ननु कोऽयं भगवान्यो भागवतमाह ऋषिभ्यः । के च ते ऋषयो ये तदुक्तं संशुश्रुवुः । तथापि तव भागवतोपदेशः कथमित्येवं विदुरमनोगतं शङ्कात्रयं परिहरति श्लोकचतुष्टयेन । तत्रादौ शङ्काद्वयं परिहरंस्तृतीयशङ्कापरिहारस्य पीठिकामारचयति ॥ **आसीनमिति** ॥ सनत्कुमारो मुख्यो येषां त इति । अनेन द्वितीयशङ्कापरिहारः । मुनयः कदाचित् उर्व्यां पाताले आसीनं स्थितम् । लोकत्रयविविक्षया पातालस्याप्युर्वीत्वेन तथोक्तिरिति ज्ञेयम् । अप्रतिहतबलं [१]आद्यं जीवोत्तमम् । अत एव पूज्यं सङ्कर्षणाख्यं देवम् । अनेन प्रथमशङ्का परिहृता । प्रत्यागत्य अतः शेषदेवस्य सकाशात्परमात्मनो महिमानं ज्ञातुकामाः प्रश्नमकुर्वन् । अनेन तृतीयशङ्कापरिहारस्य पीठिका रचिता भवति ॥ १३ ॥

**प्रोक्तं किलैतद्भगवत्तमेन निवृत्तधर्माऽभिरताय तेन ।**
**सनत्कुमाराय यदाह पृष्टः साङ्ख्यायनायांग धृतव्रताय ॥ १४ ॥**
**। ३ । ९ । ४ ।**

**साङ्ख्यायनः पारमहंस्यमुख्यो विवक्षमाणो भगवद्विभूतीः ।**
**जगाद सोऽस्मद्गुरवेऽन्विताय पराशरायाथ बृहस्पतेश्च ॥ १५ ॥**
**। ३ । ९ । ७ ।**

**प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यम् ।**
**सोऽहं बतैतत्कथयामि वत्स श्रद्धालवे नित्यमनुव्रताय ॥ १६ ॥**
**। ३ । ९ । ८ ।**

**॥ इति भागवतागतिप्रकरणं समाप्तम् ॥ १ ॥**

---

१. सनकादिभ्यः पूर्वजातं इति विजयध्वजतीर्थश्रीचरणाः.

Rarest Archive

तेनैवं मुनिभिः पृष्टेन पूज्यतमेनं सङ्कर्षणेन निवृत्तधर्माभिरताय सनत्कुमारायान्येभ्यो मुनिभ्यश्च यत्प्रोक्तम्। एतच्च प्रसिद्धमिति किलेत्यनेन सूचयति। स च सनत्कुमारः साङ्ख्यायनेन पृष्टः सन् धृतव्रताय साङ्ख्यायनाय यदाह। यः पारमहंस्यधर्मो मुख्यो यस्य। अत एव भगवतो विभूतीर्विवक्षमाणः सोऽपि साङ्ख्यायनोऽस्मद्गुरवे, अन्विताय शिष्ययोग्यैर्गुरुभक्त्यादिगुणैः, पराशराय तथा बृहस्पतेश्च यज्जागाद। स च मुनिः पराशरः स्वपिता राक्षसेन भक्षित इति श्रुत्वा स राक्षसकुलनाशाय यज्ञे प्रवृत्तो वसिष्ठवचनान्निवृत्तः। ततः स्वसन्ततिरक्षणतुष्टेन पुलस्त्येन पुराणप्रवर्तको भविष्यसीति दत्तवरो दयालुराद्यं पुराणं यन्मह्यं प्रोवाच। हे अङ्ग वत्स एतदेव तदुपदिष्टोऽहं नित्यं श्रद्धायुक्तायानुव्रताय तुभ्यं कथयामि। कथने स्वस्य आदरसूचनाय पुनरुक्तिः। कथनं च परमानन्दकरमिति बतेत्यनेनाह। अनेन तृतीयशङ्का परिहृता। तदनेन श्रीनारायणेन साक्षाद्ब्रह्माणं प्रत्युपदेशसमय एव शेषाय प्रोक्तं शेषेण सनत्कुमाराय तेन साङ्ख्यायनाय तेन पराशराय तेन मैत्रेयाय तेन विदुरायेति प्रकारान्तरेणापि लोके भागवतागतिरुक्ता भवति। तदनेन श्रवणादिरूपद्वितीये[१] नवके स्मरणाख्यो भागवतधर्मः सूचितो भवति। **यथाहुः–** ''ब्रह्माणं नारदमृषिं भवं प्रह्लादमेव च। दाक्षायणीं धर्मपत्नीं सोमकश्यपयोरपि। गङ्गां सरस्वतीं नन्दां कालिन्दीं सितवारणां। ध्रुवं ब्रह्मर्षीन्सप्त पुण्यश्लोकांश्च मानवान्। उत्थायापररात्रान्ते प्रयताः सुसमाहिताः॥ स्मरन्ति मम रूपाणि मुच्यन्ते तेंऽहसोऽखिलात्'' इति॥ १४॥ १५॥ १६॥

**॥ इति श्रीमदवधूतशिरोमणिजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां भागवतागतिप्रकरणं समाप्तम्॥**

**॥ श्रीमध्वेशार्पणमस्तु॥**

---

१. श्रवणं कीर्तनं स्मरणं पादसेवनं अर्चनं वन्दनं दास्यं आत्मनिवेदनं सख्यमिति द्वितीये नवके.

Rarest Archiver

## राजविरागप्रकरणम् ॥ २ ॥

**शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः ।**
**जीवन्ति नात्मार्थमसौ परां श्रियं मुमोच निर्विद्य कुतः कलेवरम् ॥**
**१७ ॥ १ । ४ । ११ । (१)**

श्रीकपिलाय नमः । वैयासकिर्नृपतिं यदाहेत्युक्तं पूर्वप्रकरणे तत्रेयमाशङ्का । राजा महासाम्राज्यं जीविताशां च त्यक्त्वा गङ्गातीरे निरशनः शुश्रावेति तावदविवादम् । तत्रोभयत्यागे च संभावितमुभयं, यत्परचक्रवर्तिभी राज्यहरणं, यच्च स्वकुटुम्बलोलुपतया परेषां सर्वस्वप्राणहरणादिनाऽपकीर्तौ सत्यां लोकतो लज्जेति । न तावदाद्यमत्रास्ति । अखण्डभूमण्डलाधिपतित्वेन परेषां शङ्कितुमप्यशक्यत्वात् । नापि द्वितीयः । नारायणपरायणे परमभागवते तस्मिंस्तस्य मनसापि स्मर्तुमनुचितत्वात् । अतः किन्निमित्तोऽयं राज्यादित्याग इति । अनेनैवाभिप्रायेण पृच्छति ॥ **शिवायेति** ॥ य उत्तमश्लोकपरायणास्ते लोकस्य शिवादिप्राप्तय एव जीवन्ति । नात्मार्थम् । यतस्तस्मादसौ परां श्रियं निर्विद्य कलेवरं कुतः कारणान्मुमोचेत्यन्वयः । भवः उत्पत्तिः पुत्रपौत्रादीनां । शिवं क्षेमम् । भूतिरैश्वर्यं । भौमान्तरिक्षदिव्यभेदेन त्रिविधोपद्रवपरिहारो वा शिवादिपदार्थः । परामिति विशेषणेनाखण्डाधिपतित्वं सूचितम् । उत्तमश्लोकपरायणा इति भागवतोत्तमत्वमिति ॥ १७ ॥

**यदा परीक्षित्कुरुजाङ्गले वसन्कलिं प्रविष्टं निजचक्रवर्तिते ।**
**निशाम्य वार्तामनतिप्रियां ततः शरासनं संयुगरोचिराददे ॥ १८ ॥**
**। १ । १६ । १२ । (२)**

Rarest Archiver

एवं पृष्टस्योत्तरं वदन्यत्त्वयोक्तं महाभागवतत्वमखण्डाधिपतित्वं चेत्युभयं तत्सत्यमिति तदुपपादकं तन्माहात्म्यं कलिनिग्रहरूपं तच्छ्रोतॄणां कलिबाधः कदापि न भवेदित्याशयेन श्लोकत्रयेणाह ।। **यदेत्यादिना** ।। तत्रादौ कलिवार्तां श्रुत्वा तत्क्षणादेव युद्धार्थं गच्छतो दिग्विजयप्रकारमाह ॥ **यदेति** ।। कुरुक्षेत्रे तत्रापि हस्तिनापुरे यदा वसन् आसीत्तदैव परीक्षिद्राजा कलिं निजचक्रवर्तिते स्वाज्ञया प्रवर्तिते देशे । प्रविष्टं शुश्राव । अप्रियां वार्तां निशम्य ततस्तत्क्षणादेव संयुगरोचिः युद्धसूचकं धनुर्गृहीतवान् । गृहीत्वा च दिग्विजयं कृत्वा सर्वत्र बलिं गृहीत्वा तत्र तत्र श्रीकृष्णमहिमानं गायद्भ्यो नृभ्योऽपेक्षितान् सर्वान् पुमर्थान् ददाविति वक्तव्यम् ।। **यथाहुः—** ''भद्राश्वं केतुमालं च भारतं चोत्तरान्कुरून् । किम्पुरुषादीनि सर्वाणि विजित्य जगृहे बलिम् ।। तत्रतत्रोपशृण्वानः स्वपूर्वेषां महात्मनाम् । प्रगीयमानं पुरतः कृष्णमाहात्म्यसूचकम् ।। तेभ्यः परमसंतुष्टः प्रीत्युज्जृम्भितलोचनः । महाधनानि वासांसि ददौ हारान्महामना''इति ।। १८ ।।

**न ते गुडाकेशयोधराणां बद्धाञ्जलेर्भो भयमस्ति किञ्चित् ।**
**न वर्तितव्यं भवता कथञ्चित्क्षेत्रे मदीये त्वमधर्मबन्धुः ॥ १९ ॥**
**। १ । १७ । ३० (३)**

एवं दिग्विजयं कृत्वा तत्र कुत्रापि कलिमदृष्ट्वा पुनः प्रत्यागमनसमये कस्मिंश्चिद्दिने रथमारुह्य प्राच्याभिमुख्येन स्यन्दमानसरस्वतीतीरमाजगाम । तत्र च दण्डहस्तं नृपवेषं वृषलं तेन पदा हन्यमानां विवत्सामश्रुवदनां क्षुधार्तां गां, तथा तद्भयाच्छकृन्मूत्रं मुञ्चन्तमिव स्थितं भग्नपादत्रयं एकेनैव पदा चरन्तं वृषभं च दृष्ट्वापि ततः स्पष्टमुत्तरमलभमानः स्वबुद्ध्यैव तपः शौचं दया सत्यमिति पादचतुष्टयोपेतः श्रीकृष्णगमनपर्यन्तं तेन रक्षितः, इदानीं रक्षकविहीनः स्मयसङ्गमदाख्यैरधर्माङ्गैर्भग्नपादत्रय उत्तरत्रानृताख्याधर्माङ्गेन तुरीयेण

Rarest Archiver

भज्यमानतुरीयपादो वृषभोऽयं धर्मो भवितुमर्हति। इयं च गौः श्रीहरिणावरोपितभारा तत्पदाङ्किता त्रिलोकाधिका सती तद्वियोगादब्राह्मण्या नृपा मां भोक्ष्यन्तीति भाविदुःखाच्चाश्रुमुखी भूमिरेव। एतयोर्दुःखदोऽयं कलिरेवेति निश्चित्य खड्गमादाय तस्य शिरश्छेत्तुमुद्यतः। तद्वीक्ष्य स वृषलो नृपचिह्नं परित्यज्य पादमूले पतितः। तं दीनवत्सलो नावधीत्। किञ्च भीताभयप्रदानं राज्ञां परमो धर्म इति जानन्नभयं च दत्तवानित्याह॥ **न ते गुडाकेशेति॥ यथाहुः—** "सर्वेवेदाश्च यज्ञाश्च तपो दानानि चानघ। जीवाभयप्रदानस्य न कुर्वीरन्कलामपी"ति॥ भो इत्येव सम्बोधनेन तं तुच्छीकरोति। बद्धोऽञ्जलिर्येन तस्य ते। गुडाकेशोऽर्जुनस्तस्य यशो बिभ्रतां तदनुवर्तिनां सकाशात्किञ्चिदप्यवयवच्छेदनादिरूपं प्राणहरणादिरूपं वा भयं नास्ति। परं तु देशत्यागमात्रं कुर्वित्याह॥ **नेति**॥ भवता मदीये क्षेत्रे देशे कथञ्चित् विरोधेनानुवृत्त्या वा श्रैष्ठ्येन दासतया वा न वर्तितव्यम्। यतस्त्वमधर्मस्य बन्धुः प्रियोऽत इति॥ १९॥

**त्वां वर्तमानं नरदेव देहेष्वनुप्रवृत्तोऽयमधर्मयूथः।**
**लोभोऽनृतं चौर्यमनार्यमोहो ज्येष्ठा च माया कलहश्च दंभः॥ २०॥**
**।१।१७।३२ (४)**

अधर्मबन्धुत्वमेव प्रकटयति॥ **त्वामिति**॥ तव लोके अवस्थाने सति शनैः राजदेहमेवाक्रम्य तिष्ठसि। तत्र स्थितं त्वामनुसृत्य लोभादिदम्भपर्यन्तोऽयमधर्मसमूहः प्रवृत्तो भवेत्। यतोऽतस्त्वमधर्मबन्धुरिति। हेऽनार्य अनुपासितमहच्चरणेति सम्बोधनेन महतां निकटे वर्तनं तव योग्यता नास्तीति ज्ञापयति। एवं निष्कास्यमानः स कलिर्यां यां दिशमलवलोकितवांस्तत्र सर्वत्र तमेवोद्यतायुधं दृष्ट्वा शरणमन्यमलभमानोऽत्यन्तं भीतः प्रार्थयामास-स्थानं निर्दिश तत्रैव वत्स्यामि। सर्वत्रैव त्वामद्युतायुधं पश्यन् कथं तवाज्ञोल्लङ्घनं

Rarest Archive

करोमीत्येवं तेन प्रार्थितस्तस्मै चत्वारि स्थानानि ददौ। पुनरपि याचमानाय पञ्चमं च। **यथाहुः–** ''अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ। द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः। पुनश्च याचमानाय जातरूपमदात्प्रभुः। ततोऽनृतं मदः कामो रजो वैरं च पञ्चमम्॥ अमूनि पञ्च स्थानानि ह्यधर्मप्रभवः कलिः। औत्तरेयेण दत्तानि न्यवसत्तन्निदेशकृदि''ति॥ सत्यं। तथापि स हन्तव्य एव। राज्ञा यन्न निहतस्तदेवानुचितम्। स्थानदानं तु सुतरामिति भातीति चेत्। मैवं। तथा सति राज्ञोऽप्रेक्षावत्त्वप्रसङ्गात्। स हि प्रेक्षावानित्युच्यते यस्य व्यापारेण सतामनिष्टं न भवेत्। कलिहनने तु सतामनिष्टं भवति। कलिर्हि सतामिष्टः। बहुफलसाधकत्वात्। **यथाहुः–** ''कलिं सभाजयन्त्यार्या गुणज्ञाः सारभागिनः। यत्र सकीर्तनेनैव सर्वः स्वार्थोऽपि लभ्यते॥ कृतादिषु जना राजन् कालाविच्छन्ति सम्भवम्। यत्र सङ्कीर्तितो नृणां हरिर्दास्यत्यसंभवमि''ति। अतस्तद्वधे कथं सतामनिष्टं न भवेदित्येवं तस्मिन्गुणं परीक्ष्यैव न तं जघान स्थानं च दत्तवानिति– ''नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक्। कुशलान्याशु सिद्ध्यन्ति नेतराणि कृतानि यत्॥ किमु बालेषु शूरेण कलिना शूरभीरुणा। अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्तत'' इति। तदेतदभिप्रेत्य पदान्तरपरित्यागेन परीक्षार्थं परीक्षिदिति पदमेव प्रायुंक्तेति। अनेनान्तरशत्रुनिग्रहकथनेनाखण्डाधिपत्यं परमभागवतोत्तमत्वं चोपपादितं भवति। एतच्छ्रवणेन कलिबाधो न भवति महत्पुण्यमेव लभ्यत इति। **यथाहुः—** ''उपवर्णितमेतद्वः पुण्यं पारीक्षितं मया। वासुदेवकथोपेतमाख्यानं यदपृच्छते''ति॥ २०॥

**न वै नृभिर्नरदेवोऽपराध्यस्त्वं शप्तुमर्हस्यविपक्वबुद्धे।**
**यत्तेजसा दुर्विषहेण गुप्ता विन्दन्ति भद्राण्यकुतोभयाः प्रजाः॥ २१॥**

**। १। १८। ४२। (५)**

Rarest Archiver

एवं श्रोतॄणां कलिबाधो न भवेदिति कलिनिग्रहरूपमाहात्म्यकथने-नाखण्डाधिपत्यं परमभागवतत्वं तदुदितमुपपादितम्। इदानीं किंनिमित्तो राज्यादित्याग इति प्रश्नस्योत्तरमाह ॥ **न वा इत्यादिना श्लोकद्वयेन** ॥ अत्रेत्थं कथा - कदाचिन्महाराजः परीक्षिद्धनुर्गृहीत्वा वनं गतस्तत्र मृगगवेषणेन परिश्रान्तः क्षुधितस्तृषितश्च कस्यचिदृषेराश्रमं प्रविश्य तत्र मीलितलोचनमासीनं समाधिस्थं मुनिमवेक्ष्य शुष्यत्तालुरुदकमयाचत। तथापि तस्मादलब्धोदक आसनाद्युप-चारविरहितस्तेनावज्ञातमात्मानं मन्वानोऽयं समाधिस्थश्चेन्मदाक्रोशनेनोत्तिष्ठेत। नोत्तिष्ठते च। तेन मुधा समाधिरिव भाति। किमतः। किमनेन क्षत्रबन्धूनास्माकं स्यादिति। कथं वा भवतु किं तेनास्माकमृषिणेति गच्छन् तत्रैव मृतमुरगं धनुष्कोट्या तस्यांसे निधाय स्वपुरं जगाम। ततस्तस्य पुत्रो बालकैः सह क्रीडार्थं गतः केनचिद्राजागतिसमये दूरमेव विज्ञातगतिना स्थितेन पुरुषेण राज्ञा ऋषये कृतं मृतसर्पकलेवरस्य कण्ठे निक्षेपरूपमपराधं श्रुत्वा तत्रैव बालकानां निकटे "इतः सप्तमेऽहनि स राजा तक्षकेण दग्धाङ्गो भूया"दिति शापं दत्त्वाऽऽश्रमं प्रत्यागत्य पितरं तदुक्तप्रकारेण गलस्थितसर्पकलेवरं दृष्ट्वा तदुद्बोधनाय रुरोद। स चापि मुनिः सुतरोदनं श्रुत्वा नेत्रे उन्मील्य गले स्थितं सर्पशरीरं दूरतः प्रक्षिप्य किमर्थं रोदिषीति पृष्टे सति सुतोदितं सर्वं श्रुत्वा किमरे बालक अपराधादधिकं दण्डं कृतवानसीति बहुशस्तं निन्दितवानिति। ततः किमकरोदित्यत आह ॥ **न वा इति** ॥ हे अविपक्वबुद्धे इति पुत्रं प्रति पितुः सम्बोधनम्। यस्मात् दुर्विषहेण यस्य तेजसा गुप्ताः प्रजाः न विद्यते कुतोऽपि भयं यासां तादृशाः भवन्ति। भद्राणि विन्दन्ति प्राप्नुवन्ति च। तस्मात्स नरदेवो नृभिस्तद्देशस्थितैरपराध्यो न भवति। वा इत्यनेन विपक्षे बाधकं सूचयति। त्वं त्वविपक्वबुद्धित्वादेव तं शप्तवानसि। अतस्त्वया अकार्यमेव कृतमिति प्रोवाचेति। केवलं धर्मेण राज्यपालको महाभागवतः क्षुत्तृट्परीत आश्रममागतश्चेदस्माभिस्तृणफलाम्बु-सूनृतादिभिरर्हणीय एवेत्याशयेनोक्तं **नरदेव इति** ॥ २१ ॥

Rarest Archiver

**अरक्षमाणे नरदेवनाम्नि रथाङ्गपाणावयमङ्ग लोकः ।**
**तदा हि चोरप्रचुरो विनंक्ष्यत्यरक्ष्यमाणो विवरूथवत्क्षणात् ॥ २२ ॥**
**। १ । १८ । ४३ । (६)**

महापापं च कृतवानसीत्याह। **अरक्षमाण इति** ॥ हे अङ्ग नरदेवदेहमधिष्ठाय तन्नामवाच्ये हरावरक्षमाणे रक्षणमकुर्वति सति तदैवायं लोकश्चोरप्रचुरो भवति। ततस्तत्क्षणादेव विनंक्ष्यति चौरैरपहृतार्थादिर्भवति। नहि तदानीं वारयिता को वास्तीत्याशयेनाह ॥ **अरक्ष्यमाण इति** ॥ तत्र दृष्टान्तो **विवरूथवदिति** ॥ यथा हि सेना स्वपतिविरहिता परैरपहृतार्थादिर्भवति नहि तदा निवारकः कोऽप्यस्ति तथेति। अत एव परीक्षिदित्यनुक्त्वा नरदेवपदं प्रायुङ्क्तेति। एवमपक्वबुद्धिना मत्पुत्रेण कृतं महापापं भगवानेव क्षन्तुमर्हतीत्येव-मादिरूपेण पश्चात्तप्तोऽभून्मुनिरिति सूचयितुं नरदेवेऽरक्षमाण इति वक्तव्ये नरदेवनाम्नि रथाङ्गपाणावित्युक्तम्। तदनेन बाल्यमारभ्य जातककोविदविप्र-मुखश्रुततक्षकनिमित्तात्ममृत्योः सन्ततमेव तं परीक्षतोऽत एव परीक्षिदिति जनैः परिभाष्यमाणस्य, वस्तुतो गर्भे विष्णुना रक्षितत्वनिमित्तत्वेन विष्णुराता-भिधानस्य परमभागवतस्य जम्बूद्वीपपतेर्दैवादासादिताल्पतरविप्रविप्रकृतेस्तत एव स्वपुरं प्रति गमनसमये मार्ग एवाहोऽसाध्विदं मयानुष्ठितमित्यनुतप्यमानहृदयस्य राजर्षिप्रवरस्य तत्पुत्रशापमिषेण प्रारब्धकर्मणैव राज्यदित्याग इति तत्प्रश्नस्योत्तरमुदितं भवति ॥ २२ ॥

**अथो विनहायेममसुं च लोकं विमृश्य तौ हेयतया पुरस्तात् ।**
**कृष्णाङ्घ्रिसेवामभिमृश्यमान उपाविशत्प्रायममर्त्यनद्याम् ॥ २३ ॥**
**। १ । १९ । ५ (७)**

ततो राजा स्वपुरमागत्य मुनिपुत्रेण दत्तशापं श्रुतवान्। श्रुत्वा च

Rarest Archiver

किमकरोदित्यत आह ॥ **अथो इति** ॥ शापश्रवणानन्तरमेव क्षणमप्यविहायेममुं च लोकमैहिकामुष्मिकपुरुषार्थौ विहाय। **कोऽर्थः**। तौ हेयतया विमृश्येति। विमर्शनं चेतोऽपि पुरस्तादस्तीत्यभिप्रेत्योक्तं **पुरस्तादेवेति** ॥ तदनन्तरं कृष्णाङ्घ्रिसेवामेवोपादेयां मन्यमानोऽमर्त्यनद्यां प्रवाहस्थितप्रासादे प्रायमुपाविशत् प्रायोपवेशं कृतवान्। प्रायोपवेशोऽनशनव्रतम्। २३ ॥

**या वै लसच्छ्रीतुलसीविमिश्रकृष्णाङ्घ्रिरेण्वभ्यधिकाम्बुनेत्री।**
**पुनात्यशेषानुभयत्र लोकान् कस्तां न सेवेत मरिष्यमाणः ॥ २४ ॥**
**। १। १९। ६। (८)**

नद्यन्तरं विहायामर्त्यनद्यामेव कुतः प्रायोपविष्ट इत्यततस्तदपेक्षयाधिकतीर्थाभावादित्याशयेन तन्महिमानं लेशतो दर्शयति ॥ **या वा इति** ॥ लसच्छ्रीतुलसीभिर्विमिश्रा ये कृष्णाङ्घ्रिरेणवस्तैरभ्यधिकानां पवित्राणामम्बूनां नेत्री। अत एव च या उभयत्र मनुष्यलोके देवलोके च विद्यमानानशेषान् लोकान् जनान् पुनाति तां को न सेवेत स्नानादिना। तत्रापि मरिष्यमाणः को वा न सेवेतातो महामहिमत्वात्सैवावश्यं सेव्येति। **यथाहुः–**" तच्चरणपङ्कजावनेजनारुणकिञ्जल्कोपरञ्जिताखिलजगदघमलापहोपस्पर्शनामला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोभिरभिधीयमानातिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्धन्यवततार। यत्तद्विष्णुपदमाहुः यत्र ह वाव वीरव्रत औत्तानपादिः परमभागवतोऽस्मत्कुलदेवताहरिचरणारविन्दोदकमिति यामधुनापि परमादरेण शिरसा विभर्ति। ततः सप्तर्षयस्तत्प्रभावज्ञा मुक्तिमिवागतां मुमुक्षवः सबहुमानमेवाद्यापि जटाजूटैरुद्वहन्ति। ततोऽनेकसहस्रकोटिविमानानीकसङ्कुलदेवयानेनावतरन्तीन्दुमण्डलमाप्लाव्य ब्रह्मसदने निपतति। तत्र चतुर्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्दिशमभिस्यन्दन्ती नदनदीपतिमेवाभिनिविशति

Rarest Archiver

सीताऽलकनन्दा चक्षुर्भद्रेति। सीता तु भद्राश्ववर्षे प्राच्यां दिशि क्षारसमुद्रं प्रविशति। केतुमालमभि चक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति। भद्रा चोत्तरान्कुरूनतिक्रम्योदीच्यां दिशि लवणार्णवं प्रविशति। तथैवालकनन्दा भारत एव वर्षे दक्षिणस्यां दिशि जलनिधिं प्रविशति" ॥ "तथेति राज्ञाभिहितः सर्वलोकहितः शिवः। दधारावहितो गङ्गां पादपूतजलां हरेः ॥ भगीरथोऽपि राजर्षिर्निन्ये भुवनपावनीं। यत्र स्वपितॄणां देहा भस्मीभूताः स्म शेरते ॥ रथेन वायुवेगेन प्रयान्तमनुधावती। देशान् पुनन्ती निर्दग्धानसिञ्चत्सगरात्मजान् ॥ यज्जलस्पर्शमात्रेण ब्रह्मदण्डहता अपि। सगरात्मजा दिवं जग्मुः केवलं देहभस्मभिः ॥ भस्मीभूताङ्गसङ्गेन स्वर्याताः सगरात्मजाः। किं पुनः श्रद्धया देवीं ये सेवन्ते धृतव्रताः ॥ न ह्येतत्परमाश्चर्यं स्वर्धुन्या यदिहोदितम्। अनन्तचरणाम्भोजप्रसूताया भवच्छिद" इति ॥ २४ ॥

**तत्रोपजग्मुर्भुवनं पुनानाः महानुभावा मुनयः सशिष्याः।**
**प्रायेण तीर्थाधिगमापदेशैः स्वयं हि तीर्थानि पुनन्ति सन्तः ॥ २५ ॥**
**।१।१९।८। (९)**

सत्यं श्रीमद्भागीरथ्या महामाहात्म्यं ततस्तस्या एवान्यपरित्यागेन सेव्यतापि। श्रीहरिकथया तद्भक्तसङ्गेन च तत्र भाव्यम्। अन्यथा मरिष्यमाणस्य श्रीहरिभक्तिविशेषानुदयेन पुरुषार्थन्यूनता स्यादित्यतस्तद्भक्तानामपि तत्र सङ्गमः क्षीरे शर्कराया इव बभूवेत्याह॥ **तत्रेति** ॥ भुवनमेव पवित्रीकुर्वन्तः महामहिमोपेताः। अधिगमो यात्रा, अपदेशा व्याजाः, स्वयं हि स्वयमेव पुनन्ति पवित्रयन्ति। कियती नम्रताऽहोऽत्र सतां यत्तीर्थानि स्वयमेव पुनंतोऽपि वयं स्नानार्थं गच्छाम इति वदन्तीति भावः अत एव भगीरथेनाप्येवमेवोक्तम् ॥ **तथाहि—** भगीरथतपसा तुष्टा गङ्गा ब्रवीति। अहं तु त्वय्यनुग्रहेण यास्यामि भूमिम्। मद्वेगधारकः कः। अन्यथा भूम्यामेव पतने भूमिं भित्त्वा रसातलमेव

Rarest Archive

यास्ये। तथा सति त्वत्प्रयत्नो व्यर्थः स्यात्। किञ्च भूमिं मयि प्राप्तायां पापिनः स्नात्वा मय्येव पापानि त्यक्ष्यन्ति तेषां परिहारकश्च क इति। एवं गङ्गयोदिते भगीरथेनोक्तम्। महादेवो वेगधारकः। महान्तः पापपरिहारका इति। **यथाहुः–** ''धारयिष्यति ते वेगं रुद्रस्त्वात्मा शरीरिणाम्। यस्मिन्नोतमिदं प्रोतं विश्वं शाटीव तन्तुषु॥ ''साधवो (न्यासिनः) निराशिषः शान्ताः ब्रह्मिष्ठा लोकपावनाः। हरन्त्यघं तेऽगसङ्गाद्ये प्राप्ताः स्वहृदा हरि''मिति॥ २५॥

**अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरङ्गिराश्च।**
**पराशरो गाधिसुतोऽथ राम उचथ्य इन्द्रप्रमदेध्मवाहौ ॥ २६॥**
**।१।१९।९।(१०)**

**मेधातिथिर्देवल आर्ष्टिषेणो भरद्वाजो गौतमः पिप्पलादः।**
**मैत्रेय और्वः कवषः कुम्भयोनिर्द्वैपायनो भगवान्नारदश्च ॥ २७॥**
**।१।१९।१०।(११)**

**अन्ये च देवर्षिब्रह्मर्षिवर्या राजर्षिवर्या अरुणादयश्च।**
**नानार्षेयप्रवरान्समेतानभ्यर्च्य राजा शिरसा ववन्दे ॥ २८॥**
**।१।१९।११।(१२)**

परीक्षिन्महाराजो यत्र प्रायोपविष्टस्तत्रैव मुनयोऽप्याजग्मुरित्युक्तम्। तत्र के ते मुनय इत्यतः प्रधानानां केषाञ्चिन्नामान्याह। **अत्रिरित्यादिना श्लोकत्रयेण**॥ गाधिसुतो विश्वामित्रः रामो भार्गवः। इन्द्रप्रमदश्चेध्मवाहश्च॥ २६॥ कुम्भयोनिरगस्त्यः। भगवान् द्वैपायनः॥ २७॥

नारदादन्ये देवर्षयः वसिष्ठादन्ये ब्रह्मर्षय इति। अन्ये च

Rarest Archiver

तत्रोपजग्मुरित्यन्वयः । नानाऋषिगोत्रेषु श्रेष्ठान् । भागीरथीनिमित्तं वा राज्ञोऽर्थे वा समागतास्तान् राजा पूजयामास न वेत्यत आह ॥ **समेतानिति** ॥ २८ ॥

**समागताः सर्वत एव सर्वे देवा यथा मूर्तिधरास्त्रिपृष्ठे ।**
**नेहाथवाऽमुत्र च कश्चनार्थ ऋते परानुग्रहमात्मशीलाः ॥ २९ ॥**
**। १ । १९ । २४ । (१३)**

संपूज्य नमस्कृत्य स्तौति चेत्याह ॥ **समागता इति** ॥ त्रिपृष्ठे सत्यलोके मूर्तिधरा देवा यथा तत्सदृशाः । सर्वेऽपि सर्वदेशेभ्य आगता इत्येतदागमनं सं सम्यक् स्वागतमिति । परानुग्रहं विना इहामुत्र वा कश्चनार्थो नास्ति । कुतः । चो यस्मादित्यर्थे । यस्मादात्मनि परमात्मन्येव विन्यस्तसर्वस्वाः । अथ तस्मादित्यर्थे । मय्यनुग्रहार्थमेव भवतामागमनमिति ॥ २९ ॥

**पुनश्च भूयाद्भगवत्यनन्ते रतिः प्रसङ्गश्च तदाश्रयेषु ।**
**महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः ॥ ३० ॥**
**। १ । १९ । १६ । (१४)**

**॥ इति राजविरागनिमित्तकथनप्रकरणम् ॥ २ ॥**

इति स्तुत्वा प्रार्थयते च ॥ **पुनश्चेति** ॥ अनन्ते भगवति रतिस्तदाश्रयेषु महत्सु प्रसङ्गश्च पुनः पुनः । यां यां सृष्टिं योनिं तत्र सर्वत्र मैत्री भक्तिर्भवादृशानामस्तु । द्विजेभ्यो भवादृशेभ्यो मदीयं नमोऽस्त्विति । तदनेन द्वितीये नवके तन्माहात्म्यश्रवणं कीर्तनं तस्य तन्नाम्नां च अर्चनं वन्दनं सख्यमिति पञ्चकं सूचितं भवति ॥ ३० ॥

**इति श्रीमदवधूतशिरोमणिजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां राजविरागप्रकरणम् ॥ २ ॥**

Rarest Archive

## शुकागमप्रकरणम् ॥ ३ ॥

**यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव।**
**पुत्रेति तन्मयतया तरवोऽपि नेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि॥**
**३१ ॥ १ । २ । २ । (१)**

ननु तत्रोपजग्मुरित्यादिना सर्वेषां मुनीनामागमः, राज्ञा कृतस्तेषां सत्कारश्चाभिहितः। तत्र शुकाचार्यस्य कुतो नोदितौ। न ह्यत्र स सर्वथा नायात इति वक्तुमुचितम्। बहुविप्लवापातात्। नापीदानीमनागतोऽप्युत्तरत्रायास्यतीति। इदानीमनागमनं किमन्यत्र प्रयोजनसद्भावेन वाऽत्र प्रयोजनाभावेन वा। नाद्यः। निरपेक्षस्य प्रयोजनाभावात्। द्वितीयेऽप्युत्तरत्राप्यनागमनप्रसङ्गात्। तस्मादागत इत्येव वाच्यम्। न चागतस्यापि न सत्कारः कृत इति वक्तुं शक्यम्। महानर्थप्रसङ्गात्। इति चेदस्योत्तरं वदिष्यन् शुको नाम कश्चन मुनिरिति न मन्तव्यं किं त्वशेषाणां देहिनां गुरुः। गुरुत्वं च द्वेधा-अन्तर्बहिरिति। तत्राद्यं गुरुत्वं तावदुपपादयति॥ **यमिति**॥ विरहे वियोगे कातरोऽधीर इव स्थितः। द्वैपायनो नदीद्वीपोत्पत्तिमत्त्वात् स व्यासोऽनुपेतं देहाद्यभिमानरहितम्। अत एवापेतं कृत्यं यस्मात्तं कृतकृत्यम्। प्रव्रजन्तं सर्वं परित्यज्य परमहंसचर्यया गच्छन्तम्। यं पुत्रेत्याजुहाव आहूतवान् यदा तदा तरवोऽपि कदापि वचनशून्या नेदुः प्रत्युत्तरं ददुः। पुत्रस्याह्वाने तरूणामुत्तरं कथमित्यत उक्तं **तन्मयतयेति**॥ वृक्षाणामपि तदधिष्ठानतयाऽधिष्ठातुरेव तद्वचनमिति। शुकस्य कथं वृक्षाधिष्ठातृत्वमित्यत उक्तं **सर्वभूतहृदयमिति**॥ मनोनियामकरुद्रावतारतया सर्वभूतमनःस्थितत्वेन वृक्षाधिष्ठातृत्वं सम्भवतीति। ईदृशं तं मुनिं भक्तिपूर्वकं नतोऽस्मि। अनेनान्तस्स्थित्वा सर्वोपदेष्टृत्वरूपमान्तरं गुरुत्वमुपपादितं भवति॥ ३१ ॥

Rarest Archiver

**यः स्वानुभावमखिलश्रुतिसारमेक**
**मध्यात्मदीपमतितितीर्षतां तमोऽन्धम्।**
**संसारिणां करुणयाऽऽह पुराणगुह्यं**
**तं व्याससूनुमुपयामि गुरुं मुनीनाम्॥ ३२ ॥ १ । २ । ३ । (२)**

द्वितीयमप्युपपादयति ॥ **य इति** ॥ योऽखिलश्रुतीनां मुख्यतात्पर्यविषयम्। अत एव प्रधानम्। दृढनिरूढमज्ञानाख्यमान्तरतमोऽतितितीर्षतां संसारिणां जनानां देहान्तर्दीपवस्थितं पुराणेष्वप्रकाशितमपराधीनज्ञानात्मकं ब्रह्म। संसारिषु करुणयाऽऽह भागवतपुराणरूपेण सम्यक् प्रदर्शयामास। तं सर्वेषां ज्ञानिनां गुरुं व्याससूनुं शरणमुपयामि। अनेन भागवतशास्त्रप्रवर्तकतया द्वितीयं बाह्यगुरुत्वं चोपपादितं भवति ॥ ३२ ॥

**तत्राऽभवद्भगवान्व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः।**
**अलक्ष्यलिङ्गो निजलाभतुष्टो वृतश्च बालैरवधूतवेषः ॥ ३३ ॥**
**१ । २० । १ । (३)**

विशिष्यभक्त्युत्पादनाय तन्महिमानं निरूप्य तदागमनप्रकारं वक्ति ॥ **तत्रेति** ॥ यत्र राजा प्रायमुपविष्टः। न बुद्धिपूर्वं मरिष्यमाणमहाराजदर्शनेच्छयाऽऽगमनम्। किन्तु यदृच्छया गामटमानस्य यदृच्छयैवात्राप्यागमनमिति सूचनाय तत्रागमदिति वक्तव्येऽभवदित्युक्तम्। करिष्यमाणज्ञानोपदेशोपयोगिज्ञानादिसूचनाय भगवानिति। प्रयोजनार्थमेवागत इति किं न स्यादित्यित उक्तम्– **अनपेक्ष ति** ॥ सर्वापेक्षारहितत्वमपि कुत इत्यत उक्तं **निजलाभतुष्ट इति** ॥ भक्तिरेव हि भक्तानां निजोऽनुत्तमो लाभः। किमाश्रमोऽसाविति तत्राह—**अलक्ष्यलिङ्ग इति** ॥ सर्वाश्रमचिह्नाभावे किंवेष इति तत्रोक्तं **अवधूत-**

Rarest Archiver

**वेष इति** ॥ दिगम्बरत्वादिकमेवावधूतचिह्नम् । अत एव बालैर्वृतश्च ॥ ३३ ॥

**तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रम् ।**
**चार्वायताक्षोन्नसतुल्यकर्णं शुभ्रानन्नं कम्बुसुजातकण्ठम्    ॥ ३४ ॥**
**। १ । २० । २ (४)**

**[1]निगूढजत्रुं पृथुतुङ्गवक्षसमावर्तनाभिं वलिवल्गूदरं च ।**
**दिगम्बरं वक्त्रविकीर्णकेशं प्रलम्बबाहुं स्वमरोत्तमाभम्    ॥ ३५ ॥**
**। १ । २० । ३ (५)**

**श्यामं सदापीच्यवयोऽङ्गलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन ।**
**प्रत्युत्थिता मुनयश्चासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसम्  ॥ ३६ ॥**
**। १ । २० । ४ (६)**

सर्वगुरोः शुकस्य ध्यानमवश्यं मुमुक्षुभिः कार्यमित्याशयेन पादमारभ्य यावद्धसितं अवयवसन्निवेशमाह ॥ **तमित्यादिश्लोकत्रयेण** ॥ गूढवर्चसमपि तं शुकं तल्लक्षणज्ञत्वान्मुनय आसनेभ्यः प्रत्युत्थिताः बभूवुः इत्यन्वयः । षोडशवर्षं । सुकुमारत्वं विशेषणम् । चारु ईषद्रक्ताक्षश्चासौ उन्नसश्चासौ तुल्यकर्णश्च । शुभ्रं शोभनम् । त्रिवलितया कम्बुसमानसुलक्षणकण्ठम् । पीवरजत्रुं । निम्ननाभिं । वलिभी रेखाभिः । सम्यक् अमरोत्तमवद्भासमानम् । [2]अपीच्यं वयो यस्य तच्च तदङ्गं च तस्य लक्ष्म्या ॥ ३४ ॥ ३५ ॥ ३६ ॥

---

१. अंसवक्षस्थलयोर्मध्यं जत्रु निगूढं पीवरं तद्यस्य तम् ।

२. अपीच्यं षोडशवर्षीयं वयो यस्येति, तादृशाङ्गलक्ष्म्या इत्यनूद्य स्त्रीणां मनोज्ञत्वविधानात् न द्व्यष्टवर्षमित्यनेन पौनरुक्त्यम् । तस्याविधेयत्वात् इति ।

Rarest Archiver

**स विष्णुरातोऽतिथय आगताय तस्मै सपर्यां शिरसा जहार।**
**ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भका महासने चोपविवेश पूजितः ॥**
**३७॥ १। २०। ५। (७)**

एवमागताय राजा किं कृतवानित्यत आह॥ **स इति**॥ विष्णुना स्वीकृतो रक्षित इति यावत् विष्णुरात इति सर्वैर्व्यवह्रियमाणो राजा यदृच्छयाऽऽगतायातिथये तस्मै शुकाय सपर्या तत्साधनं शिरसाऽऽजहार आनयामास। पूजायामत्यादरं सूचयति ॥ **शिरसेति॥** ततः पूजासाधनसम्भारानन्तरम्। अबुधाः स्त्रियोऽर्भकाश्च तत्रस्थैर्गच्छतेत्युक्तास्ततः स्थानान्निवृत्ताः ततो महासन उपविवेश। तत्र स्थितस्सन् पूजितश्चाभवत्। अनेन सर्वेषां मुनीनां आगमनसमकालमेव शुकोऽपि यदृच्छयाऽऽगतः। तथापि नृपसन्निधिं प्रति नागतः। किन्तु दिगम्बरमपूर्वपुरुषं वीक्ष्य विस्मितैः जनैः वीक्ष्यमाणः तत्र तत्र किञ्चित्कालं यदृच्छया अवस्थानेन व्यवधानेन नृपसमीपमागतः। एवं किञ्चिद्व्यवधानेन नृपसमीपागमनेन तत्पूजादेरपि व्यवधानेन जाततया तदाऽऽगमनपूजादेस्तत्सहपाठेन नोक्तिरिति शङ्कापरिहार इति ज्ञेयम्॥ ३७॥

**प्रशान्तमासीनमकुण्ठमेधसं मुनिं नृपो भागवतोऽभ्युपेत्य।**
**प्रणम्य मूर्ध्नाऽवहितः कृताञ्जलिर्नत्वा गिरा सूनृतयाऽन्वपृच्छत् ॥**
**३८॥ १। २०। ७। (८)**

भागवतो नृपः पुनः किमकार्षीदित्यत आह॥ **प्रशान्तमिति**॥ भागवतो नृपो मुनिमभ्युपेत्य समीपे स्थित्वा मूर्ध्ना तदुपलक्षितैः सर्वाङ्गैः प्रणम्यावहित कृताञ्जलिर्भूत्वा सूनृतया गिरा प्रियवचनेन स्तुत्वा प्रष्टव्य सम्यगपृच्छदिति। **यथाहुः–** ''येषां संस्मरणात्पुंसस्सद्यश्शुध्यन्ति वै गृहाः। किं

Rarest Archiver

पुनर्दर्शनस्पर्शपादशौचासनादिभिः ॥ अतः पृच्छामि संसिद्धं योगिनां परमं गुरुम् । पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वदे''ति । म्रियमाणस्य मरणशीलस्य । सर्वदा यत्कार्यम् ॥ ३८ ॥

**पितामहा मे समरेऽमरञ्जयैर्देवव्रताद्यातिरथैस्तिमिङ्गलैः ।**
**दुरत्ययं कौरवसैन्यसागरं कृत्वाऽतरन्वत्सपदं स्म यत्प्लवाः ॥ ३९ ॥**
**। १० । १ । ५ । (९)**

एवं सामान्यतः संक्षिप्य राज्ञा कृतं प्रश्नं दर्शयित्वा विशेषतो विस्तरेण कृतं दर्शयति **श्लोकत्रयेण ॥** तत्रादाविन्द्रियाणां ब्रह्मणा बहिर्मुखतयैव विनिर्मितानां विषयध्यानेन बहुदुःखप्रदानां मुमुक्षुवैरिणां दुर्जयानां कथं जयः स्यादित्यभिप्रायेण स्वपूर्वजोपकारकारितया श्रीहरिं स्तौति ॥ **पितामहा इति ॥** मम पितामहा धर्मादयः । यः कृष्ण एव प्लव उडुपं येषां तादृशा भूत्वा । युद्धे अमरानपि जयन्तीति तादृशैः । देवव्रतो भीष्मः स एवाद्यो येषामतिरथानां तैस्तद्रूपैस्तिमिंगिलैस्तन्नामकैर्मत्स्यविशेषैर्विद्यमानैर्निमित्तैरत्येतुमशक्तम् । कौरवाणां सैन्याख्यसमुद्रम् । वत्सपदं कृत्वा । आयासं विना । अतरँस्मेति ॥ वत्सपदसदृशं कृत्वेति अवयवार्थविवक्षायां यत्पदार्थस्य प्लवत्वकथनं न स्वरसम् ॥ ३९ ॥

**द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गं सन्तानबीजं कुरुपाण्डवानाम् ।**
**जुगोप कुक्षिं गत आत्तचक्रो मातुश्च मे यः शरणं गतायाः ॥ ४० ॥**
**। १० । १ । ६ । (१०)**

मुमुक्षुणा मुख्यतः संपाद्यं द्वयमेव – भगवति रतिः । अरतिः अन्यत्रेति ।

Rarest Archiver

तत्रान्यत्रारतिः कथं स्यादिति पृष्टं पूर्वत्र। अत्र पुनर्भगवति रतिः कथमिति भावेन स्वस्यैवोपकृतिकर्तृतया तं स्तौति॥ **द्रौणीति**॥ द्रौणेरश्वत्थाम्नोऽस्त्रेण विप्लुष्टं दह्यमानम्। कुरूणां तद्वंश्यानां पाण्डवानां तद्विशेषणम्। पाण्डवानां कुरुत्वेऽपि गोबलीवर्दन्यायेन सामान्यविशेषभावमाश्रित्य सजातीयवैशिष्ट्य-कथनाय पृथग्व्यवहार इति ज्ञेयम्। एवमत्रैव स्थानान्तरेऽपि—"ते समेत्य कुरुक्षेत्रे राजानः कुरुपाण्डवाः। स्यमन्तपञ्चके चक्रुर्व्यूहमुद्यति भास्करे॥ अक्षौहिण्यः कौरवाणामेकादश दुरात्मनाम्। सप्त पाण्डुसुतानां च कर्शितानां वने भृशमि"ति॥ सन्ततेर्मूलभूतम्। इदं दृश्यमानं मम शरीरम्। मे मातुः कुक्षिं गतः आत्तचक्रस्सन् संरक्षितवान्। तथा पाण्डवानां पञ्चानां शरीरं च। तथा स्वात्मानं शरणं प्राप्ताया मे मातुश्च शरीरं तस्येति। **यथाहुः**— "गन्तुं कृतमतिर्ब्रह्मन् द्वारकां रथमास्थितः। उपलेभेऽभिधावन्तीमुत्तरां भयविह्वलाम्॥ पाहि पाहि महायोगिन् देवदेव जगत्पते। नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम्॥ अभिद्रवति मामीश शरस्तप्तायसो विभो। कामं दहतु मां नाथ मा मे गर्भो निपात्यताम्॥ उपधार्य वचस्तस्या भगवान् भक्तवत्सलः। अपाण्डवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत। तर्ह्येवाथ भृगुश्रेष्ठ पाण्डवाः पञ्चसायकान्। आत्मनोऽभिमुखान् दीप्तानालक्ष्यस्त्राण्युपाददुः॥ व्यसनं वीक्ष्य तत्तेषामनन्य-विषयात्मनाम्। सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः॥ अन्तस्थस्सर्व-भूतानामात्मा योगेश्वरो हरिः। स्वमाययाऽऽवृणोद्गर्भं वैराट्याः कुरुतन्तवे॥ यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियम्। वैष्णवं तेज आसाद्य समशाम्यद्भृगूद्वह॥ मातुर्गर्भगतो वीरस्स तदा भृगुनन्दन। ददर्श पुरुषं कञ्चिद्दह्यमानोऽस्त्रतेजसा। अङ्गुष्ठमात्रममलं स्फुरत्पुरटमालिनम्। आपीच्य-दर्शनं श्यामं तडिद्वाससमच्युतम्॥ श्रीमद्दीर्घचतुर्बाहुं तप्तकाञ्चनकुण्डलम्। क्षतजाक्षं गदापाणिमात्मनस्सर्वतोदिशम्॥ परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां

Rarest Archiver

मुहुः । अस्त्रतेजः स्वगदया नीहारमिव गोपतिः ।। विधमन्तं सन्निकर्षे पर्यैक्षत क इत्यसौ। विधूय तदमेयात्मा भगवान् विश्वगुब्विभुः ।। मिषतो दशमासस्य तत्रैवान्तर्दधेहरि''रिति ।। ४० ।।

**वीर्याणि तस्याखिलदेहभाजामन्तर्बहिः पूरुषकालरूपैः ।**
**प्रयच्छतो मृत्युमनामयं च मायामनुष्यस्य वदस्व विद्वन् ।। ४१ ।।**
**। १० । १ । ७ । (११)**

न केवलं मम मातुः पूर्वजानां मम चेति त्रयाणामेव तेनोपकारः कृतः। किन्तु देहधारिणां सर्वेषामपि। ननु सत्यं त्रयाणामुपकारस्य कर्तेति। तस्य त्वयैवोदितत्वात्। सर्वेषामुपकारस्तु कृष्णेन कृत इति कथम्। तस्यादर्शनात् इत्यतः कृष्णो नाम नास्मत्सम्बन्धी कश्चन पुरुषः किन्तु सर्वेषां देहधारिणामन्तः पुरुषो नियामको बहिस्तु यः कालोऽस्ति स एव। ताभ्यां क्रियमाण उपकारस्तु सर्वेषां अनुभवसिद्ध इत्याशयेन तन्महिमानं पृच्छति ।। **वीर्याणि तस्येति** ।। मृत्युं संसारं। अनामयं मोक्षं च प्रयच्छतो वीर्याणीत्यनेन बन्धमोक्षप्रकारः कथमिति। देहभाजामन्तःपुरुषरूपैरित्यनेन बिम्बरूपं कीदृशमिति। बहिः कालरूपैरित्यनेन तदुपयोगः कथमिति विशेषविषयत्वं विस्तृतत्वं च प्रश्नस्य सूचितं भवति। कृष्ण ईदृशश्चेद्वृष्णिष्वेको भूत्वा इतस्ततः किमिति सञ्चरतीत्यत उक्तं मायया स्वेच्छया। वस्तुतोऽमानुषस्यापि कापट्येन मनुष्यभूतस्येति। **यथाहुः**– लीला विदधतः स्वैरमीश्वरस्यात्ममायया ।। १ । ११ । १८ ।। एकोनविंशे विंशतिमे वृष्णिषु प्राप्यजन्मनी। रामकृष्णाविति भुवो भगवानहरद्भरम् ।। ४१ ।।

**एवं निशाम्य भृगुनन्दन साधुवादं**
**वैयासकिः स भगवानथ विष्णुरातम् ।**

Rarest Archiver

**प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं**

**व्याहर्तुमारभत भागवतप्रधानः ॥ ४२ ॥ १० । १ । १४ । (१२)**

॥ इति शुकाचार्यसमागमप्रकरणम् ॥ ३ ॥

एवं पृष्टवते राज्ञे प्रीत्या प्राहेत्याह ॥ **एवमिति** ॥ हे भृगुनन्दन शौनक । एवं साधुवादं निशम्य विष्णुरातं परीक्षितं प्रत्यर्च्य संभाव्य । प्रधानः गुरुत्वात् ॥ ४२ ॥

॥ इति श्रीमदवधूतशिरोमणिजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां शुकाचार्यसमागमप्रकरणम् ॥ ३ ॥

Rarest Archiver

## संक्षिप्तशास्त्रार्थप्रकरणम् ॥ ४ ॥

**पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु सम्भृतम् ।**
**पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥४३॥**
**। २ । २ । ४० । (१)**

श्रीशुकः परीक्षिते व्याहर्तुमारभतेति तृतीयप्रकरणान्तिमभागे प्रतिपादितम् । तत्किं प्रतिपादितवानित्यतस्तदत्र वदिष्यन् तच्छ्रवणादौ अधिकारिणां आदरजननाय श्रीहरिकथाश्रवणादेः महाफलत्वं तावदाह ॥ **पिबन्तीति** ॥ सतां सकाशात् सम्भृतं पूरितम् । विषयैः गृह्यमाणैः विदूषितं आ**शयं** अन्तः**करण**म् ॥ ४३ ॥

**ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्र-**
**मात्मप्रसाद उभयत्र गुणेष्वसङ्गः ।**
**कैवल्यसम्भृतपथस्त्वथ भक्तियोगः**
**को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥ ४४ ॥२। ३ । १२ ।(२)**

पूर्वत्र श्रवणेन मनश्शुद्धिद्वारा मुक्तिरित्युक्तम् । द्वारान्तरं च अस्तीत्याशयेनाह ॥ **ज्ञानमिति** ॥ यदा याभिः श्रुताभिः आदौ आत्मनो मनसः प्रसन्नता । अचाञ्चल्यनिमित्तस्सन्तोषः । तत ऐहिकपारत्रिकविषयेष्वसङ्गो वैराग्यम् । ततः प्रतिनिवृत्तं स्वकार्याक्षमतया कृतं गुणनिमित्तानां षण्णामूर्मीणां अशनायापिपासाशोकमोहरागद्वेषलक्षणानां चक्रं येन तादृशं ज्ञानम् । अथ कैवल्यसम्भृतपथः कैवल्यगमनाय बहुजनाकुलो निर्भयो मार्ग इव विद्यमानो भक्तियोगो भवति । ननु भक्तिः पूर्वमेवास्ति । सत्यं । सैव पुनरभिवृद्धेति

Rarest Archive

वदामः । अत एव विशेषार्थकस्तुशब्दः । तासु हरेः कथासु कः स्वस्थात्मा रतिं न कुर्यात् ।। ४४ ।।

**निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोतृमनोभिरामात् ।**
**क उत्तमश्लोकगुणानुवादात् पुमान् विरज्येत विना पशुघ्नात् ।।४५।।**
**। १० । १ । ४ । (३)**

तादृशा अपि बहवः सन्तीति चेत्सन्तु नाम सहस्रशः । तर्हि हरिकथासु रतिं कुर्वाणाः के । विरक्ता नरा इति वदामः । किं ते पशवः? सत्यमित्याह ।। **निवृत्ततर्षैरिति** ।। निवृत्ता तर्षा विषयाकाङ्क्षा येभ्यस्ते । विषयासक्ताद्भिनेति वक्तव्ये यत्पशुघ्नादित्युक्तं तेनायमर्थस्सूचितः । नित्यपुरुषार्थसाधनं शुद्धं सुगमं निवृत्तिमार्गं परित्यज्यास्थिराल्पतरसुख[१]मुद्दिश्य प्राणिहिंसादिरूपयज्ञाद्यनेकश्रमबहुवित्तादिसाध्यकर्मरूपप्रवृत्तिमार्गनिरतो न प्रेक्षावानिति । **यथाहुः**– ''आस्तीर्य दर्भैः प्रागग्रैः कार्त्स्न्येन क्षितिमण्डलम् । ततो बृहद्वधान्मानी कर्म नावैषि यत्परमि''ति ।। ४५ ।।

**को नाम लोके पुरुषार्थसारवित् पुराकथानां भगवत्कथासुधाम् ।**
**अपीय कर्णाञ्जलिभिर्भवापहामहो विरज्येत विना नरेतरम् ।। ४६ ।।**
**। ३ । १५ । ५२ । (४)**

भवन्तु नाम भगवत्कथाविमुखाः पशुप्रायाः । ये पुनरेकवारं श्रुत्वा

---

१. अत्र ''कुर्वन्नेवेह कर्माणी' त्यादिना यज्ञादिवर्णाश्रमोचितनिष्कामकर्मणां विहितत्वात् काम्यकर्मणामेवाकरणीयत्वमभिप्रेतं अत एवास्थिराल्पतरसुखमुद्दिश्येति फलाभिसन्धिपूर्वकत्वं प्रादर्शि समाख्यायामपि ''कर्म नावैषि यत्परमि''ति । तेन सर्वथा कर्मत्यागो निवृत्तिमार्गः । कर्माचरणमात्रं प्रवृत्तिमार्ग इति केषाञ्चिदभिसन्धिरसाधुः ।

Rarest Archiver

परित्यजन्ति। भजन्ति च भवभवं विभवं ते क इति न जानीम इत्यत आह ॥ **को नामेति** ॥ पुरातनकथानां मध्ये सारभूताम्। नरेतर इति तावदविवादम्। विशेषस्तु ज्ञापकविशेषादवगन्तव्य इति भावेनोक्तं नरेतरं विनाऽऽपीयापि को नाम विरज्येतेति ॥ ४६ ॥

**निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्।**
**पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ४७ ॥**
**।१।१।३।(५)**

एवं श्रवणादिफलाभिधानेन तत्रोत्पन्नादराणां नराणां भागवतश्रवणादौ क्षिप्रप्रवृत्तये तन्माहात्म्यकथनपूर्वकं श्रवणादिकं विधातुं तानभिमुखीकरोतीत्याह ॥ **निगमेति** ॥ भुवि भारतखण्डे भावुकाः मुकुन्दसेवासाधनपदार्थसार्थेष्वकुण्ठोत्कण्ठासम्भृतमनोवृत्तयः। रसिकाः सारग्राहिणो यूयं तावच्छृणुत। किमिति। निगमकल्पतरोरेकं भागवतनामकं फलमस्ति। तच्चादौ भगवता गलितम्। ततश्शुकमुखादमृतद्रवसम्युतं जातम्। अथ तस्य रसं यावद्देहं तत्रापि मुहुः प्रतिक्षणं पिबतेत्यन्वयः। नन्वत्र रसपानं तावत् विधीयते। तत्कथं सङ्गच्छते। एकस्मिन् फले एक एव हि रसः। स च मधुराद्यन्यतरः षड्विधो नैकविधो वा। तत्पानार्थिनश्च भूमौ विद्यमानाः सर्वेऽपि मिलित्वा रसिका बहवो भवन्ति भिन्नरुचयश्च। स्वस्वेष्टरसाभावे च यावद्देहं मुहुः पानं च न सम्भवति। कथञ्चिदेकवारं कर्तुं शक्यत्वादित्यतः सत्यं सर्वमन्यत्र। अत्र फले त्वपेक्षिता अनन्ता रसा वर्तन्ते। अतः सर्वमुक्तं युक्तमित्याशयेनोक्तम् ॥ **कल्पतरोरिति** ॥ अत एवेदं फलं आश्चर्यतममित्यहो इत्यनेन सूचयामास। अमृतद्रवः स्रवणं स्यन्दनम्। फलं च तरुसार इति प्रसिद्धमेव। तस्मिंश्च रससम्पूर्णे फले शुकतुण्डेन स्पृष्टे रसो द्रवति। भुवि

Rarest Archiver

निक्षिप्ते सति तस्य रसः प्रवाहरूपेण प्रवर्तते। इह तु व्यासेन वेदशास्त्रसारमुद्धृत्य भागवतं कृतम्। तच्च शुकाय प्रोक्तम्। तदध्ययनसमये प्रश्नप्रतिवचनचातुर्येण स्पष्टीकृतम्। शुकेन पुनः कुरुक्षेत्रे परीक्षितं प्रति वचनसमये प्रश्नप्रतिवचनचातुर्यविशेषेण विशदम्। अत एव सुगमं शृणुतेति॥ ४७॥

**शृण्वन् गृणन् संस्मरयंश्च चिन्तयन्**
**नामानि रूपाणि च मङ्गलानि ते।**
**क्रियासु यस्त्वच्चरणारविन्दयो-**
**राविष्टचित्तो न भवाय कल्पते ॥ ४८॥ १०। ३। ३८। (६)**

एवमभिमुखीकृत्य। विदितसंक्षेपा हि विशेषं विवत्सवो भवन्ति। तेषामेव च विशेषाभिधानमुचितमिति तावत्संक्षिप्य भागवतार्थं दर्शयति॥ **शृण्वन्निति**॥ संस्मरयन् स्मारयन्। अत्र शृण्वन् स्मारयन्नित्युभयथाप्रयोगेणो-भयथापि विवक्षां सूचयति। तथा च हे हरे यः पुरुषः स्वेन क्रियासु क्रियमाणासु त्वच्चरणारविन्दयोराविष्टचित्तो भवति। स भवाय संसाराय न कल्पते। किम्भूतः। ते मङ्गलानि नामानि शृण्वन् स्वयं, श्रावयंश्चान्यान्, गृणन् उच्चरन् स्वयं, उच्चारयंश्चान्यान्, तथा ते मङ्गलानि रूपाणि च संस्मरन् स्वयं, स्मारयंश्चान्यान्, चिन्तयन्, स्वयं, चिन्तापयंश्चान्यान्, इति योजना। **इदमुदितं भवति**— श्रवणादि कुर्वन् अनुदिनमादरेण श्रीहरिचरणार-विन्दनिरतचित्तवृत्तिः पुरुषः पुरुषार्थभागिति शास्त्रान्निर्गलितोऽर्थः परीक्षितः संक्षिप्तप्रश्नपर्यालोचनया श्रीशुकस्य संक्षिप्तोत्तरपर्यालोचनया चेत्थमेवावगमात्। **यथाहुः**—''यच्छ्रोतव्य-मथो जाप्यं यत्कर्तव्यं नृभिः सदा। स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययमि''ति। – ''तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वरः। श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभय''मितीति॥ किञ्चायमर्थः

Rarest Archiver

प्रेक्षावतामनुभवसिद्धः। तथाहि। पुरुषैरर्थ्यमानः पुरुषार्थः। स च प्रथमो दुःखनिवृत्तिरेव। भारवाहिभिर्भारनिवृत्तेरेव प्रथमं प्रार्थनात्। सा च श्रवणादिना भगवति मनोवधाने भवत्येवेति तदेतदाह। **शृण्वन्निति**॥ श्रवणादिना भगवत्याविष्टचित्तो भवाय दुःखाय कल्पते नैवेत्येतत्प्रेक्षावतामनुभवसिद्धमिति क्रियोत्तरकाङ्क्षा सूचयतीति॥ छ॥ **अथवाऽस्मिन्** भागवते भक्तियोगो मुक्तिसाधनतया प्रतिपाद्यते। तथा ज्ञानयोगः कर्मयोगश्चेति द्वयमपि। **यथाहुः–** ''योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया। ज्ञानं कर्म च भक्तिश्च नान्योपायोऽस्ति कुत्रचि''दिति। एवं त्रिष्वपि योगेषु को वरिष्ठ इत्यतो येनैषावस्था प्राप्यते स **वरिष्ठ** इत्याशयेन श्रोतॄणां तत्रादरजननायादावेतदाह॥ **त्वच्चरणारविन्दयोराविष्टचित्त इति**॥ यत्स एव योगो वरिष्ठ इति। सैषावस्था च प्रायेण भक्तियोगे भवतीति तत्रादरेण भाव्यमिति। **यथाहुः–** ''एतावान् योग आदिष्टो मद्भक्तैः सनकादिभिः। सर्वतो मन आकृष्य मय्यद्धाऽऽवेश्यते यथा॥ न युज्यमानया भक्त्या भगवत्यखिलात्मनि। सदृशोऽन्यः शिवः पन्था योगिनां ब्रह्मसिद्धय'' इति॥ छ॥ **अथवा** भक्तियोगसाधनतया त्रिंशद्विधो भागवतो धर्मोऽत्र प्रतिपाद्यते। तथाचोक्तं प्रथमप्रकरणे–अखिलधर्मगुप्तय इति। तत्र को वरीयानित्यतो येनैवंविधाऽवस्था लभ्यते स वरीयानिति भावेन श्रोतॄणां तत्रादरजननायादावेव ज्ञापयति येन त्वच्चरणारविन्दयोराविष्टचित्तो भवति स वरीयानिति। अनेकैरपि तथा चेत् कथं? येन प्रावण्यमधिकं स वरीयानिति॥ छ॥ **अथवा** भक्तिस्तावद्विद्यत एव। सर्वसाधनसाधनत्वात्तस्याः। साध्यापि भवति। सर्वसाधनानामपि विशेषवत्तया साध्यत्वाच्च। भागवतधर्मैर्भाव्यश्च भक्तियोगः कीदृश इत्यत आह त्वच्चरणारविन्दयोगाविष्टचित्त इति यत्स एव भक्तियोगस्तल्लभ्य इति। **यथाहुः–** ''मद्गुणश्रुतमात्रेण मयि सर्वगुणाश्रये। मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ। लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतमि''ति। निर्गुणस्य मोक्षसाधनस्य। एवंविधभक्तियोगसाधनभूतो

Rarest Archives

भागवतो धर्मः कीदृश इति श्रोतॄणामुत्कण्ठाशमनाय कांश्चिदेव दर्शयति ॥ **शृण्वन्नित्यादिना** ॥ श्रवणादिरेव भागवतधर्म इति ॥ छ । **अथवा** भक्तिं तत्साधनभागवतधर्मांश्च प्रदर्श्य तत्साध्यं वैराग्यं च प्रदर्शयति ॥ **शृण्वन्निति** ॥ ग्राम्यकथाः गृणन् तत्प्रतिपादकशब्दान् । इत्येवं सर्वासु क्रियासु क्रियमाणास्वपि त्वच्चरणारविन्दयोरेवाविष्टचित्त इति यत्तदेव वैराग्यमिति यावत् । अनेन त्वच्चरणारविन्देतरानाविष्टचित्तत्वे सति तदाविष्टचित्तत्वं लब्धम् । तत्रेतरानाविष्टचित्तत्वमेव वैराग्यम् । आविष्टचित्तत्वकथनं तु तज्जन्यः श्रीहर्यनुग्रहः सर्वसाधनेष्वपि साधनं, भगवद्भक्तिवत्तत्साध्यं च भवति विशेषवत्तयेति सूचनायेति मन्तव्यम् ॥ छ ॥ **अथवा** भागवतधर्मानुष्ठानेन जायमानं ज्ञानमीदृशमिति दर्शयति ॥ **शृण्वन्निति ॥** श्रवणादिकुर्वन्नपि त्वच्चरणारविन्दयोरेवाविष्टमलिवल्लग्नं चित्तं यस्य स इति यत्तदेव ज्ञानमिति । एवशब्देनान्यविषयकतां व्यवच्छिनत्ति । तेनायमर्थः सूचितः । सर्वो हि क्रियां कुर्वन्नहमिदं साधयामीत्यनुसन्धत्ते । ज्ञानी त्वहमंशं परित्यज्य मुख्यतः कर्तृत्वं तत्रैवानुसन्धत्ते । प्रयोजनं च नाकांक्षते । किन्तु श्रीहरिपूजामेवोद्दिशति । अत एवाद्यापि भागवता भुक्त्वा श्रीविष्णुपूजास्त्विति भणन्ति । तथाचानुष्ठीयमानक्रियायां कर्तृत्वपूज्यत्वाभ्यां धर्माभ्यां श्रीहरिं विषयीकुर्वज्ज्ञानं भागवतधर्मानुष्ठानेन लभ्यमिति ॥ छ ॥ **अथवा** क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचित्तो न भवाय कल्पते इत्युदिते अधिकारिण एवमाकांक्षोदेति । भवभयहरं क्रियासु तच्चरणप्रावण्यं कथमस्माकं मन्दभाग्यानां भवेदिति तत्रोत्तरमाह ॥ **शृण्वन्निति** ॥ ते मङ्गलानि नामानि शृण्वन् गृणन् तादृशानि ते रूपाणि संस्मरयंश्च चिन्तयन् त्वच्चरणारविन्दयोराविष्टचित्तो यथा भवति तथान्यासु क्रियासु क्रियमाणासु त्वच्चरणारविन्दयोराविष्टचित्तो भवेदेवेति । **इदमुदितं भवति—** भगवतो गुणकर्मनामानि शृण्वतां श्रीकृष्णादिरूपाणि स्मरतां च

Rarest Archiver

प्रेक्षावतां तावच्चित्तस्य तत्प्रावण्यं अनुभवसिद्धम्। अत एवान्यत्र गच्छन्तीं मनोवृत्तिमपि बलादाकृष्य स्वविषयां करोतीति सूचयितुं उभयं मङ्गलानीति विशिंषन्ति। एवं सुबहुकाल श्रवणादावभ्यस्तपदं चित्तं कटादिवत्संस्कार-वशाच्छ्रवणादितोऽन्यास्वपि क्रियासु तत्प्रावण्यं लभेदेवेति॥ छ॥ **अथवा** यावदभ्यासपाटवाभावेन विना श्रवणादिकमन्यासु क्रियासु क्रियमाणासु चित्तं तत्प्रावण्यं न लभेत तावत्पर्यंतमन्यमुखेन श्रवणादिकं कुर्वन्नेव तेन तत्प्रवणचित्तो भूत्वैवाग्निहोत्राद्याः क्रियाः कुर्वीतेत्याह॥ **शृण्वन्निति**॥ योऽधिकारी यावदलब्धचित्तपाटवस्तावन्मङ्गलानि नामानि शृण्वन् गृणन् तादृशानि रूपाणि संस्मरयंश्चितयंश्च तेन त्वच्चरणारविन्दयोराविष्टचित्तो भूत्वाऽन्यासु अग्निहोत्रादिक्रियासु प्रवर्तेत ततो भवाय न कल्पत इति योजना॥ ४८॥

**सकृन्मनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यैरिह।**
**न ते यमं पाशभृतश्च तद्भटान् स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः**
**॥ ४९॥ ६। १। ११। (७)**

अपि चानुदिनमेव श्रीहरिच्चरणनिविष्टतचेतसः सांसारिकदुःखनिवृत्ति-र्भवतीति किमु वक्तव्यम्। यतः सकृदपि तच्चरणकृतमतेः प्रबलतरस्य पारत्रिकस्य यमयातनाविशेषस्य निवृत्तिरुदितेति भावेन तावदर्थकं पद्यं पठति॥ **सकृदिति**॥ हिर्हेतौ। तस्य हरेर्गुणेषु रागि लुब्धं भवत् मनो यैः सकृदेव कृष्णपदारविन्दयोर्निवेशितं तद्विषयतया कृतं य इहलोक एव चीर्णं कृतं निष्कृतं पापप्रायश्चित्तं यैस्ते तादृशा इति ज्ञेयम्। किं ततः। यतश्चीर्णनिष्कृतास्ततो हेतोर्यमं तद्भटांश्च न पश्यन्ति॥ यदा दर्शनमेव नास्ति तदा तैर्बन्धनादिकं सुतरां नास्तीति सूचितम्। अत एव पाशभृत इति विशेषितम्। एतद्विषये संशयो

Rarest Archiver

न कर्तव्य इति सूचयितुं स्वप्नेऽपीत्युक्तमिति ॥ ४९ ॥

**धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां**
**वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।**
**श्रीमद्भागवते महामुनिकृते किंवा परैरीश्वरः**
**सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्** ॥ ५० ॥
। १ । १ । २ । (८)

तदेवं श्रोतृमत्यनुकूलनाय संक्षिप्य शास्त्रार्थं प्रतिपाद्य नास्माभिरयं बलात्तदर्थतया वर्ण्यते किन्तु तत्प्रतिपाद्यप्रतिपादनपरपद्येनैव प्रतिपादित इत्यभिप्रेत्य तत्पद्यं पठति ॥ **धर्म इति** ॥ महामुनिना व्यासेन कृते श्रीमद्भागवते धर्मस्तावत् प्रतिपाद्यते । कीदृशः प्रोज्झितं कैतवं यस्मात्सः कापट्यरहितः । वाचा वदति **मोक्षशास्त्रमिदमहं वक्ष्ये इति । मनसा** तु द्रव्यादिफलमुद्दिशति । इदमेव हि कैतवम् । **निष्कामतया** कृतौ तु **प्रोज्झितकैतवं** भवति । वाङ्मनसयोरुभयोरेकविषयत्वेन कापट्या**भावात् ।** अत्र भगवति अर्पितोऽत एव परमः । वस्तु च प्रतिपाद्यते । कीदृक् । निर्मत्सराणां सतां वेद्यं, वास्तवं नित्यनिरस्तदोषगुणपूर्णस्वरूपं, वस्तु नित्याप्रतिहतं, शिवदमिष्टप्रदं, तापत्रयोन्मूलनं अनिष्टनिवर्तकं च । अपरैः उक्तेभ्योऽन्यैर्धर्मादिभिः किं वा प्रयोजनम् । कुतः । अत्र भरतखण्डे, अत्र नृजन्मनि, शुश्रूषुभिः परमधर्मानुष्ठानपूर्वकश्रीहरिसेवाकारिभिः कुशलैः ईश्वरः सद्यः तत्क्षणादेव हृदि अवरुध्यते । भक्त्या सन्निहितो भवति भक्त इति । तेनैवापेक्षिताशेषपुरुषार्थसिद्धेरिति भावः । अत्रापि श्रीहरिनिविष्टचित्तस्य भवमोचनमित्येव प्रतिपादितमित्युक्त एव शास्त्रार्थ इति । ननु प्रवृत्तिधर्मोऽपि प्रतिपाद्यते । सत्यं । एतत्तत्त्वस्योत्तरत्र वक्ष्यमाणत्वात् ॥ ५० ॥

Rarest Archiver

**शास्त्रेष्वियानेव सुनिश्चितो नृणां क्षेमस्य सम्यग्विमृशेषु हेतुः ।**
**असङ्ग आत्मव्यतिरिक्तवस्तुनि दृढा रतिर्ब्रह्मणि निर्गुणे च या ॥५१॥**
**। ४ । १ । २२ । २१ । (९)**

एवं संक्षिप्य शास्त्रार्थं प्रतिपाद्याधुनाऽयमेव शास्त्रार्थ इति कण्ठत एव प्रतिपादयन् पद्यषट्कं एतत्पद्यव्याख्यारूपं पठति ॥ **शास्त्रेष्वित्यादिना** ॥ तत्रादौ शास्त्रार्थं दृढीकरोति ॥ **शास्त्रष्वियानेवेति** ॥ आत्मनः परमात्मनः यद्व्यतिरिक्तं तस्मिन् सर्वस्मिन् सर्ववस्तुनि असङ्गो वैराग्यं, निर्गुणे ब्रह्मणि दृढा रतिश्चेति यत् शास्त्रेषु सम्यगुपक्रमादिना विमृशेषु विचारितेषु सत्सु नृणां क्षेमस्य हेतुः इयानेव निर्णीत इतोऽधिको नास्तीति ॥ ५१ ॥

**तच्छ्रद्धया भगवद्धर्मचर्यया जिज्ञासयाऽऽध्यात्मिकयोगनिष्ठया ।**
**योगेश्वरोपासनया च नित्यं पुण्यश्रवःकथया पुण्यया च ॥ ५२ ॥**
**। ४ । २२ । २२ । (१०)**

ननु कथं नृणां पुरुषार्थहेतुरियानेवेत्युच्यते । भगवति श्रद्धा अध्यात्मविचारो महत्सेवा तदनिन्दा ग्राम्येहोपरमः इन्द्रियजयः विविक्तदेशसेवा सर्वेन्द्रियाणां भगवद्विषयकत्वं अहिंसा यमो नियमो यदृच्छया लब्धेन सन्तोषो द्वन्द्वतितिक्षा श्रवणमुपासनं भगवन्माहात्म्यस्य गुणकर्मनाम्नां कीर्तनं चेत्येषामन्येषां च भागवतधर्माणां पुरुषार्थहेतूनां सद्भावादित्यतो नैते साक्षात्पुरुषार्थहेतवः किं त्वस्माभिः पुरुषार्थसाधनतयोक्तयोरसङ्गरत्योरेव हेतवः । पुरुषार्थहेतुत्ववचनं तु परम्परयेति भावेन तेषां एते प्रत्येव साधनतां दर्शयति ॥ **तच्छ्रद्धयेत्यादिना श्लोकचतुष्टयेन** ॥ तस्मिन् ब्रह्मणि श्रद्धया । आध्यात्मिकयोगनिष्ठया अध्यात्मयोगविषयिण्या । जिज्ञासया विचाररूपया । योगेनेश्वराः शापानुग्रहशक्तिमन्तो महान्तस्तेषां नित्यं सेवया । पुण्यकीर्तेर्हरेः पुण्यप्रदया कथया नित्यं तच्छ्रवणेन ॥ ५२ ॥

Rarest Archive

अर्थेन्द्रियारामगुणेष्ववतृष्णया तत्सम्मतानामपरिग्रहेण च ।
विविक्तरुच्याऽपरितोष आत्मन्विना हरेर्गुणपीयूषपानात्     ॥ ५३ ॥
। ४ । २२ । २३ । (११)

अहिंसया पारमहंस्यचर्यया स्मृत्या मुकुन्दाचरिताग्र्यसीधुना ।
यमैरकामैर्नियमैरनिन्दया निरीहया द्वन्द्वतितिक्षया च       ॥ ५४ ॥
। ४ । २२ । २४ । (१२)

हरेर्मुहुस्तत्परकर्णपूरया गुणाभिधानेन विजृम्भमाणया ।
भक्त्या ह्यसङ्गः सदसत्परात्मनि स्यान्निर्गुणे ब्रह्मणि चाञ्जसा रतिः॥
५५ ॥ ४ । २२ । २५ । (१३)

अर्थो द्रव्यमैहिकं । इन्द्रियारामाः, इन्द्रियसुखदाश्च । गुणाः विषयाः पारत्रिकाः तेष्ववतृष्णया । तदुभयं सम्मतं अत्युपादेयं येषां तेषामसङ्गेन । अयं च पूर्वोक्तग्राम्येहोपरमहेतुः । विविक्तदेशसेवया । हरेर्गुणपीयूषपानाद्विना आत्मन् आत्मनि मनसि असन्तोषः । मुकुन्दस्य यान्याचरिताग्र्याणि तद्रूपसुधापानेनात्मनि सन्तोष इत्याभ्यां सर्वेन्द्रियाणां भगवदेकविषयत्वं लक्ष्यते । तत्र भगवद्विषयत्वमात्रमत्र ग्राह्यम् । इतराविषयत्वं वैराग्यस्य सार्वत्रिकत्वसूचनायोक्तमिति ज्ञेयम् । तेन अहिंसया सर्वभूतेषु सर्वथाऽनिष्टचिन्तनवर्जनेन । पारमहंस्यचर्यया इन्द्रियजयेन स्मृत्या द्विविधया[१] अकामैः इच्छानुसारकरणरहितैः । नित्यानुष्ठेयैरिति यावत् । यमैर्द्वादशभिः । नियमैस्तावद्भिः अभयेन सह कदाचिदनुष्ठेयैः । **यथाहुः**— ''यमानभीक्ष्णं सेवेत

---

१. जन्मजरामरणादिकं नूनमापतिष्यत्येवेत्यैहिकविषयानित्यताविषयिण्या, भगवद्गुणविषयिण्या च, अत एव जन्मजरादिचिन्तयेति **विजयध्वजीये** ।

Rarest Archiver

नियमान् मत्परः क्वचि''दिति। ''अहिंसा सत्यमस्तेयमसङ्गो ह्रीरसञ्चयः। आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाऽभयमि''ति द्वादश यमाः।– ''शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनम्। तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनमि''ति नियमाः। यमोक्ताभयेन सह द्वादश— ''एते यमाः सनियमा उभयोर्द्वादश स्मृता'' इति वचनात् तेन सहैवेति ज्ञेयम्। अनिन्दया महताम्। निरीहया यदृच्छया लब्धेनैव सन्तुष्ट्या। द्वन्द्वसंज्ञयोः शीतोष्णादिरूपयोः तितिक्षया सहनशक्त्या। स हरिरेव परः परायणं येषां तेषां भगवद्भक्तानां कर्णभूषणभूतया हरेः मुहुः कथायाः कथनेन तद्भक्तेभ्यस्तन्महिमप्रतिपादनेनेति यावत्। गुणाभिधानेन गुणकर्मनामकीर्तनेनेत्येवंरूपाणां अन्येषां च भगवता प्रोक्तानां भागवतधर्माणां अनुदिनं चर्यया आचरणेन निमित्तेन विजृम्भमाणया भक्त्या। आत्मव्यतिरिक्तवस्तुन्यसङ्गः, सदसतोः कार्यकारणपदवाच्ययोर्देहेन्द्रिययोः स्थित्वा मुख्यत आदानादिकर्तरि निर्गुणे ब्रह्मणि रतिः अञ्जसा दृढा स्यादिति। अनेन श्रद्धादीनामेतद्द्वयं प्रत्येव हेतुत्वमिति इयानेव शास्त्रेषु निश्चितोऽर्थ इति सिद्धम्॥ ५३॥ ५४॥ ५५॥

**यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान् ज्ञानविरागरंहसा।**
**दहत्यबीजं[१] हृदयं [२]जीवकोशं पञ्चात्मकं योनिमिवोत्थितोऽग्निः ॥**
**५६॥ ४। २२। २६। (१४)**

**॥ इति संक्षिप्तशास्त्रार्थप्रकरणम्॥ ४॥**

---

१. अनादि।

२. जीवस्य गृहस्थानीयं पञ्चात्मकं पंचभूतस्वरूपं अत एव बाह्यमित्युच्यते— ''जीवोपाधिर्द्विधा प्रोक्तः स्वरूपं बाह्यमेव च। बाह्योपाधिर्लयं याति मुक्तावन्यस्य तु स्थितिः। सर्वोपाधिविनाशे हि प्रतिबिम्बः कथं भवेत्'' इति हि वचनं **विजयध्वजतीर्थीये**।

Rarest Archiver

संत्वेतान्यसङ्गरत्योः साधनानि साध्यं चैताभ्यां कीदृशमित्यतस्तदाह ॥ **यदेति** ॥ गुर्वनुगृहीतः पुमान् ज्ञानवैराग्ययोरुद्रेकेण भक्तिर्यदा नैष्ठिकी निष्ठां प्राप्ता पक्का भवति तदा जीवकोशं पञ्चात्मकमबीजं बाह्यहृदयमन्तःकरणं दहति। योनेः काष्ठादुत्थितोऽग्निः काष्ठमिव भगवद्विषयिणी या रतिः सैवान्तःकरणं स्वोत्पादकं नाशयतीति रतिफलमीदृशमिति भावः। तदनेन पद्यषट्केनाविष्टचित्त इत्युक्तचित्तवृत्तौ दाढर्यरूपस्य विशेषस्य तद्विषये निर्गुणत्वस्य तत्साधने शृण्वन्नित्याद्युक्तश्रवणादितोऽधिकानां साधनानां न भवाय कल्पत इत्युदिते तत्साध्ये संसारनिवृत्तिरूपे फले प्रतियोगिविशेषस्य, ''आचार्यवान्'' इत्याचार्यप्रसादस्य चाधिकस्य कथनेन संक्षिप्य शास्त्रार्थप्रतिपादकं शृण्वन्निति पद्यं विवृतं भवति ॥ ५६ ॥ छ ॥

**॥ इति श्रीमदवधूतशिरोमणिजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां संक्षिप्तशास्त्रार्थप्रकरणम् ॥ ४ ॥**

Rarest Archives

## वैराग्यप्रकरणम् ॥ ५ ॥

**न तस्य तत्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन्।**
**स्वप्ने निरुक्त्या गृहमेधसौख्यं न यस्य हेयानुमितं स्वयं स्यात् ॥**
**५७॥ ५। ११। ३। (१)**

विरागो रतिश्चेति द्वयमेव मुख्यं मुक्तिसाधनम्। तत्र साधनानि चेतराणीति प्रतिपादितं पूर्वप्रकरणे। तच्च वैराग्यं कथं स्यादित्यतस्तदर्थं संसारस्य हेयता व्युत्पाद्यतेऽस्मिन्प्रकरणे। देहदारागारादिषु सङ्गो हि संसारः। तस्य च प्रागनन्तरं मध्ये चावस्थात्रय इति सर्वत्रापि विचार्यमाणे दुःखपरम्परापरीतत्वमिति तत्र विरागेण तावद्दुःखनिवृत्तिः। तथा तस्य ज्ञानभक्तिस्थिरीकरणहेतुतया प्रसादविशेषसाधनतया च महापुरुषार्थलाभश्चेति तत्रावहितैर्भाव्यमित्याशयेनादौ ज्ञानस्थिरीकरणहेतुतां दर्शयति ॥ **न तस्येति** ॥ यस्य येन स्वप्ने निरुक्त्या स्वप्नदृष्टान्तेन गृहमेधानां सुखं वैषयिकं स्वबुद्ध्यैव हेयत्वेनानुमितं न स्यात्। तस्य साक्षादपौरुषेयत्वेन वरीयस्योऽपि वेदवाचो न परतत्त्वबोधनाय समर्था भवन्तीति। असङ्गेन दुःखनिवृत्तिश्चानुभवसिद्धा। उपदिष्टमपि तत्त्वं वैराग्यवत एव हृदयेऽवतिष्ठत इति तस्य ज्ञानस्थिरीकरणहेतुत्वं भक्तिस्थिरीकरणहेतुत्वं च पूर्वप्रकरणान्ते प्रतिपादितम्। प्रसादहेतुता च प्रमाणप्रमिता। **यथाहुः**– ''ये दारागारपुत्रादीन् प्राणान्वित्तमिदं परम्। हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे॥'' इति॥ इदं तु स्वत एव विरक्तविषयम्। अत एव स्वयं स्यादित्युक्तम्। ये तु स्वतो बुद्धिपूर्वं न विरज्यन्ते तान् बलात्कृत्य विरक्तान् कृत्वानुगृह्णाति। **यथाहुः**– ''ब्रह्मन्यमनुगृह्णामि तद्वित्तं विधुनोम्यहम्'' ८।२१।२४॥ ५७ ॥

Rarest Archiver

**देह्यन्यदेहविवरे जठराग्निनाऽसृग्विण्मूत्रकूपपतितो भृशतप्तदेहः । इच्छन्नितो विवसितुं गणयन् स्वमासान्निर्वास्यते कृपणधीर्भवता कदा नु ॥ ५८ ॥ ३ । ३२ । १९ । (२)**

परलोकादिमं लोकमागच्छन् व्रीह्यादिद्वारा कर्मशेषेण पुरुषदेहं गतस्त्रिमासं तत्र दुःखमनुभूय रेतोद्वारा स्त्रियः कुक्षिं श्रितः कललबुद्बुदादिक्रमेण शिर आद्यङ्गोपेतपिण्डमास्थितः षण्मासं दुःखमनुभूय, बहुजन्मार्जितपुण्यवशेन कस्मिंश्चिज्जन्मनि सप्तमे मासि पूर्वतनानि जन्मानि स्मरन् मात्रा भुक्तैः कटुतीक्ष्णक्षारादिभिः सर्वाङ्गेषूत्पन्नवेदनो विण्मूत्रगर्तस्थैः कृमिभिः क्षतसर्वाङ्गः प्रतिक्षणं मूर्च्छामाप्नुवानः पञ्जरे शकुन्त इव स्वाङ्गचेष्टायामप्यकल्पो जन्मशतोद्भवं दुःखमनुस्मरन् दीर्घमुच्छ्वसन् पुनरेवंविधं कर्म न कुर्यामिति पश्चात्तप्यमानोऽपि तत्परिहाराऽशक्तः एवं चिन्तयन्नास्त इत्याह ॥ **देहीति** ॥ यथा लोके देवदत्तः स्वयं गेहवान् केनचिन्निमित्तेन परगेहं गतः तत्र तैरकल्पे कुत्सिते स्थले दत्ते दुःखी भवति । तथायमपीति सूचनाय जीव इति वक्तव्ये देहीति, अन्यकुक्षाविति वक्तव्ये अन्यदेहविवर इत्युक्तम् । तत्राप्यसृग्विण्मूत्राणां कूपे पतितस्तत्रापि जाठरजातवेदसा भृशं तप्तो देहो यस्य तादृशोऽत एव कृपणधीः इतो मातृदेहाद्विवसितुं निर्गन्तुं इच्छन् स्वस्य क्लृप्ता यावन्तो मासा दश तावत्सु कति गताः कति चावशिष्टा इति गणयन् भवता कदा निर्वास्यते बहिर्निष्कास्यते इति नु वितर्कयन्नास्त इति । **यथाहुः**– ''कर्मणा दैवतन्त्रेण जन्तुर्देहोपपत्तये । स्त्रियः प्रविष्ट उदरं पुंसो रेतःकणाश्रयः ॥ कललं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम् । दशाहेन तु कर्कन्धूः पेश्यण्डं वा ततः परम् ॥ मासेन तु शिरो द्वाभ्यां बाह्वङ्घ्र्याद्यङ्गविग्रहः । नखरोमास्थिचर्माणि लिङ्गच्छिद्रोद्भव-स्त्रिभिः ॥ चतुर्भिर्धातवः सप्त पञ्चभिः क्षुत्तृडुद्भवः । षड्भिर्जरायुणा वीतः कुक्षौ भ्रमति दक्षिणे ॥ सप्तमे जन्मकर्माणि गतानि स्मरते ऋषिः । जगत्यां यानि देवस्य

Rarest Archiver

मायया बन्धमात्मनः ।। मातुर्जग्धान्नपानाद्यैरेधेतातुरसंमतः । शेते विण्मूत्रयोर्गर्ते स जन्तुर्जन्तुसम्भवे ।। कृमिभिः क्षुतसर्वाङ्गः सौकुमार्यात्प्रति-क्षणम् । मूर्च्छामाप्नोत्युरुक्लेशस्तत्रत्यैः क्षुधितैर्मुहुः ।। कटुतीक्ष्णोष्णलवणक्षा-राम्लादिभिरुल्बणैः । मातृभुक्तैरुपस्पृष्टः सर्वाङ्गोत्थितवेदनः ।। उल्बेन संवृत-स्तस्मिन्नान्त्रैश्च बहिरावृतः । आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः ।। अकल्पः स्वांगचेष्टायां शकुन्त इव पञ्जरे ।। तत्र लब्धस्मृतिर्दैवात्कर्म जन्मशतोद्भवम् । स्मरन्दीर्घमनुच्छ्वासं गर्भे किं नाम विन्दते ।।" इति ।। ५८ ।।

**अहो विधानस्त्वमतीव बालिशो यस्त्वात्मसृष्टेः प्रतिरूपमीहसे ।**
**परे तु जीवत्यपरस्य या मृतिर्विपर्ययश्चेत्त्वमसि ध्रुवं परः ।। ५९ ।।**
**। ६ । १४ । ५३ । (३)**

एवं संसारात्प्राक्तनं दुःखं प्रदर्श्य अन्तिमं दुःखं प्रदर्शयति ।। **अहो इति ।।** यद्यपि गर्भवासदुःखकथनानन्तरं कौमाराद्यवस्थासम्बन्धि दुःखं प्रदर्श्यैव एतत्प्रदर्शनीयम् । तथापि उत्पत्त्यनन्तरं कौमारादावेव मरणं कदाचिद्भवतीति तद्दुःखप्रदर्शनेन विशेषतो हेयताव्युत्पादनायात्रैव प्रदर्शनम् । [१]प्रदर्श्यते च अवस्थात्रयानन्तरकालीनमरणदुःखमपीति । हे विधातः ब्रह्मन् यस्त्वमेव आत्मसृष्टेः प्रतिरूपं विरुद्धं कर्म करोषि स त्वं अतीव बालिशो निन्द्यतमः । किं तदात्मसृष्टिविरुद्धं कर्म येन धाता निन्दितो भवेदित्यत उक्तम् ।। **पर इति ।।** परे वयोधिके जीवति सति अपरस्य न्यूनवयसः या मृतिः सैवेति । एतस्य विपर्ययोऽन्यथाभावः । परस्य पूर्वं मृतिः पश्चादपरस्येति कृतश्चेत् तर्हि त्वं परः प्रशस्यो ध्रुवमसीति ।। ५९ ।।

---

१. विद्वानपीत्यादिना ।

Rarest Archiver

**न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः । यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि ॥**

**६० ॥ ३ । १४ । ५४ (४)**

शरीरिणां इह मृत्युजन्मनोः एक एव क्रमो यदि नहि स्यात् तदात्मनां कर्मभिः पापैर्निमित्तैः सृष्टिविपरीतः क्रम एव लयेऽस्तु । सृष्टिप्रतिरूपो लयक्रमः कथमिदानीमङ्गीक्रियत इत्यतोऽङ्गीकारवादस्येदं प्रयोजनं यत्पूर्वोक्तस्यैव समर्थनम् । पूर्वं हि नास्माभिः सृष्टिप्रतिरूपः क्रमो निर्निमित्तं प्रतिषिद्धः, किन्तु परे जीवत्यपरस्य मृतौ दुःखविशेषो भवति स माभूदित्येतदर्थमेव । तदेव च प्रयोजनं प्रकारान्तरेण व्यवस्थापयितुं अयमङ्गीकारवाद इत्याशयेन वक्तीत्याह ॥ **य इति ॥** स्वयं स्वेनैव कृत इत्यनेन तच्छेदनं तव शक्यमिति सूचयति । तस्यैवाकृतौ शिशूनां स्वरक्षणशक्त्यभावेन जीवनमेव न सिध्यतीति प्रजावृद्धिरेव न स्यादिति निजस्य सर्गस्य वृद्धये यः स्नेहाख्यः पाशः कृत इति[१] ॥ ६० ॥

**अहो वयं धन्यतमा यदत्र त्यक्ताः पितृभ्यां न विचिन्तयामः । अभक्ष्यमाणा अबला वृकादिभिः स रक्षिता रक्षति यो हि गर्भे ॥**

**६१ ॥ ७ । २ । ३८ । (५)**

एवं संसारस्य विशेषतो हेयताव्युत्पादनाय दुःखविशेषमेकस्मिन् निदर्शने प्रदर्श्य तत्प्रसङ्गात् स्थानान्तरे ततोऽप्यधिकं दुःखविशेषं प्रदर्शयितुं अन्यैरपरिहार्यं शोकं विदित्वा शवसमीपे विलपन्तीनां राजस्त्रीणां अतिबहुलं तमसहमानः साक्षात् प्रेतराज एव तच्छान्त्यै बालरूपं समास्थाय तत्रागत्य समाधत्त इत्याह ॥ **अहो इति ॥** यद्यस्मात् मात्रा पित्रा च त्यक्ता अपि बाला अपि वयं न

---

१. तमिमं विवृश्चसि चेत्तदास्तु जन्मलययोः क्रमाभावः, तस्य सत्वेऽपि दुःखविशेषस्य तद्धेतु-भूतस्नेहच्छेदादेवानुदयादिति भावः ।

Rarest Archiver

विचिन्तयामस्तस्माद्धन्यतमा अहो। बालकत्वाच्चिन्ताभावेऽपि अन्यतो बाधो भाव्यो भवेदेवेत्यत उक्तम्-बालतया[१] बलरहिता अपि वृकादिभिः अभक्ष्यमाणा इति। मात्रादे रक्षकस्याभावे को रक्षितेत्यत उक्तं **स इति**॥ यो गर्भे रक्षिता स एव हि ततोऽन्यत्रापि रक्षतीति ॥ ६१ ॥

**पथि च्युतं तिष्ठति दिष्टरक्षितं गृहे स्थितं तद्विहतं विनश्यति।**
**जीवत्यनाथोऽपि तदीक्षितो वने गृहेऽपि गुप्तोऽस्य हतो न जीवति॥**
**६२ ॥ ७ । २ । ४० । (६)**

एवं बालकोक्तं वृद्धसंमतं वचनं श्रुत्वा विस्मितास्ता अभिमुखीकृत्य दिष्टनामकश्रीहर्यनुग्रहसद्भावासद्भावाभ्यां जायमाने कार्ये शोकेन किं स्यादित्याशयेन सदृष्टान्तमुपपादयति॥ **पथीति**॥ दिष्टेन दैवेन रक्षितं पथि च्युतमपि कङ्कणादिकं वस्तु तिष्ठति। तेन दिष्टेन विहतं नाशितं गृहे स्थितमपि विनश्यति यथा, तथा मात्रादिरक्षकरहितोऽपि तेन दिष्टेन ईक्षितः प्रसन्नदृष्ट्या, वनेऽपि जीवति। अस्य अनेन दिष्टेन हतो गृहे गुप्तोऽपि न जीवतीति। तदनेन प्रेतराजेतरापरिहार्यदुःखोपेतनिदर्शनान्तरप्रदर्शनेन विशेषतो हेयता व्युत्पादिता भवति। विशेषश्च हानेः शैघ्र्यमेवेति ॥ ६२ ॥

**कथं प्रियाया अनुकम्पितायाः सङ्गं रहस्यं रुचिरांश्च मन्त्रान्।**
**सुहृत्सुतस्नेहवशः शिशूनां कलाक्षराणामनुरक्तचित्तः ॥ ६३ ॥**
**। ७ । ६ । १७ । (७)**

एवमनन्तरकालीनं दुःखं व्युत्पाद्य अवस्थात्रये कौमारे जातमपि दुःखं

---

१. अबला इति वयमित्यस्य विशेषणमित्यभिप्रेत्य बलरहिता इति व्याख्यातम्।

Rarest Archiver

दन्तोत्पाददुःखमिव जनोऽयं स्फुटं नानुसन्धत्त इति किं तद्व्युत्पादने प्रयासेनेति द्वितीयावस्थावस्थितमेव विशदीकृत्य प्रदर्शयति ॥ **कथमित्यादिना श्लोकसप्तकेन** ॥ रहस्यं रहसि भवं मैथुनादि। मन्त्रान् संल्लापान्। विवाहादिचिन्ताविशेषान्वा। शिशूनां यानि कलाक्षराणि तेषां विषये। कथं त्यजेतेत्युत्तरेणान्वयः ॥ ६३ ॥

**प्रत्ताः स्मरंस्ता दुहितृर्हृदय्या भ्रातृन्स्वसृर्वा पितरौ च दीनौ।**
**गृहान् मनोज्ञान् रुचिरच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् ॥**
**६४ ॥ ७। ६। १८। (८)**

प्रत्ताः स्वसमानवित्तेभ्यः परेभ्यो दत्ताः हृदय्याः हृदयप्रियाः दुहितॄः पुत्रीः स्वसॄश्चापरगृहे दत्ताः खल्वेतास्तत्र सुखेन वर्तन्ते वा न वा अस्मद्गृहान् प्रत्यानेतव्याः किमित्यादिरूपेण स्मरन्, दीनौ दुःखितौ बन्धुमरणादिना, मनोज्ञान् मनोहरान् रुचिरान् परिकरांश्च कुल्याः कुलपरम्परायाताः वृत्तीः जीवनकरीः क्षेत्रादिरूपाः ॥ ६४ ॥

**त्यजेत कोशस्थ इवेहमानः कर्माणि लोभादवितृप्तकामः।**
**औपस्थ्यजैह्वयं बहु मन्यमानः कथं विरज्येत दुरन्तमोहः ॥ ६५ ॥**
**। ७। ६। १९। (९)**

कोशस्थः कोशकारी कीट इव लोभादे[१]वावितृप्तकामः तदनुकूलान्येव कर्माणि ईहमानः कुर्वाणः अत एव दुरन्तमोहः कथं विरज्येतेति। अविरागे मूलकारणमाह॥ **औपस्थ्येति** ॥ औपस्थ्यं उपस्थेन्द्रियकार्यं। जैह्वयं जिह्वेन्द्रियव्यापारं च। बहु महापुरुषार्थतया। मन्यमान इति॥ **यथाहुः**– ''को

१. सर्वं सावधारणं इति हि न्यायः तेनैवं व्याख्यायि।

Rarest Archiver

गृहेषु पुमान् सक्तमात्मानमजितेन्द्रियः। स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुमि''ति ॥ ६५ ॥

**कुटुम्बपोषाय च यन्निजायुर्न बुध्यतेऽर्थं विहतं प्रमत्तः।**
**सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुम्बरामः ॥ ६६ ॥**
**। ७। ६। २०। (१०)**

अस्त्विदानीं इन्द्रियतर्पणलोभादविरागः, वार्धके तु इन्द्रियाणां पाटवाभावेन द्रव्यार्जनसामर्थ्याभावेन विशेषतो भोगसाधनद्रव्याभावेनैतावता कालेन मया पारत्रिकसाधनं किमपि न कृतमिति पश्चात्तापेन बन्धुसन्निधौ वा स्वामिसन्निधौ वा मित्रसन्निधौ वा, सर्वत्र गमने सति तापत्रयेणैवागतेन दुःखितमनस्त्वेन अन्ते विरागो भवेदेवेत्यतः सत्यम्। जन्मान्तरार्जितपुण्यानां केषाञ्चिदेवमन्ते वयसि भवेदिति। ये तु पशुप्रायाः दम्भाचाराः तेषां सर्वथा न भवत्येव मरणपर्यन्तं कुटुम्बेष्वेव संलग्नमनस्त्वादित्यभिप्रेत्याह॥ **कुटुम्बेति॥** कुटुम्बपोषायैव [१]यत् गच्छत् निजं क्लृप्तं आयुर्यस्य सः॥ **यथाहुः–** ''पुंसो वर्षशतं ह्यायुस्तदर्धं चाजितात्मनः। निष्फलं यदसौ रात्र्यां शेतेऽन्धं प्रापितस्तमः॥ १। मुग्धस्य बाल्यकौमारैर्क्रीडतो याति विंशतिः। जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशति॥ २॥ दुरापूरेण कामेन मोहेन च बलीयसा। शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि॥ ३॥'' इति॥ ६६॥

**वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः।**
**प्रेत्येह चाथाप्यजितेन्द्रियस्तदशान्तकामो हरते कुटुम्बी ॥ ६७॥**
**। ७। ६। २१। (११)**

---

१. मूले यन्निजायुरित्येकं पदं।

Rarest Archiver

एवं प्रतिपादितेषु अनेकेषु विषयेषु द्वयमेव महाबन्धकं वित्तमेकं द्वितीयं च वनितेति। तत्र आद्यं ,तावत् केनापि परित्यक्तुं न शक्यत इत्याह॥ **वित्तेष्विति॥** एवं द्रव्याभावेऽपि न विरज्यते। किन्तु परवित्तस्य हर्तुः पुरुषस्य इह ताडनादिरूपं प्रेत्य च यातनारूपं दोषं विद्वान् यद्यपि जानाति। अथापि अजितेन्द्रियत्वादशान्तकामः। तत एव वित्तेषु नित्यं अभिनिविष्टं आसक्तं चेतो यस्य स तादृशः सन्। कुटुम्बपोषणमनस्त्वात् तत्पोषणार्थं उभयत्र दोषमगणय्य परवित्तं हरते हरतीति। **यथाहुः–** ''को न्वर्थतृष्णां विसृजेत्प्राणेभ्योऽपि गरीयसीम्। यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक्॥ १॥'' इति। तत्र नारकदुःखप्रकारश्च नामप्रकरणे विस्तरेण वक्ष्यत इति॥ ६७॥

**यतो न कश्चित् क्व च कुत्र विद्वान् दीनं स्वमात्मानमलं समर्थः।**
**विमोचितुं वामदृशां विहारक्रीडामृगोऽयं निगडोऽक्षिसर्गः॥ ६८॥**
**।७।६।२३।(१२)**

द्वितीयमपि बन्धकं केनाप्यपरित्याज्यमेवेत्याह॥ **यत इति॥** यतोऽयं पुमान् वामदृशां विहारार्थं गृहीतः क्रीडामृगो मृगविशेषः। वामदृशां अक्षिसर्गः कटाक्षमोक्षश्च यस्य मृगस्य निगडस्थानीयः। ततस्तादृशो विद्वान् वेदशास्त्रपारं गतोपि कश्चित् कोपि कुत्रचित् देशेपि कच कस्मिंश्चित् कालेपि दीनं दुःखितं स्वात्मानं अलं मोचयितुं समर्थो न भवतीति॥ **यथाहुः–** ''बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम्। या करोति निजायत्तान् भ्रूविजृम्भेण केवलमि''ति॥ ६८॥

**निर्जित्य दिक्चक्रमभूतविग्रहो वरासनस्थः समराजवन्दितः।**
**गृहेषु मैथुन्यपरेषु योषितां क्रीडामृगः पूरुष ईश गीयते॥ ६९॥**
**।१०।५४।५३।(१३)**

Rarest Archiver

ननु ब्राह्मणोऽयं स्वभावतो दरिद्रः कथंचित् सुन्दरीः लब्ध्वा लुब्धः तासां क्रीडामृगो भवेदेव। किञ्च स्वभावतोऽक्षमः ततः कटाक्षमोक्षनिगडबन्धादात्मानं मोचयितुं न समर्थश्च। राजानस्तु पुनः दशदिग्जयिनो बहुतर-परिभुक्तवाराङ्गनादिविहाराः स्वबाहुबलतिरस्कृताखिलवैरिजनशारीराः कथं वनिताविनोदमृगा भवेयुः। कथं च तत्कटाक्षविक्षेपनिगडात् आत्मानं मोचयितुं असमर्थाश्चेत्यत आह॥ **निर्जित्येति**॥ अभूतविग्रहः अजातयुद्धः। समैर्वित्तादिना, वरासनं सिंहासनम्, ईदृशोऽपि मैथुन्यपरेषु विहारसाधनेषु सौधादिषु, प्रवेशमात्रेण, पुरुषो राजादिः योषितां क्रीडामृगो भवतीति गीयत इत्यनेन तथा लोके बन्दिभिः परोक्षे स्तूयत इति सूचयति। मृगस्य तु स्वयं निगडमोचनसामर्थ्यं नास्तीति हृदयम्। **यथाहुः—** ''अहो मे आत्मसंमोहो येनात्मा योषिता हृतः। क्रीडामृगश्चक्रवर्ती नरदेवशिखामणि''रिति॥ ६९॥

**विद्वानपीत्थं दनुजाः कुटुम्बं पुष्णन् स्वलोकाय न कल्पते वै।**
**यत्स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः ॥ ७०॥**
**।७।६।२२।(१४)**

एवं यौवनावस्थादुःखं व्युत्पाद्य वार्धकावस्थावस्थितं अनन्तरकालस्थितं च तत्प्रदर्शयति॥ **विद्वानपीति**॥ विद्वान् वेदशास्त्रपारं गतोऽपि यावच्छरीरादिदार्ढ्यं तावदात्मजायासुतागारपशुद्रविणबन्धुपरिजनादिषु निरूढ-स्नेहः तेषां उद्वहनाद्यर्थं द्रव्याद्याशया तत्र तत्र परिभ्रमन् स्वमनोनुसारतः कदाचिल्लाभे हृष्यन् अलाभे शुष्यन् इत्थं कुटुंबं पुष्णन् यदा जरया दार्ढ्यं गतं तदापि कथञ्चित् परिभ्रमन्नपि वित्तमलभमानः कृपणो याचकमुद्रामुद्रितो जरया ग्रस्तो गृहे एव वसन् गृहपाल इव अपमानेन दत्तमन्नं भुञ्जन् रोगवशेन अप्रदीप्ताग्निः अल्पाहारः अल्पविहारः कुटुम्बचिन्तयैव दुःखितः ''मे पितरौ मम

Rarest Archiver

भार्या मम सुता मम बान्धवाश्च मामृते कथं वर्तेरन्, ततस्तेषां इयं वृत्तिः इदं वित्तं इदं गृहं इमे पशवः। एते च न मम भार्यादयः किन्तु मम भ्रातुः, एतेषां किमपि न देयं दानेऽपि इयदेवे''त्येवं स्वीयत्वपरकीयत्वाभ्यां कल्पिताभ्यां निमित्ताभ्यां विभिन्नो विरुद्धो भावः प्रवृत्तिर्यस्य तादृशः सन्। वायुना बद्धश्वासो निश्चेष्टः रुदतां स्वानां शब्देन आकृष्टचेतोवृत्तिः तत्रैव मग्नः आसन्नमरणः स्वस्य यत् परलोकसाधनं तत् यद्यस्मान्न कृतवान् तस्मात् कारणात् तस्मै न कल्पते परलोकं न प्राप्नोतीति भावः। किञ्च यथा विमूढः अज्ञः तमः नरकं मूढयोनिं वा प्रपद्यते तथा तत् प्रपद्येतेति॥ **यथाहुः–** ''आत्मा जायासुतागारपशुद्रविणबन्धुषु। निरूढमूलहृदयमात्मानं बहु मन्यते॥ १॥ सन्दह्यमानसर्वाङ्ग एषामुद्वहनादिना। करोत्यविरतं मूढो दुरितानि दुराशयः॥ २॥ आक्षिप्तात्मेन्द्रियः स्त्रीणामसतीनां स्वमायया। रहोरचितसंलापैः शिशूनां कलभाषणैः॥ ३॥ गृहेषु कूटधर्मेषु दुःखतन्त्रेष्वतन्द्रितः। कुर्वन् दुःखप्रतीकारं सुखवन्मन्यते गृही॥ ४॥ कुटुम्बभरणाकल्पो मन्दभाग्यो वृथोद्यमः। श्रिया विहीनः कृपणो ध्यायन् श्वसिति मूढधीः॥ ५॥ तत्राप्यजातनिर्वेदो भ्रियमाणः स्वयम्भृतैः। जरयोपात्तवैरूप्यो मरणाभिमुखो गृहे॥ ६॥ आस्तेऽवमत्याऽपत्याद्यैर्गृहपाल इवाहरन्। अहो मे पितरौ वृद्धौ भार्या बालात्मजा सती॥ ७॥ अनाथा मामृते दीनाः कथं जीवन्ति दुःखिताः। एवं कुटुम्बभरणे व्यापृतात्माऽजितेन्द्रियः॥ ८॥ आमयेनाप्रदीप्ताग्निरल्पाहारोऽल्पचेष्टितः। वायुनोत्क्रमतोत्तारः कफसंरुद्धनासिकः॥ ९॥ कासश्वासकृतायासः कण्ठो घुरघुरायते। म्रियते रुदतां स्वानामुरुवेदनयाऽस्तधीः॥ १०॥ अधस्तान्नरलोकस्य यावतीर्यातनास्तु ताः। क्रमशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः॥ ११॥ ३॥ ३१'' इति॥ ७०॥

Rarest Archive

**विमोहितोऽयं जन ईश मायया त्वदीयया त्वां न भजन्यनर्थदृक् ।**
**सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित्पुरुषश्च वञ्चितः ॥ ७१ ॥**
**। १० । ५४ । ४७ । (१५)**

तदेवं गर्भवासमारभ्य आमरणं विरागोत्पत्तये दुःखविशेषं प्रदर्श्य अत्रादरजननाय पूर्वाचारमपि प्रदर्शयति॥ **विमोहित इत्यादिभिरेकविंशतिपद्यैः ॥** तत्रादौ मुचुकुन्दमहाराजस्य विरक्तिप्रकारं दर्शयति ॥ **विमोहित इत्यादिपञ्चभिः पद्यैः ॥** हे ईश अनर्थं दुःखं पश्यन्नपि त्वदीयया मायया विमोहितोऽयं जनः त्वां दुःखहरं सुखप्राप्तये न भजति । किञ्च त्वदीयया माययैव योषित्पुरुषश्चेत्ययं जनो वञ्चितो मोहितः दुःखसाधनेषु गृहेषु तदादिषु विषयेषु सुखाय सज्जते च । इदं च द्वयं त्वन्माययैवेति ॥ ७१ ॥

**ममैष कालोऽजित निष्फलो गतो राज्यश्रियोन्नद्धमदस्य भूपतेः ।**
**मर्त्यात्मबुद्धेः सुतदारकोशेष्वासज्जमानस्य दुरन्तचिन्तया ॥ ७२ ॥**
**। १० । ५४ । ४९ । (१६)**

**कलेवरेऽस्मिन् घटकुड्यसन्निभे निरूढमानो नरदेव इत्यहम् ।**
**वृतो रथेभाश्वपदात्यनीकपैर्गां पर्यटन् त्वामगणय्य दुर्मदः ॥ ७३ ॥**
**। १० । ५४ । ५० । (१७)**

**पुरा रथैर्हेमपरिष्कृतैश्चरन् मतङ्गजैर्वा नरदेवसंज्ञितः ।**
**स एव कालेन दुरत्ययेन कलेवरो विट्कृमिभस्मसंज्ञितः ॥ ७४ ॥**
**। १० । ५४ । ५२ । (१८)**

Rarest Archiver

**मन्ये ममानुग्रह ईश ते कृतो राज्यानुबन्धापगमो यदृच्छया ।**
**यः प्रार्थ्यते साधुभिरेकचर्यया वनं विविक्षुद्भिरखण्डभूमिपैः ॥ ७५ ॥**
**। १० । ५४ । ५६ । (१९)**

हेऽजित मर्त्ये देहे आत्मेत्यहंमतिर्बुद्धिर्यस्य तस्य ॥ ७२ ॥

उक्तमेव विशदयति ॥ **कलेवर इति ॥** घटेन कुडचेन वा सदृशे कलेवरे निरूढमानोऽभवम् । त्वां अगणय्य त्वत्पूजामकृत्वा अनीकपैः सेनापतिभिः ॥ ७३ ॥

हेम्ना अलङ्कृतैः यः कलेवरः नरदेवसंज्ञां प्राप्तः स एव विडिति वा कृमिरिति वा भस्मेति वा संज्ञां प्राप्तो भवति ॥ **यथाहुः—** ''देवसंज्ञितमप्यन्ते कृमिविड्भस्मसंज्ञितम् । भूतध्रुकुरुते स्वार्थं किं वेद निरयो यतः'' इति ॥ १० ॥ ११ । १० ॥ ७४ ॥

हे ईश यदृच्छया राज्यानुबन्धापगमः राज्याधिपत्यापगमः स ते त्वया कृतः मम मयि अनुग्रह इति मन्ये । कुतः । एकाकितया त्वत्पूजां कर्तुं वने प्रवेष्टुं इच्छुभिः साधुभिः अखण्डमण्डलाधिपतिभिरपि राज्यानुबन्धापगमः स्वयं प्रार्थ्यते यतोऽत इति ॥ ७५ ॥

**यद्वाचितन्त्यां गुणकर्मनामभिः स्वदामभिर्वत्स वयं सुयोजिताः ।**
**सर्वे वहामो बलिमीश्वराय प्रोता नसीव द्विपदे चतुष्पदः ॥ ७६ ॥**
**। ५ । १ । ४ । (२०)**

एवं मुचुकुन्दमहाराजेन विराग एवाशासित इति तत्र अवहितैर्भाव्यमित्यभिधाय अधुना प्रियव्रतमहाराजस्य आचारमपि निदर्शयति ॥ **यद्वाचीति ॥** अथवा मुचुकुन्दो नाम इक्ष्वाकुवंशजातो मान्धातृतनयो महाबलः

Rarest Archive

इन्द्रादिभिः अमरवरैः असुरपरित्रस्तैः स्वरक्षणाय प्रार्थितः तद्रक्षामकरोत्। एवं सुचिरकालं स्वपरिपालनाय अवस्थितं कालतः कालितसुतदारमन्त्रिराज्यपुरोगमं राजानं अवेत्य ''विना मोक्षं अशेषपुरुषार्थं वृणीष्व'' इति देवैः उदिते सुचिरश्रमकर्शितो बहुकालिकीं निद्रां एकामेव वव्रे। तथास्त्विति देवैरुदितो गुहायां सुचिरं निद्रितः यवनं दृशैव भस्मसात्कृत्य श्रीहरिं उपलभ्य अस्तौषीदिति रहस्यम्। तत्र यद्यपि हरिणा देवैरिव ''वरान् वृणीष्वे''ति उदितोऽपि न वव्रे महाभागवतत्वात्। तथापि भुक्तभोगत्वात् श्रीहरिसेवामेव वरं मन्यमानो नरनारायणाश्रममेव अनुसृतवान्। किञ्च येन केनापि व्याजेन राज्यं कालतो गतमेवासीत् तच्च पुनर्नापेक्षितवान् इत्येव। न तु विद्यमानमेव राज्यं तत्याज। नेदं आश्चर्यम्। अभुक्तभोगेन विद्यमानमेव राज्यं परित्यक्तं इत्येतदेवाश्चर्यं इत्यतः तादृशमेव दृष्टमित्याशयेनाह॥ **यद्वाचीति**॥ अथवा अखण्डभूमिपैः प्रार्थ्यते इत्यनन्तरमेव अभिहिते के ते अखण्डभूमिपाः कथं वा तां तत्यजुः इत्यतः इत्थमित्याह॥ **यद्वाचीति**॥ स्वायम्भुवमनुपुत्रः प्रियव्रतो नारदसेवया अवगतपरतत्वः तस्मिन्नेव समावेशितसकलशारीरव्यापारः परमहंसपदवीं अनुरून्धानः अवनितलपरिपालनाय स्वपित्रा प्रीतिपूर्वकं उपामन्त्रितोऽपि नैवाभ्यनन्दत्। तदैव हि सकलजगदभिप्रेतविदां शिरोमणिः कमलासनः समागतः मुनिमनुतत्सुतनतः सदयावलोकं प्रियव्रतं प्रति वक्ति। यथा लोके कस्मैचित् पुरुषाय स्वस्वामिने वृषभादयः दीर्घरज्ज्वां तत्रापि स्वस्वदामभिः रात्रौ नियोजिताः प्रातः नासिकायां प्रोताः सन्तः गोण्यादिकं वहन्ति इव तद्वत् हे वत्स वयं सर्वेऽपि यस्य हरेः वाचि वेदरूपवाण्यां द्विजादिनामभिः सम्यक् स्वस्वव्यापारेषु योजिताः सन्तः ईश्वराय स्वामिने स्वकृतकर्मरूपं बलिं पूजासाधनं वहामः कृत्वा समर्पयामः। **यथाहुः**— ''यथा गावो नसि प्रोतास्तन्त्यां बद्धाः स्वदामभिः। वाक्तन्त्यां नामभिर्बद्धा वहन्ति बलिमीशितु'' रिति॥ ७६॥

Rarest Archiver

**भयं प्रमत्तस्य वनेष्वपि स्यात् यतो वसन्ते सह षट्सपत्नाः ।**
**जितेन्द्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किन्नु करोत्यवद्यम् ॥ ७७ ॥**
**। ५ । १ । १७ । (२१)**

यथा अहं मम पितुः आदेशकरः मम पुत्रः स्वायंभुवः ममादेशकरः तथा त्वमपि त्वत्पितुरादेशं कुर्विति स्वाभिप्रायं प्रकाश्य ''राज्यपरिपालनाय प्रवृत्ते मयि मम विहितं विहतं भवतीति वनं प्रवेक्ष्ये'' इति तन्मनोविलासं तत्रापि भयप्रदर्शनेन तावद्विघटयति ॥ **भयमिति ॥** प्रमत्तस्य विस्मृतस्वकार्यस्य वनेष्वपि भयं स्यादेव । कुतः । यतः षडपि वैरिणः सहैव वसन्ति । यतो वनेष्वपि भयं अतो विजितेन्द्रियस्य आत्मन्येव रतिमतो ज्ञानिनः गृहाश्रमः कुटुम्बितया अवस्थानरूपः किमवद्यं कुर्यादिति ॥ ७७ ॥

**यः षट् सपत्नान् विजिगीषमाणो गृहेषु निर्विद्य यतेत पूर्वम् ।**
**युध्येत दुर्गाश्रित ऊर्जितारीन् क्षीणेषु कामं विचरेद्विपश्चित्॥ ७८ ॥**
**। ५ । १ । १८ । (२२)**

स्वकृतसृष्टिपरिबृंहणलुब्धेन पितामहेन एवमुच्यते । कथमन्यथा कर्मभूमावस्य महापुरुषार्थसाधनस्य देहस्य अन्यत्र विनियोगः महतां मनोज्ञः स्यात् इति शङ्का पौत्रस्य मनसि मा भूदिति स्वाभिप्रायं व्यनक्ति ॥ **य इति ॥** यः विपश्चित् सपत्नान् जेतुकामः सः पूर्वं गृहेषु स्थित्वैव भोगेन निर्विद्य तत्र स्थित्वा यतेत । **कथं ।** श्रीहरिगुरुचरणलक्षणं दुर्गं आश्रित एव सन् प्रबलान् अरीन् प्रति युध्येत । युद्धेन वैरिषु गतबलेषु सत्सु यथेच्छं विचरेदिति ॥ ७८ ॥

**स्वपुत्रेभ्य इमां गां यथादायं विभज्य भुक्तभोगां महिषीं मृतकमिव स महाविभूतिं अपहाय स्वयं निहितनिर्वेदो हृदि गृहीतरुचिर-**

Rarest Archive

**हरिविहारानुभवः भगवतो नारदस्य पदवीं अनुससार॥ ७९॥**
**।५।१।३८। (२३)**

तदेवं पितामहोपदेशं शिरसा अवधार्य यथास्वपित्रादेशं पृथिवीं अनुशास्य पुत्रान् उत्पाद्य स्थितस्य प्रियव्रतस्य प्रवृत्तिमाह॥ **स्वपुत्रेभ्य इति॥** अनेन पूर्ववयस्येव स्वहस्तगतस्य महासाम्राज्यस्य परित्यागो महाश्चर्यतरमिति पूर्वशङ्का अपहस्तिता वेदितव्या। एवं परित्यक्तराज्यस्यापि यत् कियद्दिनपरिपालनं तत् केवलं पितामहवचनगौरवेणेति सूचनाय मृतकं कुणपमिव अपहायेत्युक्तम्। दूरं गच्छन् किमपि पाथेयं गृहीत्वा गच्छति। अयं तु महाराजः कियद्द्रव्यं गृहीत्वा गतवान् इत्यतः इदमेकमेवेत्याह। हृदि गृहीतरुचिरहरिविहारानुभव इति। यथाहुः– ''भौमं दिव्यं मानुषं वा महित्वं योगकर्मजम्। यश्चक्रे निरयौपम्यं पौरुषं तु जनप्रियमि''ति॥ ७९॥

**कुत्राशिषः श्रुतिसुखा मृगतृष्णरूपाः**
**क्वेदं कलेवरमशेषरुजां विरोहम्।**
**निर्विद्यते न तु जनो यदपीति विद्वान्**
**कामानलं सुखलवैः शमयन् दुरापैः॥ ८०॥ ७।९।२५।(२४)**

यस्य श्रीपतिः नरहरिः स्वयमेव प्रसन्नः तस्य अलभ्यपुरुषार्थरहितस्यापि परमभागवतस्य प्रह्लादस्य वैराग्यं सर्वैरपि शिरसा श्लाघ्यतमं गर्भ एव भागवतोत्तमनारदानुग्रहासादितं दर्शयन् तद्वचनं पठति॥ **कुत्राशिष इति॥** श्रुती कर्णाविव सुखयन्तीति श्रुतिसुखाः ऊषरोदकसदृशाः रुजां रोगाणां उत्पत्तिस्थानं आशिषः कुत्र कलेवरं क्वेति विद्वानपि जनो नैव निर्विद्यते। कुतः यत् यतः कामलक्षणवह्निं सुखलवैः शमयन् आस्ते तत इति॥ ८०॥

Rarest Archiver

**जिह्वैकतोऽच्युत विकर्षति माऽवितृप्ता**
**शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् ।**
**घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्ति-**
**र्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ॥ ८१ ॥ ७।९।४०।(२५)**

विषयेषु शरीरेषु च हेयताहेतुं अल्पत्व-अत्यायाससाध्यत्व-रोगवत्त्वादिकं व्युत्पाद्य इन्द्रियेष्वपि तमाह ॥ **जिह्वेति** ॥ हे अच्युत अवितृप्ता जिह्वा एकतः एकस्मिन् विषये मा मां देहपतिं विकर्षति । अन्यतः अन्यत्र त्वक् । अपरत्र उदरं अशनायायाम् । श्रवणं श्रोत्रं कुतश्चित् कुत्रचित् । चपला चञ्चला दृक् चक्षुः क्व च कस्मिंश्चित् । कर्मशक्तिः कर्मेन्द्रियाणि केषुचित् । कथमिव । बह्व्यः सपत्न्यः गेहपतिं स्वपतिं लुनन्ति विकर्षन्ति इव तद्वत् इति । अनेन सपत्नीवत् इतस्ततो विकर्षकत्वमेव हेतुनित्युक्तं भवति ॥ ८१ ॥

**किमात्मना तेन जहाति यो मुदं किं रिक्थहारैः स्वजनाख्यदस्युभिः ।**
**किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैर्यदिहायुषो व्ययः ॥ ८२ ॥**
**।८।२१।९। (२६)**

इदानीं वामनाख्यस्य हरेः अनुग्रहगस्य मुख्यं पात्रं अत एव अद्यापि यस्य द्वारि गदापाणिः स्वयमेव अवतिष्ठते । तादृशोऽपि बलिः महाभागवतोऽपि वैराग्यमेव अवलम्बत इत्याशयेन तद्वाक्यमेवोदाहरति । **किमिति** ॥ यः देहस्वामी मुदं सुखमुद्दिश्य प्रयतमानः येन पतता देहेन मुदं उद्देश्यां जहाति न प्राप्नोति । तेन केवलं नश्वरेण तस्य पुंसः किं प्रयोजनम् । तत्सम्बन्धिष्वपि अधिकया संसृतिहेतुभूतया जाययापि किं प्रयोजनम् । रिक्थं पित्रार्जितं धनं हरन्ति एतैः पुत्रादिस्वजनाख्यचोरैरपि किं प्रयोजनम् । तथा मर्त्यस्य अल्पायुषः

Rarest Archiver

पुंसः इह अस्मिन्नेवायुषि यैः आयुषो व्ययः तैः गेहैः किं प्रयोजनम्। अतोऽयमतिहेय इति ॥ ८२ ॥

**अथाहमप्यात्मरिपोस्तवान्तिकं दैवेन नीतः प्रसभं त्याजितश्रीः।**
**इदं कृतान्तान्तिकवर्ति जीवितं ययाऽध्रुवं स्तब्धमतिर्न बुध्यते॥८३॥**
**।८।२०।४४। (२७)**

यस्मादेवं संसारोऽतिहेयः तस्मात् मयैव त्याज्यः तत्र भवानेव ऐश्वर्यं गृहीतवान् तत्केवलं मय्यनुग्रह एवेत्याशयेनाह ॥ **अथेति** ॥ इदानीं अहं आत्मनः रिपोः तव अन्तिकं दैवेन त्याजिता श्रीर्यस्य तादृशो भूत्वा प्रसभं बलात्कृत्य नीतः प्रापितः एतद्युक्तमेवेति हृदयम्। कुतः। यया श्रिया मोहितमतिः इदं जीवितं यमस्य समीप एव विद्यमानं अध्रुवं न जानाति तत इति ॥ ८३ ॥

**गृहेषु दारेषु सुतेषु बन्धुषु द्विपोत्तमस्यन्दनवाजिपत्तिषु।**
**अक्षय्यरत्नाभरणाम्बरादिष्वनन्तकोशेष्वकरोदसन्मतिम् ॥ ८४ ॥**
**।९।६।१५। (२८)**

यस्य भक्त्या प्रीतो भगवान् हरिः सुदर्शनं स्वीयं आयुधमेव तद्रक्षणाय अस्मै ददौ। **यथाहु—** ''तस्मा अदाद्धरिश्चक्रं प्रत्यनीकभयापहम्। एकान्तभक्तियोगेन प्रीतो भूत्वाऽभिरक्षणमि''ति॥ ९।६।१६। तादृशोऽपि महाभागवतः अम्बरीषो नाम राजापि विरागवृक्षच्छायामेव समाश्रित इति तत्प्रवृत्तिप्रकारं कथयति॥ **गृहेष्विति॥** स्यन्दना रथाः। पत्तयः पदातयः। अक्षय्याणि रत्नादीनि येषु तेषु। अत एव अनन्तेषु बहुव्ययेऽपि अक्षीयमाणेषु असत् नश्वरत्वात् हेयमिति मतिं अकरोदिति ॥ ८४ ॥

Rarest Archive

**आस्यस्त्र्यपत्यसुहृदो बलमृद्धकोश-**
**मन्तःपुरं परिविहारभुवश्च रम्याः ।**
**भूमण्डलं जलधिमेखलमाकलय्य**
**कालोपसृष्टमिति स प्रययौ विशालाम्　　॥ ८५ ॥**
**। ४ । १२ । १६ । (२९)**

येन पञ्चवर्षेण बालकेन श्रीहरिः प्रसादितः सम्पादितं च ध्रुवपदं सोऽपि परमभागवतो ध्रुवो महाराजो वैराग्यभाग्यमेव भेजे इति तत्प्रवृत्तिं दर्शयति ॥ **आत्मेति** ॥ आत्मा देहः बलं सैन्यं समुद्रपरिखं भूमण्डलं कालेन नाश्यमिति ज्ञात्वा । विशालां नदीं ॥ ८५ ॥

**वयं पुरा श्रीमदनष्टबुद्धयो जिहीर्षयास्या इतरेतरस्पृधः ।**
**घ्नन्तः प्रजाः स्वा अपि निर्घृणाः प्रभो मृत्युं परं त्वामगणय्य दुर्मदाः**
**॥ ८६ ॥ १० । ८१ । १२ । (३०)**

**त एव कृष्णाऽद्य गभीररंहसा दुरन्तवीर्येण विचालिताः श्रिया ।**
**कालेन तद्वै भवतोऽनुकम्पया विनष्टदर्पाश्चरणौ स्मरामहे　॥ ८७ ॥**
**। १० । ८१ । १३ । (३१)**

किं बहुना सर्वेऽपि राजानो महाभागवता वैराग्यपदवीं अनुसृता इत्याशयेन तद्वचनं उदाहरति ॥ वयमिति ॥ अस्याः भूमेः ॥ ८६ ॥

ये वयं पुरा त्वां अगणय्य स्थिताः त एव वयं अद्य यतः श्रिया विचालिताः ततः तस्मात्तव चरणौ स्मरामहे इति। **यथाहुः—** ''नैव नाथाऽभ्यसूयामो मागधं मधुसूदन। अनुग्रहो यद्भवतो राज्ञां राज्यच्युतिर्विभो ॥

Rarest Archiver

राज्यैश्वर्यमदोन्नद्धा न श्रेयो विन्दते नृपाः। त्वन्मायामोहिता नित्यं मन्यन्ते सम्पदोऽचलाः'' इति ॥ १०।८१।९-१० ॥ ८७ ॥

**अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य।**
**अन्तर्जले वारिचरप्रसङ्गात् प्रस्रावितं ब्रह्म चिरं धृतं यत् ॥ ८८ ॥**
**।९।७।५१। (३२)**

न केवलं राजान एव वैराग्यमाश्रिताः किन्तु राजभोगाधिकभोगा ऋषयोऽपीत्याशयेन ऋषिप्रवरस्य सौभरेः विरागप्रकारं दर्शयति ॥ **अहो इति ॥** **यथाहुः—** ''यद्गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवतीपतिः। विस्मितः [1]स्तम्भमजहात् सार्वभौमश्रियान्वित''मिति ।९।७।४८। वारिचरः मीनः। यच्चिरं धृतं [2]ब्रह्म तत्प्रस्रावितं त्याजितं इति यत् इमं मे विनाशं पुरुषार्थनाशकरं पश्यत। अहो आश्चर्यमेतत् ॥ ८८ ॥

**एकस्तपस्व्यहमथाम्भसि मत्स्यसङ्गात्**
**पञ्चाशताथ सुतपञ्चसहस्रसङ्गः।**
**नान्तं व्रजाम्युभयकृत्यमनोरथानां**
**मायागुणैर्हृतमतिर्विषयेऽर्थभावः॥ ८९ ॥ ९। ७। ५३। (३३)**

तमेव नाशप्रकारं विशदयति ॥ **एक इति।** आदौ अथ अनन्तरं पञ्चाशता भार्याणां युक्तः अथ सुतानां पञ्चसहस्रेण सङ्गतवान्। उभयेषां पुत्राणां पुत्रीणां च तत्तद्योग्यकन्यावरादिसम्पादनाख्यकार्यरूपमनोरथानां अन्तं न

---

१. स्तम्भमहङ्कारनिमित्तं कर्तव्याकरणलक्षणमिति विजयध्वजीये।

२. ब्रह्म तपः इति विजयध्वजीये।

Rarest Archiver

व्रजामि। विषये जात्येकवचनं विषयेषु। अर्थभावः पुरुषार्थसाधनत्वबुद्धिमान् ॥ ८९ ॥

**अहं पुरा भरतो नाम राजा विमुक्तदृष्टश्रुतसङ्गबन्धः।**
**आराधनं भगवत ईहमानो मृगोऽभवं मृगसङ्गाद्धतार्थः ॥ ९० ॥**

**।५।१२।१४। (३४)**

किमत्र वक्तव्यं देहानुबन्धिषु सजातीयेषु सङ्गो बन्धक इति। यावता विमुक्तदुस्त्यजसङ्गस्य महानुभावस्य परमभागवतस्य भरतस्य विजातीयहरिण-शिशुसङ्गोऽपि बन्धको बभूवेत्याशयेन भरतराजस्य वृत्तान्तं तेनैव जन्मान्तरे प्रोक्तं कथयति ॥ **अहमिति** ॥ रहूगणं प्रति अवधूतवचनमेतत्। हे वीर रहूगण विमुक्तः दृष्टश्रुतयोः ऐहिकपारत्रिकयोः पुरषार्थयोः स्नेहाख्यो बन्धो येन सः। ईहमानः इच्छन् वनं गतः तत्र यस्मात् मृगसङ्गात् हतस्वार्थः मृगत्वं प्राप्तः ॥ ९० ॥

**सा मां स्मृतिर्मृगदेहेऽपि वीर कृष्णार्चनप्रभवा नो जहाति।**
**अथो अहं जनसङ्गाद्विमुक्तो विशङ्कमानोऽवधूतश्चरामि ॥ ९१ ॥**

**।५।१२।१५। (३५)**

तत्र गर्हिते मृगदेहे पूर्वजन्मनि कृतात् हर्यर्चनात् उदिता सा जन्मान्तरविषयिणी स्मृतिः मां न तत्याज। तस्मादेव अहं विमुक्तोऽपि जनसङ्गाद्विशङ्कमानः तत एव अवधूतः अज्ञातलिङ्गो भूत्वा चरामि भुवीति। अत एव इमं विशेषं सूचयितुं राजसु अनुक्त्वा अत्रोक्तिरिति ज्ञेयम्॥ ९१ ॥

Rarest Archiver

**योषित्सु तल्पाभरणाम्बरादिद्रव्येषु मायारचितेषु मूढः ।**
**प्रलोभितात्मा ह्युपभोगबुद्ध्या पतङ्गवन्नश्यति नष्टदृष्टिः ॥ ९२ ॥**

। ११ । ८ । ८ (३६)

एवमपि यस्य वैराग्यं नोपपद्यते तस्य जन्म वेश्याया अपि निकृष्टमिति भावेन, पिङ्गलानाम्नी विदेहराजस्य पुरे स्थिता तस्याः विरक्तिप्रकारं वर्णयति **पद्यचतुष्टयेन।** तत्रादौ स्वविषये प्रसज्जमानान् पुरुषान् धिक्करोति ॥ **योषित्स्विति** ॥ मोहकतया भगवता निर्मितासु योषित्सु तादृशेषु तल्पादिद्रव्येषु च विषयेषु शोभनत्वाध्यासेन अग्नौ शलभवत् भोगेच्छया प्रवर्तमानः पुरुषः नष्टस्वपुरुषार्थो भवति । ननु शास्त्रजन्ये तेष्वशोभनत्वज्ञाने जाग्रति कथमयं तत्र प्रवर्तेतेत्यत उक्तं नष्टदृष्टिरिति ॥ कुतस्तन्नाश इत्यतः उक्तं **प्रलोभितात्मेति** ॥ तत्तत्पदार्थगतसौन्दर्यसौलक्षण्यादिभावैः विमोहितमनस्त्वादिति । एतच्च मदुक्तं शास्त्रानुभवादिना प्रसिद्धमिति हिशब्देनाह । यत एवं अतः ईदृशानां जन्म धिगिति पुरुषपदं अप्रयुज्य मूढपदप्रयोगेण सूचयतीति । **यथाहुः**— "दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेन्द्रियः । प्रलोभितः पतत्यन्धे तमस्यग्नौ पतङ्गवदि"ति । "अहो सुभद्रं सुनसं सुस्मितं च मुखं स्त्रियः । त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ । विण्मूत्रपूये रमतां कृमीणां कियदन्तरमि"ति ॥ ११।८।७॥ ९२ ॥

**सन्तं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय ।**
**अकामदं दुःखभयातिशोकमोहप्रदं तुच्छमहं भजेऽज्ञा ॥ ९३ ॥**

। ११ । ८ । ३० । (३७)

आस्तां तच्चिन्ता, ममैव जन्म धिगित्याशयेनाह ॥ **सन्तमिति** ॥ समीपे सन्तं नित्यं रतिप्रदं । वित्तं अपेक्षितं प्रददातीति । नित्यं मृतिरहितम् । इमं ईदृशं

Rarest Archiver

रमणं पतिं विहाय। कामं अपेक्षितं न ददातीत्यकामदम्। प्रत्युत स्वस्य विपदादिना दुःखादिप्रदम्। अत एव तुच्छं हेयं रमणपदवाच्यम्। अज्ञा मुख्यपतिज्ञानशून्या अहं भजे सेव इति ॥ ९३ ॥

**अहो मयात्मा परितापितो वृथा साङ्केत्यवृत्त्याऽतिविगर्ह्यवार्तया।**
**स्त्रैणान्नरांश्चार्थतृषाऽनुशोच्यान् क्रीत्वेह वित्तं रतिमात्मनेच्छती ॥**
**९४ ॥ ११ । ८ । ३१ । (३८)**

कृतस्य पापस्य पश्चात्तापे सत्येव प्रायश्चित्तेन शुद्धिरिति भावेन तस्याः पश्चात्तापप्रकारं दर्शयति। **अहो इति** ॥ आत्मा मनः। प्रयोजनं विनैव परितापितः। ननु वृथैवेत्यनुपपन्नं, वित्तलाभादेः प्रयोजनस्य सद्भावादित्यतः। सत्यं। तस्य अज्ञानदशायां प्रयोजनत्वेऽपि इदानीं अप्रयोजनत्वादित्याशयेन पूर्वतनवृत्तिविषयप्रयोजनानि विनिन्दतीत्याह ॥ **साङ्केत्येति** ॥ यतः अतिविगर्ह्या वार्ता किंवदन्ती यस्याः सा तया। साङ्केत्यं सङ्केतप्राप्यद्रव्यं तेन वृत्तिः आजीविका तया। इह वित्तं उद्दिश्य आत्मना देहेन, अर्थतृषा विषयतृष्णयैव अनुशोच्यान् स्त्रैणान् नरान् क्रीत्वा रतिं सुखं इच्छती अभवं तत इति। अहो इति खेदे। तेन पश्चात्तापं ध्वनयति ॥ ९४ ॥

**यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचारोमनखैः पिनद्धम्।**
**क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं मदुपैति काऽन्या ॥ ९५ ॥**
**। ११ । ८ । ३२ । (३९)**

ननु नित्यरमणज्ञानाभावेन अनित्यरमणं सेवितवतीति प्रागभिहितम्। तदयुक्तं। तस्यापि देहसद्भावे अनित्यत्वप्रसङ्गात्। तदभावे सौन्दर्यसौलक्षण्याद्यभावेन सौन्दर्याद्युपेतदेहादियुक्तपुरुषपरित्यागेन तादृशपुरुषोपसत्त्ययोगात्

Rarest Archiver

इत्युभयथा च दोषादिति चेत्। मैवम्। देहवत्त्वाङ्गीकारेण द्वितीयपक्षोक्तदोषाभावात्। न च प्रथमपक्षोक्तदोषः। देहवत्त्वमात्रस्य अनित्यत्वप्रसञ्जकत्वाभावात्। भौतिकदेहवत्त्वस्य सदेहः सुखगन्धश्चेति प्रमाणबाधितत्वात्। स्वयं देहनाशादिरूपसंसारोपेतस्य मोचकत्वायोगाच्च। एतदर्थमेव च प्राग्वित्तप्रदमित्युक्तम्। स च देहः नखमारभ्य आकेशं निरुपमनिरवधिकानन्दाद्यात्मकतया तादृशसौन्दर्यसौलक्षण्याद्युपेत इति स एव ज्ञानदशायां भजनीयः। तदेतत्सूचयितुं रतिप्रदमित्युक्तम्। ततोऽन्येषां तु भौतिकशरीरत्वेन अनित्यत्वमेवेत्यतो हेयत्वमेवेत्यतः ते न ज्ञानदशायां भजनीया इत्याशयेन भागवतं स्वरूपं अजानद्भिः भजनीया देहाः ईदृशसौन्दर्याद्युपेता इत्याह ॥ **यदस्थिभिरिति** ॥ बहिः त्वचारोमभिः नखैः पिनद्धं आच्छादितम्। अन्तः वंशाः वेणवः वंश्याः वंशप्रोताः तिरश्चीनावेणवः, स्थूणा सर्वाधारो महान् वंशः अस्थिभिः निर्मिता वंशादयो यस्मिन्। क्षरन्ति स्रवन्ति नवद्वाराणि यस्य तत्। ईदृशं अगारं गृहं मत्तो ज्ञानशून्या या अन्या का स्त्री शोभनतया स्वीकुर्यादिति ॥ ९५ ॥

**सङ्गं न कुर्यात् प्रमदासु जातु योगस्य पारं परमारुरुक्षुः।**
**मत्सेवया प्रतिलब्धात्मलाभो वदन्ति या निरयद्वारमस्य ॥ ९६ ॥**
**। ३ । ३२ । ४१ । (४०)**

तदेवं निरूपितवैराग्यमुपसंहरति ॥ **सङ्गमिति** ॥ ज्ञानिनः याः अस्य पुंसः निरयद्वारं वदन्ति तासु प्रमदासु जातु कदापि सङ्गं स्नेहं न कुर्यात्। सङ्गकरणे स्वपुरुषार्थहानिः स्यात् इत्यभिप्रेत्योक्तं **योगस्य पारं परमारुरुक्षुरिति** ॥ प्रतिबन्धकमिदं। साधकं किम् ? इत्यत उक्तम् **मत्सेवयेति** ॥ आत्मलाभः पुरुषार्थलाभः। **यथाहुः—** ''न तथास्य भवेन्मोहो बन्धश्चान्यप्रसङ्गतः।

Rarest Archive

योषित्सङ्गाद्यथा पुंसो यथा तत्सङ्गिसङ्गतः'' ॥ ३ । ३२ । ३ ॥ ९६ ॥

**रायः कलत्रं पशवः सुतादयो गृहा मही कुञ्जरकोशभूतयः ।**
**सर्वेऽर्थकामाः क्षणभङ्गुरायुषः कुर्वन्ति मर्त्यस्य कियत्प्रियं चलाः ॥**
**९७ ॥ ७ । ७ । ४१ । (४१)**

बन्धकेषु विषयेषु श्रेष्ठं द्वयं कान्ता कनकं च। तत्र आद्ये सङ्गः परित्याज्यः इत्यभिधाय द्वितीयेऽप्याह ॥ **राय इति** ॥ रायः धनानि। भूतिः अलङ्कारादिः । इत्येवं सर्वे अर्थाः विषयाः कामाः तद्भोगाश्च । अतः तत्परित्याग एव वरीयानिति भावः । **यथाहुः**— ''स्तेयं हिंसाऽनृतं दंभः कामः क्रोधः स्मयो मदः । भेदो वैरमविश्वासः संस्पर्धा व्यसनानि च ॥ एते त्रयोदशाऽनर्था अर्थमूला मता नृणाम्। तस्मादनर्थमर्थाख्यं श्रेयोर्थी दूरतस्त्यजेदि''ति । ''नित्यार्तिदेन वित्तेन दुर्लभेनात्ममृत्युना । गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलै''रिति ॥ ९७ ॥

**क्षुद्रं चरं सुमनसां शरणे मथित्वा**
**रक्तं षडङ्घ्रिगणसामसु लुब्धकर्णम् ।**
**अग्रे वृकानसुहृतोऽविगणय्य यान्तं**
**पृष्ठे मृगं मृगयुलुब्धकबाणभिन्नम् ॥ ९८ ॥ ४ । २९ । ५४ ।(४२)**

**अस्यार्थः। सुमनसां सुमनःसधर्माणां स्त्रीणां शरणे आश्रमे पुष्पमधुगन्धवत् क्षुद्रतमं काम्यकर्मविपाकजं कामसुखलवं जैह्वयोपस्थ्यादि विचिन्वन्तं मिथुनीभूय तदभिनिवेशितमनसं षडङ्घ्रिगणसामगीतवत् अतिमनोहरवनितादिजनालापेषु अतितरां अतिप्रलोभितकर्णं अग्रे वृकयूथवत् आत्मनः आयुर्हरतोऽहोरात्रांस्तान् कालविशेषान् अविगणय्य गृहेषु विहरन्तं**

Rarest Archive

**पृष्ठतः परोक्षं अनुप्रवृत्तः लुब्धकः कृतान्तः शरेण यं इह पराविध्यति तमिमं आत्मानं अहो राजन् भिन्नहृदयं द्रष्टुमर्हसीति यथा मृगयुहतं मृगमिति ॥ ९८ ॥ ४।२९।५४। (४२)**

तदेवं व्युत्पादिते अर्थे अत्यादरजननाय नारदेन परमरहस्यतया उक्तं प्रमेयं प्रतिपादयत् पद्यं फलितार्थकथनपरं पठति ॥ **क्षुद्रमिति** ॥ दुर्गमार्थत्वात् स्वयमेव विवृणोति । **अस्यार्थ इति** ॥ सुमनसामित्येतत् न पुष्पबोधकं किन्तु तत्सधर्माणां इति भावेन तद्व्याचष्टे ॥ **सुमनसां सुमनःसमानधर्माणामिति** ॥ स कः समानो धर्मः इत्यतः कोमलतरावयवत्वमेवेत्याशयेन तद्विवक्षितमर्थं दर्शयति । **स्त्रीणामिति** ॥ शरणं इत्यनूद्य अर्थमाह । **आश्रम इति** ॥ क्षुद्रपदाभिमतमर्थं दर्शयति ॥ **क्षुद्रतममिति** ॥ अल्पतममित्यर्थः । बुद्ध्यारोहाय तत्र दृष्टान्तमाह ॥ **पुष्पमधुगन्धवदिति** ॥ किं तत्पुष्पगन्धवत् क्षुद्रतममित्यत आह ॥ **कामसुखलवमिति** ॥ विषयसुखलेशमित्यर्थ । बुद्ध्यारोहाय वा सर्वानुभवसिद्धमिति वा आह । **जैह्व्योपस्थ्यादीति** ॥ जिह्वोपस्थविषयम् । चरमित्यस्यार्थः **विचिन्वन्तमिति ।** वैषयिकसुखेच्छया गवेषणं न सतां मनोज्ञम् । तस्य कालत एव लभ्यत्वादित्याशयेनोक्तम् ॥ **काम्यकर्मविपाकजमिति** ॥ जन्मान्तरे कृतकाम्यकर्मपरिपाककालेन जायमानमित्यर्थः । मथित्वेत्यस्य तात्पर्यमाह । **मिथुनीभूयेति** ॥ रक्तपदं व्याचष्टे। **तदभिनिवेशितमनसमिति** ॥ सामपदार्थकथनं **गीतेति** ॥ सामपदमपि सुमनःपदवत् समानधर्मबोधकमित्याह ॥ **वदिति** ॥ तं दर्शयति ॥ **अतिमनोहरेति** ॥ तत्स्वरूपं दर्शयति ॥ **वनितादिजनालापेष्विति** ॥ तैः सह रहोरचितसँल्लापेष्वित्यर्थः । लुब्धकर्णमित्यस्य अभिप्रेतार्थमाह ॥ **अतितरामतिप्रलोभितकर्णमिति** ॥ अग्रे वृकानित्येतदपि समानधर्मवद्बोधकमित्याशयेनोक्तम् **अग्रे वृकयूथवदिति** ॥ असुहृत इत्यस्यार्थः **आत्मन आयुर्हरत इति** ॥ अनेन

Rarest Archiver

अनिष्टकारित्वं समानो धर्मः इति सूचयति ।। तत्स्वरूपमाह ।। **अहोरात्रानिति ।।** एतस्य अविगणय्येत्यनेन अन्वयप्रदर्शनेन द्वितीयान्तत्वं व्यनक्ति ॥ **तान् कालविशेषानविगणय्येति ।।** यान्तमित्यस्यान्वयप्रदर्शनपूर्व-कमर्थमाह ।। **गृहेषु विहरन्तमिति ।।** पृष्ठ इत्यत्र निमित्तसप्तमीति प्रतीतिं निवारयति। **पृष्ठत इति ।।** फलितार्थं दर्शयति। **परोक्षमिति।** तस्य लुब्धकपदेनान्वयमाह। **अनुप्रवृत्तो लुब्धक इति।** लुब्धकबाणभिन्नमित्यत्र भेदेन संबन्धिद्वयं प्रतीयते। तत्र उभयस्य कर्तृत्वं करणत्वं वा विरुद्धं इति एकस्य कर्तृत्वं अपरस्य करणत्वं इत्येव वाच्यम्। तत्र कः कर्ता, किं करणं इत्यतो यथायोग्यं तदुभयं प्रदर्शयति ।। **कृतान्तः शरेणेति ।।** एतेन लुब्धकपदमपि मारकत्वरूपसमानधर्मवत्परमिति सूचयति। उक्तमर्थं निगमयति ॥ **हे राजन् इति ।।** उक्तप्रकारेण यं पराविध्यति तं इमं आत्मानम्। भिन्नमित्यस्यार्थः **भिन्नहृदयमिति ।।** ईदृशं ज्ञातुमर्हसीति। मृगमित्यस्य लुप्तोपमत्वं मृगयुपदस्य भिन्नमित्यनेन अन्वयं चाभिप्रेत्य व्याचष्टे ।। **यथेति ।।** इतिशब्दस्य अस्यार्थ इति पूर्वेणान्वयः ॥ **इदमुदितं भवति**—यथा हि पुष्पवने कश्चन मृगः पुष्पगन्धं मधुकरशब्दं बालतृणादिकं स्वजातीयस्त्रीसम्भोगादिकं च ईहमानः तत्र तत्र परिभ्रमन् तत्सर्वं प्राप्य तत्रैव निरतसर्वेन्द्रियव्यापारः स्वस्य पश्चात् स्थितं मृगयुं अग्रे स्थितान् वृकांश्च अविगणय्य विहरन् तेन हतो भवति। तथा जीवोऽपि पारोक्ष्येणैव स्थितं मृत्युं अहोरात्राभ्यां गच्छदायुश्च अविगणय्य जैह्व्यौपस्थ्यादिनिरतः सहसैव मृत्युं आपद्यत इति ।। ९८ ।।

**स त्वं विचक्ष्व मृगचेष्टितमात्मनोऽन्त**
**श्चित्तं नियच्छ हृदि कर्णधुनीं च चित्तिम्।**
**जह्यङ्गनाश्रममसत्तमयूथगाथं प्रीणीहि**
**हंसशरणं विरम क्रमेण** ।। ९९ ।। । ४ । २९ । ५७ । (४३)

Rarest Archiver

तदेवं निरूपितफलार्थानुवादपूर्वकं मुमुक्षुणा अवश्यं साध्यमपि सूचयन् उपसंहरति ॥ **स त्वमिति** ॥ यः पूर्वं कर्मठः सः त्वं आत्मनः तव चेष्टितं सर्वमपि मृगचेष्टितं तत्सदृशं जानीहि। अत एव आसन्नमृत्युत्वात् आत्मनः चित्तं हरौ नियच्छ। चित्तिं बुद्धिं च कर्णयोः तद्विषयेष्वेव विहरन्तीं तत्रैव नियच्छ। असत्तमानां यूथैः गाथं उपादेयतया श्लाघितम्। अङ्गनानां भ्रमं विलासं त्यज। परमहंसानां आश्रयं प्रीणीहि। भागवतधर्मं अनुष्ठाय तत्प्रीतिं सम्पादयेति हृदयम्। क्रमेण विरम विरक्तो भव। ततः क्रमेण विरम संसारात् मुक्तो भवेति ॥ ९९ ॥

**कथा इमास्ते कथिता महीयसां विताय लोकेषु यशः परेयुषाम्।**
**विज्ञानवैराग्यविवक्षया विभो वचोविभूतीर्न तु पारमार्थ्यम्॥ १०० ॥**
**। १२ । ३ । १४ । (४४)**

ननु प्रथमप्रकरणे अत्र श्रीहरिरेव अनुपदं प्रतिपाद्यते इत्युक्तम्। इदानीं दृष्टान्ततया बहव उदाहृताः तेन ज्ञायते अन्येऽप्यत्र प्रतिपाद्यन्त इत्यतः कथं न विरोध इत्यत आह॥ **कथा इति** ॥ हे विभो राजन् ते तुभ्यं इह लोकेषु देशेषु यशो विताय विस्तृत्य परेयुषां परलोकं प्राप्तानां महीयसां महत्तमानां याः कथाः कथिताः इमाः कर्म। विज्ञानवैराग्यविवक्षया विज्ञानपदेन भक्तिरपि विवक्षिता ज्ञानभक्तिवैराग्याणि भवन्तु इत्यभिप्रायेणैव। वचोविभूतीः अस्मदीयवचसां विभूतीः विशेषेण विषयभूता विद्धीति। न तु पारमार्थ्यं न तु तेषां मुख्योद्देश्यत्वम्। तादृशस्तु हरिरेव। **इदमुदितं भवति—** त्रिविधा हि भागवताः अदृढविरागाः। दृढविरागा अपि अविशदबोधाः विशदबोधा अपि अविशदभक्तय इति। तेषां विरागादिदाढर्यादिप्राप्तये राजकथामिषेण तादृशानि साधनानि निरूप्यन्ते। अतः भक्त्यादीनामेव अस्मन्निरूपणविषयता। न तु

Rarest Archiver

तेषाम्। बाहुल्येन तेषामुक्तिस्तु नास्त्येवेति प्रागेव प्रतिपादितम्। क्वचित्तदुक्तिरपि भगवद्भक्त्यादिविवक्षयैव तादर्थ्येनेति। हरिरेव पुनः पुनः पठित इति न कोऽपि विरोध इति॥ १००॥

**या निर्वृतिस्तनुभृतां तव पादपद्म**
**ध्यानाद् भवज्जनकथाश्रवणेन वा स्यात्।**
**सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्**
**किम्वन्तकासिलुलितात् पततां विमानात्　　॥ १०१॥**

**। ४। १०। १०। (४५)**

**॥ इति भागवतसारोद्धारे वैराग्यप्रकरणम्॥ ५॥**

किञ्च केषाञ्चिद्भागवतानां आदिराजकथाश्रवणमात्रेण मुक्तेरप्यधिकः आनन्दो भवति। तथा तन्महिमाश्रवणेन प्रीतो भगवान् अनुगृह्णाति च। इत्यत आनन्दादिप्राप्तये कुत्रचित् तत्कथावर्णनमिति भावेनाह॥ **या निर्वृतिरिति**॥ हे नाथ भवतो जनानां भागवतानां कथाश्रवणेन तनुभृतां केषाञ्चित् या निर्वृतिः स्यात् भवेत्, सा अन्येषां तनुभृतां भवत्कथाश्रवणेनापि न भवेत्। या च निर्वृतिः अन्येषां भवत्कथाश्रवणेन स्यात्, सा अपरेषां तव पादपद्मध्यानादपि मा भूत्। या निर्वृतिः परेषां तव पादपद्मध्यानात् स्यात्, सा क्वचित् पुंसि स्वे महिम्नि ज्ञानानन्दादिरूपे स्थिते मुक्ते ब्रह्मणि जीवे अधिकारिविशेषे मा भूत्। इति यदा तदा अन्तकस्य मृत्योः असिना खड्गेन लुलितात् कम्पितात् विमानात् पततां स्वर्गिणां तनुभृतां केवलं देहधारिणां सा निर्वृतिः मा भूदिति किमु वाच्यमिति। **यथाहुः**— ''यद्येषोपरता देवी माया वैशारदी मतिः। सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते'' इति। ''इति कौषारवाख्यातामाश्रुत्य भगवत्कथाम्। क्षत्ताऽऽनन्दं परं लेभे महाभागवतो नृप। अन्येषां

Rarest Archive

पुण्यश्लोकानामुद्दामयशसां सताम्। उपश्रुत्य भवेन्मोदः श्रीवत्साङ्कस्य किं पुनः ॥'' इति च। तदनेन वैराग्यस्य ज्ञानादिशुभगुणस्थिरीकरणहेतुतया महापुरुषार्थसाधनत्वेन सकलभागवतोत्तमैः स्वीकृतत्वेन च अवश्यं तत्र अवहितैर्भाव्यं इति सूचनेन सकलभागवतधर्माणां पीठरूपोऽत एव आदिमो गुणेष्वसङ्गरूपो वैराग्यापरपर्यायो भागवतधर्मः सूचितो भवति ॥ १०१ ॥

**॥ इति श्रीमदवधूतशिरोमणिजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां वैराग्यप्रकरणम् ॥ ५ ॥**

Rarest Archive

## महत्समागमप्रकरणम् ॥ ६ ॥

**धनं हि धर्मैकफलं यतोऽस्य ज्ञानं सविज्ञानमनु प्रशान्तिः ।**
**गृहेषु युञ्जन्ति कलेवरस्य मृत्युं न पश्यन्ति दुरन्तवीर्यम् ॥ १०२ ॥**
**। ११ । ५ । १२ । (१)**

एवं जातविरागस्यापि पुंसो विना महत्समागमं न किञ्चित्साधनं सिध्यतीत्यतः तत्समागमं सहेतुकं वक्तुं तत्रादरजननाय विपक्षे बाधकं तावदुपन्यस्यति ॥ **धनं हीति** ॥ यतो यस्मात् धनं धर्म एव एकं मुख्यं फलं यस्य तत् । अस्य धर्मस्य च मुख्यं फलं ज्ञानमेव । तस्य च मुख्यं फलं विज्ञानमेवेत्याशयेन सविज्ञानमिति विशेषितम् । विज्ञानस्य च मुख्यं फलं अनु विज्ञानमनुसृत्यैव प्रकृष्टा शान्तिर्मोक्ष इति निर्णयः । अतोऽनेन मोक्ष एव सम्पाद्यः । एवं उपदेशकानां महतां समागमाभावे ईदृशं महाफलसाधनमपि धनं कलेवरस्यार्थे गृहेषु असत्कुटुम्बेष्वेव युञ्जन्ति विनियोगं कृत्वा तत्रैव सक्ता भवन्ति । दुरन्तवीर्यं समीपस्थं मृत्युं न पश्यन्ति ॥ १०२ ॥

**लोको विकर्मनिरतः कुशले प्रमत्तः**
**कर्मण्ययं त्वदुदिते भवदर्चने स्वे ।**
**यस्तावदस्य बलवानिह जीविताशां**
**सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै ॥ १०३ ॥**
**। ३ । १० । १७ । (२)**

ततश्च एवं भवतीत्याह ॥ **लोक इति** ॥ इह कर्मसाधने भारतखण्डे अयं ब्राह्मणादिकुलोत्पन्नः लोकः जनः धनं हि धर्मैकफलमित्युक्तदिशा त्वयोदिते

Rarest Archive

त्वत्पूजारूपे स्वपुरुषार्थ साधने कर्मणि प्रमत्तः सन् तद्विरुद्धे कुटुम्बपोषणादिरूपे कर्मणि नितरां रतो भवति। किमेवमुक्तानुवादेनेत्यत उक्तम् ॥ **यस्तावदिति** ॥ एवं यः वर्तते अस्य लोकस्य परलोके भवद्दुःखं तावदस्तु सद्यः जीवितस्य जीवनस्य आशामेव बलवान् यः कालनामा भगवान् सः छिनत्ति। तस्मै निमेषादिकालकृतविकाररहिताय नमोऽस्त्विति। **यथाहुः—** ''लब्ध्वा जन्मान्तरप्रार्थ्यं मानुष्यं तद्द्विजाग्र्यताम्। तदनादृत्य ये सर्वं घ्नन्ति यान्त्यशुभां गतिम् ॥ स्वर्गापवर्गयोर्द्वारं प्राप्य लोकमिमं पुमान्। द्रविणे कोऽनुषज्जेत मर्त्योऽनर्थस्य धामनि ॥ देवर्षिपितृभूतानि ज्ञातीनन्यांश्च भागिनः। असंविभज्य चात्मानं यक्षवित्तः पतत्यधः ॥ तस्मात्सङ्क्लिश्यते विद्वान् व्यर्थयार्थेहयाऽसकृत्। कस्यचिन्मायया नूनं लोकोऽयं सुविमोहित'' इति। तदनेन श्लोकद्वयेन सत्समागमाभावे यथोक्तसाधनं परित्यज्य विपरीतकार्यनिरतत्वं जनस्य भवतीति कथनेन आतिथ्यपदोदितो यथार्हतो भूतेभ्योऽन्नादिविभजनरूपः परार्थेहापदप्रतिपादितो नृणां विपर्ययेहेक्षाऽपरपर्यायो मनोवाक्कायदण्डरूपश्च भागवतो धर्मः सम्पादनीय इति सूचितं भवति। अर्थसंविभजनाभावे नारकदुःखविशेषश्च नामप्रशंसाप्रकरणे वक्ष्यत इति ॥ १०३ ॥

**जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य।**
**अनुग्रहायेह चरन्ति नूनं भूतानि भव्यानि जनार्दनस्य** ॥ १०४ ॥

। ३ । ५ । ३ । (३)

एवमुपदेशकानां महतां समागमाभावे बाधकं भवदुपपाद्य अधुना तत्समागमोऽपि दैववशादेव भवतीत्याह। **जनस्येति** ॥ उपदेशकाभावेन कृष्णाद्विमुखस्य अत एव अधर्मशीलस्य तत एव अत्यन्तदुःखितस्य जनस्य उपदेशादिना अनुग्रहं कर्तुं जनार्दनस्य भगवतो दासभूतानि भव्यानि

Rarest Archive

मङ्गलकराणि भूतानि परमभागवतरूपाणि सत्वानि इह भारते खण्डे चरन्ति अटन्ति नूनम्। परन्तु दैवात् दैववशात् एव ईदृशस्य जनस्य समीपे चरन्ति आगच्छन्तीति ॥ १०४ ॥

**भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः ।**
**सत्सङ्गमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते रतिः ॥१०५॥**
**। १० । ५४ । ५५ । (४)**

एवं सत्समागमे दैवमेव हेतुरित्यभिधाय कृष्णाद्वैमुख्यं च जनस्य विना सत्समागमं न गच्छतीत्यतो मोचककाल एव तत्समागमो भवति नान्यदेत्याह ॥ **भवापवर्ग इति** ॥ हे अच्युत तर्हि तदैव सतामाश्रये त्वयि रतिः भक्तिः ॥ १०५ ॥

**सतां प्रसङ्गान्मम वीर्यसम्पदो भवन्ति हृत्कर्णरसायनाः कथाः ।**
**तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धावती भक्तिरनुक्रमिष्यति ॥ १०६ ॥**
**। ३ । २६ । २५ । (५)**

सत्समागमादपि न तात्कालिकात् नापि साक्षात् किन्तु बहुकालीनात् श्रवणादिद्वारैवेत्यभिप्रेत्य उक्तमुपपादयति। **सतामिति** ॥ प्रकृष्टात् बहुकालीनात् सङ्गात् सत्समागमात्। ननु पूर्वप्रकरणे सर्वसङ्गो वर्जनीय इत्यभिहितम्। तत्कथमुच्यते बहुदिनसङ्गः कार्य इति। सत्यं। भगवत्सेवाविरोधिषु वर्जनीय इति। एते तु तत्साधकतमा अवश्यं प्रार्थनीयसमागमाः दुःसङ्गदोषहराश्चेत्याशयेनोक्तं सतामिति ॥ हृत्कर्णरसायनाः हृत्कर्णयोः सुखप्रदाः। मम यानि वीर्याणि तान्येव सम्पदो यासु ताः मम

Rarest Archiver

कथास्तावत् सतां समीपे भवन्ति। किं ततः तासां कथानां जोषणात् सेवनात् अपवर्गप्रदे हरौ भक्तिः अनुक्रमिष्यति। भक्तिरपि कथाश्रवणेन न साक्षात् किन्तु वैमुख्यविरोधिश्रद्धाजननद्वारैवेत्याशयेन श्रद्धावतीति भक्तिर्विशेषिता। अवश्यं चैतदेवम्। अन्यथा तच्छ्रद्धया भगवद्धर्मचर्ययेत्यत्र भक्तिसाधनेषु श्रद्धापरिगणनमयुक्तं स्यात् इति मन्तव्यम्। **यथाहु—** "प्रसङ्गमजरं पाशमात्मनः कवयो विदुः। स एव साधुषु कृतो मोक्षद्वारमपावृतम्॥ ३॥ २६॥ २०॥ तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम्। अजातशत्रवः शान्ताः साधवः साधुभूषणाः॥ ३। २६। २१॥ मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम्। मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः॥ ३। २६। २२॥ मदाश्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च। तपन्ति विविधांस्तापानैका-त्म्यगतचेतसः[१]॥ ३। २६। २३॥ त एते साधवः साध्वि सर्वसङ्गविवर्जिताः। सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते॥ ३। २६। २४॥ संयोगः संसृतेर्हेतुरसत्सु विहितो धिया। स एव साधुषु कृतो निःसङ्गत्वाय कल्पत" इति॥ १०६॥

**भक्त्या पुमान् जातविराग ऐन्द्रियात् दृष्टश्रुतात्मद्रविणानुचिन्तया।**
**चित्तस्य यत्तो ग्रहणे योगयुक्तो यतिष्यते ऋजुभिर्योगमार्गैः॥ १०७॥**
**। ३। २६। २६। (६)**

तया भक्त्या च पुमान् ऐन्द्रियात् इन्द्रियैः सद्योऽनुभूयमानात् विषयात् जातविरागो भवति। ततो दृष्टानि श्रुतानि च यानि आत्मनां देहधारिणां

---

१. "एकः पूर्णो हरिर्नान्यस्तदन्ये तद्वशा मताः। इति ज्ञानं स्थिरं यत्तदैकात्म्यज्ञानमुच्यते" इति स्मृतेः। ऐकात्म्ये हरेः सर्वोत्तमत्वपूर्णत्वज्ञाने गतं स्थिरं स्थितं चेतो येषां ते तथोक्ताः इति **विजयध्वजतीर्थीये**।

Rarest Archiver

द्रविणानि सम्पदः तेषां अनुचिन्तया असारानित्यत्वानुसन्धानेन जातविरागः। ऐहिकामुष्मिकविषयविरक्त इति यावत्। ततश्चित्तस्य निग्रहणे विषये यत्तः अप्रमत्तो भवति। ततः स्वाधीनमनस्त्वरूपयोगयुक्तः सन् ऋजुभिः अवक्रगतिभिः योगमार्गैः भागवतधर्मानुष्ठानलक्षणैः भगवत्सेवार्थं यतिष्यते ॥ १०७ ॥

**असेवयाऽयं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृम्भितेन।**
**योगेन मय्यर्पितया च भक्त्या मां प्रत्यगात्मानमिहाऽवरुन्धे ॥१०८॥**
**। ३ । २६ । २७ । (७)**

प्रकृतेर्गुणानां प्रकृतिकार्याणां विषयाणां असेवया। उपलक्षणमेतत्। ग्राम्येहोपरमोपलक्षितभागवतधर्मानुष्ठानरूपेण योगेनोपोद्बलितं यद्वैराग्यं तेन वैराग्येण। विजृम्भितेन अभिवृद्धेन ज्ञानेन उपोद्बलिता या मय्यर्पिता भक्तिः तया च प्रत्यगात्मानं जीवस्वरूपान्तर्गतं बिम्बं मां इह देहे अवरुन्धे पश्यति प्राप्नोति च। अनेन— "भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागम" इत्येतद्विवृतं भवति ॥ १०८ ॥

**अहो नृजन्माऽखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन्।**
**न यद्धृषीकेशयशःकृतात्मनां महात्मनां वः प्रचुरः समागमः ॥१०९॥**
**। ५ । १३ । २१ । (८)**

तदेवं प्रनाडिकया बहुकालीनस्यैव महत्समागमस्य स्वपुरुषार्थसाधनतया तत्रैवादरेण भाव्यमिति ज्ञापयितुं यस्मिन् देहे महतां प्रचुरः समागमो भवति, स एव सर्वजन्मसु वरिष्ठ इति स्तौति ॥ **अहो इति** ॥ यत् यदि। हृषीकेशस्य यशसि स्थापितमनसां अत एव महात्मनां वः प्रचुरः समागमः। तर्ह्येतदेव

Rarest Archiver

नृजन्माखिलजन्मशोभनं वरिष्ठं अपरैर्जन्मभिस्तु किं प्रयोजनम्। व्यर्थानि तानीति। अमुष्मिन्नपि यदि वः प्रचुरः समागमो नास्ति तर्हि इदमप्यशोभनमेव। यदि चैवमपीदं शोभनमित्युच्यते तर्हि केवलं तत्रभवतां प्रद्वेष एव मूलं दृश्यते। तु इतोऽपि विशेषेण अपरैर्जन्मभिः किमपराद्धमहो इति॥ १०९॥

**न ह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजेऽमला।**
**मौहूर्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतोऽविवेकः ॥११०॥**
**।५।१३।२२।(९)**

प्रचुरस्य महत्समागमस्य पुरुषापेक्षिताशेषार्थसाधकत्वं कैमुत्यन्यायेन सिद्धम्। यतो मुहूर्तमात्रं समागमादेव पुरुषार्थसिद्धिर्दृष्टा इत्याशयेनाह॥ **न हीति**॥ मुहूर्तमात्रं अवस्थितात् यस्य महच्छिखामणेः तव समागमात् मे मम कुतर्कमूलोऽविवेको अन्यथामतिरूपः अपहतो नाशितोऽभूत्। तादृशस्य तव प्रचुरसमागमवतः चरणाब्जरेणुभिः सुचिरं धृतैर्हतांहसः पुंसोऽधोक्षजे अमला वैराग्यादिना प्रभासमाना भक्तिर्मुक्तिदायिनीत्येतदद्भुतमाश्चर्यं नेति। हिशब्देन ज्ञानिभिरनुभूतमिदमिति सूचयति। ''व इति तवेति'' च रहूगणस्य अवधूतं प्रति वचनम्॥ ११०॥

**नैषां मतिस्तावदुरुक्रमाङ्घ्रिं स्पृशत्यनर्थापगमो यदुत्थः।**
**महीयसां पादरजोभिषेकं निष्किञ्चनानां न वृणीत यावत् ॥ १११॥**
**।७।५।३२।(१०)**

**॥ इति श्रीमहत्समागमप्रकरणम्॥ ६॥**

यतो विरक्तस्यापि पुंसो विना महत्समागमं न किञ्चित्साधनं सिध्यति,

Rarest Archiver

अतस्तत्रैव आदरवता भवितव्यमिति स्वाभिप्रेतमर्थमुपसंहरति ॥ **नैषामिति** ॥ अनर्थस्य संसाररूपस्य अपगमो निरसनं यस्मात् पादरजोभिषेकात् उत्थ उत्पन्नो भवति । तादृशं निष्किञ्चनानां महीयसां पादरजोभिषेकं यावत्पर्यन्तं न वृणीत न स्वीकुर्यात् तावत्पर्यन्तं एषां पुंसां मतिः उरुक्रमस्य हरेः अङ्घ्रिं न स्पृशति तद्विषयिणी न भवति ॥ १११ ॥

**॥ इति श्रीमदवधूतशिरोमणिजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां महत्समागमप्रशंसाप्रकरणम् ॥ ६ ॥**

Rarest Archives

## महत्सेवाप्रशंसाप्रकरणम् ॥ ७ ॥

**यन्माययोरुगुणकर्मनिबन्धनेऽस्मिन्**
**सांसारिके पथि चरंस्तदतिश्रमेण ।**
**नष्टस्मृतिः पुनरयं प्रवृणीत लोको**
**युक्त्या कया महदनुग्रहमन्तरेण ॥ ११२ ॥ ३ । ३२ । २६ ।(१)**

एवं विरक्तेन लब्धमहत्समागमेन पुरुषेण महत्सेवायां अवहितेन भाव्यमिति प्रतिपादयितुमिदं प्रकरणम् । तत्रादौ महद्भिः प्रसादपूर्वकमुपदिष्टमेव महाफलप्रदमिति भावेन तत्प्रसादस्य मुख्यतः श्रेयःसाधनत्वमाह ॥ **यन्माययेति** ॥ यस्य हरेर्मायया इच्छया बन्धकशक्त्या वा उरूणि बहूनि गुणाः सत्त्वादयः कर्म पुण्यपापलक्षणमेतदादीनि कारणानि यस्य तस्मिन् संसाराख्येऽस्मिन्मार्गे गच्छन् तत्प्रयुक्तेन महाश्रमेण नष्टा भगवत्स्मृतिर्यस्य स तादृशोऽयं लोको महतामनुग्रहं विना कया युक्त्या केनोपायेन तां स्मृतिं पुनः प्रवृणीतेति । यस्य माययैव सांसारिके पथि चरति तं वन्दे इति पूर्वेणान्वय इति ज्ञेयम् ॥ ११२ ॥

**महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां सङ्गिसङ्गम् ।**
**महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये ॥११३॥**
**। ५ । ५ । २ । (२)**

भवत्वेवं महतामनुग्रहः सर्वश्रेयोमुख्यसाधनं स एव कथं भवेदित्यतस्तत्सेवयैवेत्याशयेनाह ॥ **महत्सेवामिति** ॥ विमुक्तेर्द्वारं साधनमाहुः ।

Rarest Archiver

तथा योषितां सङ्गिनां सङ्गं तमोद्वारमाहुः। अतो दुःसङ्गो वर्जनीय इति भावः। ननु के ते महान्तः यत्सेवया लब्धोऽनुग्रहो मुक्तिसाधनं स्यादित्यतस्तल्लक्षणानि दर्शयति ॥ **महान्तस्त इति** ॥ ये समचित्ताः सर्वत्र भगवन्तमेवानुस्मरन्तः प्रसन्नचित्ताः क्रोधरहिताः सर्वभूतसुहृदः मङ्गलाचाराः ॥ ११३ ॥

**ये वा मयीशे कृतसौहृदार्था जनेषु देहम्भरवार्तिकेषु।**
**गृहेषु जायात्मजरातिरासु न प्रीतियुक्ता यावदर्थाश्च लोके ॥११४ ॥**
**। ५ । ५ । ३ । (३)**

ईशे मयि कृतं सौहृदं स्नेह एव अर्थः प्रयोजनं येषां ते निष्कामा देहम्भराणां वार्ता येषु तेषु जनेषु तथा गृहेषु दारपुत्रमित्रद्रव्येषु प्रीतियुक्ताः न। लोके प्राकृतविषये। यावान् स्वदेहधारणाद्युपयोगी अर्थो विषयः स्वीकार्यो येषां ते महान्त इति ॥ ११४ ॥

**यत्सेवयाशेषगुहाश्रयः स्वराड्विप्रप्रियस्तुष्यति काममीश्वरः।**
**तदेव तद्धर्मपरैर्विनीतैः सर्वात्मना ब्रह्मकुलं निषेव्यताम् ॥ ११५ ॥**
**। ४ । २१ । ३८ । (४)**

एवं महतां लक्षणान्यभिधाय तेषां सेवा पुरुषार्थार्थिभिः कार्येत्यभिहितम्। तेषु भक्तिविशेषोत्पादनाय पृथ्वादिभिरादिराजैर्महाभागवतैः सेवितत्वरूप-महिमानमाह त्रिभिः। तेऽपि किमिति महतां सेवां कृतवन्त इत्यतस्तस्याः हरिप्रीतिसाधनत्वादिति भावेनादौ तैः कृतं स्वीयान्प्रति सेवाकरणशिक्षणप्रकारं दर्शयति ॥ **यत्सेवयेति** ॥ यस्य ब्रह्मकुलस्य सेवया। हरिः कामं बाहुल्येन तुष्यति, तद्ब्रह्मकुलं तद्धर्मपरैर्विष्णुधर्मपरैर्निषेव्यतामिति ॥ ११५ ॥

Rarest Archiver

**अश्नात्यनन्तः खलु तत्त्वकोविदैः श्रद्धाहुतं यन्मुख इज्यनामभिः ।**
**न वै तथा चेतनया बहिष्कृते हुताशने पारमहंस्यवर्यगुः ॥ ११६ ॥**
**। ४ । २१ । ४० । (५)**

विशेषतो भगवदधिष्ठानेषु श्रेष्ठत्वाच्च तत्सेवा कार्येत्याह ॥ **अश्नातीति ॥** तत्त्ववेदिभिर्येषां ब्राह्मणानां मुखे । इज्यस्य हरेर्नामभिः प्राणादिभिः । श्रद्धया हुतमनन्तो यथाऽश्नाति । चेतनया बहिष्कृते जडे हुताशने तथा नाश्नाति । वै खलु । तद्ब्रह्मकुलमिति पूर्वेणान्वयः । ननु ब्राह्मणमुखे हुतं भगवानश्नाति, अश्नन्नपि हुताशनादिभ्यः आधिक्येनैव । होमश्च भगवन्नामभिर्मन्त्रैः, तत्त्वकोविदैः कर्तृभिरिति चोक्तम् । तत्र भगवानश्नातीत्येतत्तावन्न मनोज्ञं । व्यधिकरणत्वात् । अन्यथा अतिप्रसङ्गात् । [1]आधिक्येनेत्यपि । सर्वत्र भगवत एव भोक्तृत्वेन तदयोगात् । भगवन्नामभिरिति चासमञ्जसम् । न हि तत्र विष्णवे स्वाहेत्यादिरूपो मन्त्रोऽस्ति येनेज्यनामभिरिति युज्येत । किं नाम प्राणायस्वाहेत्यादिरूप एव । न च प्राणादिशब्दानामपि विष्णुनामत्वं साम्प्रतम् । तथा सति एकेनैव पूर्त्याऽपानाय स्वाहेत्यादिना पौनरुक्त्यापातात् । तत्त्वकोविदैर्हुतमश्नातीत्येतदपि न महाजनसभारञ्जनम् । तदितरैर्हुतस्यानशनप्रसङ्गात् । तथा सति सर्वभोक्तृत्वहान्यापातात् । किञ्च । किं तत्तत्त्वकोविदत्वं यद्विशिष्टैर्दत्तमेव भगवानश्नातीत्यत आह ॥ **पारमहंस्यवर्यगुरिति ॥** यत्तावदुक्तं वैयधिकरण्यादिति तन्न । भगवत एव भक्तप्रदत्तान्नभोक्तृत्वेन विवक्षितत्वात् । अत एवातिप्रसङ्गोऽपि परास्तः । भगवत एव होमोद्देश्यत्वात् । तदेतदभिसन्धायाह । **पारमहंस्यवर्यगुरिति ॥** पारमहंस्यैः परमहंसैर्भागवत-

---

१. न मनोज्ञमित्यनुषङ्गः ।

Rarest Archive

धर्मनिरतैरेव [१]वरणीया गावो रूपाणि यस्येति। भागवता हि ब्राह्मणेषु भगवन्तमेव भावयन्तस्तस्मै एवान्नादि [२]ददति। यदप्यधिक्येनेत्येतन्न मनोज्ञमिति तत्रापीदमेवोत्तरम्। पारमहंस्यैस्तारतम्येनैव भजनीया गावो नामान्यस्येति। सर्वत्र भगवन्तमेव भावयन्तोऽप्यधिष्ठानतारतम्येनैव भावयन्तीत्यङ्गीकारात्। तथाच वक्ष्यते। यच्चोक्तं भगवन्नामभिरिति चासमञ्जसमिति तत्रापीदमेवो-पतिष्ठते॥ **पारमहंस्यवर्यगुरिति**॥ [३]पारमहंस्यवर्या गावो नामान्यस्येति युज्यत एवेज्यनामभिरिति। प्राणादिपदानामपि भगवन्नामत्वात्। न च पुनरुक्तिः। रूपभेदेन तदभावात्। एतदप्याह॥ **पारमहंस्यवर्यगुरिति**॥ पारमहंस्यवर्या गावोंऽशवस्तद्वद्विद्यमानानि रूपाणि यस्येति॥ अत्र गोपदेन रूपग्रहणेन यथा सूर्यस्य तदंशूनां चाभेदेऽप्यंशवोंऽशुमानिति। तथा भगवद्रूपाणि भगवानिति च युज्यते [४]विशेषबलादिति सूचनायेति मन्तव्यम्। यदपि न महाजनसभारञ्जन-मिति तत्रापीदमेवोत्तरम्। पारमहंस्याः परमहंससंबन्धिन्यस्तत्प्रदत्ता एव वर्या वरणीया ग्राह्या गावस्तोयप्रभृतयः पदार्था येनेति॥ इदमुदितं भवति— भक्त्यैव तुष्यति हरिरिति निष्कृष्टम्। तथाच तत्त्वकोविदैर्दत्तमेवाश्नाति भगवानिति युक्तमेव। ते हि यद्ददति तुलस्यादिपत्रं वा पुष्पं वा फलं वा तोयं वान्यद्वा तत्सर्वं भक्तिपूर्वकमेव ददति। अश्नाति च खलु भगवान् सादरम्। एतच्च प्रमाण-प्रमितमित्याह खल्वित्यनेन। तत्र हेतुश्च वक्ष्यते। न च सर्वभोक्तृत्वहानिः। अन्यदत्तभोक्तृत्वस्याप्यङ्गीकारात्। नच कोविदैर्दत्तमेवेत्येवकारानुपपत्तिः। तत्र सादरं भोक्तृत्वस्यैव विवक्षिततया तस्यैव निषेधेन भोक्तृत्वमात्रस्या-

---

१. वरणीयत्वं च होमादितत्तत्क्रियोद्देश्यत्वम्।

२. तथा च स्वोद्देश्यकहविरादेरेवादानान्न वैयधिकरण्यमिति भावः।

३. परममुख्यवृत्त्या तद्वाचकत्वेनाङ्गीकारविषया इत्यर्थः। ''नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ती''ति श्रुतेः।

४. भेदाभावेऽपि भेदव्यवहारनिर्वाहका अनन्ता एव विशेषाः इति **पदार्थसङ्ग्रहे**।

Rarest Archiver

निषेधादिति। यदत्र वक्तव्यं तदुपरिष्टाद्वक्ष्यते। किञ्च। किं तत्तत्त्वकोविदत्वमित्यत्रापीदमेवोत्तरम्। पारमहंस्यैर्वर्याणि भजनीयानि नामानि रूपाणि चास्येति। [१]ये हि सर्वेष्वप्यधिष्ठानेषु ब्राह्मणादिषु, बाह्येषु, प्राणादिषु चान्तरेषु तत्तदधिष्ठानवाचकैर्नामभिः भगवद्रूपाण्येव भावयन्ति। त एव तत्त्वकोविदा इति ॥ ११६ ॥

**यद्ब्रह्म नित्यं विरजं सनातनं श्रद्धातपोमङ्गलमौनसंयमैः।**
**समाधिना बिभ्रदिहार्थसिद्धये यत्रेदमादर्श इवावभासते ॥ ११७ ॥**

**। ४ । २१ । ४१ । (६)**

ब्रह्मोपासनया स्वयं प्राप्तपुरुषार्थत्वादप्राप्तपुरुषार्थानां ब्रह्मोपदेशकत्वाच्च तत्सेवा कार्येत्यभिसन्धिना ब्रवीति। **यदिति** ॥ यद्ब्रह्मकुलं श्रद्धादिभिः समाधिना चित्तनिरोधलक्षणेन पुरुषार्थसिद्धये नित्यत्वादिधर्मोपेतं ब्रह्म विभ्रद्विषयीकुर्वदास्ते, यत्र यस्मिंश्च सेविते इदं ब्रह्म आदर्शे दर्पण इव स्पष्टमवभासते तदित्यन्वयः ॥ ११७ ॥

**यस्यामृतामलयशःश्रवणावगाहः**
**सद्यः पुनाति जगदाश्वपचं विकुण्ठः।**
**सोऽहं भवद्भ्य उपलब्धसुतीर्थकीर्ति-**
**श्छिन्द्यां स्वबाहुमपि वः प्रतिकूलवृत्तिम् ॥ ११८ ॥**

**। ३ । १७ । ६ । (७)**

न केवलं भागवतैरेव सम्भाविताः किं नाम भगवतापीति भावेनान्यतो

---

१. तथाच कथं समधानमित्यतस्तदुपपादयति।

Rarest Archive

विशेषेण भगवत्प्रीतिपात्रत्वरूपं महिमान्तरं चाह त्रिभिः। तत्रादौ भगवद्भक्तेषु भगवन्महिमप्रतिपादकत्वाद्विशेषतो भगवत्प्रीतिपात्रत्वमित्याह॥ **यस्येति**॥ सनकादीन् प्रति भगवद्वचनमेतत्। यस्य मम अमृतं कर्णपीयूषं, यशसः श्रवणं तदेवावगाहः स्नानम्। सद्यस्तत्क्षणात् जगत् आश्वपचं तत्पर्यन्तं पुनाति। तादृशयशोविशिष्टोऽहं भवद्भ्यः सकाशादुपलब्धा लोकेषु विस्तारिता सुतीर्था पावनतमा कीर्तिर्यस्य सः। यतोऽतो वो मम परमसेवाकारितया परमप्रीतिपात्राणां। प्रतिकूला विरुद्धा वृत्तिर्वर्तनं यस्य तं स्वबाहुं तज्जातं साक्षात्पट्टाभिषिक्तं क्षत्रियमपि छिन्द्यां विगतसम्पदं करोमि किमन्यमिति॥ ११८॥

**ये ब्राह्मणान्मयि धियाऽक्षिपतोऽर्चयन्ति**
**तुष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः।**
**वाण्यानुरागकलयात्मजवद्गृणन्तः**
**सम्बोधयन्त्यहमिवाहमुपाकृतस्तैः॥ ११९॥ ३। १७। २२।(८)**

न केवलं सेवाकारितयान्यवत्प्रीतिपात्रत्वं किं नाम विरुद्धव्यापारकरणेऽपि भगवत्प्रीतिपात्रत्वमित्याह। **य इति**॥ ये धिया बुद्धिपूर्वकमेव। आक्षिपतः स्वविरुद्धव्यापारं सर्वमपि कुर्वतो ब्राह्मणान्। स्वयं तुष्टमनस एव भूत्वा तत एव स्मितलक्षणसुधयोक्षितं आसिक्तं पद्मसदृशं वक्त्रं येषां ते। स्नेहकलावत्या वाण्या। मयि धिया मद्विषयया बुद्ध्या। मदधिष्ठानत्वबुद्ध्येति यावत्। मातरो धियाक्षिपतोऽप्यात्मजान् स्वयं तुष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः अनुरागकलया वाण्या मम पिता त्वं, मम माता त्वं, अवश्यमुत्तिष्ठ, भुंक्ष्व, त इदं द्रव्यं दास्य इत्यादिरूपया गृणन्तः सम्बोधयन्ति यथा तथा गृणन्तः स्तुवन्तः सम्बोधयन्ति समाहितान् कुर्वन्ति। अर्चयन्ति पीठादौ स्थापयित्वा पूजयन्ति। दृष्टान्तान्तरमाह॥ **अहमिवेति**॥ यथाहं धिया

Rarest Archiver

मामाक्षिपतोऽपि ब्राह्मणान् सन्तुष्टमना विकसितवदनः अनुरागकलोपेतया वाण्या स्तुवन् सम्बोधयामि पूजयामि च। तथेति। इदं च भृग्वादिषु मुनिष्वनुभवसिद्धमित्यहं विष्णुरिवेत्यनेन सूचयति। ते च विष्णुमनेनैव गुणेन सर्वोत्तमं निश्चितवन्त इति हि घण्टाघोषः। एवं तत्कृतं विरुद्धमपि कर्म अविगणय्य तत्पूजने कृते किं फलमिति तत्राह ।। **तैरिति ।।** तैः एवंविधवृत्तिभिः नरैः अहमेवोपाकृतः पूजितो वशीकृतश्चेति ।। **यथाहुः—** ''तद्वः प्रसादयाम्यद्य ब्रह्म दैवं परं हि मे। तद्ध्येवात्मकृतं मन्ये यत्स्वपुंभिरसत्कृतम् ।। ३।१७।४।। यन्नामानि च गृह्णाति लोको भृत्ये कृतागसि। सोऽसाधुवादस्तत्कीर्तिं हन्ति त्वचमिवामयः ।। ३।१७।५।।'' इदं च भृत्यापराध क्षमापनवचनं भगवतः। विप्रं कृतागसमपि नैव द्रुह्यत मामकाः। घ्नतं बहु शपन्तं वा नमस्कुरुत नित्यशः ।। यथाहं प्रणमे विप्रान् सर्वकालं समाहितः। तथा नमत यूयं च योऽन्यथा मे स दण्डभाक् ।।'' इत्यन्यान् प्रति शिक्षावचनम्। ''पुनः स्वसत्रमासाद्य मुनीनां ब्रह्मवादिनाम्। स्वानुभूतमशेषेण राजन् भृगुरवर्णयत् ।। तन्निशम्याथ मुनयो विस्मिता मुक्तसंशयाः। भूयः संश्रद्दधुर्विष्णुं यतः शान्तिर्यतोऽभय'' मिति ।। १०।९३।१५।१६ ।। ११९ ।।

**तस्यावनिज्य चरणौ तदपः स्वमूर्ध्नि**
**बिभ्रज्जगद्गुरुतमोऽपि सतां पतिर्हि।**
**ब्रह्मण्यदेव इति यद्गुणनाम युक्तं**
**तस्यैव यच्चरणशौचमशेषतीर्थम् ।। १२० ।। १० । ७७ । १८ ।(९)**

इयता प्रबन्धेन ब्राह्मणानां भगवतापि मान्यताभिहिता। सा न ततोऽप्युत्तमतया। किन्तु गुरुणा श्लाघिताः शिष्याः लोके ख्यातिं लभन्ते इति भावेनैव। किञ्च जगद्गुरूणामपि गुरुणा स्वचरणतीर्थस्पर्शमात्रेणाशेषलोक-

Rarest Archive

पावनेन भगवता क्रियमाणं ब्राह्मणनमनपादोदकधारणादिकं तस्य ''ब्रह्मण्यो विष्णुर्देवेष्वि''ति गुणसूचनेन सर्वदेवोत्तमत्वमेव व्यनक्तीति भावेन श्रीकृष्णकृतं ब्रह्मणचरणावनेजनोदकधारणं दर्शयति॥ **तस्येति ॥** यस्य चरणयोः प्रक्षालनोदकं अशेषाणामपि जनानां पावित्र्यप्रदं स तादृशोऽपि जगद्गुरुतमोऽपि सतां प्रतिष्ठादिदानेन पालकत्वादेव तस्य एकेन कृष्णेन क्रियमाणं षोडशसहस्रस्त्रीणां भोगेन तर्पणं द्रष्टुमागतस्य नारदस्य चरणाववनिज्य तदपः प्रक्षालनोदकं स्वस्य मूर्ध्नि बिभ्रत् अबिभ्रत् बभार। यत् यतोऽतो ब्रह्मण्यदेव इति देवानां ब्रह्मादीनां मध्ये ''अयं ब्रह्मण्य'' इति ''ब्रह्मवत्सल'' इति गुणप्रवृत्तिनिमित्तं नाम तस्यैव युक्तम्। हीत्यनेन प्रसिद्धमिदमिति सूचयति। अत एव ''ब्रह्मण्यो ब्राह्मणप्रिय'' इति तन्नामसु पाठ इति। **यथाहुः—** ''यस्माद्ब्रह्मकुलं ब्रह्मन् शास्त्रयोनेस्तवात्मनः। सभाजयति सद्धाम तद्ब्रह्मण्यगुणो भवानि''ति। ''दृष्ट्वा ब्रह्मण्यदेवस्तमवरुह्य निजासने। उपवेश्यार्हयाञ्चक्रे यथात्मानं दिवौकस'' इति ॥ १२० ॥

**किरातहूणान्ध्रपुलिन्दपुल्कसा आभीरकङ्का यवनाः शकादयः।**
**येऽन्ये च पापा यदपाश्रयाश्रयाच्छुद्ध्यन्ति तस्मै प्रभविष्णवे नमः**
॥ १२१ ॥ २। ४। १८। (१०)

**॥ इति महत्सेवाप्रशंसाप्रकरणम् ॥ ७ ॥**

यदा खलु यद्दासानां भागवतानां पादोदकधारणादिना महापातकिनामपि शुद्धिस्तदा तस्य पावित्र्याय स्वपावित्र्याय ब्राह्मणपादोदकधारणमित्येतदपहसनीयप्रक्रियमिति किं वाच्यमित्याशयेनाह। **किरातेति ॥** ये किरातादयो हीनकुलजा ये चोत्तमकुलजा अपीदानीमेव पापकर्माणस्ते सर्वेऽपि। यो हरिराश्रयो येषां ते यदपाश्रया भागवताः तेषामाश्रयात्सेवालक्षणाच्छुध्यन्ति

Rarest Archive

गतपापा भवन्ति। तस्मै पवित्राणां पवित्राय नूतनभक्तसङ्गृहीत्रे नमः ॥ **यथाहुः—** ''न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः। ते पुनन्त्युरुकालेन यूयं दर्शनमात्रतः ॥ ब्राह्मणेभ्यो नमस्यामो येऽस्मद्रूपं त्रयीमयम्। बिभ्रत्यात्मसमाधानं तपस्स्वाध्यायसंयमैः। श्रवणाद्दर्शनाद्वापि महापातकिनोऽपि च। शुद्ध्येरन्नन्त्यजाश्चापि किमु सम्भाषणादिभि''रिति। तदनेन समदृक्सेवाख्यो भागवतो धर्मः प्रतिपादितो भवति ॥ १२१ ॥

**इति श्रीमदवधूतशिरोमणिजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां महत्सेवाप्रशंसाप्रकरणम् ॥ ७ ॥**

Rarest Archiver

## महन्निन्दावर्जनप्रकरणम् ॥ ८ ॥

**कथं सुतायाः पितृगेहकौतुकं निशम्य देहः सुरवर्य नेङ्गते ।**
**अनाहुता अप्यभियान्ति सौहृदाद्भर्तुर्गुरोर्देहकृतश्च केतनम् ॥ १२२ ॥**
**। ४ । ३ । १३ । (१)**

यथा साधकानां महत्सेवावश्यकी तथा तन्निन्दावर्जनमपीति वक्तुमुत्तरं प्रकरणम् । तत्रादौ भवनिन्दया भवश्वशुरस्य महानर्थप्राप्तिर्दृष्टा, अतः सावधानैस्तत्र भाव्यमिति भवभवान्योः संवादं कथयति ॥ **कथमिति** ॥ हे सुरवर्य भव सुताया देहः पितृगेहे भवत् कौतुकं निशम्य कथं नेङ्गते न चलति। आह्वानाभावे कथं गमनं युक्तं स्यादिति तत्राह। **अनाहुता अपीति** ॥ सौहृदादेव गच्छन्ति ॥ १२२ ॥

**त्वयोदितं शोभनमेव शोभने अनाहुता अप्यभियान्ति बन्धुषु ।**
**ते यद्यनुत्पादितदोषदृष्टयो बलीयसानात्म्यमदेन मन्युना ॥ १२३ ॥**
**। ४ । ३ । १६ । (२)**

एवं भवान्याः स्वाशयाविष्कारे भवोक्तमुत्तरमाह ॥ **त्वयेति** ॥ हे शोभने बन्धुषु विषये अनाहुता अप्यभियान्तीति यत् त्वयोदितं तर्ह्येव तत् शोभनं युक्तमेव । यदि ते बन्धवः अनात्मा देहस्तत्र भवोऽनात्म्यं अभिमानः तत्प्रयुक्तेन मदेनोत्पन्नेन बलीयसा मन्युना अनुत्पादिता दोषाणां दृष्टिश्चिन्तनं येषां तादृशा भवेयुरिति ॥ १२३ ॥

Rarest Archiver

**नैतादृशानां स्वजनव्यपेक्षया गृहान्प्रतीयादनवस्थितात्मनाम्।**
**येऽभ्यागतान् वक्रधिया विचक्षते आरोपितभ्रूभिरमर्षणाक्षिभिः ॥**
**१२४ ॥ ४ । ३ । १८ । (३)**

उक्तमेव विशदयति ॥ **नेति** ॥ ये विचक्षते पश्यन्ति । एतादृशानां गृहान् स्वजनव्यपेक्षया बन्धुत्वबुद्ध्या । मन्युकार्यप्रदर्शनेन विशदीकरणं द्रष्टव्यम् ॥ १२४ ॥

**तथारिभिर्न प्रधने शिलीमुखैः शेतेऽर्दिताङ्गो हृदयेन दूयता।**
**स्वानां यथा वक्रधियां दुरुक्तिभिर्दिवानिशं तप्यति मर्मताडितः**
**॥ १२५ ॥ ४ । ३ । १९ । (४)**

न केवलं शारीरेण व्यापारेणावमन्यन्ते किन्तुं वाचनिकेनापीति भावेनाह॥ **तथेति** ॥ प्रधने युद्धे । शिलीमुखैर्बाणैः । ततो न गन्तव्यमित्याकूतम् ॥ **यथाहुः—** "न तथा तप्यते विद्धः पुमान् बाणैर्हि मर्मगैः । यथा तुदन्ति मर्मस्था असतां परुषेषव" इति ॥ १२५ ॥

**कर्णौ पिधाय निरियाद्यदकल्प ईशे**
**धर्मावितर्यघृणिभिर्नृभिरस्यमाने ।**
**छिन्द्यात्प्रसह्य रुशतीमसतां प्रभुश्चे-**
**ज्जिह्वामसूनपि ततो विसृजेत्स धर्मः॥ १२६ ॥ ४ । ४ । १७ । (५)**

एवं पत्या निषिद्धेऽपि भाविकार्यवशात्तत्र गता । तदुक्तप्रकारेण ततोऽलब्धमाना पत्युर्निन्दां पितृकृतां शृण्वानाऽऽह ॥ **कर्णाविति** ॥ धर्मप्रवर्तके महात्मनि भूतदयाशून्यैर्नृभिः सभादौ निन्द्यमाने सति, यत् यदि

Rarest Archiver

स्वयमसमर्थस्तदा कर्णौ हस्ताभ्यां पिधाय, ततः स्थानादुगच्छेत्। **यथाहुः—** "निन्दां भगवतः शृण्वन् तत्परस्य जनस्य वा। ततो नापैति यः सोऽपि यात्यधः सुकृताच्च्युत" इति॥ १०।८२।४१॥ अपि पक्षान्तरमपि असून्वा विसृजेदिति यद्द्वयं स एवासमर्थस्य धर्मः पापसाधनं न भवति। चेद्यदि प्रभुः समर्थः शिक्षायां। तदा रुशतीं परुषभाषिणीं असतां जिह्वां प्रसह्य बलात्कृत्य छिन्द्यात्। असून्वा हरेदिति यद्द्वयम्। स एव समर्थस्य धर्म इति॥ १२६॥

**नाश्चर्यमेतद्यदसत्सु सर्वदा महद्विनिन्दा कुणपात्मवादिषु।**
**सेर्ष्या महापूरुषपादपांसुभिर्निरस्ततेजस्सु तदेव शोभनम्॥ १२७॥**
**।४।४।१३।(६)**

कर्णौ पिधाय निर्गमेऽपि तैर्निन्दकैर्निगडादिना निबध्य, पुनः पुनः प्रतिदिनं निन्दने कृते बहुदिनानि परीक्ष्य, देहं त्यक्ष्यामीत्युदितेऽपि पुनः पुनर्निन्दने कृते देहोऽपि त्याज्यः। आदौ दण्डं गृहीत्वा महन्निन्दनं न कर्तव्यमित्युदितेऽपि पुनरारब्धे जिह्वामेव छिन्द्यात्। तदापि पुनः प्रकारान्तरेणारब्धे प्राणानेव हरेदिति। योऽल्पानल्पयोर्धर्म उदितः स त्विमं महाजनमार्गमाश्रित्यैवोदितः। वस्तुतो भागवतमार्गाश्रयणे तु न कोऽपि प्रयासः निन्देयमेषां महादुःखसाधनमित्यनुसन्धानमेव केवलमित्यभिप्रेत्याह। **नेति॥** कुणप एवाहमित्यभिमानवत्सु किन्निमित्ता निन्दापि सेर्ष्या ईर्ष्याऽसहनं तन्निमित्ता। सापि कुतः। व्यापकसमावेशे सूर्योदये नक्षत्राणामिव हततेजस्त्वादिति भावेनाह॥ **निरस्ततेजस्स्विति॥** किञ्च तत्सर्वदा महन्निन्दनमेव तेषां शोभनं युक्तं तदनुरूपफलयोग्यत्वादिति॥ १२७॥

**सर्वे प्रयासा अभवन्विमोघाः कृताः कृता देवगणेषु दैत्यैः।**
**कृष्णानुकूलेषु यथा महत्सु क्षुद्रैः प्रयुक्ता रुशती रूक्षवाचः॥१२८॥**
**।६।१०।२९।(७)**

Rarest Archiver

एवं भागवतमार्गानुसारणे न कोऽपि प्रयास इत्यभिहितमेव द्रढयितुं, निन्दनेन निन्द्यानां रोमहानिरपि न भवतीति दृष्टान्ततया कथितमिति कथयति ॥ **सर्व इति।** ये ये कृताः कृताः पुनः पुनः कृताः। ते सर्वेऽपि प्रयासाः आयुधादिप्रक्षेपरूपाःविमोघाः अकिञ्चित्कराः अभवन्। कथम्। कृष्ण एवानुकूलोऽनुग्रहोन्मुखो येषां तेषु महत्सु। असूययाऽल्पैरुदिता अन्येषां साधारणानां पुंसां रुशतीः रुशत्यः अमङ्गलाः अत एव रूक्षा दुःखदायकाः वाचो वचनानि विमोघाः विमोघानि अकिञ्चित्कराणि भवन्ति यथा तद्वत् कायिकं प्रयासं कर्तुमनीश्वरैः क्षुद्रैः महत्सु क्रियमाणवाचनिकप्रयासवत् दैत्यकृतकायिकप्रयासोऽपि देवेषु व्यर्थोऽभूदिति दृष्टान्ततया ग्रहणेन निन्दया न कापि हानिरिति निश्चयेन न कोऽपि मनोविषादः कार्य इति ॥ १२८ ॥

**विद्यातपोवित्तवपुर्वयःकुलैः सतां गुणैः षड्भिरसत्तमा मदैः ।**
**स्मृतौ हतायामभिमानदुर्दृशस्तसा न पश्यन्ति हि धाम भूयसाम् ॥**
**१२९ ॥ ४ । ३ । १७ । (८)**

ननु दक्षस्तावत्प्रजापतिप्रवरो बहुगुणयुक्त इति मुनीनां संमतम्। महादेवो देवप्रवर इति च। तदनयोरेवंविधे कलहे निमित्तं संभावयितुमपि न शक्यमस्माभिरल्पमतिभिरित्यतः सत्यं। दक्षो गुणवानिति भवो महीयानित्यपि। तथापि ये शास्त्रेषूदिताः सतां गुणाः विद्यादयः षट् ते यदि पुण्यवशादसत्तमेषु प्राप्तास्तदा त एव मदकारिणो भवन्ति पयःपानमिव सर्पाणाम्। तैर्विद्यादिमदैः शास्त्रजन्या स्मृतिः ''स्वोत्तमाः पूज्या'' इति सा प्रतिबद्धा भवति। तदानीमहमेव प्रवर इत्यभिमानोऽवसरं लभते। तेन च महत्पूजादौ विमुखा भविन्ति। यद्यपि महत्सु स्वतोऽधिकं गुणगणं जानन्ति। तथापि न तं वचसा वदन्ति। न च श्लाघयन्ति सभायां। कुतः। तसाः। यतः व्यापकसमावेशो वा,

Rarest Archiver

तद्वार्ताश्रवणेन वा, व्याप्यानां असतां सन्तापो भवतीति हि सुप्रसिद्धम्। तदेवं सत्यपि तस्मिन् गुणगणे सति च महादेवे ततोऽनेकगुणाधिकमहित्वे[१] निमित्तान्तरवशादिदमित्थमिति भावेनाह ॥ **विद्येति** ॥ १२९ ॥

**नाहं विशङ्के सुरराजवज्रान्न त्र्यक्षशूलान्न यमस्य दण्डात्।**
**नाग्न्यर्कसोमानिलवित्तपास्त्राच्छङ्के भृशं ब्रह्मकुलावमानात्॥ १३० ॥**
**।५।१०।१८।(९)**

इदमुदितं भवतिसाधुप्रवरस्यापि दक्षप्रजापतेर्महन्निन्दया अनर्थदर्शनात्सर्वथा श्रेयोर्थिभिर्महन्निन्दा स्वयं न कार्यैव। परेण क्रियमाणायां ततोऽपसर्पणादिकं तत्रैव स्थित्वा महतामकिञ्चित्करमित्यनुसन्धानपूर्वकं तस्यास्तदनिष्टसाधनत्वानुसन्धानं वा कार्यम्। तेन च स्वस्यानर्थो न भवतीति च। प्रमादान्महदवज्ञानघटनायामपि महानर्थप्राप्तिर्भवति। किमु बुद्धिपूर्वकं तत्कृतावित्याशयेन सिन्धुसौवीरदेशाधिपतेः रहूगणनाम्नो राज्ञः शिबिकावाहकैः एकस्मिन्न्यूने सति शिबिकावाहकपुरुषान्वेषणसमये दैववशाद्द्विजवर उपलब्धः। ''एष पीवा वोढुं समर्थ'' इति तैर्गृहीतस्तैः सह शिबिकामुवाह। तदा तद्गतिविशेषेण विषमगतौ शिबिकायां राज्ञि कुपिते ''न वयं नरदेव प्रमत्ताः साध्वेव वहामः। अयमधुनैव नियुक्तो न द्रुतं व्रजति। नानेन सह वोढुं पारयामः। सांसर्गिको दोष एव नूनमेकस्यापि संसर्गिणां भवितुमर्हती''ति वाहकैरुत्तरे दत्ते जातमन्युः अविस्पष्टब्रह्मचिह्नं नूतनं प्रत्युवाच राजा— ''अहो! कष्टं! भ्रातः व्यक्तमुरुश्रान्तोऽसि। दीर्घमध्वानमेक एव ऊहितवान् सुचिरम्। नातिपीवा नातिसंहननाङ्गः जरसोपद्रुतः भवान्सखे नो वा एते परे सङ्घट्टिन''

१. सति चेत्येतदत्रापि सम्बध्यते।

Rarest Archive

इत्येवमादि। तथापि तेनानुदिते सति पुनर्विषमगतौ च नरदेवाभिमानेन बह्वसम्बद्धं अभिभाषमाणं तत एव तमसि प्रपतन्तं राजानं तुच्छीकृत्य, तन्मदनाशके उत्तरे दत्ते शिबिकातः अवरुह्य, शिरसा पादमूले प्रणतः क्षमापयन्विज्ञापयाञ्चक्रे। तं प्रकारं दर्शयति॥ **नाहमिति॥** अहं सुरराजादेः अस्त्रेभ्यो न बिभेमि। किं तु। ब्राह्मणानां कुलस्याप्यवमानादेव भृशमत्यन्तं बिभेमि॥ १३०॥

**न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि।**
**महद्विमानात्स्वकृताद्धि मादृग्धक्ष्यत्यदूरादपि शूलपाणिः ॥ १३१ ॥**
**।५।१०।२६।(१०)**

यद्यपि सर्व भूतेषु समत्वेन विद्यमानेन निमित्तेन सर्वस्यापि निर्निमित्तमुपकारकृतः अत एव सर्वप्रियस्य तथा, गताभिमानस्य तव मया कृतेन शिबिकावाहनासम्बद्धभाषणाद्यसत्कर्मणा मनसि विकारो नास्त्येव। तथापि तन्ममाकार्यमेव। यतः शूलपाणिः उमापतिरपि स्वकृतान्महद्विमानात् अदूरात् शीघ्रमेव धक्ष्येत। किमु मादृग् अल्प इति॥ १३१॥

**नमो महद्भ्योऽस्तु नमः शिशुभ्यो नमो युवभ्यो नम आबटुभ्यः।**
**ये ब्राह्मणा गामवधूतलिङ्गाश्चरन्ति तेभ्यः शिवमस्तु राज्ञाम्॥१३२॥**
**।५।१३।२३।(११)**

**॥ इति महन्निन्दावर्जनप्रकरणम्॥ ८॥**

एवमाक्षिप्याज्ञानकृतादेव अवज्ञानात्प्रसक्तस्य महतोऽनर्थस्य निवृत्तिं प्रार्थयते॥ **नम इति॥** तेभ्यो ब्राह्मणेभ्यः सकाशात्। अवधूतं विगतं लिङ्गं ब्राह्मणचिह्नं एभ्यस्ते। आबटुभ्यः बटुपर्यन्तम्। शिवमनर्थनिवृत्तिरूपम्॥

Rarest Archiver

**यथाहुः—** "आयुः श्रियं यशो धैर्यं लोकानाशिष एव च। हन्ति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ॥" इति। **अत्रायमाशयः—** एवं प्रमादतो महदवज्ञानप्राप्तपापपरिहारजिहीर्षया महतामपि महीयांसं श्रीनारायणमारभ्य अवधूतपर्यन्तं नमनमेकमेव अस्माभिः अनुष्ठेयमिति भावेन महदादिभेदेन चतुर्विधं श्रीहरिं तावन्नमति ॥ **नमो महद्भ्य इति ॥** परिमाणतः आ महद्भ्यः रूपविशेषेभ्यः आ नमोऽस्तु। न केवलं निरवधिकमहत्परिमाणेभ्यः भक्त्यादिसाहित्येन सम्यङ्नमोऽस्त्विति। किं नाम। तदीयं महीयोरूपमारभ्य अणीयःपर्यन्तमेवेत्याशयेनाह॥ **आ शिशुभ्य इति ॥** शिशुभ्योऽप्या शिशुपर्यन्तमपि नमोऽस्त्विति। नन्वेवं महीयोरूपमारभ्य अणीयःपर्यन्तं गणने अनन्तपरिमाणरूपप्राप्त्या अस्माकं अल्पमतीनां अल्पायुषां च न तन्नमनं सुशक्यमित्यतः सत्यं प्रतिव्यक्तिनमने तथेति। अत्र तु कयाचिद्विवक्षया अनन्तरूपस्यापि हरेः (चतूरूपत्ववन्दनं अनन्तपरिमाणस्यापि) परिमाणचतुष्टयोपेतविग्रहतया भवादृशानामपि क्रोडीकारेण तन्नमनं सुशकमित्यभिप्रायेण महत्त्वाणुत्वतन्मध्यवर्तियौवनाकारसदृशाकारत्ववटुत्वाकारसदृशाकारत्वविवक्षया चतुष्टयमभिप्रेत्य महत आरभ्य शिशुपर्यन्तमित्युक्तं विशदयन् तन्मध्यवर्तिनो दर्शयति ॥ **नमो युवभ्योऽस्तु नमो बटुभ्य इति ॥** एवं परिमाणचतुष्टयोपेतान्यपि रूपाणि न त्रित्वादौ पर्यवसन्नानि, किन्तु अलं बहूनि सन्ति इत्याशयेन महद्भ्य इत्यादौ सर्वत्र बहुवचनप्रयोगः। तानि च नागन्तुकनिमित्तवशेन वृद्ध्यादिमन्ति किन्तु एकप्रकारेणैव। आ समन्तात् सर्वेषु कालेषु सर्वेषु देशेषु केषुचिन्निमित्तेषु आगतेषु गतेषु वा तथैव सन्तीत्याशयेन आ **महद्भ्य इत्याद्युक्तम्**। अस्तु परिमाणतो महत्त्वादिकं सदातनं, अविकृतं च। वास्तवी स्थितिस्तु तेषां रूपविशेषाणां कथमिति चेत्। सदा तारुण्यमेवेति वदामः। यदा खलु यदनुग्रहपात्राणां रूपविशेषाणां देवानामपि नित्यतरुणता, तदा का

Rarest Archiver

कथन्ता आदिदेवशिरोमणेः हरेः रूपाणां विषये। तदेतदभिसन्धाय युवभ्य इति सर्वान् विशेषयामास ॥ छ ॥

**अथवा** एवं महतां महीयांसं श्रीहरिं नत्वा महतो देवानपि चतुर्विधान्नमति ॥ **नमो महद्भ्य इति ॥** विष्णुब्रह्मरुद्रेभ्यः नमोऽस्तु। तथा शिशुभ्यो नमोऽस्त्वित्यादि योजनीयम्। ननु विष्णुः प्राक्प्रणतः। सत्यं। देवत्वेनात्र ग्रहणात्। अत एव "येऽन्ये विभीषणहनूमदुपेन्द्रदत्ताः पार्थार्ष्टिषेणविदुरश्रुतदेवमुख्या" इत्यादौ भक्तवर्गेऽपि भगवान् गृहीतः। ननु तर्हि इदं चातुर्विध्यं न सम्भवत्येव। देवा अजरामराः। न चाजराणां महत्त्वं वृद्धत्वापरपर्यायं सम्भवति। नाप्यमराणामुत्पत्त्यर्भकतापरपर्याया शिशुता। न च तदभावे तदुत्तरावस्था अशनित्वापरपर्याया वटुतापि। नापि तस्याभावे तदुत्तरावस्थारूपा युवता सम्भाविता। तदेवं महत्त्व-युवत्व-वटुत्व-शिशुत्वानामसम्भवान्नैवं चातुर्विध्यं देवानामिति चेन्नैवम्। देवानां नित्ययुवत्वेऽपि विवक्षाविशेषेण महत्त्वाद्युपपत्तेः। **तथाहि—** हरिविरिञ्चिहरास्तावन्महत्पदेन विवक्षिताः। तेषां महत्त्वं नाम अवान्तरपित्रादिसम्बन्धसिद्धिशून्यत्वम्। तत्र हरौ पित्रादिसम्बन्धप्रसिद्धेरेवाभावेन विरिञ्चे हरे च तत्सत्त्वेऽपि तत्पित्रादावसाधारणत्वरूपावान्तरत्वाभावेन विशिष्टाभावसत्त्वात्। हरिकमलयोर्ब्रह्मसरस्वत्योर्वा जगत्पितृत्वमातृत्वसत्त्वेनावान्तरपितृत्वाद्यभावात्। इदमेव च वृद्धत्वमिति गीयते। महतां महीयसि "कश्चिन्महान्स्तस्य न कामनिर्जयः महादेवे" इत्यादौ। अवान्तरपित्रादिसम्बन्धवत्त्वेन प्रसिद्धत्वमेव हि शिशुत्वं वृद्धत्वप्रतिरूपत्वात् शैशवस्य। तच्च स्कन्देन्द्रादावस्तीति त एव अर्भकपदपर्यायशिशुपदेन विवक्षिताः। नन्वत्र वैवक्षिकमहत्त्वस्य हरिविरिञ्चिहरेषु त्रिष्वपि सत्त्वेन तेषां महद्भ्य इत्यत्र स्तुत्यता। तथा तादृशस्य शिशुत्वस्य स्कन्देन्द्रादिषु सत्त्वेन तेषां शिशुभ्य इत्यत्र स्तुत्यता। युवभ्य इत्यत्र तथा वटुभ्य

Rarest Archiver

इत्यत्र च केषां स्तुत्यता ? किञ्च तद्युवत्वं वटुत्वं वेति चेत्। स्कन्देन्द्रादीनामेवोभयत्रापि स्तुत्यतेति वदामः। युवत्वादिकं तु वैवक्षिकं न वक्तव्यमेव। नहि विवक्षाविशेषेण कस्यचित्पदार्थस्य वचनं व्यसनितया क्रियते। किं नाम। प्रसिद्धस्यासम्भवे, सति च प्रयोजनविशेषे। तत्राजरामराणां देवानां महत्त्वशिशुत्वयोरसम्भवशङ्कया सम्भावयितुं वैवक्षिकं तदुभयमुक्तम्। असति जरोपेतशरीरसंयोगे, असत्यपि नवीनशरीरसंयोगे, उक्तोभयसम्भवात्। प्रयोजनं च स्तुत्यर्थं प्रवृत्तानां पदानां स्तोतुः पुरुषार्थार्पकमेव। एतच्च अनुपदमेव स्फुटीभविष्यति। न त्वेवं युवत्वादिके असम्भवशङ्कास्ति। नापीतः प्रयोजनालाभेन तल्लाभाय वैवक्षिकानुसरणमिति युक्तम्। महत्त्वादिज्ञानस्य स्तुत्यप्रीतिजनकतया तत्र तादृशवैवक्षिकानुसरणस्य युक्तता। अत्र तु युवत्वादिज्ञानस्यैव तत्प्रीतिसाधनतया तत एव प्रयोजनलाभेन तदर्थं तदनुसरणस्य अनावश्यकत्वात्। इदमेव तावदवशिष्यते। यत् शिशुत्वेन प्रणतानामेव स्कन्देन्द्रादीनां पुनर्युवत्वादिना प्रणामः प्रसज्यते। तथाच पुनरुक्तिरिति। एतदपि न दूषणम्। प्राप्तापत्परिहाराय देवाः स्तूयन्त इति तावदविवादम्। स्तुतिश्च माहात्म्यप्रतिपादनमेव। तेनैव प्रीतिरिति प्रसिद्धमेव। ततः स्वप्रयोजनं साधयता यथा स्तुत्यप्रीतिः तस्मिन् अधिका भवेत्, तथा कर्तव्यमेव प्रयोजनलाभपर्यन्तमिति। सति च प्रयोजने तददूषणत्वात्। किञ्च देवानां रूपदारिद्र्याभावेन स्कान्देन्द्रादीनामेव विशेषविवक्षया पुनः प्रणामस्य श्लिष्टतरत्वात्। परमेश्वरप्रेमपात्राणां देवानां विशेषतः तत्सम्पादनाय रूपान्तरे अवस्थाविशेषेणैव अवस्थानेन तथा स्तवनेन स्तोतरि तेषां प्रीतिविशेषलाभसद्भावाच्चेति ॥ छ ॥

**अथवा** यथा हि अधिकवयसः महान्तः। ततो न्यूनवयसः युवानः।

Rarest Archiver

ततोऽपि न्यूनवयसो वटवः। ततोऽपि न्यूनवयसः शिशवः। तत्र सर्वतोऽपि न्यूनगुणाः शिशवः। तत्र सर्वतोऽपि अधिकगुणाः त्रयो देवाः यदा प्रथमत्वेन विवक्षिताः, तदा तत्रिकवत् अधिकगुणत्वाभावेन, अस्मदादिवत् अल्पगुणत्वस्य च अभावेन, मध्यमगुणत्वात् इन्द्रादयो युवत्वेन विवक्षिताः। यदा तु त्रिष्वपि अधिकगुणतया विष्णुरेव महत्त्वेन विवक्षितः, तदा तद्वत् अधिकगुणत्वाभावेन अस्मदादिवत् अल्पगुणत्वस्य च अभावेन मध्यमगुणत्वात् ब्रह्मादय एव युवत्वेन विवक्षिताः। ततोऽपि न्यूनगुणत्वेन अस्मदादिभ्यः अल्पगुणेभ्यः अधिकगुणत्वेन इन्दादय एव अशनित्वापरपर्यायवटुत्वेन विवक्षिताः। यदा तु द्वयोरपि मध्ये ब्रह्मणः अधिकगुणत्वं विवक्षितं, तदा विष्णुवत् अधिकगुणत्वाभावेन अस्मदादिवत् अल्पगुणत्वाभावेन च मध्यमगुणत्वात् ब्रह्मैव युवत्वेन विवक्षितः। ततोऽपि न्यूनगुणत्वेन अस्मदादिभ्यः अल्पगुणेभ्यः अधिकगुणत्वेन रुद्र एव वटुत्वेन विवक्षितः। ततोऽपि न्यूनगुणत्वेन अस्मदादिभ्यः अल्पगुणेभ्यः अधिकगुणत्वेन इन्द्रादय एव शिशुत्वेन विवक्षिताः। तथाच महद्भ्यो नारायणब्रह्मरुद्रेभ्यो देवेभ्यः नमोऽस्तु। न केवलं महद्भ्य एव किं नाम। महतो देवान् आरभ्य शिशुपर्यन्तं इत्याशयेनाह ग्रन्थकृत्। अनेन देवानां चातुर्विध्यं विशदीकृतं भवति। तथोक्तावेव मध्यस्थितिप्रकारपरिचिन्तनावसरात्। तथा युवभ्य इन्द्रादिभ्यो नमोस्तु। अत्रापि समीचीनतां प्रसिद्धरूपां युवत्वे दर्शयति। **तथा चोक्तं**—"सुमङ्गलः कश्चन काङ्क्षते हि मां" इत्यादौ। तथा वटुभ्यः स्कन्दादिभ्यो नमोऽस्तु। अत्रापि वटुत्वे समीचीनताम्। तथा चोक्तं पुराणेषु। तथा शिशुभ्यः स्कन्दादिभ्यो नमोऽस्त्विति योजना॥ अस्मिन् पक्षे तु न कश्चित्क्षुद्रोपद्रव इति॥ छ॥

तदेवं चातुर्विध्येन देवेशं देवांश्च नत्वा सिद्धरूपान् योगिनो नमति॥

**नम इति॥** महद्भ्यो दत्तकपिलादिभ्यो नमोऽस्तु। न केवलं महद्भ्य एव

Rarest Archiver

योगिभ्यः। किन्तु महत आरभ्य शिशुपर्यन्तमित्याशयेनाह॥ **नमः शिशुभ्य इति॥** अनेन योगिनामपि चातुर्विध्यं प्रथयति। तथा युवभ्यो दुर्वासशुकप्रभृतिभ्यो नमोऽस्तु। तथा वटुभ्यः स्कन्दादिभ्यः नमोऽस्तु। तथा शिशुभ्यः सनकादिभ्यो नमोऽस्त्विति। सुप्रसिद्धा एवं प्रसिद्धलिङ्गा अथवान्ये ये योगिनस्तानवधूतलिङ्गान् अप्रसिद्धान् योगिनो नमति॥ **नम इति॥** महद्भ्यः ऋषिप्रभृतिभ्यः। वयसा न। ये च ब्रह्मसाक्षात्कारवन्तः तत एव विगतदेहाभिमानाः तत एव विगतवन्द्यताप्रयोजकदण्डकमण्डलुपूर्वकचिह्न-विशेषाः अत एव साधारणैः अनवधारणीयस्वरूपा भूत्वा भारतभूविजात-जनोद्धरणाय भूमिं प्रदक्षिणीकुर्वन्ति तादृशेभ्यः। वयसा महद्भ्यो वलीपलितादिलक्षितेभ्यो नमोऽस्तु। न केवलं वृद्धेभ्य एव। किं नाम वृद्धानारभ्य शिशुपर्यन्तमपीति सूचनाय आङ्प्रयोगः। तथा प्रकृतावधूतसदृशेभ्यो युवभ्यो दृढाङ्गेभ्यो नमोऽस्तु। अनेन नातिपीवेत्यादिस्वोक्तदुरुक्तिस्मरणपूर्वकक्षमापनं सूचयति। तथैतेभ्योऽपि वयसा न्यूनेभ्यो वटुभ्योऽपि नमोऽस्तु। किम्बहुना शिशुभ्योऽप्यकृतविशेषेभ्योऽपि नमोऽस्तु। अनेन "शङ्के भृशं ब्रह्मकुला-वमानात्" इति स्पष्टीकृतं भवति। किमर्थमेव वन्दनमित्यतः प्रमादतः प्राप्तमहदवज्ञानजनितपापपरिहारार्थमिति भावेनाह। तेभ्यश्चतुर्विधेभ्यः सकाशा-दस्माकं शिवं पापप्रयुक्तानर्थनिवृत्तिलक्षणमस्त्विति। किं तदवज्ञानेनानिष्टं, यन्निवृत्तये अयमायास इत्यतः नाहं निष्किञ्चनः किं त्वैहिकभोगसाधनेष्वधिक-राज्यादिसाधनोपेतः पारत्रिकभोगसाधनेषु अधिकान्नदानादिसाधनोपेतः ततस्ततो मम (महदतिक्रमस्य) महदनिष्टभवनस्य न विलम्ब इत्याह॥ **राज्ञामिति॥** **यथाहुः—** "आयुः श्रियं यशो धैर्यं लोकानाशिष एव च। हन्ति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः" इति। इदमनेन सूचितं भवति - नारायण एव सर्वोत्तमः सर्वगुणैः। तदनन्तरं तु कमला। तावेव जगतः सर्वस्यापि पितरौ

Rarest Archives

तदनन्तरं विरिञ्चिस्तत्पत्नी च। इतोऽन्ये देवास्तु तद्भक्ता एव मम बान्धवाः। बान्धवता चैषा मे तद् द्वारैव। कदाचिन्नारायणपुत्रतया कदाचित्पौत्रतया अन्येषां पुत्रत्वादिकं जगत्प्रति नास्त्येव। विशिष्य विद्यमानमपि तदायत्तत्वात् तत्रैव पर्यवसन्नं। ते च श्रीनारायणसेवासमासादितस्वस्वयोग्यमहिमोपेताः सर्वेऽपि चैते सर्वदा श्रीनारायणप्रसादमेव प्रार्थयन्तः इत्येवं विनिश्चयवद्भिः वैष्णवैः कृतान्येव प्रायश्चित्तानि पापपरिहारणक्षमाणि भवन्तीति ॥ १३२ ॥

**॥ इति श्रीमदवधूतशिरोमणिजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां महन्निन्दावर्जनप्रकरणम् ॥ ८ ॥**

Rarest Archive

## आत्मप्रशंसावर्जनप्रकरणम् ॥ ९ ॥

**हे सूत हे मागध सौम्य बन्दिन् लोकेऽधुनाऽस्पष्टगुणस्य मे स्यात् ।**
**किमाश्रयो वस्तव एष [1]योज्यतां मा मय्यभूवन् वितथा गिरो वः ॥**
**१३३ ॥ ४ । १५ । १९ (१)**

यथा श्रेयोर्थिभिः महन्निन्दा न कर्तव्या तथा आत्मप्रशंसापीत्येतमर्थं प्रतिपादयितुं इदं प्रकरणम् । तत्रादौ यदा परकृतमपि स्वात्मप्रशंसनं न श्रोतव्यं तदा किमु वक्तव्यं स्वप्रशंसा स्वेन न कर्तव्येतीत्येवं कैमुत्येनायमर्थः सिद्ध्यतीत्याशयेन सूतादीन् प्रति पृथुराजोक्तं दर्शयति ॥ **हे सूतेति ।** हे सूतादयः अधुना लोके अप्रकटितगुणस्य मे एष स्तवः भवत्कृतः । को गुणः आश्रयो विषयो यस्य सः किमाश्रयः स्यात् । वो गिरः मयि वितथाः बाधितविषयाः मा भूवन् । इदं योज्यतां विचिन्त्यतामिति । **इदमुदितं भवति—** एते सूतादयोऽस्मत्स्तवनं कर्तुं आगताः । आत्मस्तवनं च न श्रोतव्यम् । अतः इदानीं तावत् अस्पष्टगुणत्वं निमित्तं व्युत्पाद्य परिहरामः किमुत्तरकालचिन्तया मर्त्यानामिति ॥ १३३ ॥

**तस्मात्परोक्षेऽस्मदुपाश्रितान्यलं करिष्यथ स्तोत्रमपीड्यवाचः ।**
**सत्युत्तमश्लोकगुणानुवादे जुगुप्सितं न स्तवयन्ति सभ्याः ॥ १३४ ॥**
**। ४ । १५ । २० । (२)**

---

१. योज्यतां स्तुतिं प्रयुञ्जतां वः, यद्वा किमाश्रयो वः स्तवो योज्यतां, अप्रकटीकृतगुणत्वादद्यापीत्यभिप्रायो द्वेधा विजयध्वजतीर्थीये प्रादर्शि ।

Rarest Archiver

नन्वेवं स्तवननिषेधे पाकादिना पाचकादीनामिव क्लृप्तवृत्तीनां अस्माकं जीवनमेव न सिद्ध्येदिति तन्मनोगतमाशङ्क्याह ॥ **तस्मादिति** ॥ यस्मात् तेन विना जीवनं न सिध्यति। तस्मात् अस्मदुपाश्रितानि अस्मद्विषयाणि स्तोत्राणि अलं यथेच्छं परोक्ष एव करिष्यथेति। ननु अस्माकं पूर्वैः राजभिः एवं नियमितम्। "प्रतिदिनं अमात्यादिगृहेषु राज्ञः स्तवनमेकम्। राजसभायां तु द्वितीयम्। तदर्थं क्षेत्रादिकमपि अनुरूपं दत्तमिति" परम्परायातं कथं अपरोक्षमपि स्तवनं त्याज्यमित्यतस्तत्रापि समाधिमाह। अपि प्रत्यक्षमपि। ईड्यवाचः ईड्या स्तुत्याः वाचो नामानि यस्य तस्य हरेः स्तोत्रं करिष्यथेति। राज्ञ एव स्तवनं समक्षं कुतो न कार्यमित्यत आह ॥ **सतीति** ॥ उत्तमश्लोकस्य हरेः गुणानुवादे सति तं परित्यज्य। सभ्याः सभासु स्थिताः सभापतयः स्वात्मानं न स्तवयन्ति। न स्तावयन्ति स्तावकैः। यतोऽत इति। "प्रभवो ह्यात्मनः स्तोत्रं [1]जुगुप्सन्त्यपि विश्रुताः। ह्रीमन्तः परमोदाराः पौरुषं वा विगर्हित"मिति ॥ १३४ ॥

**महद्गुणानात्मनि कर्तुमिच्छन् कः स्तावकैः स्तावयतेऽसतोऽपि।**
**स वै भविष्यन्निति विप्रलब्धो जनापहासं कुमतिर्न वेद ॥ १३५ ॥**
**। ४ । १५ । २१ । (३)**

राज्ञा ह्येवं कारयितव्यम्। स्वोपजीविभिः सूतादिभिः यदा स्वस्तुतिः कार्यतया अभिप्रेयते। तदा परोक्ष एव स्वस्मिन् विद्यमानगुणविषयिण्येव। यदा च प्रत्यक्षमेव स्तवनं कार्यमित्युच्यते तदा श्रीहरिस्तवनमेवेति। एवं उक्तस्य वैपरीत्येन यः कारयति स न प्रेक्षावान् इति उपेक्षणीय एव महतामिति

१. न शृण्वन्त्यपीति पाठान्तरम्।

Rarest Archives

भावेनाह ।। **महद्गुणानिति ।।** आत्मनि स्वस्मिन् असतः अविद्यमानान् अपि महतां योग्यान् गुणान् आत्मनि कर्तुमिच्छन् आत्मनिष्ठतया ज्ञापनकामः । स्तावकैः उदरम्भरणैकरतैः पुरुषैः स्वस्मिन् असतो गुणान् कः स्तावयते । यः स्तावयति स कुमतिः विप्रलब्धः अज्ञानां वञ्चकः भविष्यन् भवन्, स्तावयते स्तावयतीति, जनैः क्रियमाणं अपहासं न वेदेति ।। १३५ ।।

**अहं पुराऽतीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनाम् ।**
**निरूपितो बालक एव योगिनां [१]शुश्रूषणे प्रावृषि निर्विविक्षताम् ।।**
**१३६ ।। १ । ५ । २३ । (४)**

तदेवं महत्सेवया तदनुरूपं फलं तन्निन्दया च तदनुरूपं फलं प्रसिद्धतरस्य नारदस्य महामुनेः दृष्टमिति तत्सेवानिन्दयोः करणत्यजनयोः आदरजननाय दर्शयितुं तद्वाक्यमेव पठति ।। **अहमिति ।।** व्यासं प्रति नारदवचनम् । हे मुने व्यास । अहं पुरा अतीते कल्पे पूर्वब्रह्मकल्पे कश्चिद्गन्धर्वोऽभवम् । तत्र किञ्चित् महदवज्ञायुक्तश्च अभवम् । तेन च एतद्ब्रह्मकल्पे अतीतभवे एतद्देहापेक्षया पूर्वजन्मनि कस्याश्चन दास्याः सकाशात् अभवम् । पितुर्निर्धारणाभावादेवमुक्तिः । तत्र च मात्रा योगिनां शुश्रूषणार्थं बालक एव निरूपित इति । गन्धर्वस्यापि किञ्चिन्महदवज्ञानेन दासीपुत्रत्वम् । तस्मिन् शूद्रजन्मन्यपि महत्सेवाघटनेन ब्रह्मपुत्रत्वं प्राप्तमिति भावः ।। **यथाहुः**— "अहं पुराऽभवं कश्चित् गन्धर्व उपबर्हणः । नाम्नाऽतीते महाकल्पे गन्धर्वाणां सुसंमतः (७।१६।३९) ।। रूपपेशलमाधुर्यसौगन्ध्यप्रियदर्शनः । स्त्रीणां प्रियतमो नित्यमतस्तत्प्रियलम्पटः (७।१६।७०) ।।

---

१. सन्नन्तः शृणोतिः परिचर्यायां रूढः ।

Rarest Archives

एकदा देवसत्रे तु गन्धर्वाप्सरसां गणाः। उपहूता विश्वसृग्भिः हरिगाथोपगायने (७।१६।७१) ॥ अगायंस्तद्विदित्वाहं स्त्रीभिः परिवृतो गतः। ज्ञात्वा विश्वसृजस्तन्मे हेलनं शेपुरञ्जसा (७।१६।७२) ॥ याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः। तावद्दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनाम्। शुश्रूषयाऽनुषङ्गेण प्राप्तोऽहं ब्रह्मपुत्रता'' मिति (७।१६।७३) ॥ १३६ ॥

**इत्थं शरत्प्रावृषिकावृतू हरेर्विशृण्वतो मेऽनुसवं यशोऽमलम्। सङ्कीर्त्यमानं मुनिभिर्महात्मभिर्भक्तिः प्रवृत्ताऽऽत्मरजस्तमोपहा ॥ १३७॥ १।५।२८। (५)**

**॥ इति आत्मप्रशंसावर्जनप्रकरणम् ॥ ९ ॥**

मात्रा योगिनां शुश्रूषणे निरूपित इत्युक्तम्। तत्र कियत्कालं शुश्रूषणं कृतम्। किञ्च तदा फलं लब्धम्। येनोत्तरत्र ब्रह्मपुत्रता लब्धेत्यतः कियदेव कालं शुश्रूषणं कृतम्। तेन च साक्षान्मोक्षसाधनं ज्ञानमेव लब्धमित्याशयेन स्ववृत्तं निगमयतीत्याह ॥ **इत्थमिति** ॥ ऋतुद्वये तत्राप्यनुसवं सवनत्रयेऽपि। तत्रापि क्षणकालं अविहायैव विशृण्वतो मे। रजस्तमोपहा रजस्तमःकार्यरागद्वेषादि-दोषनिरसनी भक्तिः प्रवृत्तेति विदित्वा। गमनसमये ब्रह्म उपदिश्य गताः। ततोऽहं एकदैव तत्साक्षात्कृत्य तत्सेवायामेव अवस्थितः कालान्तरे मृतो ब्रह्मपुत्रोऽभवमिति ॥ **यथाहुः—** ''तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः। श्रद्दधानस्य बालस्य दान्तस्यानुचरस्य च (१।५।२९) ॥ ज्ञानं गुह्यतमं यत्तत्साक्षात् भगवतोदितम्। अन्ववोचन् गमिष्यन्तः कृपया दीनवत्सलाः (१।५।३०) ॥ येनैवाहं भगवतो वासुदेवस्य वेधसः। मायानुभावमविदं येन गच्छन्ति तत्पद''मिति (१।५।३१) ॥ तदनेन प्रकरणद्वयेन तपआख्यो

Rarest Archiver

भागवतो धर्मः अभिहितो भवति। मनो हि स्वोत्कर्षे परापकर्षे च प्रवर्तत ति सर्वानुभवसिद्धम्। एतदेवात्मप्रशंसापरनिन्दापदबोध्यम्। तादृशवचनादिकं तु तद्धेतुतयैव तत्पदाभिधेयम्। तयोरुभयोरप्यनर्थहेतुता प्रमाणसिद्धा। ततः श्रेयोर्थिना तत्रोभयत्रापि यथा मनो न गच्छेत्तथा कार्यमेव। तन्निग्रहस्य मानसतपोरूपत्वात्। तादृशवचनादिकं तु स्वकारणनिवृत्त्यैव निवर्तत इति ॥ १३७ ॥

**॥ इति श्रीमदवधूतशिरोमणिजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां आत्मप्रशंसावर्जनप्रकरणम् ॥ ९ ॥**

Rarest Archiver

## इन्द्रियजयप्रकरणम् ॥ १० ॥

**सङ्गं त्यजेत मिथुनवृजिनान्मुमुक्षुः**
**सर्वात्मना न विसृजेत् बहिरिन्द्रियाणि ।**
**एकश्चरन् रहसि चित्तमनन्त ईशे**
**युञ्जीत तद्व्रतिषु साधुषु चेत्प्रसङ्गः ॥ १३८ ॥ ९ । ७ । ५२ । (१)**

महत्सेवादिवत् इन्द्रियजयोऽप्यावश्यक इति तत्र अवहितैर्भाव्यमिति वक्तुमिदं प्रकरणम् । तत्रादौ तज्जये हेतुं सूचयति ।। **सङ्गमिति ॥** इन्द्रियाणि बहिर्विषयेषु सर्वथा न विसृजेदित्यनेन विषयसन्निधानवर्जनं तज्जयहेतुरिति सूचयति ॥ **यथाहुः—** "अथापि नो विषज्येत स्त्रीषु स्त्रैणेषु चार्थवित् । विषयेन्द्रियसंयोगात् मनः क्षुभ्यति नान्यदा ।। केशप्रसाधनोन्मर्दस्नपनाभ्यञ्ज-नादिकम् । गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा (७।१३।८) ।। नन्वग्निः प्रमदा नाम घृतकुम्भः पुमान्यतः । सुतामपि रहो जह्यादन्यदा यावदर्थकृत् ।। ७।१३।९।। मात्रा स्वस्रा दुहित्रा वा न चैकासनगो भवेत् । बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ।।" इति । चेत् यदि तद्व्रतिषु सा भगवद्विषयिणी रतिर्येषां तेषु साधुषु प्रसङ्गो लब्धः तदा कार्य एवेत्यनेन सर्वकार्यसाधकेन सत्समागमेन इदमपि भवेदिति, साधारणं कारणं तु सिद्धमेवेति किं वक्तव्यम् इति सूचितं भवति ।। १३८ ।।

**यथाऽऽमयोंऽगे समुपेक्षितो नृभि**
**र्न शक्यते रूढपदश्चिकित्सितुम् ।**

Rarest Archiver

**यथेन्द्रियग्राम उपेक्षितस्तथा**
**रिपुर्महान् लब्धबलो न चाल्यते ॥ १३९ ॥ १० । ५ । ३८ । (२)**

इन्द्रियग्राम उपेक्षितश्चेज्जेतुं न शक्यो यथेति दृष्टान्ततया गृहीतत्वात्तद्विषये उपेक्षा सर्वथा न कार्येत्याह ॥ **यथेति** ॥ नृभिः समुपेक्षितः आमयः अङ्गे रूढपदः सन् चिकित्सितुं यथा न शक्यते । यथा च इन्द्रियग्राम उपेक्षितः । अत एव बहिर्विसृष्टो निग्रहीतुं न शक्यते । तथा रिपुः महान् । वयोधिकश्चेत् न चाल्यते चालयितुमशक्यो भवति । कुतः । लब्धं प्राप्तं बलं येन सः । वयआधिक्येन प्राप्तबलत्वात् । अतो बाल्य एव वैरिवधः कार्य इति भावः ॥ १३९ ॥

**मौनव्रतश्रुततपोऽध्ययनस्वधर्म-**
**व्याख्यारहोजपसमाधय आपवर्ग्याः ।**
**प्रायः परं पुरुष ते त्वजितेन्द्रियाणां**
**वार्ता भवन्त्युत न वाऽत्र तु दाम्भिकानाम् ॥ १४० ॥**
**। ७ । ९ । ४६ । (३)**

इन्द्रियजयाभावे सर्वं मोक्षसाधनं स्वस्वफलाय नालमित्यतोऽपि स आवश्यक इत्याह । **मौनेति** ।। पुरुष हे हरे । मौनादयः आपवर्ग्याः अपवर्गसाधनतया श्रुतिप्रसिद्धाः भवन्ति । भवन्तोऽपि प्रायेणैव भवन्तीति मन्यामहे । मौनादीनां अपवर्गनिष्पादकत्वं प्रायिकमित्येतत् कुतः । यतस्त एव अपवर्गसाधनतया प्रसिद्धा एव मौनादयः । अजितेन्द्रियैः अत एव दाम्भिकैः नृभिः कृताः । अत्रापि लौकिकार्थेऽपि परं केवलं उदरपूर्तिर्यथा स्यात्तथा वार्ताः उपयिकाः भवन्ति । उत पक्षान्तरे न वेति तत इति ॥ १४० ॥

Rarest Archiver

**यन्मैथुनादिगृहमेधिसुखं हि तुच्छं**
**कण्डूयनेन करयोरिव दुःखदुःखम्।**
**तृप्यन्ति देहकृपणा बहुदुःखभाजः**
**कण्डूतिवन्मनसिजं विषहेत धीरः ॥ १४१ ॥ ७ । ९ । ४५ । (४)**

अस्त्वेवं इन्द्रियजय आवश्यकः। तज्जयसाधनं किमित्यत इदमेवेत्याह ॥ **यदिति** ॥ यदैहिकसुखलुब्धाः पशुप्रायाः त एव करयोः कण्डूयनेन जन्यं सुखमिव तुच्छं दुःखदुःखं बहुदुःखप्रदं च मैथुनादि स्त्रीसम्भोगालापादिहेतुकं यद्गृहस्थानां सुखम्। तल्लब्ध्वा बहुदुःखभाजो भूत्वापि तृप्यन्ति कृतकृत्या भवन्ति। धीरस्तु कण्डूतिवत् कण्डूतिमिव स्वमनसि उद्गतं कामं विषहेत तद्वेगं सहेत ॥ **इदमुदितं भवति**— यथा हि कश्चन पुरुषः करयोः कण्डूतिजनने सति कराभ्यां घर्षयति। तेन तुच्छसुखं आदौ आप्नोति। ततो महद्दुखम्। अन्यस्त्वल्पं सुखं दुःखं तु महदिति मत्वा कण्डूतिमेव सहते। तस्य महद्दुःखं नास्त्येव। तथा करयोः कण्डूतिरिव मनसि कामोद्रेको भवति। तमेवाल्पसुखसाधनं महद्दुःखसाधनं अनुसन्धाय सहेत। न तु मैथुनादौ प्रयतेत। एवमभ्यासे सति क्रमादिन्द्रियजयो भवतीति। अनेन तितिक्षाख्यो भागवतो धर्मः प्रदर्शितो भवति ॥ १४१ ॥

**नैतन्मनस्तव कथासु विकुण्ठनाथ**
**सम्प्रीयते दुरितदुष्टमसाधु तीव्रम्।**
**कामातुरं हर्षशोकभयेषणार्तं**
**तस्मिन्कथं तव गतिं विमृशामि दीनः ॥ १४२ ॥**
**। ७ । ९ । ३९ । (५)**

एवं सर्वेष्वपि इन्द्रियेषु श्रेष्ठं मन इतरेषां तदधीनप्रवृत्तित्वात् अतो

Rarest Archiver

महामल्लभङ्गन्यायेन तदेवादौ जेतव्यमित्याशयेन तस्य श्रैष्ठ्योपपादकं स्वभावविशेषं कथयति ।। **नैतदिति** ।। न संप्रीयते औत्सुक्ययुक्तं न भवति। कुतः दुरितदुष्टं पापेन प्रतिबद्धम्। असाधु दुष्टस्वभावम्। तीव्रं चञ्चलम्। कामातुरं कामोत्सुकम्। हर्षशोकभयैः ईषणाभिः दारपुत्रवित्तचिन्ताभिश्च आर्तं दीनम्। मास्तु तव मनो मत्कथासु प्रीतियुक्तं त्वं तु तावत्प्रवर्तस्वेत्यत आह ।। **तस्मिन्निति** ।। मनसि तस्मिन् तादृशे दीने सति अहमपि दीनोऽभवम्। सत्येवं तव गतिं कथं विमृशामीति ।। १४२ ।।

**दानं स्वधर्मो नियमो यमश्च श्रुतानि कर्माणि च सद्व्रतानि ।**
**सर्वे मनोनिग्रहलक्षणान्ताः परो हि योगो मनसः समाधिः ।। १४३ ।।**
**। ११ । २३ । ४६ । (६)**

मनोजये आदरजननाय तं स्तौति ।। **दानमिति** ।। दानादयः सर्वे योगाः उपायाः मनोनिग्रहलक्षणो य उपायः स एव अन्तः फलरूपो येषां ते। यत एवं सर्वे मनोनिग्रहार्थाः ततः मनसः समाधिः निग्रह एव परो योगो योगेषु पर इति ।। **यथाहुः—** "तस्मात्सर्वात्मना तात निगृहाण मनो धिया। मय्यावेशितया युक्त एतावान्योगसङ्ग्रहः" इति (११।२३।६१) ।। १४३ ।।

**समाहितं यस्य मनः प्रशान्तं दानादिभिः किं वद तस्य कृत्यम् ।**
**असंयतं यस्य मनो विनश्येद्दानादिभिश्चेदपरं किमेभिः ।। १४४ ।।**
**। ११ । २३ । ४७ । (७)**

सर्वे मनोनिग्रहलक्षणान्ता इत्युक्तमेव विशदयति ।। **समाहितमिति** ।। यस्य मनः समाहितं स्वाधीनम्। अत एव प्रशान्तम्। तस्य पुरुषस्य दानादिभिः किं साध्यं वद। मनःसमाधानस्यैव दानादिसाध्यत्वात् तस्य च सिद्धत्वान्न

Rarest Archiver

किमपि प्रयोजनमिति। यस्य च पुंसो मनः दानादिभिः असंयतं अनियतं अस्वाधीनं सत्। चेत् यदि विनश्येत् विषयलग्नतया। तर्हि एभिः दानादिभिः। अपरं मनोनिग्रहादतिरिक्तम्। किं फलं साध्यं मुख्यमस्ति। अनेन दानादिभिर्मनोनिग्रहाभावे तेषां निष्फलत्वकथनेन तदेव मुख्यं फलमिति विशदीकृतमिति ज्ञेयम् ॥ १४४ ॥

**तथाऽपि सङ्गः परिवर्जनीयो गुणेषु मायारचितेषु तावत्।**
**मद्भक्तियोगेन दृढेन यावद्रजो निरस्येत तमःकषायम्      ॥ १४५ ॥**
**। ११ । २८ । २८ । (८)**

कदाचित् मनः स्वाधीनमिव गृहे स्थितस्य वा ततो विरक्तस्य वा दृश्यते। न च तावता सन्तोष्टव्यम्। यतः पुनः विषयेषु प्रसक्तं भवत् पुरुषं व्यथयति। ततः स्वाधीनमनसाऽपि पुरुषेण विषयसन्निधानं वर्जनीयमेवेति यदा। तदा किं वाच्यं अजितमनसेत्याशयेनाह ॥ **तथाऽपीति** ॥ यद्यपि मनः कदाचित् स्वाधीनं भवति। तथापि यावद्दृढेन भगवद्भक्तियोगेन। तमःकषायं तमोनिमित्तदुःखप्रदं रजः रजोगुणकार्यं रागादिकं निरस्येत। तावत् गुणेषु सङ्गः परिवर्जनीय एवेति ॥ १४५ ॥

**यथाऽऽमयोऽसाधु चिकित्सितो नृणां**
**पुनः पुनः सन्तुदति प्ररोहन्।**
**एवं मनोऽपक्वकषायकर्म**
**कुयोगिनं विध्यति सर्वसङ्गम् ॥ १४६ ॥ ११ । २८ । २९ ।(९)**

॥ इति इन्द्रियजयप्रकरणम् ॥ १० ॥

विपक्षे बाधकं सदृष्टान्तमाह। **यथेति।** असाधु असम्यक्

Rarest Archive

चिकित्सितः आमयः। पुनः पुनः प्ररोहणं कुर्वन्। नृणां नून् सन्तुदति दुःखयति। एवं तथा। अपक्कं निःशेषतया अपरित्यक्तम्। कषायकर्म पापं कर्म येन तादृशं मनः। सर्वः सर्वविषयसम्बन्धी सङ्गो यस्य तादृशम्। कुयोगिनं अदृढयोगवन्तम्। विध्यति बाधत एवेति यतः। अतः सङ्गः परिवर्जनीय इति भावः। अनेन इन्द्रियजयाख्यो दमाऽपरपर्यायो भागवतो धर्मः प्रतिपादितो भवति॥ १४६॥

**॥ इति श्रीमदवधूतशिरोमणिजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां इन्द्रियजयप्रकरणम्॥ १०॥**

Rarest Archiver

# [१]ब्रह्मोपदेशप्रकरणम् ॥ ११ ॥

[२]जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यं सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ १४७ ॥

। १ । १ । १ । (१)

आपाततः पुराणादिशास्त्रेण पित्रादिहितैषिवाक्येन वा प्रबलतर-जन्मान्तरसंस्कारेण वा सामान्यतः संक्षिप्यावगतशास्त्रमुख्यार्थस्यान्तरेव जातवैराग्यस्य सत्सङ्गवशादीषद्व्यक्तविरागस्य महत्सेवासमासादित-तदीयानुग्रहपात्रस्य महन्निन्दामात्मस्तुतिं चाकुर्वतो जितेन्द्रियस्याधिकारिणो गुरुभिः क्रियमाणमुपदेशप्रकारं दर्शयति ॥ **जन्माद्यस्य यत इति** ॥ यतोऽस्य जगतो जन्मादि । यश्चार्थेष्वभिज्ञः । यश्च स्वराट् । यश्च ब्रह्म वेदं आदिकवये चतुर्मुखाय हृदा स्नेहेन तेने विस्तारितवान् । यं प्रति सूरयो मुह्यन्ति । तेजोवारिमृदां विनिमयो यथा तथा त्रिसर्गो यत्र मृषा । तं स्वेन धाम्ना सदा

---

१. योग्योऽधिकारः पूर्वप्रकरणेषु प्रतिपादित इति तमेव संक्षिप्यावगतसकलशास्त्रार्थस्येत्यादिना सङ्गृह्य निरूप्य ''अशेषगुणपूर्णत्वं सर्वदोषसमुज्झितिः । विष्णोरन्यच्च तत्तन्त्रमिति सम्यग्विनिर्णयः'' । तथा । ''निर्दोषत्वं रमायाश्च तदनन्तरता तथा । सत्सिद्धान्त इति ज्ञेयो निर्णीतो हरिणा स्वयं'' । इति तृ.अ.तृ. पादीयानुव्याख्याने श्रीमदाचार्योदीरितं परमप्रमेयं प्रदर्शयत्यस्मिन् प्रकरणे ।

२. बहुव्याख्येयत्वेन विस्तरभिया योजनामात्रमवधूतरत्नैः प्रादर्शि । विस्तरो **विजय-ध्वजीयादेवावसेयः** । बहुवक्तव्यतया नेहास्माभिरनूद्यते ।

Rarest Archive

निरस्तकुहकं सत्यं परं धीमहीति। अनेन जगज्जन्मादिकारणत्वं ब्रह्मणो लक्षणमित्युपदेशप्रकारं सूचयति ॥ १४७ ॥

**यद्दर्शनं निगम आत्मरहःप्रकाशं**
**मुह्यन्ति यत्र कवयोऽजपरा यतन्तः ।**
**तं सर्ववादविषयप्रतिरूपशीलं**
**वन्दामहे पुरुषमात्मनिगूढबोधम् ॥ १४८ ॥ १२ । ७ । ४९ ।(२)**

नन्ववगतमेतत्सामान्यतो यदस्य जगतो जन्मादिकारणं तद्ब्रह्म । तत्र च वेदो मानमिति । विशेषतो ब्रह्मावगतिस्तु कुतः स्यात् । न च वेदात् ''यतो वा'' इत्यादितः । तत्रापि सामान्यत एवाभिधानात् । वेदविशेषात्तु भवेत् । अत एव हृदा ब्रह्म वेदं आदिकवये विस्तृत्योपदिदेशेत्युक्तम् । तथापि ब्रह्मादीनां परमस्नेहपात्राणां यथा परवस्तुस्थितिः तथैव तदियत्तावगतिः केषाञ्चिदेव स्यात् नास्माकम् । न च तेषामपि तदियत्तानिर्णयाभावः । अत एव मुह्यन्ति यं सूरय इत्युक्तमिति मन्तव्यं । ब्रह्मादय इत्यविशेषितत्वेन सूरिपदेन तदतिरिक्तानां ग्रहणसम्भवात् । जगज्जन्मादिकारणं च वस्तु कथं प्रतिपत्तव्यम् । किमेकमिति किं वानेकमिति । आद्ये विरुद्धस्वभावत्वादनुपपत्तिः । सात्त्विकादेव पालनं राजसादेव सर्जनं तामसादेव विलापनमिति विरुद्धस्वभावा हि ते । द्वितीये वा परस्परकलहप्रसङ्गेन जगज्जन्माद्यनुपपत्त्या तत्कारणत्वानुपपत्तिरेवेत्यत आह ॥ **यद्दर्शनमिति** ॥ यस्यप्रदर्शकं यस्याज्ञारूपं वा । निगमो वेदादिशास्त्रम् । परमात्मनो रहस्यस्यापि योग्यस्य रहः एकान्तेनैव अस्पष्टवचनवृत्त्यैव प्रकाशकं भवति । अनेन विशेषतोऽवगतिः कुत इत्यस्योत्तरमुदितं भवति । यत्र च । अजो ब्रह्मा स एव परोऽन्तिमो येषां ते कवयः । यतन्तोऽपि मुह्यन्तीत्यनेन ब्रह्मादीनां परमप्रीतिपात्राणामपि इयत्तानिर्णयो नास्तीत्युक्त्या अस्माकमेव नास्तीति न

Rarest Archives

भ्रमितव्यमिति द्वितीयशङ्का परिहृता भवति। तत्तद्योग्यतामनुसृत्य विशेषतोऽवगतिस्तु ब्रह्मादीनामिव अन्येषामपि भवेदेव काले गुरुविशेषलाभे इति तं पुरुषं वन्दामहे इत्यन्वयः। यदप्युक्तं कथं प्रतिपत्तव्यमिति तत्रोत्तरं एकमितीति[1]। ननूक्तं विरुद्धस्वभावत्वादनुपपत्तिरिति तत्राह॥ **सर्ववादविषयप्रतिरूपशीलमिति।** सर्वेषां वादानां सात्त्विकादेव पालनं राजसादेव सर्जनं तामसादेव विलापनमित्येवमादीनां विषयभूतं प्रतिरूपं शीलं आचरणमेव यस्य तमिति। यत्सर्ववादविषयभूतं पालनादिकमाचरणं सत्त्वादिगुणसध्रीचीनम्। तदेव विरुद्धं अत एव भिन्नकालीनं न तु तद्वस्तु विरुद्धस्वभावमिति। सत्त्वादिगुणानामेव पालनादिरूपविरुद्धकार्यकरितया तदुपादानपूर्वकं जगत्पालनादिकर्तापि विरुद्धशील इति भावः। कस्तर्हि तत्स्वभावः इत्यत उक्तं आत्मनिगूढबोधमिति॥ बोधपदं अन्योपलक्षकम्[2]। आत्मा स्वभावभूतो नितरां गूहितो बोधादिर्यस्य तमिति। ज्ञानानन्दादिस्वभावमित्यर्थः। **इदमुदितं भवति—** ज्ञानानन्दादिस्वभावं ब्रह्म सत्त्वादिगुणमुपादाय सात्त्विकादिरित्युच्यते। न तु सात्त्विकादिकं तत्स्वभाव इति। अतो न तदनुपपत्तिरिति। वक्ष्यते चैतदनुपदमेवेति॥ १४८॥

**त्वां ब्रह्म केचिदवयन्त्युत धर्ममेके**

**एके परं सदसतोः पुरुषं परेशम्।**

**अन्ये वदन्ति नवशक्तियुतं परं त्वां**

**केचिन्महापुरुषमव्ययमात्मतन्त्रम्** ॥१४९॥ ८। ११। ८।(३)

---

१. तत्र द्वितीयकल्पमनङ्गीकारेण परिहृत्य प्रथमकल्पेऽप्युक्तानुपपत्तिं परिहरिष्याम इत्याशयेनोत्तरमाह एकमितीति।

२. आनन्दादीनामुपलक्षकं। अतएव ज्ञानानन्दादिस्वभावमित्यर्थ इत्यभिप्रायः प्रादर्शि। विग्रहेऽपि बोधादिरित्यादिपदम्।

Rarest Archive

ननु जगत्कारणमेकमेव प्रतिपत्तव्यमित्यभिहितं तत्र च नास्माकं मनः स्थैर्यमवलम्बते। यतः केचिज्जगत्कारणं ब्रह्मेति वदन्ति वेदान्तिव्यपदेशाः। पुनः केचिन्नादमेव। **यथाहुः**—''समाहितात्मनो ब्रह्मन्ब्रह्मणः परमेष्ठिनः। हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते॥ यदुपासनया ब्रह्मन्योगिनो मलमात्मनः। द्रव्यक्रियाकारकाख्यं धूत्वा यान्त्यपुनर्भवमि''ति॥ एके पुनः मीमांसकाभिमताः **धर्मं** पुनरेके ''पुरुषं सदसतोः परं पुंसर्वोत्तमत्वाभिमानिनः। अन्ये त्वन्यं नवभिः शक्तिभिर्युतं पाञ्चरात्रिकाः। पुनः केचिद्योगिनो महापुरुषमि''ति। इत्यत एकमेव वस्तु तैस्तैस्तथा तथा भाष्यते न वस्तुनि भेद इत्याशयवानाह॥ **त्वामिति**॥ अवयन्ति जानन्ति। वदन्ति च तेन नाम्ना। उत मतान्तरे। **यथाहुः**— ''त्वां योगिनो यजन्त्यद्धा महापुरुषमीश्वरम्। साध्यात्मं साधिभूतं च साधिदैवं च साधवः॥ १० । ३८ । ५॥ अन्ये तु संस्कृतात्मानो विधिना विहितेन वै। यजन्ति तन्मयास्त्वां वै बहुमूर्त्येकमूर्तिकम्॥ १०।३८।८॥ त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम्। बह्वाचार्यविभेदेन भगवन्तमुपासते॥ १० । ३८ । ९॥ सर्व एव यजन्ति त्वां सर्वदेवमहेश्वरम्। येऽप्यन्यदेवता भक्ता यद्यप्यन्यधियः प्रभो॥ १० । ३८ । १०॥ यथाद्रिप्रभवा नद्यः पर्जन्यापूरिता विभो। विशन्ति सर्वतः सिन्धुं तद्वत्त्वां गतयोऽन्ततः'' ॥ १० । ३८ । ११॥ इति॥ १४९॥

**हिरण्यगर्भत्वमुपेत्य मूले सृजस्यशेषं भुवनं स एव।**
**नारायणात्मन् परिपासि भूयो जहार चान्ते भगवन् शिवात्मना ॥**
**१५०॥ १० । ५३ । १५ । (४)**

यद्येकमेव वस्तु जगज्जन्मादिकारणं तर्हि हिरण्यगर्भः स्रष्टा नारायणः पाता शिवः संहर्तेति विशिष्य कथनं कथमित्यतो रूपविशेषविवक्षयेति

Rarest Archiver

भावेनाह ।। **हिरण्यगर्भत्वमिति** ।। हे भगवन् । मूले आदौ । [1]हिरण्यगर्भनामकं रूपं गृहीत्वा, तं निमित्तीकृत्य अशेषमपि भुवनं यः सृजसि । स एव नारायणाख्येन रूपेण पुनः पुनः प्राप्तोपद्रवं परिहृत्य अन्नादिदानेन च मध्ये पालयसि । स एव शिवाख्येन रूपेण तं द्वारीकृत्य अन्ते जहार संहरसि च ।। १५० ।।

**यश्चिन्त्यते प्रयतपाणिभिरध्वराग्नौ**
**त्रय्या निरुक्तविधिना स्वहविर्गृहीत्वा ।**
**अध्यात्मयोग उत योगिभिरात्ममाया-**
**जिज्ञासुभिः परमभागवतैः परीष्टः ।।१५१।। ११ । ६ । ११ । (५)**

ननु योगिनस्तावद्द्विविधाः । कर्मयोगिनो ज्ञानयोगिनश्चेति । तत्राद्यैर्यज्ञादिकर्मण्यग्नावधिष्ठानभूते "चत्वारि शृङ्गे'त्यादिमन्त्रोदितो देवताविशेषश्चिन्त्यते । द्वितीयैस्तु ज्ञानयज्ञाख्ये कर्मणि बाह्ये मानसे वा प्रतिमादावधिष्ठाने "चतुर्भुज"मित्याद्युदितोऽपर इति कथमेकमेव प्रतिपत्तव्यमित्यतः पूर्वोक्तं मा विस्मार्षीरित्याह ।। **यश्चिन्त्यत इति** ।। त्रय्या श्रुत्या । निरुक्तेन विधिना । स्वहविर्गृहीत्वा । प्रयतपाणिभिः यत्नेनोद्धृतहस्तैर्याजिकैः । अध्वराग्नौ संस्कृते वह्नौ । "चत्वारि शृङ्गे"त्यादिवेदोक्तप्रकारेण यश्चिन्त्यते । योगिभिरुत योगिभिश्च । अध्यात्मयोगे ज्ञानयज्ञे । यः परीष्टः सम्यक्पूजितः । [2]तस्य तवेति पूर्वेणान्वयः । उभययोगिभिरप्येक एव ध्येयः पूज्यश्चेति भावः । **यथाहुः**—"त्रय्या च विद्यया

---

१. ब्रह्मविष्ण्वीशरूपाणि त्रीणि विष्णोर्महात्मनः । ब्रह्मणि ब्रह्मरूपश्च शिवरूपी शिवे स्थितः । पृथगेव स्थितो देवो विष्णुरूपी जनार्दनः ।। इति **वामनपुराणं** मनसि निधायार्थमाह ।

२. टी. तस्य तवाङ्घ्रिर्नः क्षेमाय स्यादिति स्कं. १= अ. ६=१० पद्येनान्वय इति ।

Rarest Archive

केचित्त्वां वै वैतानिका द्विजाः। यजन्ते विततैर्यज्ञैर्नानाभूतामराख्यया ॥ १०।३८।६ ॥ एके त्वखिलकर्माणि संन्यस्योपशमं गताः। ज्ञानिनो ज्ञानयज्ञेन यजन्ति ज्ञानविग्रहमि''ति ॥ १०।३८।७ ॥ १५१ ॥

**यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवन्ति।**
**कुर्वन्ति तेषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने ॥ १५२ ॥**
**। ६ । ४ । ३१ । (६)**

ननु क्वचिच्छक्तिरपि जगत्कारणमित्युच्यते। अन्यत्र शून्यं। अपरत्रासदित्यादि। न च पूर्वत्रैव अत्र समाधानं वक्तुं युक्तम्। विरुद्धधर्मत्वात्। कस्यचित्स्त्रीत्वात्। अन्यस्य निराकारत्वात्। अपरत्रावस्तुत्वादित्येव पुनःपुनर्मनो मुह्यत्येवेत्यत आह ॥ **यच्छक्तय इति** ॥ यस्यैकस्य शक्तय एव। वदतां तत्त्वनिर्णयाय वादं कुर्वतां वाद्यभिमतानां मध्ये। विवादसंवादभुवः। केषाञ्चिद्विवादस्य केषाञ्चित्संवादस्य च भुवो विषया भवन्ति। किञ्च यस्य शक्तयस्तेषां वादिनाम्। मुहुः आत्मविषये मोहं अन्यथा मतिं च। कुर्वन्ति उत्पादयन्ति। तस्मै तादृशशक्तिमते अत एव अनन्तगुणपूर्णाय नम इति ॥ **इदमुदितं भवति–** जगत्कारणं वस्त्वेकमेव। तस्य च विचित्राः शक्तयः सन्ति। तत्रैकया कैश्चिन्नृभिः स्त्रीलिङ्गैरेव शब्दैः शब्द्यते। अन्यया च अन्यैर्नृभिः नपुंसकलिङ्गैः शून्यादिपदैः पठ्यते। परया च परैरवस्तुबोधकैः अलीकादिभिरभिधानैः अभिधीयते। अपराभिश्च शक्तिभिस्तासु तासु स्वशक्तिषु केषाञ्चिद्वादिनां जगत्कारणत्वनिश्चयः समुत्पाद्यते। अन्याभिश्च अन्येषां तद्वैपरीत्येन। एवमेव अनादौ संसारे पुनः पुनः संसरतां पुंसां आत्मतत्त्वविषये मोह उत्पद्यत एव। यावदयं पुमान् निष्कापट्येन मनसा स्वचरणशरणमनुसरति। अतो भवद्भिः श्रीहरचिरणानुसरणमेव कार्यम्। तेनैव

Rarest Archiver

मनोमोहनिवृत्तिः। एतदेवाभिसन्धाय तस्मै नम इत्युक्तमिति ॥ १५२ ॥

**अहं हि पृष्टोऽस्य गुणान्भवद्भिराचक्ष आत्मावगमोऽत्र यावान्।**
**नभः पतन्त्यात्मसमं पतत्रिणस्तथा समं विष्णुगतिं विपश्चितः ॥**
**१५३ ॥ १। १८। २३। (७)**

एवं यत्सिद्धये जगज्जन्मादिकारणत्वं ब्रह्मणो लक्षणमभिहितं तत्सकलगुणपूर्णत्वमेव लक्षणं ज्ञेयम्। तद्वेद [1]परपदेनोक्तमित्यभिप्रेत्याह ॥ **अहमिति।** शौनकादीन्प्रति सूतवचनमेतत्। अस्य हरेर्गुणान्वक्तुं भवद्भिः पृष्टोऽहम्। अत्र हरिगुणेषु, यावान्, आत्मावगमः आत्मनो मम अवगमः ज्ञानं तावदेव आचक्षे व्याकरिष्ये। अशक्येऽर्थे यथाशक्ति प्रवृत्तिमत्त्वं प्रसिद्धमिति हिशब्देनाह। तवैव यावद्गुणकथने शक्तिर्नास्ति विपश्चितः अन्ये तु ब्रूयुरेवेति मुनिमनोगतामाशङ्कां हिशब्दार्थं व्यञ्जयन्नेवापनुदति। **नभ इति।** यथा पतत्रिणः। आत्मसममेव। नभः पतन्ति। तथा विपश्चितः ज्ञानिनोऽपि। हरेर्गतिम्। समं आत्मसममेव। व्याचक्षते। तत्र हरौ इतोऽधिकगुणाभावादेव उपरम्यते इत्येव किं न स्यादित्यत उक्तं **विष्णुगतिमिति ॥** विष्णोः व्याप्तस्य देशतः कालतः गुणतश्चेति त्रिविधव्याप्तिमतो गतिमित्यर्थः। अत एव व्याप्तस्याकाशस्यैव दृष्टान्तीकरणमिति ॥ १५३ ॥

**नान्तं विदाम्यहममी मुनयः प्रजेशा**
**मायाबलस्य पुरुषस्य कुत परे ये।**
**गायन्गुणान्दशशतानन आदिदेवः**
**शेषोऽधुनापि समवस्यति नास्य पारम् ॥१५४॥ २। ७। ४१ (८)**

---

१. जन्माद्यस्य यतोऽन्वयादिति पद्ये इति ज्ञेयम्।

Rarest Archiver

यदा साक्षाच्चतुर्मुखेनाप्यगण्यत्वं विष्णुगुणानां किमु तदान्यस्येति। एतमर्थं प्रतिपादयत्तद्वचनमेव पठति ।। **नान्तमिति।** पुरुषस्य यन्मायाबलं स्वरूपसामर्थ्यं तस्य। अन्तं परं पारं। अहं न विदामीति यदा तदा मोक्षाधिकारिवर्गाधिपतिर्दशशताननः सहस्रवदनोऽपि शेषः। अधुनापि। अस्य गुणान्गायन् गुणानां पारं। न समवस्यति न जानातीति किमु वक्तव्यम्। अनेन मायाबलस्येत्युक्तबलशब्दार्थ उक्तो भवति। यदा च शेषस्येदृशी दशा तदा मुनयोऽप्यमी कर्दमाद्याः। प्रजापतयोऽपि मरीच्याद्याः। न विदुरिति किं वाच्यम्। यदा तु मन्वादीनामियमवस्था। एभ्यः परे अन्येऽधिकारिणः न विदुरिति कुतः। किं वक्तव्यमिति। अत्र [1]वेद्मीति वक्तव्ये विदामीति विकरणव्यत्ययं, किमिति वक्तव्ये कुत इति तसेः प्रयोगं च कुर्वता अस्य वेदतुल्यत्वमसूचीति ज्ञेयम् ।। १५४ ।।

**नाहं न यूयं बत तद्गतिं विदुर्न वामदेवः किमुतापरे सुराः।**
**यन्मायया मोहितबुद्धयस्त्विदं विनिर्मितं स्वात्मसमं विचक्ष्महे ।।**
**१५५ ।। २ । ६ । ३६ । (९)**

नन्वितरेषां कथा यथातथम्। चतुर्मुखस्तावच्चतुर्दशभुवनकर्ता परवस्तुनोऽन्तं वेत्तुमलं समर्थः। तथा तावतां लोकानां नाशकर्ता वामदेवोऽपि। एवमेव प्रतिसृष्टिकर्तारो देवर्षिराजर्षिप्रवरा नारदविश्वामित्रादयोऽपीति तटस्थमनोगतामाशङ्कां तद्वचनोदाहरणेन परिहरति ॥ **नाहमिति ।।** तुर्विशेषे। येन मयेदं चतुर्दशभुवनात्मकं जगदेव निर्मितम्। इदं जगदेव येन। वि विरुद्धतया। कृतं। नाशितमिति यावत्। तु एतादृक् महामहिमा

---

१. विदामीति विकरणव्यत्ययेन चतुर्मुखाद्ब्रह्मणः शेषस्य सहस्रमुखत्वकथनात् ज्ञानाधिक्यमस्तीत्यज्ञशङ्कां निवारयतीति विजयध्वजतीर्थाः।

Rarest Archiver

रूपविशेषवानपि महादेवः। तथा तु विशेषपवन्तः प्रतिसृष्ट्यादिकर्तारो देवर्षिराजर्षिब्रह्मर्षिप्रवरा यूयं चेति सर्वे। तद्गतिं तस्य हरेर्गतिं महिमेयत्तां। न विदुः। बतेत्यास्वादने। सर्वानुभवसिद्धमेतदिति। इति यदा तदा इतोऽन्ये सुरा न विदुरिति कैमुत्येन सिद्धम्। कुतो न विदुरित्यतो मूलकारणमाह॥ **यन्माययेति।** यस्येच्छया मोहिता बुद्धयो येषामित्यर्थः। तर्हि मां प्रति त्वयोदितमपि कियदेव किमिति नारदमनोगतामाशङ्कामङ्गीकारेण परिहरति॥ **स्वात्मसममिति॥** वयं सर्वेऽप्यात्मसमं आत्मयोग्यमेव। विचक्ष्महे आचक्ष्महे चेति। अत्र [1]तेषां यन्महिमानमवलंब्याशङ्कितं तन्महिमानुवादपूर्वकमेव स्वात्मनां भगवन्महिमवर्णनाशक्तिकथनेन तन्मूलविघटनेन [2]तेषां शङ्का निरस्तेति ज्ञेयम्॥ १५५॥

**येषां स एव भगवान्दययेदनन्तः**
**सर्वात्मनाऽऽश्रितपदो यदि निर्व्यलीकम्।**
**ते वै विदन्त्यतितरन्ति च देवमायां**
**नैषां ममाहमिति धीः श्वसृगालभक्ष्ये ॥ १५६॥**

**। २। ७। ४२। (१०)**

ननु मुमुक्षुभिर्जिज्ञास्यं ब्रह्म निर्गुणमेव। सगुणजिज्ञासया गुणनिवृत्तिरूपमोक्षायोगादित्यत आस्तां तावन्निर्गुणत्वविचारः मायानिवर्तकस्तु भगवानेव। अतः स एव मुमुक्षुभिर्जिज्ञास्यं ब्रह्मेति भावेन मायानिवर्तकत्वं दर्शयति॥ **येषामिति॥** यदि भक्तेन निर्व्यलीकं निष्कपटतया। सर्वप्रकारेण आश्रितचरणो भवेत् तर्ह्येव स भगवाननन्तः तस्मिन् दयां कुर्यात्। किं ततः। येषां दययेत् त एव देवमायां महिमानं विदन्ति जानन्ति। ततश्च किं?

१. ब्रह्मरुद्रादीनाम्।    २. तटस्थानाम्।

Rarest Archiver

संसारमतितरन्ति च। संसारमतितरन्तीति कथं ज्ञेयमित्यतस्तज्ज्ञापकं दर्शयति। **नेति।** एषां तीर्णसंसाराणां सतां पुरुषाणाम्। श्वसृगालादिभिस्तत्सदृशैर्दारादिभिर्वा भक्षितुं योग्ये देहे। वित्तादौ वा। अहमिति ममेति वा बुद्धिर्न भवति। अहं ममेत्यभिमानाभाव एव ज्ञापक इति भावः ॥ १५६ ॥

**वेदाहमङ्ग परमस्य हि योगमायां**
**यूयं भवश्च भगवानथ दैत्यवर्यः ।**
**पत्नी मनोः स च मनुस्तदपत्यभूताः**
**प्राचीनबर्हि ऋभुरङ्ग उत ध्रुवश्च ॥१५७॥ २ । ७ । ४३ ।(११)**

**इक्ष्वाकुरैलमुचकुन्दविदेहगाधिरघ्वम्बरीषसगरा गयनाहुषाद्याः ।**
**मान्धात्रलर्कशतधन्वनरन्तिदेवदेवव्रतो बलिरमूर्तरयो दिलीपः ॥**
**१५८ ॥ २ । ७ । ४४ । (१२)**

तीर्णसंसारा अपि सन्तीत्याह ॥ **वेदेति ॥** अङ्गेति नारदं प्रति ब्रह्मसम्बोधनम्। अहं योगमायां स्वाभाविकं महत्त्वम्। यथायोग्यं वेद। तेन तीर्णश्च संसारः। एवमन्यत्रापि योज्यम् ॥ १५७ ॥

ऐलः इलायाः पुत्रः पुरूरवाः। नाहुषो ययातिः ॥ १५८ ॥

**सौभर्युदङ्कशिबिदेवलपिप्पलादाः**
**सारस्वतोद्धवपराशरभूरिषेणाः ।**
**येऽन्ये बिभीषणहनूमदुपेन्द्रदत्ताः**
**पार्थार्ष्टिषेणविदुरश्रुतदेवमुख्याः ॥ १५९ ॥ २ । ७ । ४५ ।(१३)**

Rarest Archiver

भक्तवर्गेऽपि स्वयं निविष्टो भक्तवदेव करोति अहो विडम्बनं विभून्न इति द्योतयितुं [1]दत्तोपेन्द्रयोस्तत्कोटिनिवेशनमिति ज्ञेयम्। एतेन हनूमानपि व्याख्यातः ॥ १५९ ॥

**ते वै विदन्त्यतितरन्ति च देवमायां**
**स्त्रीशूद्रहूणशबरा अपि पापजीवाः ।**
**यद्यद्भुतक्रमपरायणशीलशिक्षा-**
**स्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥१६०॥ २ । ७ । ४६।(१४)**

आदरजननाय केवलं वेदादिशास्त्रयोग्यतारहितानां संसारतरणं दृष्टमिति दर्शयति ॥ ते वा इति ॥ अद्भुतपराक्रमो हरिस्तत्परायणास्तच्छीला-स्तच्छिक्षाश्च । यदि तर्हि । स्त्र्यादयः पापजीवा अपि । तथा तिर्यग्जना अपि । ये । तेऽपि यथायोग्यं देवमायां विदन्ति । अतितरन्ति च संसारं । सति चैवम् । श्रुतधारणाः शास्त्रश्रवणयोग्याः । ते विदन्ति अतितरन्ति चेति किमु वक्तव्यमिति ॥ १६० ॥

**एतावताऽलं ननु सूचितेन गुणैरसाम्येऽनतिशायनेऽस्य ।**
**हित्वेतरान् प्रार्थयतो विभूतिर्यस्याङ्घ्रिरेणुं जुषतेऽनभीप्सोः ॥ १६१ ॥**
**। १ । १८ । २० । (१५)**

यतः सकलजगज्जन्मादिहेतुः तत एव निखिलगुणगणो गुणनिवर्तकश्च भगवानिति स एव मुमुक्षुभिर्जिज्ञास्य इत्युदितम् । तत्र यदि इतोऽन्योऽपीदृशः तर्ह्ययमेवेत्यवधारणानुपपत्तिः । यदि वा इतोऽधिकः तर्हि जिज्ञास्य

---

१. तयोर्भगवदवतारत्वादेवमभिसन्धिवर्णनम् ।

Rarest Archive

इत्यस्यैवानुपपत्तिरित्यत आस्तां तावत्साधकान्तरगवेषणायासः एतावतैव ज्ञापकेन सदृशाधिकरहितत्वं सिद्धमित्याह ॥ **एतावतेति** ॥ विभूतिर्महालक्ष्मीः । प्रार्थयतोऽपीतरान्हित्वा । अनभीप्सोरपि यस्याङ्घ्रिरेणुं जुषत इति यत् । एतावतैव सूचितेन सूचनेन ज्ञापकेन । अस्य हरेर्गुणैरसाम्ये गुणैः समरहितत्वे । अनतिशायने अधिकरहितत्वे चालम् । साधकान्तरापेक्षा नास्तीति भावः । ननु निश्चितमेतत् ॥ १६१ ॥

**नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित्तस्य न सङ्गवर्जितम् ।**
**कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः ॥**
**१६२ ॥ ८ । ८ । १९ । (१६)**

सत्यमेतत् । लक्ष्मीस्तावत्सर्वमान्या । सा च प्रार्थयतोऽपीतरान्परित्यज्य अनभीप्सोरस्य चरणौ यद्याश्रिता तदैतस्य समो नास्ति । तथा अधिकोऽपि नास्तीति सिध्यतीति । यदि च कश्चन एतेन समः स्यात्तदा तत्परित्यागेन एतस्य चरणानुसरणानुपपत्तिः । अधिकस्य सत्त्वे तु एतत्स्वीकरणस्यैवा-नुपपत्तिः । [१]एतदेव कथं । अनादित एव हरिः लक्ष्म्याः पतिः । लक्ष्मीस्तस्य भार्येति चागोपालानां प्रसिद्धिः । सति चैवं स्वयंवरादाविव अन्यान्परित्यज्य एतत्पाणिमेव जग्राहेति कथं वक्तुं शक्यम् । अत एतन्न हृदयङ्गममित्यतः सत्यम् । अनादितो भर्तृभार्याभाव इति । तथापि कारणविशेषेण कालविशेषे समुद्रोद्भूतया लक्ष्म्या नूतनस्त्रीव विडम्बनं कुर्वन्त्या एवं कृतमिति भावेन तया कृतमन्येषु दोषोद्भावनं तावद्दर्शयति । **नूनमिति** ॥ यस्य तपोऽस्ति तस्य मन्युनिर्जयो नूनं निश्चयेन नास्ति । अनेन तापसो दूर्वासादिः प्रतिषिद्धः । स हि अम्बरीषे राज्ञि क्रोधं कृत्वा सुबहुप्रसिद्धिमानिति हि प्रसिद्धम् । क्वचित्पुरुषे, ज्ञानमस्ति । तस्य

---

१. एतत् अनुसरणम् ।

Rarest Archive

तदपि सङ्गेन विषयसङ्गेन वर्जितं रहितं नूनं न भवति। अनेन शुक्रबृहस्पती। तौ देवदैत्यपुरोहितौ मन्त्रिसदृशाविति हि प्रसिद्धम्। कश्चिन्महानस्ति। तस्य नूनं कामजयो नास्ति। अनेन [१]ब्रह्मा। स हि स्वदुहितरमेव कामयामासेति प्रसिद्धम्। यश्च व्यपगतः आश्रयो यस्य तादृशो भूत्वा। परतः परेण साश्रयो भवेत्। स ईश्वरः किम्। ईश्वरपदवाच्यो न भवेदेव। नूनमित्यनेन भस्मासुरभयात्पलायितो महादेवो बटुरूपिणा हरिणा रक्षित इति लोकप्रसिद्धिं सूचयति। अनेनेश्वरो वारितः॥ १६२॥

**धर्मः क्वचित्तस्य न भूतसौहृदं त्यागः क्वचित्तच्च न मुक्तिकारणम्।**
**वीर्यं च पुंसोऽस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसङ्गवर्जितः ॥**
**१६३॥ ८।८।२०।(१७)**

क्वचित्पुंसि धर्मोऽस्ति। तस्य भूतेषु दयैव नास्ति [२]नूनम्। अनेन यमः। भूतानां यमः शास्तेति प्रसिद्धम्। क्वचित्पुरुषेषु त्यागो वर्तते। तदपि न मुक्तिप्रापकम्। तेषां मुक्तिदानसामर्थ्याभावात्। अपेक्षितादानस्य त्यागिदोषत्वात्। अनेन च दैत्येन्द्रा बल्यादयः। मुक्तिदानसामर्थ्यं च अन्यत्र नास्तीति निर्णीतमिति नूनमित्यनेनाह। कस्यचित्पुंसो वीर्यं तेजस्वित्वलक्षणमतिवेगित्वलक्षणं वाऽस्ति। तदप्यजवेगेन कालचक्रवेगेन जितमेव। अनेन सूर्यचन्द्रवायवः। ते हि क्षणमात्रमेकत्रावस्थानरहिता इति प्रसिद्धमिति नूनमित्यनेन सूचयति॥ १६३॥

---

१. भगवन्महत्त्वविद्भिर्महद्भिरसुरजनमोहनं कर्तव्यमिति नियममवेक्षमाणस्य ब्रह्मणः कामिजनविडम्बनप्रकार इति विजयध्वजतीर्थीये अस्याः कथाया भावः प्रादर्शि।

२. नूनं तपो यस्येति पूर्वश्लोकात् नूनमित्यध्याहृतम्। तत् सर्वक्रियायां अन्वेति। अत एव तत्र तत्र प्रसिद्धमिति निर्णीतमिति च नूनमित्यनेन सूचयतीति वक्ष्यति।

Rarest Archive

**क्वचिच्चिरायुर्न च शीलमङ्गलं क्वचित्तदप्यस्ति न वेद्यमायुषः ।**
**यत्रोभयं कुत्र च सोऽप्यमङ्गलः सुमङ्गलः कश्चन कांक्षते हि माम्॥**
**१६४ ॥ ८ । ८ । २१ । (१८)**

क्वचित्पुंसि चिरमायुरस्ति । तस्मिंश्च मङ्गलं तच्छीलं च तन्नास्ति नूनम् । अनेन शेषादिः । उग्रत्वं तज्जातिस्वभावसिद्धमिति । किं तत्र गमकगवेषणेनेति हिशब्देनाह । क्वचित्पुरुषेषु तत्, साधुस्वभावोऽस्ति । तत्र पुरुषेषु आयुषो विषये वेद्यं विचार्यं नास्त्येव । अल्पायुष्ट्वमेव नूनमिति । अनेन च राजानः । रैवतो राजा स्वपुत्र्या वरान्मनसा सम्भाव्य ब्रह्माणं प्रष्टुकामः सत्यलोकं गतः । तं पृष्ट्वा यदा भुवनमागतः तन्मध्य एव विवक्षिताः सर्व एव राजप्रवराः परलोकं गता इति । तथा मुचकुन्दो देवैः स्वात्मरक्षणाय याचितो दैत्यैः सह बहुकालं युद्धं कृत्वा, तद्रक्षां विधाय, आगमनसमये दारापत्यामात्यादीन् लोकान्तरं गतान्वीक्ष्य, देवेभ्यो वरं गृहीत्वा, निद्रित इति च प्रसिद्धमिति । कुत्र च क्वचिदेकस्मिन्नेव यत्र पुंसि चिरायुः साधुस्वभावत्वं चेत्युभयमप्यस्ति । ईदृशोऽप्यमङ्गलो नूनं । अनेन मार्कण्डेयो मुनिवरः । स हि जटिलत्वादिना न मनोज्ञ इति प्रसिद्धः । सुमङ्गलः अत्यन्तमङ्गलः कश्चनास्ति । स तु मां कांक्षते । आकांक्षालक्षणदोषवान्नूनम् । अनेन इन्द्रः । स तु छद्मना गौतमदयितां कामयामासेति प्रसिद्धं हीत्यनेन ज्ञापयति । हि यस्मादेवं देवमुनिदैतेयराजप्रवराः सर्वेऽपि दोषोपेताः तस्मात्कारणात् हरेर्द्वितीयोऽन्यो गुणसङ्गवर्जितो दोषास्पृष्टो नेति तावत्सिद्धमिति ॥ १६४ ॥

**[१]एवं विमृश्याऽव्यभिचारिसद्गुणं पदं निजैकाश्रयि सद्गुणाश्रयम् ।**
**वव्रे परं सर्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्षमीप्सितम् ॥ १६५ ॥**
**। ८ । ८ । २२ । (१९)**

---

१. अनाद्यनन्तकालेऽपि विष्णुमेवाश्रिता रमा । अन्येषां ज्ञापनार्थाय दोषानुक्त्वेतराञ्जहौ ॥ इति तात्पर्ये ।

Rarest Archiver

किमेतद्दोषविमर्शनेनेत्यतः तत्प्रयोजनं दर्शयति ॥ **एवमिति ॥** अव्यभिचारिसद्गुणं अव्यभिचारिणः कदाप्यनपगताः सन्तः दोषासमानाधिकरणाः गुणाः यस्मिन् तादृशम् । निजश्चासौ मुख्यश्चासावाश्रयश्च स एषामस्तीति ते, सन्तो गुणा येषां ते, निजैकाश्रयिणश्च ते सद्गुणाश्च भक्ताः तेषां आश्रयभूतं पदं वस्तु विमृश्य । एवं विमर्शने कृते सति यथा मनसेप्सितं तथैव विद्यमानं मुकुन्दं मुक्तिप्रदं अत एव परं सर्वोत्तमं हरिमेव स्वीकृतवतीति । रमया स्वीकार्ये वस्तुनि त्रयमपेक्षितम् । सकलगुणपूर्णत्वं १ निर्दोषत्वं २ भक्तानुकम्पित्वमिति ३। तत्र प्रथमं तावदस्तीत्याह ॥ **सर्वेति ॥** सर्वैर्गुणैर्विद्यमानैर्निमित्तैर्योगिभिरपेक्षितमिति । द्वितीयमप्यस्तीत्याह । **निरपेक्षमिति** ॥ कामुकत्वोपलक्षितसर्वदोषरहितमित्यर्थः । दोषेषु तस्यैव श्रेष्ठतया कण्ठतो ग्रहणं । तृतीयमपि विजयत इत्याह ॥ **मुकुन्दमिति ।** [1]तदभावे महापुरुषार्थदानायोगादिति भावः ॥ १६५ ॥

**स्वस्याः स्त्रियस्त्रिजगतो जनको जनन्या**
**वक्षो निवासमकरोत्परमं विभूतेः ।**
**श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन**
**यत्र स्थितैधयत साधिपतींस्त्रिलोकान् ॥ १६६ ॥**

**। ८ । ८ । २४ । (२०)**

तदेवं विमर्शपूर्वकं इतरप्रहाणेन हरिचरणशरणमेव प्राप्तया देव्या रमया तस्मिंस्तार्तीयो गुणः तत्क्षणादेव अनुभूत इत्याशयेनाह ॥ **स्वस्या इति** ॥ हरिः लक्ष्म्याः स्ववक्ष एव सर्वोत्तमं स्थानमकरोत् दत्तवान् । किमिदानीमेव

---

१. भक्तानुकम्पित्वाभावे ।

Rarest Archives

भार्याभर्तृभाव आसीदित्यतो वाह। **स्वस्या इति।** [१]स्वस्याः स्त्रियोऽपि कारणविशेषेण विभूतेः समुद्राद्दुद्भूताया इत्यर्थः। अनेन प्राक् [२]प्राप्तशङ्का परिहृतेति ज्ञेयम्। किमर्थमियं प्रादुर्भूतेत्यत उक्तं **त्रिजगतो जनन्या इति**॥ पुत्रसंरक्षणं विशेषतः कर्तुमिति। किं स्वबुद्ध्यैव। न। पत्युराज्ञयेत्याशयेनाह॥ **त्रिजगतो जनक इति**॥ तत्किं विशेषतः पुत्ररक्षणमित्यतः तद्वक्तुं स्थानं विशिनष्टि॥ **यत्रेति**॥ यत्र स्थिता श्रीः दयासहितावलोकनेनैव अधिपतिभिः सहितान् त्रिस्थानगतानपि स्वाः प्रजाः भूतान् (नि) ऐधयत अवर्धयत्। अपेक्षितार्थान् पूरयामास [३]तदिति। अनेन देव्या अपि तद्योग्यपत्नीत्वमस्तीति सूचितम्। **तथाहि।** त्रिजगतो जनन्या इत्यनेन यथायोग्यं गुणपूर्णत्वम्। यत्र स्थितापीत्यनेन अहङ्कारोपलक्षितसर्वदोषरहितत्वम्। ऐधयतेत्यनेन भक्तानुकम्पित्वं चेति धर्मत्रयमपि लब्धं देव्यां तत्कल्पत्वात्तस्या इति॥ १६६॥

**श्रियमनुचरतीं तदर्थिनश्च द्विपदपतीन् विबुधांश्च यः स्वपूर्णः।**
**न भजति निजभृत्यवर्गतन्त्रः कथमममुद्विसृजेत्पुमान् कृतज्ञः॥१६७॥**
**।४।३१।२३। (२१)**

''जनन्या वक्षो निवासमकरोदि'' त्युक्तेऽपि तस्य तया प्रयोजनमस्तीति न 'मन्तव्यमित्याशयेनाह। **श्रियमिति**॥ स्वसेवां कुर्वन्तीमपि श्रियं, तां श्रियमर्थयन्तीति तान्नृपतीन् विबुधांश्च यो न भजति तैः किमपि प्रयोजनं

१. अनादित एव भर्तृभार्याभावरूपसम्बन्धवत्या अपि।

२. अनादित एवाऽऽगोपाङ्गनं भर्तृभार्याभावस्य प्रसिद्धत्वेन कथं नूतना वधूरिवेतरान् परित्यज्य तस्यैवानुसारणं कृतवतीति सङ्गच्छत इत्याकारिका।

३. स्थानमित्यर्थः।

Rarest Archiver

नानुसन्धते। कुतः, स्वरूपानन्देन पूर्णत्वादित्याशयेनोक्तं **स्वपूर्ण इति** ॥ यदा रमादीनामीदृशी दशा तदा अल्पभक्तानां का गतिरित्यतस्तत्स्वभावं कथयति ॥ **निजभृत्येति** ॥ य ईदृशोऽपि निजा ये भृत्या भक्ताः तेषां वर्गः समूहः तस्य तन्त्रः अधीन इति। अल्पभक्तानां केवलं सुलभ इति भावः। अमुं ईदृक्कृपालुत्वगुणम्। कृतं जानातीति कृतज्ञः तत्कृतोपकृतिवेत्ता पुमान्। कथं विसृजेत्। एष एव मुमुक्षुभिर्जिज्ञास्य इति ॥ १६७ ॥

**रूपं यत्तत्प्राहुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारम्।**
**सत्तामात्रं निर्विशेषं निरीहं सत्त्वं साक्षाद्विष्णुरध्यात्मदीपम् ॥१३८॥**
**।१०।४।२५।(२२)**

ननु मुमुक्षुभिर्जिज्ञास्यं ब्रह्म निर्गुणमेव। सगुणजिज्ञासया-गुणनिवृत्तिरूपमोक्षायोगादिति चेत्। किमिदं निर्गुणत्वम्। गुणमात्रराहित्यं चेत्तर्हि न तस्य जिज्ञास्यता। तादृशवस्तूपासनालभ्यस्य आनन्दादि-सकलशुभगुणराहित्यरूपस्य फलस्य उपासकपुरुषार्थ्यत्वायोगात्। सत्वं रजस्तम इति प्रकृतेर्गुणाः तैरबद्धत्वं चेत् अनुज्ञया वर्तामहे। ईदृशं निर्गुणं ब्रह्म तु विष्णुरेवेति युक्तं तस्यैव जिज्ञास्यत्वमित्याशयेनाह ॥ **रूपमिति** ॥ ''अव्यक्तमचलं शान्त''मित्याद्याः श्रुतयो यत्तत्त्वं स्वानुग्रहमन्तरेण अज्ञेयत्वेन निमित्तेन अव्यक्तादिपदवाच्यं प्राहुः। तथा ''सदेव सौम्येदमग्र आसीदि'' त्यादिकाः प्रलयकालस्थितत्वेन निमित्तेन आद्यादिपदवेद्यं आहुः। तथा ''यतो वा'' इति प्रभृतयः निरवधिकानन्तानवद्यकल्याणगुणत्वेन निमित्तेन ब्रह्मादिशब्दशब्दितं वदन्ति। तथा ''परन्ज्योतिरुपसम्पद्ये''तिपूर्वकाः ज्ञानरूपत्वेन निमित्तेन ज्योतिरादिपदवेद्यमावेदयन्ति। तथा ''केवलो

Rarest Archiver

निर्गुणश्चे''त्येवञ्जातीयकाः कालत्रयेऽपि कालितगुणत्रयतया जडमिश्रितदेह-रहितत्वरूपया निमित्तभूतया निर्गुणादिनामगणैर्भणन्ति। ''निर्विकारोऽक्षरः शुद्ध'' इत्येवमाद्याः परिणामादिविकाररहिततया निमित्तभूतया निर्विकारा-दिपदप्रभेदैः प्रतिपादयन्ति। तथा ''अथ कस्मादुच्यते सत्तेति नन्दति नन्दयति चेती''त्येवमाद्याः सान्तत्वसातिशयत्वादिसर्वदोषरहितानन्दादिसर्वगुणा-त्मकदेहत्वेन निमित्तेन, ''नामैकदेशेन गृहीतेऽपि नाम्नोच्चारितेन यादृश[1]ग्रहणं भवति तादृशमेव ग्रहणं भवत्येव शब्दस्वाभाव्यादित्यभिसन्धाय क्वचिद्बल इति कुत्रचिद्बलभद्र इत्यादिवत्'' क्वचित्सत्तेति कुत्रचित्सत्तामात्रमित्येवञ्जातीयैः शब्दैः ग्राहयन्ति। तथा ''निर्विशेषोऽक्षर'' इत्येवञ्जातीयकाः समाधिकरहिततया सर्वोत्तमत्वेन निमित्तेन निर्विशेषादिपदविशेषविषयं प्रशंसन्ति। तथा ''आप्तकामस्य का स्पृहे'' त्येवमादिकाः प्राप्तसमस्तप्राप्तव्यतया निमित्तभूतया निरीहादिनामभिर्निर्दर्शयन्ति। तथा ''आत्मानमेव लोकमुपासीत'' ''तस्याः शिखाया मध्ये (तु) परमात्मा व्यवस्थित'' इत्याद्याः आत्मानं जीवमधिष्ठाय तस्मै स्वस्वरूपं तत्स्वरूपं च प्रकाशयन्तीति तत्पदप्रवृत्तिप्रदर्शनपरेण अध्यात्मदीपपदेन आत्मादिपदान्युपलक्ष्यन्ते। तथा अङ्गप्रत्यङ्गशो व्याप्य प्रकाशकत्वनिमित्तेन आत्मादिपदप्रतिपाद्यं हृद्यारोहयन्ति। **उपलक्षणमेतत्।** ''एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहु'' रित्येवमाद्याः अशेषैरपि प्रवृत्तिनिमित्तविशेषैः निमित्तभूतैरशेषैरपि नामविशेषैः विशेषतः संज्ञितं यत्तत्त्वं प्राहुस्तदेव यस्य तव रूपं तत्त्वविदः प्राहुः स एव त्वमसि। विशिष्य ज्ञानं नास्तीति लोकशङ्कां पराकर्तुं विष्णुरिति प्रसिद्धं नाम जग्राहेति। मद्दृष्टिगोचरोऽपि अस्मदादिपुत्रत्वादिना व्यवह्रियमाणोऽपि कार्यविशेषार्थं अस्मासु अनुग्रहेणैव प्रादुर्भूत इति त्वमित्यनेन सूचयति। कृष्णं प्रति

---

१. बोधः।

Rarest Archiver

देवकीवचनम्। **यथाहुः**—"वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्। ब्रह्मेति परमात्मेति भगवानिति शब्द्यते॥ १ । २ । ११॥ सत्तामात्रं तु यत्किञ्चित्सदसच्चाविशेषणम्। उभाभ्यां भाष्यते साक्षाद्भगवान् केवलः स्मृतः॥ १ । २ । १२॥ यत्रावतीर्णो भगवान्कृष्णाख्यो जगदीश्वरः। वसुदेवगृहे जन्म तस्य वृद्धिश्च गोकुले॥ १ । २ । ३४॥ केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये। यदोः प्रियस्यान्ववाये मलयस्येव चन्दनं॥ १ । २ । ३५॥ अथवा वसुदेवस्य देवक्यां याचितोऽभ्यगात्। अजस्त्वमस्य क्षेमाय वधाय च सुरद्विषाम्"॥ १ । २ । ३६॥ इति॥ १६८॥

**त्वत्तोऽस्य जन्मस्थितिसंयमान्विभो वदन्त्यनीहादगुणादविक्रियात्।**
**त्वयीश्वरे ब्रह्मणि नो विरुध्यते तदाश्रयत्वादुपचर्यसे जनैः ॥१६९॥**
**।१०।४।२०।(२३)**

ननु भवतु विष्णुरेव निर्गुणं ब्रह्म जिज्ञास्योऽपि मुमुक्षुभिः। तस्य निर्गुणस्य निर्विकारस्य जगज्जन्मादिकारणत्वं न सम्भवति। यदि चोच्यते जगज्जन्मादिकारणत्वं तदा निर्गुणत्वं न वाच्यमिति ममाशय इति चेत्। तत्किं जगज्जन्मादिकारणत्वं वदतां विकारिकारणत्वमभिलषितं मन्यसे। ॐ इति चेत्। भ्रान्तोऽसि। यतः कुलालादिवन्निमित्तकारणत्वमेव तदभिप्रेत-मित्याशयेनाह॥ **त्वत्त इति॥** अगुणादविक्रियादनीहादेव त्वत्तोऽस्य जगतो जन्मस्थितिसंयमान् ज्ञानिनो वदन्ति। पूर्णतया सृष्ट्यादिना प्रयोजनविरहितत्वात्सृष्ट्यादिकं विरुद्धं ज्ञानिभिः कथमुच्यत इत्यतस्तावदेकं साधारणं समाधिमाह॥ **त्वयीति॥** ईश्वरे ब्रह्मणि त्वयि नो विरुध्यत इति। अघटितघटनापटीयसी हि ईश्वरशक्तिरिति भावः। एवमगुणादविक्रियादेव जगतो जन्मादिकमित्यङ्गीकारे सात्त्विको राजसस्तामस इत्यस्य व्यवहारस्य का

Rarest Archiver

गतिरित्यत आह ॥ **तदाश्रयत्वादिति** ॥ जनैः ज्ञानिभिः तेषां गुणानामाश्रयत्वं निमित्तीकृत्य सात्त्विकस्त्वमित्यादिरूपेण गीयस इति ॥ १६९ ॥

**न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्षः ।**
**अथापि सर्गस्थितिसंयमार्थं धत्ते रजःसत्त्वतमांसि काले ॥ १७० ॥**
**। ८ । ५ । २१ । (२४)**

ननु भवतु सात्त्विकादिव्यवहारः कयाचिद्विवक्षया । पालनादिकं तु विना गुणबन्धं कथं भवति । मयाऽयमिदानीं वध्यो रक्षणीयः सृज्य इति कश्चिद्वर्ग आदरणीयः । अन्यश्च नेदानीं वध्यादिरित्युपेक्षणीयः । एतच्च सर्वं गुणकार्यमेवेत्यत आह ॥ **न यस्येति** ॥ यस्य येन वध्यो नास्ति रक्षणीयो नास्ति सृज्यश्च नास्ति । उपेक्षणीयादरणीयवर्ग आत्मार्थतया नास्ति यद्यपि । अथापि स तादृशोऽपि सर्गाद्यर्थं रजआदिकं धत्ते धारयति । गुणकार्याभिसंध्याद्यभावे सृष्ट्यादिकरणायोगः । तदङ्गीकारे तु कथं न गुणबन्ध इत्यत उक्तं **काल इति** ॥ तत्तत्परिपाककाले । **इदमुदितं भवति—** अभिसंध्यादिकमस्त्येव भगवतः । न च गुणबन्धः । [१]तस्य नित्यत्वात् । न चैवं सदा सृष्ट्यादिप्रसङ्गः । काल एव सृष्ट्यादि करोमीत्यादिरूपस्य नित्यस्यापि तत्तदुचितकाल एवाभिव्यक्त्यङ्गीकारादिति ॥ १७० ॥

**अयं तु तस्य स्थितिपालनक्षणः सत्त्वं जुषाणस्य भवाय देहिनाम् ।**
**तस्माद्व्रजामः शरणं जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः**
**॥ १७१ ॥ ८ । ५ । २२ । (२५)**

---

१. भगवतः अभिसंध्यादिकस्य ।

Rarest Archive

**॥ इति ब्रह्मोपदेशप्रकरणम् ॥ ११ ॥**

तदेवं गुणैरबद्धत्वेन निमित्तेन निर्गुणपदवाच्येन तथापि स्वप्रयोजनाभावेऽपि परप्रयोजनमप्यात्मगामीव मन्वानेन भक्तानुकम्पिना सत्त्वादिगुणप्रवर्तकतया सात्त्विकादिपदपरिपठितेन भक्तमुक्तये सृष्ट्यादिकं क्रियते यतोऽतः स एव मुमुक्षुभिः शरण्य इति प्रसिद्धमित्याशयेनोपसंहरति ॥ **अयं त्विति** ॥ पूर्वपद्ययोः स्थितं स्थितिपदं सत्तार्थकमिति भ्रान्तिवारणाय स्थित्यपरपर्यायं यत्पालनं तस्यायं क्षण इति व्याख्येति वा स्वसृष्टस्य जगतः [१]क्लृप्तकालपर्यन्तमवस्थानाय प्रयोजनाय यत्पालनमिति वा बोध्यम्। यस्मात् पालनक्षणः तत् तस्मात्स्वानां नः अस्माकं शं सुखं धास्यति ददाति। साधारणं हेतुमुक्त्वा विशेषं चाह ॥ **सुरप्रिय इति** ॥ सुरा एव प्रिया यस्येति। अनेन श्रवणभगवन्महिमाप्रतिपादनरूपकीर्तनाख्यौ भागवतधर्मौ प्रदर्शिताविति ज्ञेयम् ॥ १७१ ॥

**॥ इति श्रीमदवधूतशिरोमणिश्रीजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां ब्रह्मोपदेशप्रकरणम् ॥ ११ ॥**

---

१. तथाच स्थितये पालनमिति विग्रहोऽभिमतः। उद्देश्यत्वं चतुर्थ्यर्थः।

Rarest Archiver

## प्रवृत्तकर्मत्यागप्रकरणम् ॥ १२ ॥

**क्षुत्तृट्त्रिधातुभिरिमा मुहुरर्द्यमानाः**
**शीतोष्णवातवर्षैरितरेतराच्च ।**
**कामाग्निनाऽच्युत रुषा च सुदुर्भरेण**
**सम्पश्यतो मन उरुक्रम सीदते मे ॥१७२॥ ३ । १० । ८ । (१)**

एवं किञ्चिद्व्यक्तवैराग्यैः दैवाल्लब्धमहत्समागमैः तत्पादरजोभिषेकसमासादिततदीयानुग्रहलवैः महन्निन्दादितो निवृत्तैः किञ्चिदेव जितेन्द्रियैः मुमुक्षुभिः ब्रह्म जिज्ञास्यमित्यभिहितम् । इदानीं गुरुप्रसादागतब्रह्मोपदेशैः नेतरसुखाय प्रयतितव्यं किन्तु गुरूदितप्रकारेण हरेरुपासनार्थमेवेति वक्तुं मध्ये तदुपयोगि किञ्चिद्वदति । तत्रादौ गुरूणां परदुःखेन दुःखित्वरूपं दयालुत्वं दर्शयति ॥ **क्षुत्तृडिति** ॥ उरुक्रम अच्युत । वातपित्तश्लेष्मरूपैस्त्रिधातुभिः तथा शीतोष्णवातवर्षैः अन्योन्यतश्च कामलक्षणेन वह्निना वोढुमशक्येन, रुषा क्रोधेन च मुहुः पुनः पुनः अर्द्यमाना इमाः प्रजाः सम्यक् पश्यतो निरीक्षतो मे साधोः मनः सीदते खेदयुक्तं भवति । अयमेव हि स्वभावः साधूनां यत्परदुःखेन दुःखित्वमिति ॥ १७२ ॥

**नैवोद्विजे भवदुरत्ययवैतरिण्या-**
**स्त्वत्तीर्थगायनमहामृतमत्तचित्तः ।**
**शोचे नु ते विमुखचेतस इन्द्रियार्थ-**
**मायासुखाय भरमुद्वहतो विमूढान् ॥१७३॥ ७ । ९ । ४३ । (२)**

---

१. क्षुत्तृडितिरूपम् ।

Rarest Archiver

ननु [१]ब्रह्मवचनमेतत्। तत्रायं स्वभावोऽस्त्येवेति वदामः। सर्वेषामपि साधूनामीदृश एव स्वभाव इति कुत इत्यतो नैवं वक्तुं युक्तम्। यत इतोऽन्येष्वपि साधुष्विदमस्ति। ततः साधूनामित्येव वक्तव्यम्। अन्यथा अतिव्याप्त्यापत्तेरित्याशयेन सकलसाधुशिरोमणेः प्रह्लादस्य वचनं पठति॥ **नैवेति**॥ त्वत्तीर्थं त्वच्चरितं तस्य गायनं कीर्तनं तदेव महदमृतं तेन मत्तं तुष्टं चित्तं यस्य तादृशोऽहं भवरूपायास्तर्तुमशक्यायाः वैतरिण्याः सकाशात् नैवोद्विजे। कथं तरेयमिति चिन्तया न शोचामि। अनेन संसाराद्भयाभावरूपमभयं यमान्तर्गतं शमलभ्यं सूचयति। नु तर्हि किंविषयः शोकः। उत्तरमाह॥ **इन्द्रियेति**॥ इन्द्रियाणामर्थाः विषयाः तज्जन्यं यन्मायासुखं प्राकृतमल्पमशाश्वतं च तदर्थम्। संसाराख्यं भारं गर्दभवद्वहतः। अत एव विमूढान्। तेन भारेण। ते त्वद्विषये। विमुखं चेतो येषां ते तादृशानुद्दिश्य शोच इति। अनेन दयाख्यो भागवतधर्मः प्रदर्शितो भवति॥ १७३॥

**जुगुप्सितं धर्मकृतेऽनुशासनं स्वभावरक्तस्य महान्व्यतिक्रमः।**
**यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः॥**
**१७४॥ १। ५। १५। (३)**

कर्म द्विविधं। प्रवृत्तं निवृत्तं चेति। तत्र प्रवृत्ते न प्रवर्तितव्यम्। नश्वरफलत्वात् क्लेशदत्वाच्च। निवृत्ते तु प्रवर्तेत। अक्षयफलत्वादक्लेशदत्वाच्चेति दयालुभिर्गुरुभिर्वक्तव्यमेतद्द्वयमित्याशयेन प्रवृत्तकर्मोपदेशनं निन्दति॥ **जुगुप्सितमिति**॥ रागिस्वभावादेव रक्तस्य जनस्य। प्रवृत्तधर्मे प्रवृत्तये। अनुशासनं उपदेशनं निन्दितम्। न केवलं निन्दितं किन्तु महान् व्यतिक्रमः अन्यायश्च भवति। वृक्षादधः पतितस्य दण्डेन ताडनमिव। कुतो महान्व्यतिक्रमः। इतरः प्राकृतो जनः। यस्य प्रवृत्तधर्मप्रतिपादकस्य पुरुषस्य

Rarest Archiver

वाक्यात्। प्रवृत्त एव धर्म इति। स्थितः निश्चितः। इतरस्थित इत्येकपदतया पाठे तु यद्वाक्यतः प्रवृत्त एव धर्म इति मत्वा। इतरस्मिन् प्रवृत्त एव स्थितः परिनिष्ठितोः जनः। तस्य प्रवृत्तधर्मस्य। निवारणं त्यागम्। सर्वथा न मन्यते यतः। अतः तस्य पुरुषस्य महान्व्यतिक्रम इति ॥ १७४ ॥

**कस्तं स्वयं तदभिज्ञो विपश्चिदविद्यायामन्तरे वर्तमानम्।**
**दृष्ट्वा पुनस्तं सघृणः कुबुद्धिं प्रयोजयेदुत्पथगं यथान्धम् ॥ १७५ ॥**
**। ५ । ५ । १७ । (४)**

एवमुक्तमेव हृद्यारोहाय प्रपञ्चयति ॥ **कस्तमिति** ॥ स्वयं। तदभिज्ञ-प्रवृत्तनिवृत्तोभयविधधर्मफलविशेषज्ञानी। अत एव विपश्चित्। कः पुरुषः। स्वयं स्वभावत एव। अज्ञानिभिः प्रवर्तितप्रवृत्तमार्गे प्रवर्तमानं। अत एव कुबुद्धिं। तं दृष्ट्वा तमेव पुनस्तस्मिन्नेव मार्गे। स्वयमेव उत्पथगं अन्धमिव सदयः प्रयोजयेत् प्रेरयेदिति ॥ १७५ ॥

**गुरुर्न स स्यात्स्वजनो न स स्यात्पिता**
**न स स्याज्जननी न सा स्यात्।**
**दैवं न तत्स्यान्न पतिश्च स**
**स्यान्न मोचयेद्यः समुपेतमृत्युम् ॥ १७६ ॥ ५ । ५ । १८ । (५)**

ननु कः विपश्चित्प्रवृत्तमार्गे प्रयोजयेन्न कोऽपीति यदुदितं तन्न समञ्जसम्। यतस्तत्रैव नियोजयन्तो बहवः सन्ति। **तथाहि**—गुरुस्तावदस्माकं तत्रैव नियोजयति। तथैव साक्षाज्जननी। तादृशः पितापि। किं पुनः यः स्वजनः स सर्वोऽपि। तथैवान्नस्य दाता स्वाम्यपि। किं वक्तव्यं मनुष्या एवैवमिति। यदस्मत्कुलदैवं तदप्यस्मद्यात्रासमये पृच्छतां नः कश्चन पुरुषं प्रविश्य तथैव बभाष

Rarest Archive

इति। एवं प्राप्ते प्रवृत्तिमार्गे प्रवृत्तिमुपदिशत्सु तेषु गुरुत्वादिप्रतिपत्तिरेव न कर्तव्या। यया तेषामुपदेशात्तत्परः स्यादित्याशयेन वास्तवं गुरुत्वादिकं नास्त्येवेत्याह॥ **गुरुर्नेति**॥ यः समुपेतमृत्युं संसाराख्यं न मोचयेत्। तन्मोचनसाधनं निवृत्तिमार्गं नोपदिशेत्। प्रत्युत संसृतिसाधनं प्रवृत्तिमार्गमेवोपदिशेत्स तादृशो गुर्वादिरेव नेति न तद्वाक्यं विश्वसनीयमिति। **यथाहुः**—"गुरूक्तमपि न ग्राह्यं यदनर्थेऽर्थकल्पनम्। यदुक्त्या न प्रबुध्येत सुप्तस्त्वज्ञाननिद्रया। न श्रद्दध्यान्मतं तस्य यथान्धो ह्यन्धनायक" इति (७।६।४)॥ १७६॥

**मा वः पदव्यः पितरस्मदास्थिता या यज्ञशालासनधूममवर्त्मनाम्।**
**कदन्नतृप्तैरसुभृद्भिरीडिता अव्यक्तलिङ्गा अवधूतसेविताः॥ १७७॥**
**।४।४।२१।(६)**

**॥ इतिप्रवृत्तकर्मत्यागप्रकरणम्॥ १२॥**

नश्वरफलत्वात्क्लेशदत्वाच्च प्रवृत्तं कर्म त्याज्यं, नित्यफलत्वादक्लेशदत्वाच्च निवृत्तं कर्म कार्यमिति यदुक्तं तत्र शिष्टाचारोऽप्यस्तीति भावेन तद्बोधकं पितरं प्रत्युक्तं सतीवाक्यं पठन् तदुपसंहरति। **मा व इति**॥ हे पितः। अस्माभिरास्थिताः। न केवलं अस्माभिरेवेति मन्तव्यं। किन्तु अवधूत सेविताः सर्वपूज्यैः सनकादिभिरवधूतविरक्तैरपि सेविताः अज्ञानलिङ्गाः निवृत्तधर्मानुष्ठानरूपाः भागवतधर्मानुष्ठानापरपर्यायाः पदव्यः सन्ति। याः वः पदव्यः स्वर्गसाधनविशेषाः प्रवृत्तधर्मानुष्ठानरूपाः भवादृशैरसुभृद्भिः केवलं देहपोषकैरेव मांसादिरूपकुत्सितान्नसेवकैरसुभृद्भिरेव स्तुत्यास्ता अस्माकं नैव स्युरिति। अथवा ननु यज्ञशालायां आसनदीक्षादिपूर्वकं अग्निहोत्रपूर्णमासचातुर्मास्यपशुसोमादिरूपाणि प्रवृत्तकर्माण्याचरतां धूमरात्र्यादिमार्गेण गतानामस्माकं दिव्यभोगा भवन्ति। ते पुनस्तत्साधनं प्रवृत्तिमार्गमनिच्छतां भवतां कथं

Rarest Archiver

भवेयुरिति पितृमनोगतामाशङ्कामुत्थाप्य निराह ।। **मा व इति** ।। हे पितः । वः पदव्यः धूमादिमार्गाः । तैर्गतानां भोगाश्च अस्माकं नैव भवन्तु । तदपेक्षा नास्ति । कुतः । यतः अस्माकं अग्न्यादिमार्गाः नित्यपुमर्थहेतवः सन्ति । तैश्च गतानामस्माकं नित्यभोगा भवन्ति । ततः न हि कोऽपि स्वस्थात्मा सुलभे नित्यमहासुखसाधने मार्गे सति आयाससाध्ये अनित्याल्पदुःखसाधने मार्गे प्रवर्तते, सति नित्ये महति सुखे अस्थिरमल्पं वा कामयत इति । अत एव आयाससाध्यताज्ञापनाय यज्ञशालासनधूमवर्त्मनामित्युक्तम् । **यथाहुः**— ''प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् । आवर्तते प्रवृत्तेन निवृत्तेनाऽश्नुतेऽमृतम् ।। हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशान्तिदम् । दर्शश्च पूर्णमासश्च चातुर्मास्यः पशुः पुनः ।। एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च । पूर्तं सुरालयारामाकूपाजीव्यादिलक्षणम् ।। द्रव्यसूक्ष्मविपाकश्च धूमो रात्रिरपक्षयः । अयनं दक्षिणं सोमो दर्श ओषधिवीरुधः ।। अन्नं रेत इति क्ष्मेश पितृयानं पुनर्भवः । एकैकस्याप्यानुपूर्व्याद्भूत्वा भूत्वेह जायते ।। स्वलोकं न विदुस्ते वै यत्र देवो जनार्दनः । आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः । निषेकादिश्मशानान्तैः संस्कारैः संस्कृतो द्विजः ।। इन्द्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जुह्वति । इन्द्रियाणि मनस्येवं वाचि वैकारिकं मनः । तां तु वर्णसमाम्नाये तमोङ्कारं स्वरे न्यसेत् । ॐकारं बिन्दुनादे तु तं तु प्राणे महत्यमुम् । अग्निः सूर्यो दिवा वायुः शुक्लो राकोत्तरः स्वराट् । विश्वोऽथ तैजसः प्राज्ञस्तुर्य आत्मा समन्वयः ।। देवयानमिदं प्राहुर्भूत्वा भूत्वाऽनुपूर्वशः । आत्मयाज्युपशान्तात्मा ह्यात्मस्थो न निवर्तते ।। य एते पितृदेवानामयने देवनिर्मिते । शास्त्रेण चक्षुषा वेद जनस्थोऽपि न मुह्यति ।। निवृत्तं कर्म सेवेत प्रवृत्तं मत्परस्त्यजेत् । जिज्ञासायां संप्रवृत्तो नाद्रियेत्कर्मचोदना''मिति एकादशस्कान्धे ।। १७७ ।।

**।। इति श्रीमदवधूतशिरोमणिजयतीर्थ(विष्णुतीर्थ) निर्मितसारोद्धारटीकायां प्रवृत्तकर्मत्यागप्रकरणम् ।। १२ ।।**

Rarest Archiver

## निवृत्तकर्मकरणप्रकरणम् ॥ १३ ॥

**त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्कोऽथ पतेत्ततो यदि ।**
**यत्र क्व वा भद्रमभूदमुष्य को वाऽर्थ आप्तो भजतां स्वधर्मम् ॥१७८॥**
**।१।५।१७।(१)**

एवं प्रवृत्तं कर्म त्याज्यमिति निरूपितम्। अन्तिमश्लोके च निवृत्तमपि कार्यमित्युक्तम्। अत एव उभयार्थप्रतिपादकत्वादुभयमध्ये निवेशः। तत्र प्रवृत्तं परित्यज्य निवृत्तकर्मकृतौ कदाचित्परं पारमगते सति तत्फलप्राप्तिर्न भवेदेव। एतत्फलं तु तत्साधनपरित्यागादेव नास्ति। तत उभयतो भ्रष्टः कष्टां दशामापद्येत। ततो वरमवरास्थिरफलमपि प्रवृत्तं कर्मेत्यतः सत्यम्। परंपारमगते फलं न भवेदेवेति। तथापि कालव्यवधानेन जन्मान्तरेऽपि महत्फलं भवेदेवेति तदेवानुष्ठेयम्। न तु प्रवृत्तम्। निष्फलत्वात्। यच्च फलमित्यभिमतं न तत्फलं किन्तु केवलं फलवदवभासते बालानाम्। प्रदीप इव शलभानामित्यभिसन्धिना ब्रवीति ॥ **त्यक्त्वेति** ॥ स्वधर्मं प्रवृत्तलक्षणं त्यक्त्वा। हरेश्चरणांबुजं भजन्। अपक्वबुद्धित्वात्ततो भजनात् यदि पतेत्। अथ तदापि। यत्र क्व वा जन्मनि। क्लृप्त्यभावादेवमुक्तिः। एकद्व्यादिजन्मव्यवधानेन। अमुष्य भद्रमभूदेव। स्वधर्मं प्रवृत्तं भजतां तु को वाऽर्थ आप्तः। न कोऽपि। यो लभ्यते न स पुरुषार्थ इति भावः ॥ १७८ ॥

**हरौ गुरौ मयि भक्त्याऽनुवृत्त्या वितृष्णया द्वन्द्वतितिक्षया च ।**
**सर्वत्र जन्तोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या ॥ १७९ ॥**
**।५।५।१०।(२)**

Rarest Archives

स्वधर्मं त्यक्त्वा हरेश्चरणांबुजं भजन्नित्यनेन भागवतधर्मानुष्ठानमेव निवृत्तकर्मानुष्ठानमिति लब्धम्। तांश्च दर्शयन् तदनुष्ठानं जिज्ञासूनां तदुपदेशश्च ज्ञानिनामत्यन्तमावश्यक इत्याह। **हराविति**॥ पुत्रान्प्रति साक्षाद्भगवत ऋषभस्य वचनम्। हरौ मयि। गुरौ च भक्त्या। अनुवृत्त्या सेवया। जिज्ञासया ब्रह्मविचारेण। ईहानिवृत्त्या मोक्षतत्साधनातिरिक्तेषु॥ १७९॥

**मत्कर्मभिर्मत्कथया च नित्यं मत्पादसङ्गाद्गुणकीर्तनान्मे।**
**निर्वैरसाम्योपशमेन पुत्रा जिहासया देहगेहात्मबुद्धेः ॥ १८०॥**
**।५।५।१०-११।(३)**

**अध्यात्मयोगेन विविक्तसेवया प्राणेन्द्रियात्माभिजयेन सम्यक्।**
**१तच्छ्रद्धया ब्रह्मचर्येण शश्वदसंप्रमादेन जयेन वाचाम् ॥ १८१॥**
**।५।५।११-१२।(४)**

मत्कर्मभिः मद्गृहसंमार्जनादिभिः। मत्पादसङ्गात् प्रक्षालनादिरूपात्। भूतेषु निर्वैरेण। अहिंसया सर्वभूतेषु समत्वेन। उपशमेन शमेन। देहे आत्मेत्यहमिति बुद्धिः, गेहे आत्मनो ममेति बुद्धिः तस्याः परित्यागेन॥ १८०। अध्यात्मनिष्ठया। वाग्विंद्रियमनसां जयेन। वाङ्नियमेन च॥ १८१॥

**सर्वत्रमद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन।**
**योगेन धृत्युद्यमसत्त्वयुक्तो लिङ्गं व्यपोहेत्कुशलोऽहमाख्यम् ॥१८२॥**
**।५।५।१२-१३।(५)**

---

१. सच्छ्रद्धया इति विजयध्वजीयपाठः।

Rarest Archives

सर्वत्र सर्वभूतेषु। मद्भावविचक्षणेन मद्भावं मद्रूपं विचक्षणेन विषयीकुर्वता ज्ञानेन। तथा विज्ञानेन साक्षान्मुक्तिसाधनेन बिम्बविषयेण विराजितेन। योगेन ध्यानलक्षणयोगेन। धृत्या जिह्वोपस्थजयलक्षणया उद्भूतेन बलेन युक्तः कुशलः पुरुषः अहमाख्यं अहमित्यभिधानं। लिङ्गं शरीरं। व्यपोहेत् परित्यजेदिति ॥ १८२ ॥

**पुत्रांश्च शिष्यांश्च पिता गुरुर्वा मल्लोककामो मदनुग्रहार्थः।**
**इत्थं विमन्युरनुशिष्यादतज्ज्ञान् न योजयेत्कर्मसु कर्ममूढान् ॥१८३॥**
**।५।५।१४-१५। (६)**

इत्थं हरौ गुरावित्यादिनोक्तभागवतधर्मानुष्ठानरूपनिवृत्तमार्गेण। मल्लोककामः लिङ्गशरीरपरित्यागरूपो मोक्षो भवतीत्युक्तप्रकारेण मम लोकं [१]ज्ञानं स्थानं व कामयत इति तथा। तथा मामानुग्रहः अर्थः प्रयोजनं यस्य सः। अतज्ज्ञान् मोक्षोपायज्ञानरहितान्। अत एव कर्मसु प्रवृत्तेषु मूढान्। एतानि पुरुषार्थसाधनानीति भ्रान्तिमतः। कर्मसु न योजयेदिति ॥ १७३ ॥

**तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः।**
**तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा ॥ १८४ ॥**
**।१।५।१८। (७)**

॥ इति **निवृत्तकर्मकरणप्रकरणम्** ॥ १३ ॥

तदेवं भागवतधर्मापरपर्यायनिवृत्तधर्मानुष्ठानमेव मुमुक्षुभिरपेक्षणीय-मित्याशयेनोक्तमर्थमुपसंहरति॥ **तस्यैवेति** ॥ यस्मादन्यतो विषयतो

---

१. लुकृ प्रकाशे इति धातुव्याख्यानात्।

Rarest Archiver

भवत्सुखं गम्भीरवेगेन कालेन। सर्वत्रापि दुःखवत् अप्रयत्नेनैव प्रवृत्त-धर्मानुष्ठानं विनापि लभ्यते। तस्मात्कोविदः पुरुषः उपर्यधो भ्रमतां यन्न लभ्यते तस्यैव हेतोः निमित्तं प्रयतेत। निवृत्तधर्मानुष्ठानलक्षणं साधनं सम्पादयेदिति ॥ १८४ ॥

**॥ इति श्रीमदवधूतशिरोमणिजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां निवृत्तकर्मकरणप्रकरणम् ॥ १३ ॥**

Rarest Archiver

## देशप्रशंसाप्रकरणम् ॥ १४ ॥

**अहो बतैषां किमकारि शोभनं प्रसन्न एषांस्विदुत स्वयं हरिः ।**
**यैर्जन्म लब्धं नृषु भारताजिरे मुकुन्दसेवौपयिकस्पृहात्मभिः॥ १८५॥**
**।५।१९।२१। (१)**

सप्तद्वीपवति भूमण्डले षट् द्वीपा इव नववर्षवति जम्बूद्वीपेऽप्यष्टौ वर्षा अपि न कर्मक्षेत्राणि । भारतो वर्ष एक एव कर्मस्थानम् । दैवादीदृशं स्थानं प्राप्य विना भगवत्सेवां येऽन्यत्र व्याप्रियन्ते तेषआं जन्म धिगिति भावेन देवैरपि स्तुत्योऽयं भारतो वर्ष इति तन्महिमानं प्रतिपादयति ॥ **अहो इति** ॥ मुकुन्दसेवायामुपयोगिनी इच्छा यस्य तादृशं मनो येषां तादृशैः सद्भिः यैः । भारते अजिरे प्राङ्गणे । नृषु जन्म लब्धम् । एषामेभिः । कीदृशं पुण्यमकारि । अहो बत । उत प्रकारान्तरं च भासते । किं तत् । हरिः स्वयमेव तत्पुण्यादिकमनपेक्ष्यैव एषां प्रसन्नः किमिति ॥ १८५ ॥

**किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना ।**
**न यत्र नारायणपादपङ्कजस्मृतिः प्रमुष्टाऽतिशयेन्द्रियोत्सवात् ॥१८६॥**
**।५।१९।२२। (२)**

किमित्ययं वर्षः प्रशस्यत इत्यत आहुः॥ **किमिति** ॥ यत्र नारायणपादपङ्कजस्मृतिः अतिशयेन्द्रियसुखेन प्रमुष्टा सती न भवति । तादृशस्य द्युलोकस्य जयेन किं प्रयोजनम् । यदा द्युलोकस्येदृशी दशा तदा तज्जयसाधनैः क्रत्वादिभिर्वा किं प्रयोजनम् । न किमपि । मुख्यफलस्य न्यूनत्वादिति । अत एवाहु । **फल्गुनेति** ॥ अल्पेनेत्यर्थः । नारायणविस्मृतिकथनं

Rarest Archives

लोकदर्शनभाषया। विद्यमानत्वेऽपि फलासाधकतया अविद्यमानतुल्यतैवेति मन्तव्यम् ॥ १८६ ॥

**कल्पायुषां स्थानजयात्पुनर्भवात्क्षणायुषां भारतभूजयो वरः।**
**क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयान्त्यभयं पदं हरेः॥१८७॥**
**।५।१९।२३। (३)**

ननु देवत्वप्राप्तिरूपेण द्युजयेन आकल्पमायुर्लभ्यते। भारतभूजयेन तु नृजन्मप्राप्तिरूपेण क्षणमिति। सति महति विशेषे किमिति तिरस्क्रियत इति तत्राह॥ **कल्पायुषामिति**॥ कल्पायुषां यत्स्थानं कल्पायुष्यप्रदं स्थानं देवत्वं तत्प्राप्त्यपेक्षया क्षणायुषां या भारतभूः क्षणायुष्यप्रदो भारतवर्षः तत्प्राप्तिरेव वरीयसी। तत्र नृजन्मप्राप्तिरेव वरीयसीति मन्यामहे। कुतः। यतः सर्वदा भगवति मनः समाधातुमवशीकृतमनसोऽपि। यत्रोत्पन्नेन क्षणेन मर्त्येन क्षणमात्रनाश्येन शरीरेणैव। कृतं कर्महरौ संन्यस्य। क्षणं तत्र मनः समाधायेति यावत्। तस्य अभयं पुनरावृत्तिभयरहितं पदमेव संयान्ति तत इति। द्युजयोऽपि ईदृशश्चेत् को विशेष इत्यतो नेत्याह॥ **पुनर्भवादिति**॥ पुनर्भवोपेतादित्यर्थः। नित्यसिद्धिप्रदत्वाद्भारतवर्षो वरिष्ठ इति भावः॥ १८७ ॥

**न यत्र वैकुण्ठकथासुधापगा न साधवो भागवतास्तदाश्रयाः।**
**न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोऽपि न याति सेव्यताम् ॥**
**१८८॥५।१९।१३। (४)**

ननु यत्र तरवोऽपि निखिलार्थप्रदाः कल्पतर्वादयः। यत्र च वनमपि तापत्रयपरिहरं नन्दनम्। सरांसि चामृतमयानि। युवतयोऽपि जरादिविकारहीनाः कमनीयतमाः। गीतान्यपि तासां केवलं पारवश्यप्रदानि। पुरुषा अपि

Rarest Archive

नित्यतरुणाः। भोगा अपि सङ्कल्पमात्रसाध्याः अतुलाः। तदेवं प्रतिक्षणमिन्द्रियोत्सवाः। तादृशोऽपि सुरेशानां लोकः स किमित्यवज्ञायतेऽभिज्ञैरित्यत आह ॥ **न यत्रेति** ॥ यज्ञेशो हरिः तस्य मखाः तदुपदेशरूपाः यज्ञाः। तद्रूपाः महोत्सवाः। तादृशोऽपि सुरेशलोकः। सेव्यतां वासयोग्यताम् ॥ १८८ ॥

**यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनम्।**
**तेनाब्जनाभस्मृति जन्म नः स्याद्वर्षे हरिर्भजतां शं तनोति ॥ १८९ ॥**
**।५।१९।१७।(५)**

यदर्थमेतावदुदितं तदेव मनोगतं दर्शयति ॥ **यदीति** ॥ यद्यस्माकम् स्वर्गसुखसाधनावशिष्टम्। यज्ञदानादि कर्मार्जितं पुण्यं विद्येत। तर्हि तेन पुण्येन। अब्जनाभस्मृतिहेतुः जन्म। अत्र भारते वर्षे स्यात्। कुतः। यतो हरिरत्र वर्ष एव भजतामपेक्षितार्थं ददाति तत इति। **यथाहुः**— ''अत्रापि जम्बूद्वीपे भारतमेव वर्षं कर्मक्षेत्रं अन्यान्यष्टवर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमानि स्वर्गपदानि व्यपदिशन्ती''ति। तदेवं देवैरपि साधनानुष्ठानयोग्यतया प्रार्थिते वर्षे साधनानुष्ठानमेव अवश्यमनुष्ठेयं नान्यत्र दृष्टिर्देयेति परमार्थः ॥ १८९ ॥

**मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानाम्।**
**अदान्तगोभिर्विशतां तमिस्रं पुनःपुनश्चर्वितचर्वणानाम् ॥ १९० ॥**
**।७।५।३०।(६)**

भारतवर्षे वनमेव स्थानं प्रशस्तं अथवा गृहम्। उभयमपीति ब्रूमः। विरुद्धमेकस्य उभयत्रावस्थानमित्यतः अधिकारिभेदेन न विरोध इति भावेन

Rarest Archiver

तत्स्वभावं तावत्प्रतिपादयति। **मतिरिति**॥ अवशैरिन्द्रियैः। पुनःपुनरपि भुक्तचरभोगानेव भुञ्जानानाम्। अत एव तमिस्रसदृशं संसारं भजतां कुटुम्बिनाम्। परोपदेशेन वा स्वबुद्ध्या वा। परस्परं सवयस्यैर्वा। श्रीहरौ रतिर्न भवेदिति॥ १९०॥

**तत्साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात्।**
**हित्वात्मपातं गृहमन्धकूपं [1]वनं गतो यद्धरिमाश्रयेत ॥ १९१॥**
**।७।५।६।(७)**

संत्वीदृशा अपि जनाः किमेते वनवासेऽधिकारिणः किंवा गृहवास इत्यत आह॥ **तदिति**॥ गृहं हित्वा वनं गतः सन् हरिमाश्रयेतेति यत् तदेव तेषां साधु मन्ये इति॥ १९१॥

**शिलोञ्छवृत्त्या परितुष्टचित्तो धर्मं महान्तं विरजं जुषाणः।**
**मय्यर्पितात्मा गृह एव तिष्ठन्नातिप्रसक्तः समुपैति शान्तिम्॥ १९२॥**
**।११।१७।४३।(८)**

द्वितीयाधिकारिणो दर्शयति। **शिलोंछेति**॥ चतुर्विधा हि गृहिणां जीवनोपयोगिनी वृत्तिर्विरिञ्चेन विरचिता। वार्ता १। असंचयः २। शालीनं ३। शिलोंछः ४। इति। **यथाहुः**— ''वार्ताऽसञ्चयशालीनं शिलोञ्छ इति वै गृह'' इति। तत्र यायावरपर्यायः भैक्षचर्याविशेषो वार्ता। १। तद्दिनार्जितस्य व्रीह्यादिद्रव्यस्य तद्दिन एव व्ययः असञ्चयः। २। वत्सरपर्यन्तं स्वजीवनहेतोः

१. ''वनं सज्जनसङ्गमलक्षणं'' इति **विजयध्वजतीर्थाः**। स्थाने हि तत्। न खलु वनप्रवेशमात्रेण हर्याश्रयो लभ्यते अतिप्रसङ्गात्। **विष्णुतीर्थीया**भिप्रायस्तु १९२ तमश्लोकव्याख्यावसरे इदमुदितं भवतीत्यादिना व्यक्तीभविष्यति।

Rarest Archive

कुसूलमञ्जूषादिषु व्रीह्यादेः सङ्ग्रहः शालीनं। ३। व्रीह्यादिसस्ययुक्तक्षेत्रेषु खले राशीकृते व्रीह्यादौ तत्स्वामिना नीते सति तत्परित्यक्तधान्यानयनं शिलोञ्छ इति। ४। तत्र यया कयाचन वृत्त्या परितुष्टं चित्तं यस्य। अनेन वशीकृतेन्द्रियत्वमभिप्रैति। अत एव तयैव वृत्त्या। विरजं पापाजनकं। महान्तं अक्षयफलम्। धर्मं जुषाणः सेवमानः। तथा मय्यर्पितमनाः। अत एव नातिप्रसक्तः उदरपूर्त्यनुकूलाधिकविषयेष्वप्रसक्तः। योऽधिकारी स गृह एव तिष्ठन्। शान्तिं संसारनिवृत्तिं प्राप्नोति। यतोऽतस्तस्य गृह एव वास उचित इति॥ **इदमुदितं भवति—** नहि गृहपरित्यागेन वनवासो व्यसनितया क्रियते। किं नाम। अवशीकृतेन्द्रियाणां पुनःपुनर्भोगवासनया भगवति मनो न प्रविशतीत्येव हेतोः। स च तस्मिन्मनोनिवेशो यदि गृह एव भवेत् तदा किमधिकं लभ्यं वनवासेन। यदर्थं तत्परित्यज्य वनवासः कर्तव्यो भवेदिति॥ १९२॥

**यद्वाञ्छया नृपशिरोमणयोऽङ्गवैन्य**
**जायन्तनाहुषगदादय ऐकपत्यम्।**
**राज्यं विसृज्य विविशुर्वनमम्बुजाक्ष**
**सीदन्ति नाऽनुपदवीं त इहास्थिताः किम्** ॥ १९३॥

। १०। ७६। ४५। (९)

### ॥ इति देशप्रशंसाप्रकरणम्॥ १४॥

ननु समीचीनमेतत् यद्गृह एव स्थितो हरिं भजेतेति। गृहं हित्वा वनं गतो हरिमाश्रयेतेति तु विचिन्त्यम्। तत्र हरिभजने कृते सति यदि पुरुषार्थप्राप्तिः स्यात् तदा चिन्ता नास्त्येव। यदा तु न तदा केवलं श्रम एव सम्पादितः स्यात्। ननु दैवमेव एषां प्रतिकूलमिव आभाति। यत्तु गृहेषु मनःप्रसादमनासादयतां तत एव अतनुभवभवपरितापपरितापिनां तन्निवृत्तये वनाश्रयणे तत्रापि

Rarest Archiver

इतोऽप्यनेकगुणाधिकश्रमः प्राप्तः। तरणिचरणसन्तप्तमस्तकस्य खल्वाटकस्य तन्निवृत्तये तालतरुच्छायाश्रयणे तत्फलपतनेन ततोऽधिकक्लेश इवेत्यतः स्यादियं चिन्ता सन्तापकरी भवताम्। यदि हि हरिशरणानां पुरुषार्थप्राप्तिः कदाचिन्न भवतीत्ययमर्थः सिद्ध्येत्। तदेव नास्ति। तच्चरणसेवानिरतानां कदापि फलाऽनिष्पत्त्यदर्शनात्। ततो युक्तमेव वनं गतो हरिमाश्रयेतेति भावेनाह॥ **यद्वाञ्छयेति**॥ ''हे अम्बुजाक्षे''ति श्रीकृष्णं प्रति रुक्मिणीवचनम्। कदाचिन्नर्मसमये हरिणोक्तं— ''महासाम्राज्यवतो नृपान् परित्यज्य दरिद्राणां नः करं धृतवती क्लिश्यसी''ति। तच्छ्रुतवत्या देव्या उत्तरमुच्यते। यस्य त्वत्पादसेवनस्य वाञ्छया। ये नृपशिरोमणयः वनं विविशुः तेऽनुपदवीं स्वयोग्यपदं नास्थिताः किम्। अप्राप्य इह वन एव सीदन्ति किम्। किमाक्षेपे। नैव। स्वयोग्यमपेक्षितं पदं प्राप्य निर्वृताः। अतोऽहमपि त्वत्पादाश्रिता कथं क्लिष्टा भवेयमिति। अङ्गो नाम्ना। वैन्यो वेदपुत्रः पृथुः। जायन्तो भरतः। नाहुषो नहुषपुत्रो ययातिः॥ १९३॥

**॥ इति श्रीमदवधूतशिरोमणिश्रीजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटिप्पण्यां देशप्रशंसाप्रकरणम्॥ १४॥**

Rarest Archiver

## कालप्रशंसाप्रकरणम् ॥ १५ ॥

**कलौ न राजन् जगतां परं गुरुं त्रिलोकनाथानतपादपङ्कजम् ।**
**प्रायेण मर्त्या भगवन्तमच्युतं यक्ष्यन्ति पाखण्डविभिन्नचेतसः ॥१९४॥**
**।१२।३।४३।(१)**

श्रीरस्तु ॥ कालोऽपि ईदृशः सुदुर्लभः ततः अस्मिन्नेव पुंसा यत्संपादनीयं तत्सम्पाद्यमिति भावेन तत्र अप्रवृत्तान् धिक्करोति॥ **कलाविति**॥ हे राजन्, मर्त्या ईदृशेऽपि कलौ प्रायेण न यक्ष्यन्ति न तं सेवन्ते। अतः प्राप्तपरित्यागिनां जन्म धिगिति भावः। कुतो न यक्ष्यन्तीत्यत उक्तं पाखण्डेति॥ पाखण्डमतेन मोहितबुद्धय इति॥ १९४॥

**यन्नामधेयं म्रियमाण आतुरः पतन्स्खलन्वा विवशो गृणन्पुमान्।**
**विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यन्ति न तं कलौ जनाः ॥**
**१९५॥१२।३।४४।(२)**

यस्मिन्कलौ नामोच्चारणमात्रेण पुरुषार्थप्राप्तिः तस्मिन् स्वकार्यमसाधयन् अकुशल एवेति भावेनाह॥ **यन्नामधेयमिति**॥ आसन्नमरणोऽपि वा। रोगी वा। यतः कुतश्चित्पतन् वा। स्खलन्वा। स्ववशो विवशो वा। यस्य हरेर्नाम। यस्मिन्कलौ गृणन् कीर्तयन्नेव। विमुक्तकर्मार्गलः विमुक्तकर्मपाशः सन्। उत्तमां गतिं प्राप्नोति जनः। तं तादृशमहिमानम्। तस्मिन् तादृशफलदेऽपि कलौ न यक्ष्यन्ति। **यथाहुः—** ''कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः। कीर्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजे''दिति॥ १९५॥

Rarest Archives

**योऽयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहुश्चेष्टते येन विश्वम् ।**
**निमेषादिर्वत्सरान्तो महीयांस्तं त्वेशानं क्षेममधाम प्रपद्ये ॥ १९६ ॥**
**। १० । ४ । १७ । (३)**

**॥ इति कालप्रशंसाप्रकरणम् ॥ १५ ॥**

पाखण्डमतविभिन्नमतित्वात् न तं कलौ यक्ष्यन्तीति यदुदितं तन्निमित्तमात्रम् । वस्तुतस्तु कालनामा श्रीहरिरेव यमनुगृह्णाति तस्मै स्वस्मिन् मतिं दास्यत्येव । अतः स एव सर्वेषामायुरादिरक्षको विघ्नपरिहारकः साधनकारकश्चेति प्रतिपत्तव्य इति भावेनाह । **योऽयमिति** ॥ कृष्णं प्रति देवकीवचनमेतत् । हेऽव्यक्तबन्धो । निमेषादिर्वत्सरान्तो महीयान् योऽयं कालोऽस्ति । तं कालं तस्य ते चेष्टां त्वयैव प्रेर्यमाणम् । ज्ञानिन आहुः । न तस्य स्वातन्त्र्येण फलदातृत्वमिति भावः । कुत एवं । तस्यैव स्वातन्त्र्यं किं न स्यादित्यतः तस्य ते इत्युक्तम् । सः कः इत्यत आह ॥ **येनेति** ॥ विश्वं येनैव चेष्टते तस्य ते इति । सर्वप्रेरकतया प्रमितत्वादिति भावः । ततोऽहं कालतो भीता सर्वप्रेरकतया कालस्यापि प्रेरकं काले स्थित्वा । क्षेमधाम क्षेमप्रदं सर्वभक्ताश्रयं त्वामेव । क्षेमाय प्रपद्ये इति ॥ १९६ ॥

**॥ इति श्रीमदवधूतशिरोमणिश्रीजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटिप्पण्यां कालप्रशंसाप्रकरणम् ॥ १५ ॥**

Rarest Archive

## देहप्रशंसाप्रकरणम् ।। १६ ।।

**सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या**
**वृक्षान् सरीसृपपशून् खगदंशमत्स्यान् ।**
**तैस्तैरतुष्टहृदयः पुरुषं विधाय**
**ब्रह्मावबोधधिषणं मुदमाप देवः।। १९७ ।। ११ । ९ । २९ ।(१)**

श्रीरस्तु ।। देहोऽपि ईदृशो दुर्लभः ततः अस्मिन्नेव स्वकार्यं साधनीयमवहितैरित्याशयेन इदं प्रकरणम् । तत्रादौ श्रीहरिणा जीवसाधनार्थमेव इदं शरीरं निर्मितं ततस्तत्रैव विनियोगो युक्त इत्याह ॥ **सृष्ट्वेति** ।। आत्मनः अधीना शक्तिः यस्याः तया प्रकृत्या । वृक्षादिरूपाणि विविधान्यपि पुराणि सृष्ट्वा । तैस्तैः सृष्टैरपि स्वाभिप्रेतकार्यसाधनाक्षमैः । अतुष्टमनाः । पुरुषं पुरुषदेहं विधाय मुदमाप । तत्र हेतुः । ब्रह्मणोऽवबोधस्याश्रयमिति । अनेन उद्देश्यं ब्रह्मज्ञानमेव शरीरनिर्माणस्येति सूचितम् ।। १९७ ।।

**प्राप्ता नृजातिं त्विह ये च जन्तवो ज्ञानक्रियाद्रव्यकलापसंभृताः ।**
**न चेद्यतेरन्नपुनर्भवाय भूयो वनौका इव यान्ति बन्धनम् ।। १९८ ।।**
**। ५ । १९ । २५ । (२)**

विपक्षे बाधकं दर्शयति ।। **प्राप्ता इति** ।। इह भरतखण्डे । ये प्राणिनो नृदेहं प्राप्ताः । तत्रापि ज्ञानसाधनेन प्रतिभाविशेषादिना । क्रियासाधनेन देहदार्ढ्यवित्तादिना । द्रव्यकलापेन संभृताः पूर्णाः । ईदृशा अपि मोक्षाय यदि न प्रयत्नं कुर्युः । ते वनौकाः नरकस्था इव । बन्धनं दुःखमेव । भूयो बाहुल्येन ।

Rarest Archiver

यान्ति प्राप्नुवन्ति॥ **इदमुदितं भवति**—जीवानां विमुक्तये सृष्टिरिति तावदविवादम्। विमुक्तिश्च ज्ञानादिसाधनसामग्र्येण। तत्र सृष्टिसमये श्रीहरिः तांस्तान्देहान् विरचय्य तत्र तत्र प्रविश्य तत्र साधनसंपत्तिसाधकत्वं अनुपलभ्य। अन्ततः पुरुषदेहं विधाय। तत्र प्रविश्य। तत्र साधनसंपत्तिं उपलभ्य। तदभिलषितं मुक्तिस्तत्साधनं ज्ञानं चेत्येतद्द्वयमपि सिद्धमिति सन्तुष्टमना बभूव। ततः साधनसामग्र्यवता अनेन देहेन ये मुक्त्यर्थमेव प्रयतन्ते तदनुमतकारिणः तत्प्रसादेन सिद्धाः भवन्त्येव। ये तु पुनर्विषयलौल्यादन्यत्र प्रयतमाना अत्र न प्रयतन्ते ते पुनस्तत्कोपेन राजकोपेन राजदत्तसकलसम्भारः राजकार्याकारी राजभृत्य इव क्लिश्यत्येव भूरिश इति। यदन्यद्वक्तव्यं तदध्यात्मप्रकरणे वक्ष्यते ॥ १९८ ॥

**लब्ध्वा सुदुर्लभमिदं बहुसम्भवान्ते**
**मानुष्यमर्थदमनित्यमपीह धीरः।**
**तूर्णं यतेत न पतेदनुमृत्यु याव-**
**न्निःश्रेयसाय विषयः खलु सर्वतः स्यात्** ॥ १९९ ॥
**। ११ । ९ । २९ । (३)**

॥ इति **देहप्रशंसाप्रकरणम्** ॥ १६ ॥

प्रकरणार्थमुपसंहरति। **लब्ध्वेति**॥ बहुसंभावान्ते बहुजन्मावसाने। पृष्ठतोऽनुगतमृत्युत्वेन अनित्यमपि पुरुषार्थप्रदम्। मानुष्यं मानुषं देहं लब्ध्वा। अनु अनन्तरमेव। कौमारावस्थायामेव इति यावत्। तत्रापि श्वः परश्वः इति न कर्तव्यमित्याह॥ **तूर्णमिति**॥ कुत एवं शैघ्र्यमित्यत उक्तम्। **यावन्न पतेदिति**॥ मरणमवधिं कृत्वैव निःश्रेयसाय मोक्षाय यतेतेति। मरणं च नास्मिन्काले भवतीति नियतमिति भावः। कौमारमारभ्यैव मोक्षाय प्रयतने

Rarest Archiver

देहपोषणसाधनविषयः कथं सिध्येदित्यत उक्तं **विषय इति** ।। विषयः सर्वतः सर्वस्मात्पश्वादिदेहादपि स्यात् । खलु । देहादिपोषणलक्षणं कार्यं पश्वादिदेहसाधारणम् । नैतच्छरीरप्रयोजनमिति तत्र प्रयत्नः कार्यः । दुःखवदप्रयत्नेनैव लभ्यत्वात् वैषयिकसुखस्येति भावः ।। **यथाहुः**— ''सर्वेषामेव जन्तूनां सततं देहपोषणे । अस्ति प्रज्ञा समायत्ता को विशेषस्तया नृणाम् ।। कौमार आचरेत्प्राज्ञो धर्मान्भागवतानिह । दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम् ।। ७।६।६।। सुखमैन्द्रियकं दैत्या देहयोगेन देहिनाम् । सर्वत्र लभ्यते दैवाद्यथा दुःखमयत्नतः ।। ७।६।८ ।। न तत्प्रयासः कर्तव्यो यत आयुर्व्ययः परः ।। ७।६।९।। हन्तार्भका मे शृणुत वचो वः सर्वतः शिवम् ।। वयस्यान्पश्यत मृतान् क्रीडान्धा मा प्रमाद्यथ ।। ७।६।१।।'' इति ।। १९९ ।।

**।। इति श्रीमदवधूतशिरोमणिश्रीमज्जयतीर्थार्य(श्रीविष्णुतीर्थ) निर्मितसारोद्धारटीप्पण्यां देहप्रशंसाप्रकरणम् ।। १६ ।।**

Rarest Archiver

## ध्यानप्रकरणम् ॥ १७ ॥

[१]भूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिङ्
नरकभागणलोकसंस्थम् ।
गीतं मया तव नृपाऽद्भु तमीश्वरस्य स्थूलं
वपुः [२]सकलजीवनिकायधाम्नः॥ २०० ॥ ४ । २४ । ४४ ।(१)

श्रीरमारमणाय नमः ॥ यदुपयोगितया प्रवृत्तं कर्म त्याज्यमित्युदितं, निवृत्तं कर्म कर्तव्यमित्यभिहितं, देशः कालो देहश्च प्रशस्त इति प्रतिपादितं, तदिदानीं श्रीहरेरुपासनं समवहितैः सदैव संपाद्यमिति वक्तुमिदं प्रकरणम् ॥ तत्राणिष्ठरूपोपासनयैवमुक्तिरिति तावन्निष्कर्षः। विना बिम्बोपासां साधनसहस्रेणापि मुक्तेरयोगात्। बिम्बस्य चाणिष्ठत्वे सन्देहाभावात्। उपासनं च मनोवृत्तेस्तत्रावधानमेव। नच प्रथममेवाणिष्ठे मनोऽवधातुं शक्यम्। मानसवासनानिर्मितप्रतिमायां हि मनो निवेश्यम्। वासना च श्रवणदर्शनादिजन्या। अतस्तत्संस्कारसमर्पकतया स्थूलप्रतिमापेक्षा भवत्येव। स्थूले निवेशितं मनः सूक्ष्मे निवेशयितुं शक्यम्। तत्रापि स्थविष्ठं ''पातालमेतस्य हि पादमूलमि'' त्यादिना प्रतिपादितं रूपमारभ्य पुरुषबाल्यदेहपरिमितप्रतिमापर्यन्तं स्थूलमित्युच्यते। तेषु च स्थूलेषु रूपेषु यत्र यत्र मनो निम्नभूमिमाप इव प्रविशति तत्र तत्र निवेश्य पादादिमुखपर्यन्तं वासनाः दृढीकुर्यात्। ततः प्रादेशपरिमितं, ''केचित्स्वदेहान्तरि''त्यादिना प्रतिपादितं रूपमारभ्य अणिष्ठरूपपर्यन्तं सूक्ष्ममित्यभिधीयते। तदेवं स्थूलश्रवणदर्शनाद्यभ्याससमासादितेन वासनापरपर्यायसंस्कारपाटवेन सूक्ष्मप्रतिमाकल्पनासामर्थ्ये सति

---

१. भागण इत्यत्र भकारस्य दीर्घत्वं आर्षम्।

२. सकलजीवनिकायः धाम यस्य स तथा वा इति पदरत्नावल्याम्।

Rarest Archiver

स्थूले निर्जितं मनः सूक्ष्म एव रूपे निवेशनीयम्। ततस्तदुपयोगितया स्थूलरूप-मुपासनाविषयमादौ दर्शयति ॥ **भूद्वीपेति** ॥ हे नृप, तव सकलजीवसमूहाश्रयस्य हरेः। अद्भुतं स्थूलं वपुः। मया गीतं प्रतिपादितम्। कीदृशं वपुः। भूर्भूमिः प्रसिद्धा। द्वीपास्तत्र विद्यमानाः जम्बूप्लक्षशाल्मलीकुशक्रौञ्चशाकपुष्करसञ्ज्ञाः सप्त। वर्षाः भारतकिम्पुरुषकुरुहिरण्मयरम्यककेतुमालहरिवर्षभद्राश्वेलावृत-सञ्ज्ञाः खण्डापरनामानो नव। तत्र पूर्वमाजनाभं नाम वर्षं भरतेन प्रतिपालितमिति भारतमिति व्यपदिशन्ति। सरितः भागीरथ्यादयः। अद्रयः मेर्वादयः। समुद्राः लवणोद-सुरसोद-सुरोद-घृतोद-क्षीरोद-दधिमण्डोद-शुद्धोदनामानः सप्त। तत्र सुरसोदमेवेक्षुरससमुद्रमन्ये मन्यन्ते। भागणः ज्योतिर्गणः। लोकाः उक्तेभ्योऽन्य एकादश। त एव संस्था अवयवा यस्य तादृशमिति। यथाहुः- ''उद्गीयते यत्तद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्ममायया गुणमयमनुवर्णितमादृतः पठति शृणोति श्रावयति स एवायं भगवतः परमात्मनो ह्यणिष्ठमतिश्रद्दधानो भक्तिविशुद्धबुद्धि-र्वेद।५।२४।४२। ''श्रुत्वा स्थूलं तथा सूक्ष्मं रूपं भगवतो [१]यतिः। स्थूले निर्जितमात्मानं शनैः [२]सूक्ष्मे धिया नयेदिति क्रम'' (५।२४।४३) **इतीति** ॥ नन्वणिष्ठबिम्बज्ञानादेव मुक्तिसिद्धेः किं स्थविष्ठरूपकथनेनेत्यत आह ॥ **उद्गीयत इति** ॥ स्थविष्ठं स्थूलतमम्। अणिष्ठं सूक्ष्मतमम्। स एव वेदेत्यनेन तस्य तद्वेदनोपयोगितालाभेन तदुपयोगितयाऽस्य कथनं युज्यत इति भावः। नन्वणिष्ठाद्बिभ्यतः स्थविष्ठकथनं वृश्चिकभिया पलायमानस्याशीविषमुखे निपात इत्याभाणकमनुसरतीत्यत उक्तं विवृणोति ॥ **श्रुत्वेत्यादिना** ॥ अनेन स्थविष्ठपदं

---

१. **यदुपत्याचार्यास्तु** यातीति पाठं अनुसृत्य यातीत्यस्य जानातीति व्याचख्युः।

२. सूक्ष्मधिया नयेदिति **विजयध्वजी**पाठः। उभयोः रूपयोर्मध्ये कस्मिन् रूपे प्रथमप्रतिपत्तिरिति क्रममाह ॥ **श्रुत्वेति** ॥ आत्मानं मनः। सूक्ष्मधिया सूक्ष्मरूपोपासनया। इति **पदरत्नावल्यां** अयं श्लोको व्याख्यातः ॥ **यादुपत्येऽपि** अयमेव पाठः अनुसृतः। व्याख्यापि इत्थमेव।

Rarest Archiver

स्थूलोपलक्षकम्। अणिष्ठपदं तु सूक्ष्मोपलक्षकमिति विवृतं भवति। ननु यदि स्थूलमाश्रितं तदापि सूक्ष्ममनुसरणीयमेव। ततो वरं प्रथमत एव सूक्ष्मशरणमिति चेत्। सत्यम्। जन्मान्तरानुसृतस्थूलानां विशदभक्तिविशुद्धमनसामेवमिति। ये तु न तादृशाः तेषामयं क्रम इत्याशयेन श्रुत्वेति ''क्त्वा'' प्रत्ययेनोक्तमुपयोगं व्यनक्ति। **स्थूले निर्जितमिति**॥ बुद्धिशब्दस्य विवक्षितमाह॥ **आत्मनमिति**॥ मन इत्यर्थः। स्थूलोपासनाभिव्यक्तभक्तिविशेषविशुद्धम्। आत्मानं मनः। सूक्ष्मे रूपे। नयेत् गमयेत्। तत्र सहायमाह॥ **धियेति**॥ अत एव प्राक् यः स्थविष्ठं पठति स एव भक्तिविशुद्धबुद्धिः सन् अणिष्ठं वेदेत्यभिहितमिति मन्तव्यम्। तत्राप्यादौ एकमेवावयवं ततो द्वयमिति क्रमेणैव विशिष्टं रूपमित्यपि विशेषोऽस्तीत्याशयेनोक्तं **शनैरिति**। यत एवं मनो नेतुं शक्यं भगवति ततस्तादृगधिकारिणः प्रति अयं क्रमः इत्यभिप्रेत्याह॥ **इति हेतोः क्रम इति**॥ २००॥

**तस्या विशुद्धकरणः शिववार्विगाह्य**
**बद्ध्वासनं जितमरुन्मनसाऽहृताक्षः।**
**स्थूले दधार भगवत्प्रतिरूप एत-**
**द्ध्यायंस्तदव्यवहितो व्यसृजत्समाधौ॥२०१॥ ४। १२। १७।(२)**

एवं उक्तार्थस्य सम्यग् हृद्यवरोहेण तत्रादरजननाय पूर्वाचारमपि दर्शयति॥ **तस्या इति**॥ विशालानाम्न्या नद्याः। शिवं वाः मङ्गलं वारि यत्। तत्र विगाह्यावगाह्य। आसनं बद्ध्वा गुदं स्वपार्ष्णिनाऽऽपीड्य। जितो वायुर्येन सः। मनसैव आहृतेन्द्रियः सन्। स्थूले पातालादिचतुर्दशलोकात्मके। [1]प्रतिरूपे भगवत्प्रतीके। दधार मनो निवेशितवान्। एतत् भगवद्रूपं ध्यायन् सन्। तेन विशुद्धकरणः शुद्धान्तःकरणः। जितमना भूत्वा समासनः। समाधौ सति

१. ''शिलावत्प्रतिमैषा हि विष्णोर्लोकचतुर्दशी''ति तात्पर्यं।

Rarest Archiver

सूक्ष्मरूपविषयीकरणसामर्थ्ये प्राप्ते सति । [१]समाधौ सूक्ष्मरूप एव मनोऽवधानरूपे । [२]अव्यवहितः मग्नो भूत्वा तत् स्थूलं व्यसृजत् । स्थूले मनोऽवधानरूपस्य तदुपासनस्य सूक्ष्मरूपोपासनाप्राप्त्यवधिकत्वात्त्यक्तवानिति ।। २०१ ।।

**कोऽतिप्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत्सतः ।**
**अस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ।।**
**२०२ ।। ७ । ७ । ४० । (३)**

नन्वेवं विचार्यमाणे हरेरुपासने अतिप्रयासः दृश्यते अणिष्ठरूपगतविशेषाणां अवयवादीनां बुद्ध्या विभावयितुं अशक्यत्वादित्यत आह ।। **कोऽतिप्रयास इति** ।। हे असुरबालकाः । स्वे हृदि । छिद्रवत् आकाशवदलिप्ततया । सतः विद्यमानस्य । अशेषदेहिनां [३]आत्मनः आन्तर्यामिणः । सख्युर्मित्रस्य । अस्य हरेः । उपासने विषये । अतिप्रयासः कः विद्यते । येन ततो निवृत्तिर्भवतां भवेत् । विशेषज्ञानमशक्यमिति दर्शितमिति चेत्तत्राह ।। [४]**सामान्यत इति** ।। उपासने कोऽतिप्रयास इति । तर्हि विशेषो न ज्ञेय एव किमित्यत उक्तं **किं विषयोपपादनैरिति ।। अयमाशयः** हृदयावकाशे सामान्यतस्तावदुपासनं कार्यम् । तत्र मनोऽवधाने सति तदुपासनावर्धितभक्तिविशुद्धमनसः विशेषाकांक्षायां तद्विशेषाभिधानस्यावसरः । शक्यन्ते च ते विशेषाः ज्ञातुं पुंसां सुमनसाम् । वक्ष्यामश्च तदैव । इदानीं सामान्यत एवोपासनारहितानां भवतां किं विचारेण । किञ्चास्माकं तदुपपादनेनेति ।

---

१. तन्त्रन्यायेन समाधिशब्दस्यावृत्तिमभिप्रेत्य व्याख्याति ।

२. स्थूलसन्निहितसूक्ष्मरूपयोः अभेदं पश्यन् इति व्याख्यातं **पदरत्नावल्याम्** । स्थूलसन्निहितरूपैक्येन सूक्ष्मरूपं अस्मरदित्यर्थ इति **तत्रैव** ।

३. अस्य आत्मनः जीवस्य । स्वे स्वाधीने हृदि इति **पदरत्नावल्याम्** ।

४. अस्य अशेषदेहिनामित्यनेन अन्वयः प्रादर्शि **पदरत्नावल्याम्** । तथाच **तात्पर्यं** अशेषदेहिनां सामान्यतः हृदिस्थत्वेन इति ।

Rarest Archiver

सामान्यत उपासने तु न कोऽप्यतिप्रयासः इति भावः। जन्मान्तराचीर्णस्थूलोपासनान् असुरबालकान् प्रति प्रह्लादेन प्रथमत एव सूक्ष्मोपासनमभिहितमिति न क्रमभङ्ग इति ॥ २०२ ॥

**[१]केचित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम्।**
**चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्ति ॥२०३॥२।२।९। (४)**

नन्वस्तु सम्पादितसामान्यान् प्रति विशेषाभिधानस्य अवसरः। सामान्यमेव कथम्। तत्रैव तावद्वयं प्रवर्तामहे इत्यतः अवसरप्राप्तं सूक्ष्मरूपं तदुपासनं च सप्रकारं तत्र विशेषविवित्सूनां विशेषांश्च ज्ञापयति॥ **केचिदित्यादिना पद्यषट्केन**॥ अत्रापरोक्षजनिकाः तिस्रः मनोवृत्तयः। [२]धारणा, ध्यानं, समाधिरिति। तत्रादौ धारणां तावदाह॥ **केचिदिति**॥ केचित् स्थूले जितमनस्काः सूक्ष्मावधानयोग्याः। प्रादेशपरिमाणम्। अवकाशे आकाशे। वसन्तम्। अत एव पुरुषम्। रथाङ्गं चक्रम्। धारणया खण्डितया मनोवृत्त्या। स्मरन्ति विषयीकुर्वन्ति। आदौ धारणां सम्पादयेदिति भावः॥ २०३ ॥

**प्रसन्नवक्त्रं नलिनायतेक्षणं कदम्बकिञ्जल्कपिशङ्गवाससम्।**
**लसन्महाहारहिरण्मयाङ्गदस्फुरन्महारत्नकिरीटकुण्डलम् ॥ २०४ ॥**
**। २ । २ । १० । (५)**

प्रसन्नं विकसितम्। कदम्बस्तरुविशेषः तत्पुष्पस्य किञ्जल्कवत् केसरवत् पिशङ्गं पीतं वासो यस्य। लसन्महाहारश्चासौ हिण्मयाङ्गदश्चासौ स्फुरन्महारत्नानि किरीटकुण्डलानि यस्य स च तम्॥ २०४ ॥

---

१. भगवदुपासनाप्रकारबाहुल्येन उपासकबाहुल्यात् केचिदित्युक्तिः। नतु स्वासंमतत्वेन।

२. ''खण्डस्मृतिर्धारणा स्यादखण्डा ध्यानमुच्यते। अप्रयत्ना समाधिस्तु'' इति तन्त्रसारे। ''नैरन्तर्यं मनोवृत्तेर्ध्यानमित्युच्यते बुधैः'' इति भाष्ये।

Rarest Archiver

**उन्निद्रहृत्पङ्कजकर्णिकालये योगेश्वरास्थापितपादपल्लवम् ।**
**श्रीलक्षणं [१]कौस्तुभरत्नकन्धरमम्लानलक्ष्म्या वनमालयाश्चितम् ॥**
**२०५ ॥ २ । २ । ११ । (६)**

विकसितहृत्पद्मकर्णिकारूपस्थाने अभ्यस्तयोगैर्भक्तैः संस्थापित-पादपल्लवमित्यनेन प्राक्तनानां केषाश्चिदपि ''दुर्लभमिमं हरिं कथं लभेमही''ति चिन्ता अभ्यस्यमानयोगैः न कर्तव्येति सूचयति ॥ **उन्निद्रेत्यादिना** ॥ श्रीर्लक्षणं यस्य वक्षसि। कौस्तुभाख्यरत्नोपेता कन्धरा गलो यस्य। अम्लानलक्ष्म्या अगतशोभया वनमालया ॥ २०५ ॥

**विभूषितं मेखलयाङ्गुलीयकै[२]र्महाधनैर्नूपुरकङ्कणादिभिः ।**
**स्निग्धामलैः कुश्चितनीलकुन्तलैर्विरोचमानाननहासपेशलम्॥२०६ ॥**
**। २ । २ । १२ । (७)**

मेखलया काञ्च्या। अङ्गुलीयकैरङ्गुलिभूषणैः। नूपुरः पादभूषणम्। कङ्कणं करभूषणम्। स्निग्धाः मनोहराश्च ते अमलाश्च तैः। कुश्चिताः वक्राः। विरोचमाने आनने स्थितेन हासेन मन्दहासेन मनोरमम् ॥ २०६ ॥

**अदीनलीलाहसितेक्षणोल्लसद्भ्रूभङ्गसंसूचितभूर्यनुग्रहम् ।**
**ईक्षेत चिन्तामयमेनमीश्वरं यावन्मनो धारणयाऽवतिष्ठते ॥ २०७ ॥**
**। २ । २ । १३ । (८)**

अदीनलीलया हासपूर्वकेक्षणेन चोल्लसता भ्रूविक्षेपेण सम्यक् सूचितो महाननुग्रहो येन तम्। चिन्तामायं [१]चिन्तनमपेक्ष्यैव फलदायकम्। एनं तावत् धारणया चिन्तयेत्। कः अवधिः इत्यत उक्तं **यावदिति** ॥ मनः यावत् यावता

---

१. कुं पृथिवीं स्तुभ्नाति वेष्टयतीति कुस्तुभः समुद्रः तस्माज्जातं कौस्तुभम्।

२. महान्ति धनानि गृह्णन्तीति महाधनानि तैः इति पदरत्नावल्याम्।

Rarest Archiver

कालेन। अवतिष्ठते अखण्डतया संस्थितं भवेत् तावदिति। यावत्कालं भगवत्यखण्डतया मनः स्थापयितुं न शक्यं तावत्पर्यन्तं धारणा। ततोऽखण्ड-तया मनोऽवधानरूपं ध्यानमेव कार्यम्। ततस्तस्मिन् चिरकालमभ्यस्ते सति समाधिः अयत्नेन मनोऽवधानरूपो भवतीति भावः ॥ २०७ ॥[1]

**एकैकशोऽगानि धिया विभावयेत् पादादि यावद्धसितं गदाभृतः।**
**जितं जितं स्थानमपोह्य धारयेत्परं परं शुद्ध्यति धीर्यथा यथा ॥**
**२०८ ॥ २। २। १४। (९)**

**॥ इति ध्यानप्रकरणम् ॥ १७ ॥**

उक्तप्रकारेण समस्तावयवधारणायामप्यशक्तेन किं कार्यमित्यत आह ॥ **एकैकश इति** ॥ पादमारभ्य [2]मुखपर्यन्तम्। गदाभृतः हरेः। अङ्गानि। एकैकशः एकैकमेव। मनसाऽवक्ररूपतया चिन्तयेत्। जितं धारयितुं शक्यम्। स्थानं अङ्गं। अपोह्य परित्यज्य। परमन्यं धारयेत् खण्डस्मृतिविषयं कुर्यात्। जितं जितं परं परमिति च समस्तधारणायामशक्तिं सूचयति। एकैकश इत्युक्तिरपि न नियमपरा। किन्तु यस्य यावतामङ्गानां धारणायां शक्तिरस्ति तेन तावतामेव धारणा कार्येत्यभिप्राय इत्याशयेनाह। **धीर्मनो यथा यथा शुद्ध्यतीति** ॥ इदमुदितं भवति-समस्तावयवधारणायामशक्तेन पञ्चषाणां वा त्रिचतुराणां वा द्वित्राणां वाङ्गानां धारणा कर्तव्या। तत्राप्यशक्तेन तु एकैकावयवस्य धारणा कार्येति। अनेन स्मरणाख्यो भागवतो धर्मः उक्तो भवतीति स्फुटम् ॥ २०८ ॥

**॥ इति श्रीमदवधूतशिरोमणिश्रीजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटिप्पण्यां ध्यानप्रकरणम् ॥ १७ ॥**

---

१. ''यस्मात्स चिन्तितो विष्णुश्चिन्तितं प्रददात्यजः। तस्माच्चिन्तामयं देवं वदन्ति ज्ञानचक्षुषः ॥'' इति **तात्पर्यो**दाहृतवचनं मनसि निधायार्थमाह। **चिन्तनमिति**।

२. पुष्पितं वनमितिवत् हासेन विकसितं मुखं हसितमिति लक्ष्यते इति विजयध्वजीये।

Rarest Archiver

# बिम्बोपासकगुरुप्राप्तिप्रकरणम् ॥ १८ ॥

**शुद्धिर्नृणां न तु तथेड्य दुराशयानां**
**विद्याश्रुताध्ययनदानतपःक्रियाभिः ।**
**सत्त्वात्मनामृषभ ते यशसि प्रवृद्ध-**
**सच्छ्रद्धया श्रवणसंभृतया यथा स्यात् ॥२०९॥ ११।६।९। (१)**

श्रीमुरलीधराय नमः॥ **श्रीसत्यज्ञानतीर्थगुरुभ्यो नमः॥** तदेवं यथायोग्यसंपत्तिमतः अनुदिनमेव वर्धमानभक्त्यादिगुणविशेषस्य सामान्यतः उक्तप्रकारेण श्रीहरिचरणोपासनां आचरतः एकान्तदेशं उपासीनस्य अधिकारिणः मनोवृत्तयः एवं प्रचरन्ति। **तथाहि—** कीदृशी इयं मे मनःशुद्धिः। यत्पुनः पुनरपि विषयमेव अभिधावति। प्रशस्ता शुद्धिश्च केन भवेत्। किमेतं संसारसन्निधिं परित्यज्य तीर्थयात्राकायक्लेशादिना भवेत्। किं वा अन्येन केनचित्॥ १ ॥ तथा अद्य इदमस्ति, इदं च नास्ति, इदं गतं, इदं मृतं, इत्यादीनि नानाव्यसनानि भवन्ति। एतानि च किं तीर्थयात्रादिना गतानि भवेयुः, किंवा अन्येन केनचिदिति॥ २ ॥ किञ्च उपासनार्थं प्रयतने विघ्ना एव विश्वतः विजयन्ते, तत्परिहारश्च केन भवेत्॥ ३ ॥

तथा उपासनया अपरोक्षं कीदृश्या भवेत्। विना तेन मुक्त्यभावात्। न च अपरोक्षमपि रूपान्तरविषयं तत्साधनम्। ततः बिम्बविषयं ज्ञानं विज्ञानपदबोध्यं संपाद्यम्॥ ४ ॥ तच्च कथं भवेत्॥ ५ ॥ कीदृशी चेयं मम भक्तिः। या [१]भक्तभक्तिसदृशी। या च शास्त्रेषु आत्मात्मीयसमस्तवस्तुभ्यः

---

१. भक्तमन्नं तत्र या भक्तिः। फलप्राप्तिपर्यन्तेति यावत् इति भाति।

Rarest Archiver

अनेकगुणाधिकनिरन्तरप्रेमप्रवाहतया गीयते, सा परमभक्तिः कथं वा स्यात् ॥ ६ ॥ कीदृशः अयं मे विरागः। यः अपेक्षितालाभनिमित्तकुमारविरागसदृशः। यश्च शास्त्रे ''कुणपमिव कलेवरमिदं पश्यन्ती''त्यादिना गीयते। सोऽयं प्रशस्तः विरागः कथं भवेत्। येन च इदं सर्वं साधनजातं उज्जीवितं भवति ॥ ७ ॥ अपि च मे मनः यथा लौकिके अर्थे मम इदं प्रयोजनं, मया इदं साधनीयं, तस्य च अन्येन विघ्ने कृते तत्र अस्माभिः इदं उत्तरं देयं, तेन पुनः प्रकारान्तरे कृते तत्र अस्माभिः इत्थं कार्यं, इत्येवं अनेकविधोत्प्रेक्षाक्षमं, तथा अलौकिके आध्यात्मिके सूक्ष्मे तत्त्वे न भवति। इदं च अत्यावश्यकम्। अध्यात्मप्रवणताया एव उपासनाद्यन्तरङ्गत्वात् तच्च कथं सिद्ध्येत् ॥ ८ ॥ अस्तु एतत्सर्वं तावत्। यः साम्प्रतं उपास्यते सामान्यतः उक्तप्रकरेण मया हरिः। स हि बिम्बरूप एव उपासितः मुक्तिदः इति ह्युक्तम्। तच्च रूपं कीदृक् चकास्ति ॥ ९ ॥ तत् क्वास्ति ॥ १० ॥ तदुपासनमपि किम्प्रकारकम् ॥ ११ ॥ किञ्च तत्प्राप्तये मया साधनीयं साधनम् ॥ १२ ॥ तदेतस्य सर्वस्य प्रकाशक(प्रदर्शक)श्च कः ॥ १३ ॥ तादृशश्च यदि विद्येत, दैवात् लभ्येत च अस्माकं, तदा अस्मत्स्वरूपोद्धारकं निर्निमित्तं उपकारिणं कथं वयं च प्रतिकुर्मः ॥ १४ ॥ [१]इत्येवंविधाः। तत्र सर्वत्र उत्तरं उत्तरैः प्रकरणैः वदिष्यन् सर्वस्यापि एतदेव मूलमिति आदौ बिम्बोपासकगुरुप्राप्तिं वक्तुं इदं आदिमं प्रकरणम्। तत्र आदौ आदिमां शङ्कां परिहरति॥ **शुद्धिरिति** ॥ हे ईड्य, दुराशयानां अनिगृहीतमनसां। नृणां पुंसां। विद्यादिभिः पावनतया प्रसिद्धैरपि। तथा तादृशी। शुद्धिः। न तु नैव। सा का? यथा यादृशी शुद्धिः। सत्त्वात्मनां निगृहीतमनसां पुंसां। ते तव। यशसि विषये। नित्यं प्रवर्धमानया सत्या श्रद्धया। तत्पूर्वकं यच्छ्रवणं यशसः, तेन सम्भृतया अभिव्यक्तविशेषया।

---

१. अस्य मनोवृत्तयः प्रचरन्तीति पूर्वेणान्वयः।

[1]भक्त्या स्यादिति। अनेन अत्यन्तं मनःशुद्धिः श्रद्धापूर्वकश्रवणादिजन्यभक्त्यैव न तु तीर्थयात्रादिनेति श्रवणादिकमेव तदुपाय इति प्रथमशङ्कापरिहारः इति ज्ञेयम् ॥ २०९ ॥

**सङ्कीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसाम्।**
**प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः॥२१०॥**
**।१२।१२।४७। (२)**

द्वितीयामपि निराकरोति॥ **सङ्कीर्त्यमान इति**॥ यैः पुम्भिः। अनन्तः भगवान्। श्रुतः अनुभावो यस्य। यैः सं सम्यक् माहात्म्यकथनपूर्वकं, कीर्त्यमानः प्रतिपाद्यमानश्च भवति। तेषां पुंसां। चित्तं प्रविश्य। तत एव प्रसन्नः सन्। अर्कः तमो यथा यद्वत्। अतिशयितः वातः मेघमिव। अशेषमपि व्यसनम्। विधुनोति परिहरति। बहुभागवतजनानुभवसिद्धमिदमिति हिशब्देनाह। अनेन पूर्वत्रेव अत्रापि तदेव प्रसादद्वारा उपाय इति द्वितीयशङ्कापरिहार इति॥ अनेन लभ्यः शौचाख्यः भागवतधर्मस्तु प्रदर्श्यते तदवसर इति॥ २१० ॥

**अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि शमं तनोति च।**
**सत्वस्य शुद्धिं परमां च भक्तिं ज्ञानं च विज्ञानविरागयुक्तम् ॥२११॥**
**।१२।१२।५४। (३)**

इदानीं [2]शङ्कापञ्चकं पराकरोति॥ **अविस्मृतिरिति**॥ कृष्णपदारविन्दयोः अविस्मृतिः स्मरणम् श्रवणादिसाध्यं [3]द्विविधम्।

---

१. श्रवणसम्भृतयेत्यस्यान्वयप्रदर्शनाय अध्याहरति **भक्त्येति**।

२. तृतीयशङ्कामारभ्य आसप्तमं शङ्कापञ्चकं इति।

३. धारणा ध्यानं चेति।

Rarest Archive

स्मृतिरित्येव वक्तव्ये विस्मृतिः सर्वथा न कर्तव्या, स्मृतिरपि न कादाचित्की नाप्यनादरवती किन्तु सार्वकालीना परमादरपूर्वकैव कर्तव्येति सूचनाय इत्थमुक्तिरिति ज्ञातव्यं (मन्तव्यं)। कृष्णपदारविन्दयोः अविस्मृतिः एकैव सर्वत्र उपाय इति **सामान्यतः** परिहारः। या निरन्तरं क्रियमाणा उपासना सैव ततः अधिकं क्रियमाणा श्रीकृष्णपदारविन्दयोः अविस्मृतिः स्वविघ्नप्रापकाणि पापानि नाशयतीति [१]प्रथमायाः शङ्कायाः परिहारः। सैव आदरनैरन्तर्याभ्यां विशेषिता अविस्मृतिः ज्ञानं अपरोक्षं च तनोतीति द्वितीयायाः। सैव विरागभक्तिविशेषाभ्यां विशेषिता अविस्मृतिः विज्ञानं च तनोतीति तृतीयायाः। सैव विरागज्ञानाभ्यां विशेषाभ्यां विशेषिता अविस्मृतिः परमां भक्तिं तनोतीति **चतुर्थ्याः**। सैव ज्ञानभक्तिभ्यां विशेषाभ्यां विशेषिता प्रावण्यरूपा अविस्मृतिः विरागमपि तनोतीति **पञ्चम्याः** इति ज्ञेयम्॥ २११ ॥

**यथा यथाऽऽत्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः।**
**तथा तथा पश्यति तत्वसूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्तम् ॥ २१२ ॥**
**। ११ । १४ । २६ । (४)**

अष्टमीं निराचष्टे॥ **यथा यथेति**॥ आत्मा मनः। मम पुण्यकथानां पुनः पुनः श्रवणेन पुनः पुनः अभिधानेन च इत्येवं श्रवणैः अभिधानैश्च। तदभिवृद्धया भक्त्येति यावत्। यथा यथा परिमृज्यते शोध्यते। तथातथा शुद्धिविशेषं अनुसृत्य। तत्वसूक्ष्मं सूक्ष्मतत्वं पश्यति जानाति। अञ्जनेन संस्कृतं चक्षुः यथा अतिसूक्ष्ममपि पदार्थं गृह्णाति तथैवेति। किमाश्चर्यं तत्रेति। तत्र श्रवणाद्यभ्यासजन्यभक्तिरेव उपाय इति परिहारो द्रष्टव्यः। अत्र अध्यात्मविषये ज्ञातव्याः विशेषाः द्विविधाः। शिष्यस्य बुद्धचैव प्रतिभाबलेन मनःशुद्धिसचिवेन

१. अनुक्रमतस्तृतीयाया अपि पराक्रियमाणशङ्कापञ्चके प्रथमाया इति। एवमुत्तरत्रापि ध्येयम्।

Rarest Archiver

उत्प्रेक्ष्य ज्ञातुं शक्याः अशक्याश्चेति। तत्र आद्यानामेव अत्र अवगम इति तद्विषयिण्या एव **अष्टम्याः** परिहारः। द्वितीयानां तु गुरूपदेशेनैवेति द्वितीयविषयिण्याः तेनैव परिहार इति विशेषो ज्ञेयः ॥ २१२ ॥

**त्रिभुवनविभवहेतुभिर्विकुण्ठस्मृतिभिरजेशसुरादिभिर्विमृग्यात्।**
**न चलति भगवत्पदारविन्दाल्लवनिमिषार्धमपि स्म वैष्णवाग्र्यः ॥**
**२१३ ॥ ११ । २ । ५३ । (५)**

**विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः।**
**प्रणयरशनया धृताङ्घ्रिपद्मः स भवति भागवतप्रधान उक्तः ॥ २१४ ॥**
**। ११ । २ । ५५ । (६)**

तदेतस्य सर्वस्य प्रदर्शक (प्रकाशक) श्च क इति **त्रयोदशी** शङ्कां परिहर्तुं बिम्बोपासको गुरुरेव प्रदर्शक इति भावेन दैवात् लभ्यमानोऽपि बिम्बोपासकः वैष्णवोत्तमः गुरुः ईदृश इति तल्लक्षणमाह ॥ **त्रिभुवनेति द्वाभ्याम्** ॥ विकुण्ठा अङ्कुठिता स्मृतिः भगवद्विषयिणी येषां तैः। अजश्च ईशश्च सुराश्च। यः न चलति स वैष्णवेषु अग्र्यः। स्मेति प्रसिद्धं एतदिति द्योतयति निमिषार्धमपीत्यादिना किमु ततोऽधिके काले यः भगवत्पदारविन्दात् न चलति स वैष्णवाग्र्य इति वक्तव्यमिति सूचयति ॥ २१३ ॥

यतः अवशेन अभिहितोऽपि अघौघनाशकः, अतः साक्षात् हरिशब्दार्थेषु मुख्यः भगवान्। यस्य हृदयं न विसृजति। स भागवतानां प्रधानः। नास्माभिरेव तथा उच्यते। किन्नाम। प्राचीनैरपि उक्तो भवति। कुतः। न विसृजति इत्यतः भक्तिपाशेन बद्धत्वात् इत्याशयेनोक्तं **प्रणयेति** ॥ २१४ ॥

---

१. तुशब्देन कर्दमजलेन कर्दमप्रक्षालनमिवेति दर्शयतीति **पदरत्नावल्याम्**।

Rarest Archiver

**कृष्णाङ्घ्रिपद्ममधुलिण्ण पुनर्विसृष्ट-**
**मायागुणेषु रमते वृजिनावहेषु ।**
**अन्यस्तु[१] कामहत आत्मरजः प्रमार्ष्टु-**
**मीहेत कर्म यत एव रजः पुनः स्यात् ॥२१५॥ ६।३।३०। (७)**

एवं बिम्बोपासकस्य वैष्णवोत्तमस्य लक्षणं अभिधाय तत्प्रवृत्तिप्रकारमपि दर्शयति॥ **कृष्णाङ्घ्रीति** ॥ जन्मान्तराचीर्णसुबहुसाधनः । ईषत्कर्मवशात् अलब्धपरपारः पूर्वसंस्कारवशात् तमेव मार्गं मार्गमाणः ईषत्सङ्गवशात् किञ्चित् श्रवणादिकं निमित्तीकृत्य लब्धमनोरथः अन्यत् अगणयन् श्रीहरिचरणगत-मनोवृत्तिः तद्गुणविशेषविचिन्तन एव लब्धरुचिः पुनः पुनः अन्तरायविहतोऽपि न स्वमार्गात् प्रचलति । यः ईदृशः स एव बिम्बोपासको भवति । स च अस्मिन् जन्मन्यपि पुनः । कृष्णाङ्घ्रिपद्मयोः यन्मधु तत्रत्यः गुणविशेषः तद्ग्राही भागवतो जनः । एकदा पूर्वजन्मनि । विसृष्टाः परित्यक्ताः ये मायागुणाः प्राकृतविषयाः तेषु । पुनः न रमते अन्यवत् आसक्तो न भवति । तत्र हेतुः । **वृजिनाव-हेष्विति** ॥ पूर्वसंस्कारवशात् पापकार्यदुःखसाधनतया अनुसंहितेष्विति । अस्मात् अन्यो जनस्तु । यतः कर्मणः । रजः पापं । तत्कार्यदुःखं स्यात् । तादृशमेव कर्म । आत्मनः रजः दुखम् । प्रमार्ष्टुं परिहर्तुं । ईहेत इति । तत्र हेतुः ॥ **कामहत इति** ॥ कामेन हतः विगतानुसन्धान इति । केवलं प्राणधारणौपयिकी लौकिकी तेषां प्रवृत्तिरिति भावः ॥ २१५ ॥

**न वै जनो जातु कथञ्चनाव्रजेन्मुकुन्दसेव्यन्यवदङ्ग संसृतिम् ।**
**स्मरन्मुकुन्दांघ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रही जनः ॥ २१६ ॥**
**।१।५।१९। (८)**

Rarest Archiver

एवंविधा प्रवृत्तिः भागवतजनेषु प्रमाणप्रमितेत्याशयेनाह ।। **न वा इति** ।। हे अङ्ग प्रियेति नारदसम्बोधनं। यतः रसग्रही सारग्राही। भागवतो जनः। मुकुन्दपादारविन्दस्मरणसुखं। पुनः पुनः स्मरन्। विहातुं नेच्छेत्। अतः मुकुन्दसेवी जनः। जातु कदाचिदपि कथञ्चन केनापि प्रकारेण। अन्यवत् इतरजनवत्। संसारं नाव्रजेत्। वै प्रमाणप्रमितमेतत् ।। २१६ ।।

**मुक्तोऽपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः ।**
**यथोपयातं प्रतियातनिद्रः किं त्वन्यदेहाय गुणान्न वृंक्ते ।। २१७ ।।**
**। ५ । १ । १६ । (९)**

उभयत्र भागवतजनस्य लौकिकी प्रवृत्तिः अबन्धिका इत्यन्यतो विलक्षणेत्यभिहितं तत्स्फुटीकरोति ॥ **मुक्तोऽपीति** ।। जीवन्मुक्तोऽपि। स्वदेहं तावत् बिभृयादेव। कुतः। यतः त्रिविधस्य कर्मणः मध्ये सञ्चितस्य ज्ञानेनैव विनाशेऽपि प्रारब्धस्य भोगेनैव नाशः अत इति। एतदेवाह ।। **प्रारब्धमश्नन्नेवेति** ।। आगामिनः का गतिः। न तावत् पूर्वस्येव ज्ञानेन नाशः। ज्ञानसद्भावदशायां उत्पद्यमानस्य ज्ञानेन नाशायोगात्। नापि द्वितीयस्येव भोगेन। कदापि मुक्त्यभावप्रसङ्गात्। इत्यतः उभयस्मादपि विशेषोऽस्तीत्याह ।। **किंत्विति ।।** तं विशेषं स्पष्टयति ।। **अन्येति** ।। अन्यदेहाय तत्प्राप्तये। गुणान् विषयान्। न वृंक्ते न अनुभवतीति ॥ **इदमुदितं भवति—** यत् रागद्वेषाभ्यां क्रियते, तदेव हि बन्धकं स्यात्। तौ च न स्त एव। ततः तस्य स्थितस्यापि फलाऽननुभावकत्वरूपो विशेष इति। अत एव हि प्रतियाता निद्रा अज्ञानं तत्कार्यभूतः रागादिः यस्मात् स इत्युक्तं। तदपि कुतः इत्यतः **अभिमानशून्य इति** ।। अभिमानादेव हि रागादिः। तर्हि तदाचरणमपि कीदृशमित्यत उक्तम् ।। **यथोपयातमिति** ।। यथोपयातं यदृच्छया प्राप्तं। अश्नन् अनुभवन्निति। अनेन

Rarest Archiver

रागद्वेषपूर्वकत्वाभावेन न तत्कर्मणः बन्धकत्वमित्युक्तं स्पष्टीकृतं भवति ॥ २१७ ॥

**एवं जनं निपतितं प्रभवाहिकूपे**
**कामाभिकाममनु यः प्रपतन्प्रसङ्गात् ।**
**[1]कृत्वात्मसात्सुरर्षिणा भगवन्गृहीतः**
**सोऽहं कथं नु विसृजे तव भृत्यसेवाम् ॥ २१८ ॥**

**। ७ । ९ । २८ । (१०)**

यथा हरौ भक्तिः सर्वपुरुषार्थप्रदा तथा उक्तलक्षणादिना ज्ञाप्ये परमभागवते दैवाल्लब्धे गुरौ भक्तिरपीति सर्वथा या सम्पाद्येति भावेनाह ॥ **एवमिति** ॥ हे भगवन्, यः अहं। पूर्वोक्तरीत्या। प्रकृष्टे संसाराख्ये अहिसदृशस्त्रीपुत्रादिभिः युक्ते कूपे। निपतितम्। तथापि कामाभिकामं विषयान् इच्छन्तं जनम्। अनु अनुसृत्य। तद्वत् तस्मिन्नेव कूपे। पतमानोऽपि। सुरर्षिणा नारदेन। प्रसङ्गात् मम मातुरर्थे। मां आत्मसात्कृत्वा आत्मीयेषु अयमेक इति बुद्धिं कृत्वा। तत्त्वोपदेशरूपं हस्तावलम्बनं दत्वा गृहीतः, तस्मादेव कूपे न पतितः। यतः अतः। सोऽहं तेन उद्धृतः अहम्। नु इदानीं। तव भृत्यानां भागवतानां सेवाम्। कथं विसृजे इति। निर्निमित्तं भवभयपरिहारकरूपतया तत्सेवाया आवश्यकत्वकथनेन तत्र भक्तिः आवश्यकीति सूचनेन द्वितीये नवके सख्याख्यः भागवतो धर्मः प्रदर्शितो भवति ॥ २१८ ॥

---

१. ''तदधीनवचने'' इति सातिप्रत्ययः। पूर्वं विषयपरायत्तचित्तवृत्तितया तदधीनं मां स्वाधीनं कृत्वेत्यर्थः। यद्वा ''अभिविधौ संपदा, चे''ति सातिप्रत्ययः, अभिविधिश्च किञ्चिदन्यथात्वं पूर्वं भगवत्प्रातिकूल्येन स्थितं मां किञ्चित्तदनुकूलं कृत्वेत्यर्थः इति केचित्।

Rarest Archive

**सोऽहं प्रियस्य सुहृदः परदेवताया**
**लीलाकथास्तव नृसिंह विरिञ्चिगीताः ।**
**अञ्जस्तराम्यनु गृणन्गुणविप्रमुक्तो**
**दुर्गाणि ते पदयुगालयहंससङ्गः ॥ २१९ ॥ ७ । ९ । १८ ।(११)**

श्रीहरिभक्तेरिव गुरुभक्तेरपि पुरुषार्थसाधनत्वात् अवश्यं सा सम्पादनीयेत्यभिहितम् । सा किं गुरुभक्तिः साक्षात्पुरुषार्थसाधनं, किं वा किञ्चिद्द्वारीकृत्येत्यतः श्रीहरिभक्तिद्वारेणैवेत्याह ॥ **सोऽहमिति** ॥ हे नृसिंह । तव पादयोः युगमेव आश्रयो येषां ते हंसाः भागवतधर्मानुष्ठानेन शुद्धान्तःकरणाः तेषु भागवतेषु सङ्गः सम्यक् आदरपूर्वकं गच्छति मनसेति सङ्गः । भक्तिमानिति यावत् । तादृशो भूत्वा । तव । लीलाः चरित्राणि तत्प्रतिपादिकाः कथाः । गृणन् कीर्तयन् । तेन च भक्तिविशेषवान् भूत्वा । गुणविप्रमुक्तः विषयसङ्गवर्जितः । सर्वाण्यपि [1]दुर्गाणि अञ्जसैव तरामीति । अनेन गुरुभक्तिः हरिभक्तिमेव जनयति । साच सर्वपुरुषार्थप्रदेति सूचितं भवति ॥ २१९ ॥

**कस्त्वं त्वनादृत्य परानुचिन्तामृते पशुत्वमसतीं नाम युञ्ज्यात् ।**
**पश्यन् जनं निपतितं भववैतरिण्यां स्वकर्मजान् परितापान्जुषाणम् ॥**
**२२० ॥ २ । २ । ८ । (१२)**

तदेवं भागवतोत्तमेषु भक्तिः आवश्यकी । साच हरिभक्तिद्वारा सर्वपुरुषार्थप्रदेत्यभिहितं । तत्कथमित्यतः मिथ्याज्ञानस्य पुरुषार्थप्रतिबन्धकस्य नाशनं तावत् तदुपदेशेनैव भवति । ततः तन्निवृत्तये तत्र भक्तिः आवश्यकी ।

१. दुर्गाणि कलत्रादीनि नरकाणि वा इति **पदरत्नावल्याम्** ।

Rarest Archiver

तदर्थं सन्ततं तत्सेवनं आवश्यकमिति वदिष्यन् मिथ्याज्ञानत्यजने आदरजननाय मिथ्याज्ञानिनः तावत् निन्दति ॥ **कस्तमिति** ॥ तत्तत्क्रियाकारकतया तेषु तेषु पदार्थेषु स्थितं तत्तन्नामकं सर्वपुरुषार्थप्रदं तत एव सर्वेषां अनिमित्तबन्धुमपि हरिं ईदृशतया कदाप्यननुसन्धाय, अनीदृशानां ईदृशतया अनुसन्धानं पशुत्वं विना कः मनुष्यः नाम कुर्यात् । तथा कुर्वाणः पशुरेवेति । कुतः स पशुः इत्यतः यथाहि पशुः कूपादिके पतितं तत्र दुःखानि अनुभवन्तं अन्यं पशुं दृष्ट्वा कूपादिकं अनर्थसाधनमिति जानन्नपि तत्र पुनः स्वयं निपतति। तथा हरिं अनादृत्य, परानुचिन्तां परस्य नारकं दुःखं भवतीति जानन्नपि । पुनः स्वयं परित्यज्य स्थित इति तत्सदृशत्वादित्याशयेनाह ॥ **पश्यन्निति ॥ यथाहुः**— "चतुर्वेद्यपि यो विप्रो वासुदेवं न विन्दति। वेदवादभराक्रान्तः स वै ब्राह्मणगर्दभ" इति ॥ २२० ॥

**यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः ।**
**यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव [1]गोखरः ॥**
**२२१ ॥ १० । ७२ । १३ । (१३)**

### ॥ इति बिम्बोपासकगुरुप्राप्तिप्रकरणम् ॥ १८ ॥

नन्वस्तु मिथ्याज्ञानं पुरुषार्थप्रतिबन्धकमिति पुरुषार्थार्थिना तत्परित्याज्यमिति। तन्निवृत्तये प्रयतितव्यमिति च। तथापि तन्निवृत्तिः सदुपदेशेनैवेति कुतः । भागीरथ्यादीनां क्षेत्रमूर्तीनां वा सेवया तन्निवृत्त्युपपत्तेरिति चेत् । सत्यं । अन्यतोऽपि तन्निवृत्तिरिति । तथापि सदुपदेशः आवश्यकः । यतः

१. गवां सम्बन्धी खरः तदर्थकतृणादिवाहकः रासभः । यद्वा गवि पृथिव्यां खरः नापर इत्यर्थः । सिन्धुदेशे गोखराख्यः पशुरप्यस्ति । "अज्ञातभगवद्धर्मा मन्त्रविज्ञानसंविदः । नरास्ते गोखरा ज्ञेया अपि भूपालवन्दिताः ॥" इति **बृहस्पतिसंहितायाम्** ।

Rarest Archiver

तत्सेवया मिथ्याज्ञाननिवृत्तिः भवन्ती अपि द्वारान्तरं अपेक्षते। न हि तीर्थस्नानादिकं वा प्रतीकदर्शनादिकं वा साक्षान्मिथ्याज्ञाननिवर्तकम्। द्वारं च सम्यग्ज्ञानमेव। शुक्तिरजतादिज्ञाने तथा दर्शनात्। तच्च सदुपदेशं विना न भवति। उपदेशश्च प्रसादपूर्वक एव फलप्रदः। प्रसादश्च न तत्र भक्तिं विना जायते। भक्तिश्च न तत्सेवां विना इत्यतः तत्परित्यागेन तदनुसारेण केवलं कालविलम्बेन श्रम एव अधिको लाभ इति सदुपदेश एव अनुसरणीयः प्रेक्षावता इति **यथाहुः**— ''न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः। ते पुनन्त्युरुकालेन दर्शनादेव साधवः'' (१०।७२।११) इति॥ किं तन्मिथ्याज्ञानं यन्निवृत्तये सदुपदेशः आवश्यकः तदर्थं तद्भक्त्यादिकं च। इत्यतः एतदेव मिथ्याज्ञानमिति भावेन लेशतः तद्दर्शयति। **यस्येति**॥ वातादयः त्रयो धातवः यस्मिन्। कुणपे देहे। यस्य आत्मेति अहमिति बुद्धिः। कलत्रादिषु। स्वधीः स्वे स्वकीया इति मम एते इति बुद्धिः। भौमे शिलादौ प्रतिमादौ। इज्यः पूज्य इति धीः। सलिले। तीर्थं पावनमिति बुद्धिः। अनेन परानुचिन्तामित्येतत् विशदीकृतं भवति। अभिज्ञेषु भगवत्तत्वं जानत्सु। जनेषु। कर्हिचित् कदापि। इज्यधीः तीर्थबुद्धिश्च नास्ति। स एव गोखरः आरण्यको मृगविशेषः। नृषु श्वभक्षकः श्वपचापरपर्यायः चण्डालः नीचत्वे परमावधिरिव पशुषु च अस्थिभक्षकः गोखरापरपर्यायः गर्दभः नीचत्वे चरमावधिः। अनेन पूर्वोक्तं पशुत्वं विवृतं भवति। अत एव श्वचण्डालः गोखर इति द्विपदेषु नीचत्वे श्वचण्डालः चरमावधितया, चतुष्पादेषु नीचत्वे गोखरः चरमावधितया च उक्त इति। ''श्वविड्वराहोष्ट्रखरैः स तुल्यः पुरुषः पशु'' रित्यादाविव खरइत्येव प्रयोगं विहाय, गोखर इति विशेषप्रयोगोऽपि इममेवार्थं सूचयति॥ **इदमुक्तं भवति**— देहे अहमिति। देहसम्बन्धिषु ममेति। प्रतिमादौ देवतेयमिति। यद्द्रवतीति प्रत्यक्षतः दृश्यते तदेव तीर्थं पावनमिति। स्वोत्तमे स्वतः नीचोऽयमिति। स्वतः

Rarest Archive

नीचेऽपि उत्तमोऽयमिति । असमे सम इति । समे च असम इति । एवमनादिकं मिथ्याज्ञानं पुरुषार्थप्रतिबन्धकं सदुपदेशेनैव निवर्तनीयं सम्यग्ज्ञानजननद्वारा । तच्च प्रागेव सूचितं । ततः भक्तिपूर्वकं तत्सेवया सति प्रसादे मिथ्याज्ञाननिवृत्तौ परमपुरुषार्थलाभश्च भवतीति सत्सु भक्तिः आवश्यकीति ॥ २२१ ॥

**॥ इति श्रीमदवधूतशिरोमणिश्रीजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां बिम्बोपासकगुरुप्राप्तिप्रकरणम् ॥ १८ ॥**

Rarest Archiver

## अध्यात्मप्रकरणम् ॥ १९ ॥

**भवाय नस्त्वं भव विश्वभावन त्वमेव मातात्मसुहृत्पतिः पिता।**
**त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम ॥२२२॥**
**।१।१०।४४।(१)**

श्रीकृष्णो विजयते ॥ एवं दैवाल्लब्धो बिम्बोपासको गुरुः बिम्बोपदेशं करिष्यन् तस्य अन्तरङ्गमध्यात्मप्रावण्यमिति तत्प्राप्तये अध्यात्ममुपदिशति। विशेषं जिज्ञासवे शिष्याय। तदर्थमिदं प्रकरणम्। पूर्वप्रकरणे गुरुभक्तिः हरिभक्तिं जनयतीत्युक्तम्। तस्यां च हरिभक्तौ साधनविशेषकथनेन विशेषं तत्रादावाह ॥ **भवायेति** ॥ हे विश्वभावन जगदुद्भवादिप्रद। त्वं नः भवाय भक्त्यादिरूप-मङ्गलार्थं भव। यस्य तव। अनुवृत्त्या सेवया भक्त्यादिपूर्वकया। वयं कृतिनः प्राप्तपुरुषार्थाः। बभूविम। सः त्वम्। नः अस्माकं सर्वेषाम्। परमं दैवतं [१]त्रिविधापि देवता। न केवलं दैवम्। सद्गुरुश्च। सन् कृपालुत्वादिगुण-विशिष्टो गुरुश्च। त्वमेव पिता माता। आत्मना स्वयमेव निर्निमित्तं सुहृत्। पतिः स्वामी चेति। अनेन पितृत्वाद्यनेकविधसम्बन्धादिकमवश्यमनुसन्धेयमिति सूचितं भवति। असाधारण्येन पितृत्वादिस्मृतौ तदुपासने वा नियमः नान्यत्रेति मन्तव्यम् ॥ २२२ ॥

**न ब्रह्मणः स्वपरभेदमतिस्तव**
**स्यात्सर्वात्मनः समदृशः [२]स्वसुखानुभूतेः।**

---

१. त्रिविधा हि देवता वन्द्या भवति विशिष्टेष्टाधिकृता चेति **श्रीमत्सुधायाम्**।

२. स्वरूपसुखस्य अनूभूतिः अनुभवः पूर्णानन्दोऽहमिति यस्य स तथा तस्य। अयमपि स्वपरबुध्यभावे हेतुरिति **विजयध्वजतीर्थश्रीचरणाः**।

Rarest Archiver

**संसेवया सुरतरोरिव ते प्रसादः**
**सेवानुरूप उदयो न विपर्ययोऽत्र ॥२२३॥ १० । ८० । ६ ।(२)**

विषमदृष्टौ पुरुषे भक्तिः न भवत्येव। भवन्त्यपि मन्दैवेति अविषमत्वानुसन्धानं भक्तौसाधनमिति भगवतोऽविषमत्वमाह। **न ब्रह्मण इति** ॥ ब्रह्मणः पूर्णस्य तवायं स्वः स्वीयः स तु परः परकीयः इति भेदबुद्धिर्न स्यात्। कुतः। समदृशः सर्वभूतान्येकप्रकारतया पश्यतीति। तर्हि केषाञ्चित्फलं भवति परेषां नेतीदं वैषम्यं किंमूलमित्यत आह॥ **सुरतरोरिति** ॥ सुरतरोः प्रसादः यथा संसेवयैव भवति। तथा ते प्रसादोऽपि सेवानुरूपः सेवाजन्य एव। उदयः फलं तु [१]प्रसादजन्यमिति प्रसिद्धमेव। यत एवमतो यत्र यस्मिन्पुरुषे विपर्ययः सेवाभावः अत्र अस्मिन्पुरुषे। विपर्ययः प्रसादाभावः यत्र प्रसादाभावः अत्र अस्मिन्विपर्ययः फलस्याप्यभाव इति। अत्र फले विपर्ययो व्यत्यासः न नास्त्येवेति ॥ २२३ ॥

**एवं सुरासुरगणाः समदेशकालहेत्वर्थयोगगतयोऽपि फले विकल्पाः।**
**तत्रामृतं सुरगणाः फलमञ्जसापुर्यत्पादपङ्कजरजःश्रयणान्न दैत्याः**
**॥ २२४ ॥ ८ । ८ । ७३ । (३)**

ननु भगवत्सेवया प्रसादद्वारा फलं भवति सेवाभावे च प्रसादाभावेन फलं न भवतीति सेवाभावाभावाभ्यामेव फलभावाभावाविति न भगवतो वैषम्यमित्यभिहितम्। कुत्रैतद्दृष्टमित्यतो दर्शयति। **एवमिति** ॥ यद्यप्येवं पूर्वोक्तरीत्या विचारणे कृते। सुराणामसुराणां च ये गणास्ते उभयेऽपि। समाः समानाः। [२]देशकालौ प्रसिद्धौ। हेतुः मन्दरादिसाधनम्। अर्थः प्रयोजनम्।

---

१. प्रसादादिति पञ्चम्यन्तपदस्यानुषङ्गमभिप्रेत्य व्याचष्टे **प्रसादेति**।

२. देशः क्षीरोदधितीरम्। कालः मथनसमयः।

Rarest Archives

अमृतलाभलक्षणम् उद्देश्यम्। योगाः परस्परवैरानाविष्करणेनावस्थानादयः। गतयः आकर्षणादयः शारीरव्यापाराश्च येषां ते तथा। तथापि फले विषये। विकल्पाः वि विरुद्धौ भिन्नौ कल्पौ प्रकारौ येषां ते तादृशा अभवन्। ननु यथा देवा ऐरावतं वारणं अगृह्णंस्तथा दैत्या अपि वारुणीं जगृहुरेव। ततः कथं फले विकल्पा इत्यत उक्तम् ॥ **वीति** ॥ विशिष्टे उद्देश्ये[1] तौ कौ विरुद्धौ कल्पावित्यत आह ॥ **तत्रेति** ॥ समदेशत्वादौ सत्यपि सुरगणा अमृतं फलमापुः। दैत्यास्तु नापुरिति। अनेन फलभावाभावलक्षणौ विरुद्धौ कल्पावित्युक्तं भवति। तत्र हेतुः **यत्पादपङ्कजरजःश्रयणादिति।** द्वेषिणां दैत्यानां तु तदभावः सुप्रसिद्ध इति कण्ठतो नोक्तिः। अनेन सेवाभावाभावाभ्यामेव तौ देवदैत्ययोर्दृष्टाविति सूचितं भवति ॥ २२४ ॥

**नैषा परावरमतिर्भवतो ननु स्याज्जन्तोर्यथात्मसुहृदो जगतस्तथापि।**
**संसेवया सुरतरोरिव ते प्रसादः सेवानुरूप उदयो न परावरत्वम् ॥**
**२२५ ॥ ७ । ९ । २७ । (४)**

तथापि ब्रह्मणः प्रकारान्तरेण विषमता। **तथाहि—** यत्रोभाभ्यामपि सेवा कृता तथापि फलमेकस्याल्पम्। अन्यस्य महत्तत्र कथम्। न च पूर्वत्रेवात्र समाधानम्। पूर्वं हि सेवाभावाभावाभ्यां फलभावाभावाविति वैषम्यं परिहृतम्। न चात्र तथास्ति। उभयत्रोभयोरपि सद्भावात्। परन्तु फलेऽल्पत्वमहत्त्वलक्षणं वैषम्यमात्रमस्ति। तच्च ब्रह्मणः अयं परः असाववर इति मतिं विना नोपपद्यत इति तत्राह ॥ **नैषेति** ॥ यद्यपि जगत एवात्मना स्वत एव निर्निमित्तं सुहृदः भवतः तव। जन्तोर्यथा मनुष्यमात्रस्येव। अयं परः असाववर इत्येवंरूपा मतिः

---

१. अमृतलाभलक्षणे कल्पौ भिन्नप्रकारौ येषां ते तथा।

Rarest Archiver

वैषम्यं नास्ति । [1]तथापि । उदयः फलं तावत्तारतम्येन भवत् । ते प्रसादानुरूपः । प्रसादश्च सेवानुरूपः । सुरतरोः प्रसाद इव । [2]न तु परावरत्वमपेक्ष्येति ॥ **इदमुदितं भवति—** दैवादागतस्य कल्पतरोः सेवा बहुभिः कृता । सेवया च फलं प्राप्तं तदपि तारतम्येनैव । एकस्य राजत्वं अन्यस्य अमात्यत्वमित्यादि । तत्र द्रष्टव्यं तत्तारतम्यं किन्निमित्तमिति । प्रसादतारतम्याधीनमिति चेत् । हन्त तर्हि मनसापि स्मर्तुमयोग्यः सुरतरौ निहितो दोषः । सेवानुरूपो हि प्रसाद इति कथं सुरतरौ दोष इति चेत् । समः समाधिरिति ॥ २२५ ॥

**नाहं तु सख्यो भजतोऽपि जन्तून् भजाम्यमीषामनुवृत्तयो यथा ।**
**तथैव मत्तः फलसम्पदः स्युरुच्चावचाः कल्पतरोरिवार्थिनाम् ॥२२६॥**

**। १० । ३० । २० । (५)**

बुद्ध्यारोहाय उक्तमर्थं विशदयति । **नाहमिति** ॥ गोपिकाः प्रति श्रीकृष्णवचनमेतत् । हे सख्यः । अहं यथा माऽभजतः भजतश्च तु विशेषाभ्यां स्वपरत्वाभ्यां न भजामि न पश्यामि । तथा मां भजतोऽपि जन्तून् । तु परावरत्वाभ्यां विशेषाभ्याम् । न भजामि । तुरनेकार्थः । तर्हि फले विशेषः कथमिति भावेन शङ्किते किंत्वित्युत्तरमाह ॥ **अमीषामिति** ॥ भजतामनुवृत्तयो यथा यादृश्यः । फलसम्पत्तयोऽपि तथा तादृश्य एव । मत्तः मम सकाशात् । स्युरिति । यथातथेत्युक्तं सादृश्यं केन धर्मेणेत्यत आह ॥ **उच्चावचा इति** ॥ नीचोच्चत्वाभ्यां धर्माभ्यां सादृश्यं उच्चाभिः सेवाभिरुच्चाः फलसम्पत्तयः नीचाभिर्नीचा इति । तत्र दृष्टान्तः अर्थिनां कल्पतरोः सकाशादुच्चावचाः फलसम्पद इवेति । अभिप्रायः पूर्ववत् ॥ २२६ ॥

---

१. सर्वथा वैषम्यरहितस्यापि ते तव संसेवया ।

२. सर्वेषु एकरूपप्रसादाभावे परावरत्वरूपवैषम्यं न कारणमित्यर्थः ।

Rarest Archiver

**त्वयैव दत्तं पदमैन्द्रमूर्जितं हृतं त्वयैवाद्य तदेव शोभनम्।**
**मन्ये महानस्य कृतोऽप्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात्॥**
**२२७॥ ८। २१। १६। (६)**

अविषमत्वानुसन्धानवत्कृपालुत्वानुसन्धानमपि भक्तिविशेषसाधनमिति श्रीहरौ तदप्यनुसन्धेयम्। **इयान्विशेषः—** हरिर्यत्प्रथमत एव दयालुतां न प्रदर्शयति। किन्तु बहुतरं परीक्ष्य तत्र स्थैर्ये सतीति। इदं च बलिविषये दृष्टमित्यनुशयेन परीक्षार्थं भगवता बलौ हृतराज्ये सति प्रह्लादः अभ्युपेत्य गतराज्यं पाशबद्धं बलिं दृष्ट्वा भगवन्तं प्रत्युवाच। तदाह॥ **त्वयैवेति**॥ ऊर्जितं उत्कृष्टं ऐन्द्रं पदम्। त्वयैव दत्तं पूर्वम्। इदानीं त्वयैव हृतम्। तदानीं दानमेव इदानीं हरणमेव शोभनमहं मन्ये। त्वदिच्छया यद्भवति तदेव शोभनमिति मन्तव्यं भागवतैरिति भावः। न केवलं सुखकरं किन्तु महानुग्रहसाधनं चेति भावेनाह॥ **महानिति**॥ यदा श्रियः सम्पदः सकाशात् विभ्रंशितः चालितः। तदा आत्ममोहादेव विभ्रंशित इति मन्ये। तस्या एव तत्र हेतुत्वादिति भावः। यस्मादेवं तस्मादस्य बलेर्विषये। महाननुग्रहोऽपि कृत इति च मन्ये इति। **यथाहुः—** "[१]ब्रह्मन्यमनुगृह्णामि तद्वित्तं विधुनोम्यहं। यन्मदः पुरुषः स्तब्धो [२]लोकं [३]मां चावमन्यते॥ (८।२१।२४) [४]यदा कदाचिज्जीवात्मा संसरन्निजकर्मभिः। नानायोनिष्वनीशोऽयं पौरुषीं गतिमाव्रजेत्॥ (८।२१।२५।) जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः। यद्यस्य न [५]भवेत्स्तम्भस्तत्रायं मदनुग्रहः॥ (८।२१।२६।) [६]मानस्तम्भनिमित्तानां

---

१. ब्रह्माणं प्रति भगवद्वचनमेतत्।
२. मदन्तरात्मकं जगत्।
३. तदन्तर्वर्तिनं मां च।
४. यादृच्छिकसुकृतविशेषात्।
५. मदर्चनादौ तन्द्रीलक्षणा।
६. मानः गर्वः स्तम्भः अनम्रता अविवेको वा तयोः निमित्तभूतानाम्।

Rarest Archiver

[1]जन्मादीनां समन्ततः। सर्वश्रेयःप्रतीपानां यो [2]"न मुह्येत्स मत्पर" इति ॥ (८।२१।२७) ॥ २२७ ॥

**यत्पादयोरवशधीः[3] सलिलं प्रदाय**
**दूर्वाङ्कुरैरपि विधाय सतीं सपर्याम्।**
**अत्युत्तमां गतिमसौ भजते त्रिलोकीं**
**दत्वा न विक्लवमनाः कथमार्तिमृच्छेत् ॥ २२८ ॥**
**।८।२१।२३।(७)**

एवं बलिं पाशबद्धं दृष्ट्वा सकरुणेन प्रह्लादेन स्तुतो भगवानित्युक्तम्। इदानीं तादृशेन ब्रह्मणा स्तूयते इति भावेनाह ॥ **यत्पादयोरिति** ॥ लोके जनः अन्यः कश्चन। यस्य तव पादयोः अवशधीरेव न बुद्धिपूर्वकम्। उदकमेकमेव प्रदाय। तथापरः। कश्चन। दूर्वाङ्कुरैरपि। सतीं सपर्यां विधायापि। उत्तमां गतिम्। भजते प्राप्नोति। तादृशाय तुभ्यं असौ बलिः त्रिलोकीमपि। अविक्लवमना एव। दत्वा आर्तिं पाशबन्धादिना अपमानरूपां। कथं ऋच्छेत्। तद्योग्यो न भवति अतस्त्वयानुगृहीतव्य इति। **इयांस्तु विशेषः—** यत्प्रह्लादो गूढाभिसन्धिरेव स्तुतवान् अयं तु "कथमार्तिमृच्छे"दिति स्पष्टमेवोक्तवानिति ॥ २२८ ॥

**बिभेमि नाहं निरयात्पदच्युतो न पाशबन्धाद्व्यसनाद्दुरत्ययात्।**
**न चार्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद्भृशमुद्विजे यथा॥२२९॥**
**।८।२१।३।(८)**

---

१. पञ्चम्यर्थे षष्ठीति **विजयध्वजीये**।

२. हन्त मुह्येन्न मत्पर इति **विजयध्वजीयपाठः**। अहं परः प्रधानीभूतो यस्य स तथाभूतो जनः न मुह्येत् तेषु मोहं न प्राप्नुयादित्यर्थः।

३. रशठधीरित्यपि पाठान्तरम्।

Rarest Archiver

एवमन्यैरेव तदपमानमसहमानैः भगवान् तन्मोचनाय स्तुतः। स तु नैव तदर्थमेवं स्तुतवान्। नापि मनसापि ग्लानिमवाप्तवान् अहो भागवती परीक्षा अहो भागवतानां दाढ्र्यं अहो कृपालुता भागवती। पूर्वतोऽप्यधिकमैश्वर्यं दत्त्वापि असमाहितमनाः यत्स्वात्मानमेव गदापाणिं द्वारपतया कृतवानितिभावेन बलिवचनमेव दर्शयति। **बिभेमीति**॥ पदच्युत इत्यनेन पदभ्रंशादपीति सूचयति। त्वया [१]कारितात्पाशबन्धात्। अर्थकृच्छ्रात् अर्थः कोशः गत इति दुःखात्। किम्बहुना भवतः सकाशाज्जातात् जनिष्यमाणाच्च विनिग्रहात् न बिभेमि मनोग्लानिमान् न भवामि। तर्हि कुतस्तव भयमित्यतः अभिप्रेतं दर्शयति॥ **असाधुवादादिति**॥ अनृतभाषणादेव अहं यथा उद्विजे न तथा अन्यस्मादिति। तव पदत्रयं दास्ये इत्युक्त्वा न दत्तवानिति। एतस्मादेव मम मनोग्लानिरिति भावः॥ **यथाहुः**— ''[२]क्षीणो विभ्रंशितः स्थानात्क्षिप्तो बद्धश्च शत्रुभिः। ज्ञातिभिश्च परित्यक्तो [३]यातनामनुयापितः॥ (८।२१।२९) गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः। [४]छलैरुक्तो मया धर्मो नायं त्यजति सत्यवाक्। (८।२१।३०) एष मे प्रापितः स्थानं दुष्प्रापममरैरपि। सावर्णेरन्तरस्यायं भवितेन्द्रो [५]महायशाः॥ (८।२१।३१) तावत्सुतलमध्यास्तां विश्वकर्मविनिर्मितम्॥ (८।२१।३२) इन्द्रसेन महाराज याहि भो भद्रमस्तु ते॥ (८।२१।३३) सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः। न

---

१. गरुडेन। **यथोक्तं**— ''अथ ताक्ष्र्यसुतो ज्ञात्वा विराड्विभुचिकीर्षितम्। बबन्ध वारुणैः पाशैर्बलिं सौत्येऽहनि क्रतोरि''ति॥ ८।२०।२७।

२. सत्यत्यागनिमित्तक्षीणत्वं प्राप्तः।

३. तीव्रवेदनां। ''यातना तीव्रवेदने''त्यमरः।

४. ''न ह्येतस्मिन्कुले कश्चिन्निस्सत्वः कृपणः पुमान्'' इत्यादिना मया छलैरेव धर्मः उक्तः। तथापि सत्यवाक् अयं तं धर्ममिति शेषः न त्यजति।

५. मदाश्रय इति **विजयध्वजी**यपाठः।

Rarest Archiver

त्वामभिभविष्यन्ति लोकेशाः किमुतापरे ॥ (८।२१।३४) त्वच्छासनातिगान्दैत्यांश्चक्रं मे सूदयिष्यति। रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छदम्। (८।२१।३५) सदा सन्निहितं वीर तत्र मां द्रक्ष्यते भवान्। तत्र दानवदैत्यानां सङ्गात्ते भाव आसुरः॥ (८।२१।३६) दृष्ट्वा मदनुभावं वै [१]सद्यःकुण्ठो विनंक्ष्यति ॥ (८।२१।३७) ॥ २२९ ॥

**भ्रातुर्विरूपकरणं युधि निर्जितस्य**
**प्रोद्वाहपर्वणि च तद्वधमक्षगोष्ठ्याम्।**
**दुःखं तदुत्थमसहोऽस्मदयोगभीत्या**
**नैवाब्रवीः किमपि तेन वयं जितास्ते ॥ २३० ॥**

**। १० । ७५ । ६० ।(९)**

यदा खलु भगवता भगवत्या अपि परीक्षां कृत्वैव अतुलितः अनुग्रहः कृतः। का कथा तदा भागवतानां परीक्षयैव अनुग्रहः क्रियत इत्याशयेन रुक्मिणीं प्रति निगदितं श्रीकृष्णवचनं दर्शयति ॥ **भ्रातुरिति** ॥ विरूपकरणं वैरूप्यकरणं श्मश्रुप्रभृतीनां वपनेन। इदमेवान्याय्यं। एतत्तु स्खलितस्य कशया ताडनमिव परमान्याय्यमिति भावेन भ्रातरं विशेषयामास ॥ **युधि निर्जितस्येति** ॥ न केवलं मानहानिमेव किन्तु प्राणहानिमपीत्याह ॥ **तद्वधमिति** ॥ तस्य भ्रातुः वधं चेत्यर्थः। बन्धोर्वधोऽपि न निन्दितः क्षत्रियाणां मृधे। इदं तु न तथेति अतिनिन्दित एव तद्वध इत्याशयेनोक्तं **अक्षगोष्ठ्यामिति** ॥ द्यूतक्रीडायामिति। इदं तु निन्दिततममित्यभिप्रेत्योक्तं **प्रोद्वाहपर्वणीति** ॥ [२]अनिरुद्धविवाह-

---

१. सद्यःकुण्ठ इत्येक पदम्। सद्यः कुण्ठः छेदो यस्य स तथा। विनंक्ष्यति निर्मूलो भविष्यतीत्यर्थः इति **पदरत्नावल्याम्**। मदनुभावात् भवान् आसुरं भावं त्यक्ष्यतीति भावः।

२. इयं कथा दशमस्कन्धे ७६ तमाध्याये द्रष्टव्या।

Rarest Archive

लक्षणोत्सवसमये। विरूपकरणं वधं चासह इत्यस्य फलितार्थमाह ॥ **तदुत्थमिति** ॥ ताभ्यां भ्रातुः कृताभ्यां[1] उत्थं उद्भूतं यद्दुःखं तदसह इति। किंनिमित्तं सहनमिति तत्राह ॥ **अस्मदिति** ॥ अस्माकं अयोगः मनोविक्षेपः भवेदिति भीत्यैव। किंबहुना कथितेन। किमपि अयुक्तमिदमित्येवंरूपं वाच्यमपि। नैवाऽब्रवीरिति। अन्या स्त्री चेत् स्वहृदयताडनादिकं कायिकं, दुष्टभाषणादिकं वाचनिकं च अस्मदयोगहेतुं कुर्यादेव। येन त्वमस्माभिरपकृतापि मनोविक्लवमप्राप्ता तेन वयम्। ते त्वया। जिताः तव भक्तिदार्ढ्यानुसारेण असदृशानुग्रहकर्तारो भवाम इति ॥ २३० ॥

**अहो बकीयं स्तनकालकूटं जिघांसयाऽपाययदप्यसाध्वी।**
**लेभे गतिं [2]धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम ॥२३१॥**
**।३।२।२३। (१०)**

किं वर्णयामः वयं भगवतः दयालुतायाः काष्ठां सेवाकारिषु साधुषु। यतः अहितकारिण्यां असाध्व्यामपि पूतनिकायाम्। भगवत्पदीव निम्ननिन्दितभूमिषु प्रवाहमुवाहेत्याशयेनाह। **अहो बकीति।** [3]बकी मांसादिदुष्टभक्षणशीला। अत एवासाध्वी। इयं पूतना। जिघांसया हन्तुमिच्छयैव। स्तनयोः सम्भृतं कालकूटं विषं अपाययत् पाययामास। तथापि धात्र्याः पोषणादिकर्त्र्याः यशोदायाः। उचितां गतिं लोकम्। लेभे प्राप। तस्मात्कारणात्। ततः

---

१. विरूपकरणवधाभ्यां।

२. पूतनादेहेऽधिष्ठितं जीवद्वयं, ताटकोर्वशीचेति, तत्र न ताटकां प्रति कृपालुत्वं किन्तूर्वशीं प्रत्येव, आद्याया दुर्गतियोग्यत्वस्य, द्वितीयायाः शुभगतियोग्यत्वस्य च प्रमितत्वात्। **यथोक्तं तात्पर्ये—** ''कंसपूतनिकाद्याश्च बान्धवादियुता यतः। जीवद्वयसमायोगाद् गतिद्वयजिगीषवः'' इत्यादि।

३. बक् भक्षण इति धातोरयमर्थ उक्तः। बालग्रहत्वात् बालभक्षणशीलाऽपि।

Rarest Archive

स्वानिष्टकारिण्यामपीष्टकारिणः कृष्णात् अन्यः को वा विद्यते दयालुः। तेन ततः अस्मादन्यम्। कं वा दयालुम्। शरण्। वयं व्रजेम गच्छाम इति। ईदृशो दयालुर्नास्त्येवेति भावः ॥ २३१ ॥

**कः पण्डितस्त्वदपरं शरणं समीया-**
**द्भक्तप्रिया[१]दृतगिरः सुहृदः कृतज्ञात्।**
**सर्वान् ददाति सुहृदो भजतोऽपि कामा-**
**नात्मानमप्युपचयापचयौ न यस्य ॥२३२॥ १०। ४७। २७(११)**

तदेवं पितृत्वादेरविषमत्वात्कृपालुत्वाच्च श्रीहरौ विशेषतो भक्तिः कार्येत्याशयेन तत्रादरजननाय भगवतः अन्यत्र भक्तिं कुर्वतो गङ्गावालुके कूपं कुर्वत इव मूर्खतां दर्शयति ॥ **कः पण्डित इति** ॥ यः भजतः। सुहृदः प्रियस्य भक्तस्य। आत्मानमपि ददाति यदा। तदा सर्वान्कामान् ददातीति किमु। एवं सर्वान् प्रति दानेऽपि उपचयापचयौ यस्य न स्तः। तस्मात्तादृशात्। त्वत् त्वत्तः। अपरमन्यं पुरुषम्। कः पण्डितः बन्धमोक्षवित्। शरणं प्राप्नुयात् भक्तिपूर्वकं भजेत्। भजनीये भवन्ति पुरुषे त्रयो धर्मा अपेक्षिताः। पितृत्वादिकं अविषमत्वं कृपालुत्वं चेति। तत्त्रयमप्यस्मिन्नेवास्तीत्याह॥ **सुहृद इत्यादिना**[२] ॥ सुहृदः। कृतज्ञात्। भक्तोच्चरिताः प्रियाः आदृताः गिरो येन तस्मादिति। सुहृत्त्वं पितृत्वादेरुपलक्षणमिति भावेन **सुहृद इति**। कृतसेवानुसन्धानवान्हि सेवानुरूपफलदातृतया अविषमो भवेदिति। **कृतज्ञादिति**। कृपालुत्वं चादरतस्तद्वाक्यश्रवणेन ज्ञायत इति **आदृतगिरः** इत्युक्तं ॥ २३२ ॥

---

१. भक्तप्रियात् ऋतगिर इति पदच्छेदः। भक्तप्रियादृतगिर इति एकं वा पदं इति **पदरत्नावल्याम्**। भक्ताः प्रियाः यस्य भक्तानां वा प्रियः तस्मात्। ऋता सत्या गीर्यस्य तस्मात्। इति पदच्छेदपक्षे पदद्वयस्यार्थः।

२. विशेषणत्रयेणेत्यर्थः।

Rarest Archiver

**यत्सानुबन्धेऽसति देहगेहे ममाहमित्यूढदुराग्रहाणाम् ।**
**पुंसां सुदूरं वसतोऽपि पुर्यां भजेम तत्ते भगवन्पदाब्जम् ॥ २३३ ॥**
**। ३ । ६ । २२ । (१२)**

ननूक्ते धर्मत्रये अन्तिमद्वयं सम्यगनुभवारूढं जातम् । प्रथमं पितृत्वादिकं तु न सम्यग्ज्ञायते इत्यतस्तद्विशदीकरिष्यन् अध्यात्मप्रवणता श्रीहर्यनुग्रहविशेषमन्तरा सुदुर्लभेति भावेन तामादौ स्तौति ॥ **यदिति** ॥ हे भगवन् । ते तव । पदाब्जं भजेम । किं तत् । देहेन सहिते गेहे । न केवलं देहेन । किन्तु [1]तदनुबन्धैः पुत्रदारादिभिश्च सहिते । असति अमङ्गले । देहे अहमिति । पुत्रादिसहिते गेहे च ममेति । निरूढाग्रहाणां पुंसाम् । पुर्यां तस्यामेव । वसतोऽपि ते । यत्पदाब्जं [2]सुदूरं दुर्लभम् । तदिति ॥ २३३ ॥

**भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः ।**
**भुङ्क्ते गुणान्षोडश षोडशात्मकः सोऽलङ्कृषीष्ट भगवान्वचांसि मे**
**॥ २३४ ॥ २ । ४ । २३ । (१३)**

पितृत्वमनुभवारूढं न भवतीति वदन् प्रष्टव्यः देवदत्तस्य पितृत्वं कथमिति । मम देहो हि देवदत्तेन जातः । यश्च देहस्य कर्ता स एव पितेत्युच्यते । देहजननं च ततः अनुभवसिद्धमिति पितृत्वं देवदत्तस्यानुभवारूढमिति चेत् । एवमेव भगवतोऽपि पितृत्वं अनुभवारूढं कर्तव्यं कोविदेनेत्याशयेनाह ॥ **भूतैरिति** ॥ यो विभुः । महद्भिर्भूतैः पृथिव्यादिभिः इमाः पुरः शरीराणि । निर्माय अमूषु पूर्ष्वेव । शेते यस्मात्तस्मात्पुरुष इति गीयते । तत्र

---

१. अनुबध्यन्ते इत्यनुबन्धाः पुत्रदारादयः ।

२. अत्यन्तं अगोचरं इति **विजयध्वजतीर्थाः** ।

Rarest Archive

च षोडशात्मकः श्रोत्रादिपञ्चकं वागादिपञ्चकं [1]मनआदिपञ्चकं [2]बुद्धिश्चेति षोडशाधिष्ठानेषु षोडशरूपः भूत्वा। षोडश गुणान् विषयान्। अनुभवति। य ईदृशः स भगवान् मे वचांसि। अलङ्कृषीष्ट अलङ्कुर्यात्॥ स्वस्य स्वभक्तानां च प्रीतिजनकानि कुर्यादिति। सर्वशरीराणां मुख्यतो निर्माता भगवानेवेति स एव मुख्यः पिता अन्यस्तु तत्र निमित्तमात्रमिति सोऽपि कथञ्चित्पितृपदाभिधेय इति। अनेन विश्वभावनेत्युक्तं विवृतं भवति॥ २३४॥

**सृष्टं स्वशक्त्येदमनुप्रविश्य चतुर्विधं पुरमात्मांशकेन।**
**अथो विदुस्त्वां पुरुषं सन्तमत्र भुङ्क्ते हृषीकैर्मधु सारघं यतः॥२३५॥**
**।४।२४।६५।(१४)**

ननु भगवतोऽस्मिन् शरीरे स्थितस्येन्द्रियाण्यधिष्ठाय भोगमार्गगमने समभूमेरिव विषमभूमेरपि प्राप्त्या स्खलनमपि प्रसज्येतेत्यत आह॥ **सृष्टमिति**॥ जरायुजादिभेदेन चतुर्विधम्। स्वशक्त्या। सृष्टं इदं पुरम्। आत्मनोंऽशकेन स्वरूपसमूहेन। स्वशक्त्यैव प्रविश्य अत्रैव। सन्तं वसन्तम्। विदुः। अथो अस्मादेव प्रवृत्तिनिमित्तात्। त्वां पुरुषपदवाच्यं विदुः। अत्र स्थित्वा स्वांशाधिष्ठितैः [3]हृषीकैः इन्द्रियैः। मधु सुखमेव स्वशक्त्यैव भुङ्क्ते अनुभवति।

---

१. मनोबुद्धिरहङ्कारश्चित्तं चेतनेति मनआदिपञ्चकं, सङ्कल्पविकल्परूपं मनः निश्चयरूपा बुद्धिः अस्वरूपे स्वरूपमतिरहङ्कारः स्मरणहेतुश्चित्तं चेतसो व्याप्तिश्चेतनेति पञ्चवृत्तिर्मनोवदिति सूत्रभाष्यव्याख्यावसरे **तत्वप्रकाशिकायाम्**। ''बहुस्मरणशक्तिश्च चेतनेत्यभिधीयते'' इति **चतुर्थतात्पर्ये**।

२. बुद्धिर्बुद्धितत्वं तैजसपरिणामः। श्रोत्रादीन्द्रियाणां ज्ञानजननशक्तिर्यदनुग्रहाद्भवति तदिदमिति विचार्यतां विद्वद्भिरिति।

३. जीवेन्द्रियैरिति **विजयध्वजतीर्थाः**।

Rarest Archiver

तदपि नेतरभोगयोग्यमित्याह॥ [१]**सारघमिति ॥** सारमात्रं। अत्युत्कृष्टं निरतिशयमिति यावत्॥ **इदमुदितं भवति—** यस्तु कदर्यः दैवाद्बलाद्वा अन्यरथे स्थापितः स एवान्यदीयेन रथेन सारथिना अश्वैश्च तथाविधैर्मार्गे गच्छन् समविषमभूमिप्राप्तिवशेन सुखमितरं वा परवश एवानुभवति। यस्तु पुरुषव्याघ्रो रथं स्वयं निर्मातुं शक्तः परैर्वा कारयितुं समर्थः स्वाधीनसारथ्यादिः स्वाधीनमार्गः स कथं प्रेक्षावान् समां भूमिं परित्यज्य विषमां गच्छेत्। येन स्खलनं सम्भाव्येतापि। गतोऽपि च तत्र नैव स्खलेदिति॥ २३५ ॥

**स वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेऽस्मिन्।**
**भूतेषु चान्तर्हिन्त आत्मतन्त्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः ॥२३६॥**
**।१।३।३४। (१५)**

**इति अध्यात्मप्रकरणम्॥ १९ ॥**

ननु स्वयं शरीरं निर्माय स्वशरीरेण जीवशरीरमधिष्ठाय स्वीयैरिन्द्रियैर्जीवेन्द्रियाण्यभिव्याप्य स्वरूपैर्विषयसारैर्विषयानधिष्ठाय भगवता क्रियमाणो भोगः स्वीयमन्नादिकं गृहीत्वा गतानां परगृहेषु भुञ्जतां बालकानां भोग इव विभाति। सत्यम्। तथापि स्वप्रयोजनाभावेन सुखोद्रेकेणैव क्रियमाणत्वसाम्यात् परप्रयोजनमपि स्वप्रयोजनमिव मन्वानेन परमदयालुना भगवता सृष्ट्यादयः क्रियन्ते। तथा चोक्तं ब्रह्मोपदेशप्रकरण इत्यभिप्रेत्याह॥ **स वा इति॥** स भगवान् विश्वं समस्तम्। इदं जगत्। सृजति। अवति रक्षति। अत्ति संहरति। भूतेषु तन्निर्मितेषु शरीरेषु। अन्तर्हितः अन्तः सन्। षड्गुणेशः मनःश्रोत्रादिषडिन्द्रियाणां ईशः अधिष्ठाता सन्। षाड्वर्गिकं षड्वर्गगतम्।

---

१. ''अवधारणे घशब्दः स्यात् सारमात्रं तु सारघ''मिति **शब्दनिर्णये**। अवधारणे घशब्दः स्यात् इत्यनेन घशब्दार्थकथनं। सारमात्रमित्यनेन प्रयोजनोक्तिरित्यवसेयमिति **तात्पर्यदीपिकायाम्।**

Rarest Archive

जिघ्रति अनुभवति। तथाप्यस्मिन्जगति। न सज्जते तत्कृतेन पुण्यपापादिना लिप्तो न भवति। तत्र हेतुः। **आत्मतन्त्र इति**॥ स्वतन्त्र इत्यर्थः। एतत्सर्वं प्रमाणसिद्धमिति वैशब्देनाचष्टे। पूर्णस्य सृष्ट्यादिना प्रयोजनाभावेन व्यर्थेयं सृष्ट्यादिरूपा लीलेत्यतो न हि भागवती लीला व्यर्थेति भावयितुमपि युक्तम्। स्वप्रयोजनाभावेऽपि भक्तमुक्तिरूपपरप्रयोजनसद्भावेन सार्थक्योपपत्तेरिति भावेनाह॥ [1]**अमोघलील इति**॥ इदमुदितं भवतिजीवानां मुक्तये खल्विदं सृष्ट्यादिकम्। यथा यथा कृतौ मुक्तिर्भवेत्तथा तथा क्रियते भगवता। तथाहि। शरीरान्तराणि परित्यज्य पुरुषशरीराणि निर्माय तत्र स्वपूजासाधनानीन्द्रियाणि दत्वा तादृशानि द्रव्याणि दापयित्वा स्वयं स्वेन शरीरेण स्वैरिन्द्रियैः स्वरूप-विषयान् सन्ततमनुभवन् स्थितोऽपि स्वशरीरेण पुरुषशरीराणि, इन्द्रैयैरि-न्द्रियाणि, स्वविषयैर्विषयानधिष्ठाय, भोगैः स्वात्मानं स्वयमेव पूजयन्, राजा पुरोहिताय गृहं निर्माय तत्र सकलपदार्थसार्थं परिपूर्य लीलया कानिचिद्दिनानि तत्रैव स्थित्वा भोजनादि कुर्वन् प्रीतिवशेन पुरोहितमिव लोकेषु विख्यातकीर्ति कृत्वा पुरुषाय पुरुषार्थान् प्रयच्छतीति। तदनेन शरीरोत्पादकत्वरूपं पितृत्वं, प्रलये स्वोदरगतस्य विश्वस्य सृष्टिकाले तस्माद्बहिर्निःसारणा-दव्यवधानेनोत्पादकत्वरूपमातृत्वं, तदा तदा प्राप्ताध्यात्मिकाद्यनिष्टपरिहारेण रक्षकतयाऽनिमित्तबन्धुत्वरूपं सुहृत्त्वं, ज्ञानादिदातृतया सद्गुरुत्वं, मोचकतया परदैवत्वमिति पितृत्वादिपञ्चकमनुभवारूढं कृतमिति ज्ञेयम्। अनेनैव च शिष्यप्रतिभाद्यलभ्यविशेषविषयिण्या अष्टम्याः शङ्कायाः परिहारो द्रष्टव्यः। तेषां गुरुभिरेव प्रतिपादितत्वादिति। तदनेन शमात्मविमर्शनाख्यौ भागवतौ धर्मावुक्तौ भवतः। शमेनाभयं लब्धमिति॥ २३६॥

**॥ इति श्रीमदवधूतशिरोमणिजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां अध्यात्मप्रकरणम्॥ १९॥**

---

१. सफलसकलचरित्र इत्यर्थः।

Rarest Archiver

## धर्मोपदेशप्रकरणम् ॥ २० ॥

**पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये ।**
**वैराग्यसारं प्रतिलभ्य बोधं यथाञ्जसा [१]त्वापुरकुण्ठधिष्ण्यम् ॥२३७॥**
**। ३ । ६ । २४ । (१)**

श्रीः ॥ एवमष्टमीं परिहृत्य एतानि साधनानि अनुतिष्ठतः अधिकारिणः बिम्बोपासनं लभ्यं भवेत् इत्याशयेन किञ्च तत्प्राप्तये साधनमिति द्वादशीं शङ्कां परिहरन् तदुत्तरत्वेन भागवतधर्मान् उपदेष्टुं इदं प्रकरणम्। तत्रादौ भागवतधर्मेषु आदरजननाय भक्तिमार्गं प्रशंसति। **पानेनेति ॥** द्विविधा हि योगिनः। श्रवणादिजन्यभक्तिप्रधानाः भक्तियोगिनः। वायुजयप्रधानाः समाधियोगापर-पर्यायहठयोगिनश्चेति। तत्र ये प्रथमाः तेषां कालविलम्बेन भवन्त्यपि मुक्तिः अञ्जसैव भवति। ये च द्वितीयाः तेषां शीघ्रमेव भवन्त्यपि न पूर्वेषामिव अञ्जसा। मुक्तौ शैघ्र्यं द्वितीयेषु प्रथमेषु फले विशेष इति गुणतः साम्यम्। **इयानेव विशेषः—** यः द्वितीयेषु वायुजयनिमित्तः श्रमविशेष इति। प्रथमेषु तु श्रवणादिना श्रमाभावात्। प्रत्युत सुखविशेषस्यैव सद्भावात्। तथा प्रोक्तं [२]वैराग्यप्रकरणान्ते इति। तत्र प्रथमानां प्रवृत्तिप्रकारं प्रथमतः प्रदर्शयति ॥ **पानेनेति ॥** हे देवेति देवेशं प्रति देवसम्बोधनम्। ये भक्ताः। त्वदपरोक्षं। प्रतिलभ्यापि। स्थिताः न तदैव मुक्त्यर्थं प्रयतन्ते ते भक्ताः। तव। कथारूपामृतस्य। श्रवणादिलक्षणपानेन। प्रवर्धमानभक्त्या विशिष्टाः। तथाविधं वैराग्यं प्राप्य। स्थिताः। तथा निरन्तरं विशदीभवद्बोधविशेषाः सन्तः।

१. त्वेयुरिति विजयध्वजीयपाठः।

२. या निर्वृतिरिति पद्ये।

Rarest Archive

कालविलम्बेन अप्रतिहतं वैकुण्ठादिस्थानं यस्य तत्र स्थितम् । त्वाम् । यथाञ्जसा सम्यक् । प्रापुः । २३७ ॥

**तथापरे [1]त्वात्मसमाधियोगबलेन [2]जित्वा प्रकृतिं बलिष्ठाम् ।**
**त्वामेव धीराः पुरुषं विशन्ति तेषां श्रमः स्यान्न तु सेवया ते॥२३८॥**
**। ३ । ६ । २५ । (२)**

अपरे द्वितीयेऽपि । धीराः साहसिनः । अद्याप्यात्मनां यत्समाधियोगस्य वायुनिरोधरूपस्य बलं सामर्थ्यं तेन । प्रबलतमां प्रकृतिं जित्वा । शीघ्रमेव । पुरुषं त्वामेव प्रविशन्ति । तथाप्यञ्जसा न तु नैवेति समम् । **इयांस्तु विशेषः**— यत्तेषां लोकान्तरगतानां गमनसमये वायुनिरोधादिनाश्रमः स्यात् । ते तव सेवया श्रवणादिरूपया निमित्तभूतया अत्रैव स्थितानां तु नैव । प्रत्युत सुखविशेष एवेति ॥ २३८ ॥

**धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुर्ऋषयो नापि देवाः ।**
**न सिद्धमुख्या असुरा मनुष्याः कुतो नु विद्याधरचारणादयः ॥२३९॥**
**। ६ । ३ । १९ । (३)**

एवं भक्तिमार्गं प्रशस्य भक्तिसाधनभूतानां भागवतधर्माणां वक्ता सुदुर्लभः । ततस्तज्ज्ञानमपि सुदुर्लभं अतस्तत्सम्पाद्यमित्याशयेन तल्लक्षणमाह ॥ **धर्मं त्विति** ॥ यः धर्मः भगवता साक्षात् मुख्यं मुक्तिलक्षणफलं उद्दिश्य प्रणीतः स भागवत इति । इदं च लक्षणं नाधुनिकैः स्वबुद्ध्या कल्पितं किन्तु

१. (चा) वि.पा. ।

२. प्रकृतिं जित्वा, ''वायोश्च प्रकृतेर्विष्णोर्जयो भक्त्यैव नान्यथे''ति दत्तात्रेययोगे । तेन भक्त्या स्वानुग्रहोन्मुखीकरणमेव जय इत्युक्तं भवति ।

Rarest Archive

भागवतोत्तमैः सनकादिभिः भगवदुपदिष्टैः उद्दिष्टमिति भावेनोक्तम् ॥ **साक्षाद्भगवत्प्रणीतं धर्मं भागवतमिति** ॥ विदुः ज्ञानिन इति । **यथाहुः—** "ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये । अञ्जः पुंसामविदुषां विद्धि भागवतान् हि तान् ॥ (११।२।३४) ॥ यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यज" इति ॥ (११।२।३१) एतस्य वक्तैव सुदुर्लभ इत्याशयेनाह ॥ **न वा इति** ॥ असुराः भागवताः । मनुष्यास्तु कुतो विदुः नैवेति । एवं दौर्लभ्यं प्रदर्श्य भक्तानां धैर्यजननाय भागवतधर्माणां ज्ञातारो भागवतोत्तमा विशिष्टाः सन्ति । ततो भवतामपि परम्परया भागवतधर्मवेदनं भवेदिति न भेतव्यमिति भावेनाह ॥ **त्विति** ॥ **यथाहुः—** "स्वयंभूर्नारदः शम्भुः कुमारः कपिलो मुनिः । प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयम् ॥ (६।३।२०) ॥ द्वादशैते विजानीमो धर्मं भागवतं भटाः । गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वामृतमश्नुत" इति ॥ (६।३।२१) ॥ भगवता मोक्षसाधनतया उपदिष्टो भागवतो धर्मः कतिविध इत्यत आह । **त्विति** ॥ भगवत्प्रणीतं धर्मं भागवतं तु । त्रिंशद्भिर्विशेषैर्विशिष्टं विदुरिति । एते तु प्रभेदाः प्रमाणप्रसिद्धा इति वैशब्देनाह ।

**यथाहुः—** "भगवन् श्रोतुमिच्छामि नृणां धर्मं सनातनम् । वर्णाश्रमाचारयुतं यत्पुमान्विन्दते परम् ॥ (७।१२।२) ॥ भवान् प्रजापतेः साक्षादात्मजः परमेष्ठिनः । सुतानां संमतो ब्रह्मन् तपोयोगसमाधिभिः ॥ (७।१२।३) ॥ नारायणपरा विप्रा धर्मगुह्यं यथा विदुः । करुणाः साधवः शान्तास्त्वद्विधा न तथा परे ॥" (७।१२।४) । इति युधिष्ठिरेण पृष्टो नारदो वक्ति- "नत्वा भगवतेऽजाय लोकानां धर्महेतवे । वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतं ॥ (७।१२।५) ॥ योऽवतीर्यात्मनोंऽशेन दाक्षायण्यां तु धर्मतः । लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्रमे ॥ (७।१२।६) ॥

Rarest Archiver

[1]धर्ममूलं हि भगवान् सर्ववेदमयो हरिः। स्मृतिश्च तद्विदां राजन् येन चात्मा प्रसीदति॥ (७।१२।७)॥ येन धर्मेणात्मा हरिः प्रसीदति प्रसन्नः पुमर्थं प्रयच्छति च स त्वया पृष्टो गुह्यो भागवतो धर्म इति लक्षणमभिधाय, तत्र

१९ २ ४

श्रुतिस्मृती ज्ञापिके अभिधाय तद्विभागं दर्शयति— "सत्यं १ दया २ तपः

३ ५ १० ९

३ शौचं ४ तितिक्षे ५ ज्या ६ शमो ७ दमः ८॥ अहिंसा ९ ब्रह्मचर्यं च १०

१३ ७ ८ १७

त्यागः ११ स्वाध्याय १२ आर्जवं १३॥ (७।१२।८)॥ सन्तोषः १४

११ १८ ६

समदृक्सेवा १५ ग्राम्येहोपरमः १६ शनैः॥ नृणां विपर्ययेहेक्षा १७ मौन १८

१ १८

मात्मविमर्शनम् १९॥ (७।१२।९)॥ अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः २०। १२ तेष्वात्मदेवताबुद्धिः सुतरां नृषु पाण्डव २१॥ (७।१२।१०)॥ श्रवणं २२ कीर्तनं चास्य २३ स्मरणं २४ महतां गतेः। सेवे २५ ज्या २६ ऽवनतिः २७ सख्यं २८ दास्य २९ मात्मसमर्पणं ३०॥ (७।१२।११)॥ एवं लक्षणविभागाभ्यां पृष्टं धर्ममुक्त्वा उपसंहरति॥ **नृणामिति॥** नृणामयं परो धर्मः सर्वेषां समुदाहृतः। त्रिंशल्लक्षणसंयुक्तः सर्वात्मा येन तुष्यति॥ (७।१२।१२)॥ वर्णाश्रमाचारयुतमित्यस्योत्तरं सर्वेषां नृणां परो धर्म इति। यत्पुमान्विन्दते परमित्यस्योत्तरं सर्वात्मा येन तुष्यतीति।

---

१. धर्ममूलं धर्मविषयः। न केवलं धर्मविषय एव तत्प्रतिष्ठापकश्चेत्यतो धर्ममूलमिति, अत्र प्रमाणं सर्ववेदमय इति। प्रमाणान्तरं चास्तीत्याह स्मृतिरिति, प्रमाणमिति शेषः इति **विजयध्वजीये।**

Rarest Archiver

अथैवं विभज्य [१]प्रदर्शिते। ननु ''धर्मःप्रोज्झितकैतवोऽत्रपरम'' इत्यादौ परो धर्म एव मुख्यो वेद्यः अनुष्ठेयश्चेत्यभिहितम्। कथं त्वया भागवतो धर्म एव [२]तथा अभिधीयत इति। अत आह॥ **नृणामिति॥** ''नृणामयं परो धर्मः सर्वेषां समुदाहृतः। त्रिंशल्लक्षणसंयुक्तः सर्वात्मा येन तुष्यति'' (७।१२।१२) यः मया तुभ्यं जीवमुक्तिहेतुत्वेन लक्षणेन लक्षितः त्रिंशत्प्रभेदवत्तया विभक्तः भागवतो धर्मः समुदाहृतः अयमेव [३]तत्र परो धर्म इति समुदाहृतः। न त्वतोऽन्यः परो धर्मोऽस्ति। येन स तत्रोच्येत इति। अथवा यस्त्रिंशल्लक्षणो भागवतो धर्मः स एव परमो धर्म इति नास्माभिरेवोच्यते किन्तु व्यासेन भागवतकर्त्रैवोदित इति भावेनाह। **नृणामिति।** यस्त्रिंशल्लक्षण-संयुक्तः। येन च सर्वात्मा तुष्यति। स भागवतो धर्मस्तावद्भागवत एव ''धर्मान् भागवतान्ब्रूत यदि नः श्रुतये क्षमं'' (११।२।३१) इति प्रश्ने ''तत्र भागवतान् धर्मान् शिक्षेद्गुर्वात्मदैवत'' (११।३।२३) इत्यादिना तदुत्तरतया विस्तार्य समुदाहृतः। किं तावता। यतो भागवते अयमेव प्रतिपादितः ततः अयमेव च असन्तुष्टमनसं व्यासं प्रति नारदेन विस्तार्य [४]समाधिना वक्तव्यतया समुदाहृतः सप्रस्तावितः इत्यवश्यं वक्तव्यम्। अन्यथा प्रस्तावितः अन्यः उक्तश्चापरः इत्यसामञ्जस्यप्रसङ्गात्। **तथा चोक्तं—** ''उरुक्रमस्याखिल[५]धर्मगुप्तये समाधिनानुस्मर यद्विचेष्टित''मिति (१।५।१३)। किञ्च तावता यतोऽयमेव

---

१. अधिकारिणः शङ्कोन्मिषति इति शेषः। तामेव दर्शयति **नन्वित्यादिना** इतीत्यन्तेन।

२. तथा मुख्यो वेद्यः अनुष्ठेयश्चेति।

३. धर्म इति पद्ये।

४. भाषाविशेषेण। ''गुह्यदर्शनभाषे च भाषा चैव समाधिका। तिस्रस्तु मूलभाषाः स्युः''। तत्र, ''यथा प्रदृश्यमानार्था समाधिः सा प्रकीर्तिता। विष्णुः परम इत्याद्या सा च विद्वद्भिरीरिते''ति ११ **तात्पर्ये।**

५. बन्धमुक्तये इत्यपि पाठः **विजयध्वजीये** पाठद्वयमप्यादृतम्।

Rarest Archive

प्रतिपादितः प्रस्तावितश्च ततो धर्मः प्रोज्झितकैतव इत्यत्रापि भागवतप्रतिपाद्यप्रदर्शनपरे पद्येऽप्ययमेव समुदाहृत इति वक्तव्यम्। अन्यथा ग्रन्थकर्तुः विस्मरणशीलत्वस्य वा प्रतारकत्वस्य वा प्रसङ्गादिति। अपि च धर्मः प्रोज्झितकैतवोऽत्र परम इति यः भागवतप्रतिपाद्यतया प्रदर्शितः स एवात्रोच्यत इति प्रदर्शयितुं "अमाययानुवृत्त्या च तुष्येदात्मात्मदो हरिः" (११।३।२३) इति तत्रोदितमेवार्थं स्मारयामास। अन्यथा "तत्र भागवतान् धर्मान् शिक्षेद्गुर्वात्मदैवत" (११।३।२३) इत्युदिते "के ते भागवता धर्मा" इत्याशङ्कायां "सर्वतो मनसोऽसङ्ग"मित्यादिना तत्प्रदर्शनस्य श्लिष्टतया एतदुदाहरणस्य (च) वैयर्थ्यापत्तेः। **तथाहि**—मुमुक्षूणामपि तत्साधनविशेषं विशेषतः अविदुषां मोक्षार्थं यदुपायसमुदायः भगवता प्रोक्तः स एव हि भागवतो धर्मो नाम। मोक्षश्च भगवत्प्राप्तिरेव। तत्र च साधनं भगवत्प्रसाद एव। तस्मिंश्च साधनं उपायसमुदायः। स च यादृशतयानुष्ठीयमानो हरितोषकरो भवेत्तथैवानुष्ठेयः। स च प्रकारो द्विविधः। प्रोज्झितकैतवत्वं परमत्वं चेति। मनसा एकं द्रव्यादिप्राप्तिरूपं फलं अनुसन्धाय वाचा श्रीविष्णुप्रीत्यर्थं ब्राह्मणसमाराधनं करिष्ये इत्यभिधाय शतमेकं ब्राह्मणानां, अनेकं शतमन्येषां च भोजयन्ति। तदिदमेव कैतवं। एतन्निवृत्तिरेव प्रोज्झितकैतवत्वम्। परमपुरुषार्थप्रतिबन्धकत्वमेव हि नीचत्वम्। तन्निवृत्तिरेव चोत्तमत्वम्। उभयत्र निवर्तकं चानुपदमेव वक्ष्यते। तदेताभ्यां विशिष्टतया अनुष्ठित उपायसमूह उपेयोपयोगीति। तदेतदनुसन्धायाह। "अमाययानुवृत्त्या च तुष्येदात्मात्मदो हरि"रिति (११।३।२३)। **यथाहुः** — "तत्र भागवतान्

१ २

धर्मानि"त्युपक्रम्य "सर्वतो मनसोऽसङ्गमादौ १ सङ्गं च साधुषु २॥ दयां

३ २ ३ ४

३ मैत्रीं ४ प्रश्रयं च ५ भूतेष्वद्धा यथोचितम्॥ (११।३।२४) शौचं ६ तप

Rarest Archiver

५ ६ ७ ८ ९ १०

७ स्तितिक्षां च ८ मौनं ९ स्वाध्याय १० मार्जवं ११ ॥ ब्रह्मचर्य १२ महिंसां च

११ १२ १३

१३ समत्वं १४ द्वन्द्वसंज्ञयोः ॥(११।३।२५) सर्वत्रात्मेश्वरान्वीक्षां १५ कैवल्य

१४ १५ १६ १७

१६ मनिकेतनं १७। विविक्त १८ चीरवसनं १९ सन्तोषं २० येन केनचित् ॥ (११।३।२६) श्रद्धां भागवते शास्त्रे २१ निन्दामन्यत्र चापि हि २२।

१८ १९ २०।२१

मनोवाक्कायदडं च २३ सत्यं २४ शम २५ दमावपि २६ ॥ (११।३।२७) श्रवणं २७ कीर्तनं २८ ध्यानं २९ हरेरद्भुतकर्मणः। जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितं ॥ (११।३।२८) इष्टं दत्तं तपो जप्तं पूर्तं यच्चात्मनः प्रियम्। दारान्सुता[१]न्प्रियान्प्राणान्परस्मै सन्निवेदयेत् ३० ॥ (११।३।२९) एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम्। परिचर्यां चोभयत्र महत्सु नृषु साधुषु ॥ (११।३।३०) परस्परानुकथनं पावनं भगवद्यशः। मिथो रतिर्मिथस्तुष्टि (र्निवृत्ति) र्निवृत्तिर्मिथ आत्मनः ॥ (११।३।३१) स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम्। भक्ताः सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥ (११।३।३२) इति भागवतान् धर्मान् शिक्षन् भक्त्या तदुत्थया। नारायणपरो मायामञ्जस्तरति दुस्तरा''मिति ॥ (११।३।३४)

**अथवा-** नाहं कर्ता किन्तु हरिः कर्ता, सर्वं कर्म तत्पूजारूपमेव इत्यनुसन्धानपूर्वकं क्रियमाणो धर्मो भागवतो भवमोचनसाधनमित्यभिहितो मुक्तिमार्गोऽयं नान्यो मार्ग इव दुर्गमः किन्तु यस्मिन्मार्गे पुरुषः नेत्रे निमील्य धावन् न स्खलेत् न च पतेत् तादृशः सुगमोऽतोऽनेनैव मार्गेण

१. गृहान्—**विजयध्वजीये।**

Rarest Archiver

मोक्षपान्थैर्गन्तव्यमिति भावेनात्रादरजननाय अतिगोप्योऽप्राप्योऽल्पपुण्यैरित्याह॥ **धर्मं त्विति॥** भगवत्प्रणीतं धर्मं देवाद्या अपि न विदुरित्यनेनातिगोप्यत्वं, कुतो मनुष्य इत्यनेनाल्पपुण्यैरलभ्यत्वं सूचितं भवतीति। **यथाहुः—** ''यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित्। धावन्नुन्मील्य वा नेत्रे न स्खलेन्न पतेदिहे''ति॥ (११।२।३५) **अथवा—** ''सर्वतो मनसोऽसङ्गं'' इत्यादिना वक्ष्यमाणेषु भागवतधर्मेषु भक्तेरपि प्रविष्टतया तत्रेत्थं भावं दर्शयति। अन्यथा भागवतधर्मसमूहोऽपि तदर्थत्वेनैवानुष्ठीयत इति तस्या एव दुष्टत्वे ''एकापि सुता पुंश्चली जातेति मदीयः संसारसम्भारः अनर्थक'' इति आभाणकविषयतामापद्येतेति॥ **तथाहि—** सर्वेषां तनुभृतां स्वस्मिन्नादरस्तावदनुभवसिद्धः। स च नान्यन्निमित्तीकृत्येति च। स एव हि प्रेमापरपर्यायो भक्तिर्नाम अनुवृत्तिपदाभिधेयश्च। स च विना वैराग्यं नोत्पद्यत एव। तच्च सर्वेषु विषयेषु सङ्गवर्जनमेव। हन्त तर्हि वैराग्यं सुलभमित्यायातम्। सर्वेषां गृहं परित्यज्य वनं प्रति गमनमात्रेण संपादयितुं शक्यत्वात्। मैवम्। यतोऽत्र सङ्गपदेन राग एव विवक्षितः। न तु सन्निकर्षः। येन स्थानान्तरगमनमात्रेण सम्पादयितुं शक्येत। स रागश्च स्नेहापरनामा। तन्निवृत्तिश्च न तन्मात्रेणेति निवर्तकं तु वक्ष्यते। तदेतदाह। **सर्वतो मनसोऽसङ्गमित्यादि॥** अनेन ''गुणेष्वसङ्गो वैराग्य'' ११।१९।२७ मित्युक्ताभिप्रायम्। ननु भवतु प्रेमैव भक्तिः, भवतु च रागनिवृत्तिरेव विराग इति। तथापि भक्तिः वैराग्यं विना नोत्पद्यत इति कुतः। व्यतिरेकबलादिति ब्रूमः। नहि हेये रागवतः उपादेये प्रेमोत्पत्तिरस्ति। तदेतदभिसन्धायाह॥ **सर्वत इति॥** सर्वतो मनसोऽसङ्गमादावेव स्थितं **शिक्षेदिति।** (१) (ननु भक्तिदार्ढ्या (दिक)पादकमुच्यते। सत्यम्।) पूर्वतोऽतिशयविशेषविशिष्टतया व्यक्त्यपेक्षयैव एतदित्यदोषः। ननु भगवद्भक्त्यैव भगवत्प्रसादो भवति। तेन चालभ्यं किमपि नास्त्येवेति किमुत्तरग्रन्थेन। यदि च भक्तिसाधनानि वक्तुमुत्तरग्रन्थ-

Rarest Archiver

सन्दर्भस्तदापि सङ्गं चेत्यारभ्य यथोचितमित्यन्तो व्यर्थ एव भाति। न हि स भक्तिसाधनं वक्ति। किं नाम भक्तेषु भक्तिमेव। सङ्गपदेन राग एव विवक्षित इति व्यवधानं विना अनन्तरमेवोक्तत्वात्। न च तेन किमपि प्रयोजनमस्ति। सर्वस्यापि भगवद्भक्त्यैव साधितत्वादिति। मैवं। भक्तिदोषनिरासार्थत्वात्। भक्तिदोषो ह्यसौ यत्तद्भक्तेषु भक्त्यभाव इति। नन्वस्तु भगवद्भक्तस्यापि तद्भक्तेषु भक्त्यभावः। भगवद्भक्तेषु को दोषः? अभिमतविशिष्टफलाजनकत्वमेवेति वदामः। भक्त्या भवति सति प्रसादे तदेव कुत इति चेत्। तादृशप्रसादाभावात्। सोऽपि कुतः। विशिष्टभक्त्यभावात्। सोऽपि कुतः। दोषेण प्रतिबद्धत्वात्। तदेवं भगवद्भक्त्या पुरुषार्थसम्भवेऽपि विशिष्टपुरुषार्थालाभेन तल्लाभाय विशिष्टभक्तिरपेक्षिता। भावानुष्ठानं विना अभावपरित्यागायोगेन भागवते भक्तिविशिष्टभगवद्भक्तेरेव विशिष्टपुरुषार्थहेतुतेति ज्ञापनाय प्रवृत्तत्वात्। नन्वस्तु अमात्ये भक्तिमति राजभक्ते पुरुषे, नारदे भक्तिमति नृसिंहभक्ते प्रह्लादे च महाफलस्य दर्शनात्, केवलराजभक्ते पुरुषे, इन्द्रादिभक्तिरहितेषु दैत्येन्द्रेषु च ब्रह्मादिभक्त्या अल्पफलस्यैव दर्शनात् विशिष्टभक्तेरेव विशिष्टफलदत्वमिति। तथापि सङ्गं च साधुष्वित्येतावत एवावश्यकत्वप्राप्त्या अधिकांशवैयर्थ्यानिस्तार इति चेत्सत्यम्। तस्याप्येतत्समानयोगक्षेमतया दोषाभावात्। **तथाहि**— तनुभृन्मात्रस्य स्वस्मिन् विनैव निमित्तमादरोऽनुभवसिद्ध इति स एव भक्तिरिति चोक्तम्। तथा च यथा अखण्डभूमण्डलाधिपे स्वगृहं प्राप्ते गृहाधिपेन स्वात्मनोऽनेकगुणाधिकः आदरः क्रियते तादृशैरुपचारैस्तादृशस्यैवादरस्य सम्भावयितुं शक्यत्वात्। तादृशस्याधिकस्य चाभावेन ततो नीचेष्वेवामात्यादिषु तत्तन्माहात्म्यवैशेष्यानुसारेणैवादरः क्रियते। अन्यथा महाफलहेतुत्वाभावापत्तेः। तथैव भगवति स्वात्मात्मीयसमस्तवस्तुभ्योऽनेकागुणाधिक आदरः, तद्भक्तेषु च भगवत्प्रीतिविशेषतारतम्येन। स्वात्मनोऽनेकगुणाधिकेषु स्वात्मना अधिकः,

Rarest Archive

समेषु च स्वात्मना समः, नीचेषु तु स्वात्मना नीचः, आदरः कर्तव्यः । अन्यथा पूर्वोक्तदोषापत्तेः । ततो विशिष्टफलार्थिना विशिष्टा भक्तिः कर्तव्या । ततः सङ्गं च साधुष्वित्युक्त एवादरः स्वोत्तमेषु प्रश्रय इति, समेषु मैत्रीति, स्वाधमेषु दयेति, च गीयते । एवं यथोचितं तथाकारण एव विशिष्टफलावाप्तिः । अन्यथा अल्पफलावाप्तिरिति । **तदेवाह—** "दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचित" (११।३।२४) मिति । तदनेन तारतम्यक्रमोपेतया भक्तभक्त्या सहितत्वमेवाऽमायत्वम् । तदेव भगवद्भक्तौ इत्थंभावः । तत्र विशेषणाभावे वा विशेष्याभावे वा समायत्वमेवेति सिद्ध्या अमाययैवानुवृत्त्या हरिस्तुष्येत् । ततः अनुष्ठितो भागवतधर्मसमूहश्च विशिष्टभक्तिजनकतया सार्थकोऽपि भवेदिति नाभाणकविषयतापीति योजनां सूचयतीति ॥

भगवद्भक्तेः अमायत्वरूपेतिकर्तव्यताभावे भगवत्प्रसाद एव विशिष्टो न भवतीति विशिष्टफलाभावादिप्राप्त्या तदर्थमितिकर्तव्यतानुसरणीयेत्यभिहिते शङ्कोदेति । यथा कृतापि भगवद्भक्तिः इतिकर्तव्यताविरहेण विशिष्टफलदायका न भवति । तथा भागवतभक्तिरपि इतिकर्तव्यताभावे तादृश्येव भवेदिति । को नेत्याह । तर्हि तत्रापि इतिकर्तव्यताभिधानीया । अभिहितैव । समानन्यायत्वात् । यदा खल्वितरेणेषदपि प्रयोजनं यस्य नास्ति, तादृशोऽपि इतरभक्तिमपेक्ष्यैव भक्तेभ्यः पुरुषार्थं विशिष्टं प्रयच्छति । किमु तदा वक्तव्यं, भ्रूविक्षेपादावपि तदपेक्षमाणाः तद्भक्तिमनपेक्षमाणा एव स्वभक्तापेक्षितं न शिक्षेयुरितीति । तारतम्यक्रमोपेतता तु प्रागेवोक्ता । ततश्च निरवधिक-भगवद्भक्तिसहितत्वे सति तारतम्यक्रमोपेतभक्तभक्तिसहितत्वममायत्वम् । तत्र विशेषणाभावे वा विशेष्याभावे वा समायत्वमेव । भक्तभक्तिश्च भगवद्भक्तिप्रसादद्वारैव पुरुषार्थं प्रयच्छतीति प्रागेवाभिहितम् । ततो भक्तभक्त्या विशिष्टपुरुषार्थमाकाङ्क्षमाणैरमाययैव भक्त्या भगवद्भक्ता अपि भजनीयाः ।

Rarest Archive

तादृश्यैव च हरिस्तुष्यतीति। तदेतदभिसन्धाय वा आह— ''अमाययैवानुवृत्त्या तुष्येदात्मात्मदो हरिरि'' (११।३।२३) ति ॥

**अथवा—** तदेवं वक्ष्यमाणायां भगवद्भक्तौ अत्रोक्तायां भक्तभक्तौ चेत्थंभावावभिधाय तज्ज्ञापिकायां पूजादिरूपायां सेवायामपीति वा अभिधत्ते- ''अनुवृत्त्या चामाययैव हरिस्तुष्येदि''ति। अमायत्वं पूर्ववदेवावधेयम् ॥ अथवा-आत्मात्मीयसमस्तवस्तुभ्यः अनेकगुणाधिकादररूपां भक्तिं प्रदर्श्य, तत्र ये दोषास्ते सर्वेऽपि भक्त्या विशिष्टपुरुषार्थमिच्छता पुरुषेण त्याज्या एव। अन्यथा अभिमतपुरुषार्थप्राप्त्ययोगादित्याशयेनाह॥ **अमाययेति** ॥ अत्र मायाशब्दो ''दृष्ट्वा स्त्रियं [१]देवमायामि'' ११ । ८ । ७ त्यादाविव प्रतिबन्धकशक्तिमत्परः। तद्रहितयैव भक्त्या हरिस्तुष्यति। यतस्तुष्टश्चात्मदो भवति नान्यथा। ततो विशिष्टपुरुषार्थार्थिना ते दोषास्त्याज्या एवेति भावः ॥ यदत्र वक्तव्यं तदुत्तरत्र वक्ष्यते ॥ **अथवा** ''तत्र भागवतान् धर्मान् शिक्षेदि''ति अभिहिते कथं तच्छिक्षणमित्याशङ्कायां इत्थमिति भावेन लक्षणं तावदाह ॥ **अमाययेति** ॥ अनुवृत्त्या भागवतधर्मानुष्ठानरूपया सेवया अन्तःस्थित्वा ज्ञानदाता तत एवात्मनामा हरिः आत्मानमपि ददातीत्यात्मदस्तुष्येदित्यनेन मोक्षसाधनत्वमेव भागवतधर्मलक्षणम्। तदपि न साक्षात्किन्तु ज्ञानादिद्वारेति सपरिकरं लक्षणमभिधाय, स च त्रिंशल्लक्षणसंयुक्तः ते च त्रिंशत्प्रभेदा एत इति

---

१. तथाच अत्र **तात्पर्य—** अविद्यमानं मेत्युक्तं तज्ज्ञापयति यत्स्वयं। ''मोहकारणभूतां तु मायेत्याहुर्मनिषिणः'' **इतितन्त्रनिरुक्ते**। देवमायेति मिथ्यात्वमुच्यत इति प्रतीतिमपाकर्तुं मायाशब्दार्थमाह ॥ **मोहेति** ॥ कथमस्माच्छब्दादयमर्थो लभ्यत इत्यत आह ॥ **अविद्यमानमिति** ॥ ''अमानोनाः प्रतिषेध'' इति माशब्दः प्रतिषेधवाची। तस्य च कर्मणि व्युत्पन्नस्य प्रतिषेध्यार्थकत्वादित्याशयः। 'या प्रापणे' इति धातोः यापयति ज्ञापयति इति प्रप्तिः याशब्दार्थः। तत् अविद्यमानं वस्तु स्वयं ज्ञापयति। यत् यस्मात् तस्मात् मायेत्याहुरिति सम्बन्धः। तथाच देवमायां देवनिर्मितां मायां अविद्यमानार्थज्ञापिकां मोहकारणभूतामिति यावत्।

Rarest Archiver

शृङ्गिग्राहकतया दर्शयति। **सर्वत इति॥** सर्वतो मनसोऽसङ्गमेकं लक्षणं **शिक्षेदिति** (१)। एवमग्रेऽपि योजनीयम्। अत्र सर्वतो मनसोऽसङ्गमित्यनेनात्मविमर्शनं अध्यात्मविचाररूपमुच्यते। तस्य सर्वतो मनसोऽसङ्गे सत्येव ज्ञा(जा)यमानत्वसूचनाय तथा ग्रहणम्। तं च आदौ शिक्षेत् भक्तौ मुख्यसाधनतया शिक्षेत्। माहात्म्यज्ञानपूर्वकस्नेहो हि भक्तिः भक्त्यर्थमेव च भगवन्महिमोक्तिरिति च सिद्धमेव। **तथा चोक्तं–** [१]**अध्यात्मप्रकरणे**। वैराग्यं तु तदनन्तरमिति भावः। अत एवोभयसङ्ग्रहाय वैराग्यमित्येव वक्तुं शक्यत्वेऽपि सर्वतो मनसोऽसङ्गमित्याहेति। तदेतदभिसन्धायाह॥ आत्मविमर्शनमिति (१।१२।९) अनेनासङ्गाख्ययमत्वमुभयोरुक्तं भवति (१)॥ छ॥ ननु मोक्षसाधनतयोक्तभागवतधर्मानुष्ठानेन लभ्यं ज्ञानभक्तिवैराग्यात्मविमर्शनादिरूपं सर्वसाधनजातं कथं स्यादित्यत इदमेव तत्र मुख्यसाधनमित्याशयेनाह॥ सङ्गमिति (२)। साधुषु सङ्गं सतां समागमनमेव हेतुं शिक्षेदिति (२)॥ तथाचोक्तं[२]महत्समागमप्रकरणे। अत्र सङ्गपदेन भक्ति, सत्सङ्गतिश्चेति, द्वयमपि विवक्षितम्। अत एव सङ्गत्यादिपदपरित्यागेन सङ्गपदग्रहणम्। एतेन ''दयां मैत्रीं प्रश्रयं चे''ति तत्प्रभेदकथनेनैव पूर्तौ पुनः सङ्गपदग्रहणं व्यर्थमिति परास्तम्। सत्सङ्गतिप्रदर्शनरूपप्रयोजनान्तरस्यापि सद्भावात्। न च तत्प्रभेदप्रदर्शनं व्यर्थम्। निपुणतरं तदावश्यकतायाः प्रदर्शितत्वात्। प्रयोजनान्तरसाधकत्वमप्यस्तीति ज्ञापनार्थं च तत्प्रदर्शनस्यावश्यकत्वात्। **यथाहुः—** ''महतां बहुमानेन हीनानामनुकम्पया। मैत्र्या चैवात्मतुल्येषु [३]भगवान् सम्प्रसीदती''ति (३।३०।१७) (२)॥ छ॥ शौचं शिक्षेदिति (३)। [४]नन्वन्यत्र शौचस्य

---

१. भवाय नस्त्वमिति श्लोके (२२२)।

२. नैषां मतिरिति १११ श्लोकावतारिकायां।

३. यमेन नियमेन च इति पाठः विजयध्वजीये।

४. ग्रन्थान्तरे **तथाहि-** ''अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवं। क्षमा धृतिर्मिताहारः शौचं चैते यमा दश॥'' इति योगयाज्ञवल्क्यः।

Rarest Archiver

यमान्तर्गतस्यात्र नियमान्तर्गत्या ग्रहणं कथम्। कथं च पुनर्भागवतधर्मेषूभयत्र ग्रहणम्। मैवम्। अन्यत्र यमान्तर्गतस्यापि अत्र नियमान्तर्गत्या ग्रहणेनेदं सूचयति। फलविशेषार्थं हि नियमेनानुष्ठानं, पराभिमतस्य शौचस्य तु मृज्जलाभ्यां पादप्रक्षालनरूपस्य फलविशेषसाधकत्वाभावेन न तत्र निवेशो युक्तः। एवमपि निवेशो नियमेऽनिवेशनेन तुल्य इति। एवं विनिन्दितस्यापि पुनरुभयत्र ग्रहणेन शौचपदस्यैव अर्थान्तरपरतायां परमार्थप्रतिपादकतया फलविशेषहेतुतया नियमेनानुष्ठेयत्वलाभेन नियमतुल्येषु भागवतधर्मेषु युक्तो निवेश इति। शुचेर्भावो हि शौचं शुद्धिरिति पर्यायः। परमशुद्धिश्च निष्कामत्वेनैव भवति। अतस्तद्धेतुतयात्र निष्कामत्वमेव शौचशब्दार्थः। **यथाहुः**— "कर्मस्वसङ्गमः शौचमि" (११।१९।३९) ति। निष्कामत्वेनैव कृतस्य कर्मणोऽबन्धकत्वादिति (३) ॥ छ ॥

**तपः शिक्षेत्** (४)। [१]ननूभयत्र नियमपरिगणितस्योभयत्रग्रहणं किमर्थम्। मोक्तं विस्मार्षीः। शौचपदस्येव तपः पदस्याप्यर्थान्तरपरतायां विशिष्टफलहेतुतालाभेन अवश्यानुष्ठेयत्वसूचनाय उभयत्र निवेश इति। निषिद्धेषु कर्मसु मनोनिग्रहः परमं तपः। यथाहुः— "कामत्यागः परं तप" (११। १९। ३८) इति। निरूपितं चैतत् निपुणतरं [२]महदनिन्दात्मप्रशंसावर्जन-प्रकरणयोरिति (४) ॥ छ ॥ **तितिक्षां शिक्षेत्** (५)। सहनं हि तितिक्षा। **यथाहुः**— "तितिक्षा दुःखसंमर्ष" (११।१९।३७)- इति। ततः यद्यपि दुःखोद्वेगसंवहनमेव मुख्यं। तत्साधनोद्वेगसहनं तु ततोऽवरं। तथापि

---

१. भागवते ११।१९।३५ तमश्लोके। ग्रन्थान्तरे च। तथाहि— "तपः सन्तोषमास्तिक्यं दानमीश्वरपूजनम्। वेदान्तश्रवणं चैव ह्रीर्मतिश्च जपो हुतम्। दशैते मुनिभिः प्रोक्ता नियमास्तत्वदर्शिभिः" इति योगयाज्ञवल्क्यः।

२. इत्थं शरदिति (१३७) श्लोकव्याख्यावसरे तदनेनेति वाक्यमारभ्य।

Rarest Archiver

तत्सहनशक्तिमतां तत्साधनोद्वेगसहनस्य दुःशकत्वात्। तदेतदभिसन्धायोक्तम् ॥ **दुःखसंमर्ष इति** ॥ सा च। [१]**इन्द्रियजयप्रकरणे** प्रदर्शिता (५) ॥ छ ॥ **मौनं शिक्षेत्** (६)। ननु मौनस्य अन्यत्र नियमेषु यमेषु चापरिगणितस्यात्र यमेषु परिगणनं तथोभयत्र परिगणनं च कुतः। अन्यथा महानर्थस्य, करणे तु महापुरुषार्थस्य च सद्भावादिति ब्रूमः। तथा च [२]वक्ष्याम इति (६) ॥ छ ॥

**स्वाध्यायं शिक्षेत्** (७)। नन्वयमन्यत्र नियमेषु शब्दान्तरेण गृहीतः। मैवं। ततोऽन्यस्यैव श्रुत्यपरपर्यायस्योभयत्र ग्रहणात्। स्वाध्यायो भगवन्नामत्ववेदनम्। अत्र वक्तव्यं [३]मौननिरूपणावसरे वक्ष्यते (७) ॥ छ ॥ **आर्जवं शिक्षेत्** (८)। नन्वार्जवमन्यत्र यमेषु परिगणितं। अत्र यमेषु नियमेषु चापरिगणय्य, भागवतधर्मेषु [४]उभयत्रापि परिगणने को विशेषः। मैवं। तस्य सर्वधर्मदोषभूतकैतवनिवर्तकतया सर्वभागवतधर्मोपकारकतया श्रैष्ठ्यज्ञापनाय तथा कृतत्वात्। तस्य त्रिष्वपि करणेषु एकप्रकारत्वरूपस्य तद्विरोधिरूप-कापट्यनिवर्तकतायाः न्यायप्राप्तत्वात्। तस्य सर्वोपकारकत्वं च विशिष्टफला-धायकत्वेनेति प्रागेव प्रतिपादितं। अस्मिंश्चार्जवे निष्कामत्वरूपं शौचमेव हेतुरिति मन्तव्यम्। अत एव शौचस्यापि सर्वोपकारितया सर्वत्रानुस्यूतत्वमिति ज्ञेयं। अथवा-अन्यत्र यमेषु परिगणितस्याप्यत्र यमेषु नियमेषु चापरिगणय्य [४]उभयत्र परिगणनेनेदं सूचयति। नेदं यमनियमान्तर्गतत्वेन हेतुना भागवतधर्मेषु परिगण्यते। किं नाम मोक्षयोग्यस्य स्वाभाविकलक्षणतया दैवसम्पत्परिगणितं। तत एवात्यावश्यकमिदमिति (८) ॥ छ ॥

**ब्रह्मचर्यं शिक्षेत्** (९) ननु ''स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं ॥

---

१. यन्मैथुनादीति (१४१) श्लोकव्याख्यावसरे इदमुदितं भवतीत्यादिना।

२-३ जरायुजमिति (३०७) श्लोकावतारिकायां।

४. सप्तमे एकादशे च।

Rarest Archive

सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृतिरेव च। एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिण'' इत्युदितस्याष्टविधस्य मैथुनस्य ''कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा। सर्वत्र मैथुनत्यागं ब्रह्मचर्यं प्रचक्षत'' इति। सर्वथा त्यागो हि ब्रह्मचर्यं नाम। किमनेन ब्रह्मचर्येण कृतं स्यात्। भगवत्प्रावण्यासाधकत्वात्। तादृशस्यैव भागवतधर्मेषु परिगणनीयत्वात्। यथा अनेन तत्प्रावण्यं भवेत्, तथा कर्तव्यमिति, इतिकर्तव्यताविधानाय, अत्रोच्यते इति चेत्, निवृत्तिकर्ममात्रेऽपीतिकर्तव्यताविधानायारब्धत्वेन तत्तन्मात्रे विशिष्येतिकर्तव्यताकथनेन प्रयोजनाभावात्। ततोऽत्र नैतत्परिगणनं युक्तमिति। मैवं। तत्पदस्य अर्थान्तरविवक्षया सामञ्जस्यात्। सर्वेन्द्रियाणां तद्वृत्तीनां कायस्य तद्व्यापाराणां चेति सर्वेषां ब्रह्मणि चरणमेव ब्रह्मचर्यं इति स्वीकारात्। तत्प्रकारश्च प्रदर्श्यते [१]ब्रह्मचर्यकथनावसरे। एतदेव च भक्तौ मुख्यसाधनं [१]षडङ्गसेवात्वेनापि गीयते। यदत्र वक्तव्यं [१]तदुपरिष्टाद्वक्ष्याम इति (९) ।। छ ।।

**अहिंसां शिक्षेत्** (१०) कामक्रोधलोभमोहमदमत्सराख्याः षड्वैरिणो हि मुमुक्षोः। तत्र षट्सु त्रयः श्रेष्ठाः। त्रिष्वपि एकः श्रेष्ठः। तमाश्रित्यैवाधिकारिणो दुःखयति। ननु बालक इवापेक्षितदाने स्वयं शान्तो भवति। ततः कथं दुःखदो भवेदिति चेत्सत्यं। (तावतैव शान्तत्वे)। न चायमपेक्षितस्यैकस्य दानमात्रेण शान्तो भवति। किं नाम दत्तं दत्तं गृहीत्वा पुनराकांक्षत एवेति कदापि तस्यालम्बुद्धिः नास्त्येव। न चेदृशस्य अपेक्षापूरणं केनापि कर्तुं शक्यं पुरुषायुषापीति। ननु एषां ज्ञानं नास्ति तानधिकारिण एवं दुःखयेदेव। येषां तु शास्त्रजन्यं ज्ञानमस्ति तानेवं कथं दुःखयेदिति। मैवम् कामाख्ये वैरिणि सति तस्यैवोत्पादनायोगात्। यदि जन्मान्तरार्जितपुण्यवशेनोत्पद्यतेः तत्। तदापि तज्ज्ञानमेव प्रतिबध्य यथाऽपरोक्षं न जनयत्येव तथा करोति।

---

१. तत्वे मन इति (२५८) श्लोके।

Rarest Archiver

विरोधिप्रमाणसहस्रेणापि अचाल्यतैव हि परोक्षज्ञानपूर्णतायाः [१]काष्ठा। तादृशज्ञानवतोऽपि यदेदृशी दशा का कथा तद्विरहितानां ईषज्ज्ञानानां अज्ञानां वा। **तथाहि—** चोराणां मध्ये कश्चनाधिपतिः वेषान्तरेण कस्यचित्पुंसो गृहमागत्य तेन सह मैत्रीमादर्श्यावसरे सति तस्य यः स्वामी रक्षकः तं प्रति यथा अयं न गच्छेत् तथा प्रतिबन्धं ''समीपगमने स्वयमेव नश्येदि''ति दूरत एव कृत्वा, तस्य यः परमं मित्रं स्वामिने निवेदनद्वारा प्राप्तापत्परिहारकः तं च निरुध्य, एकाकिनं गेहपतिं मित्राय स्वामिने गत्वा वा आह्वानादिना वा प्राप्तानामापदामनिवेदनाय पृष्ठभुग्नशिरोधरतया विविधैः पाशैः निबध्य, स्वप्रियानानीय, तदीयं सर्वमप्यर्थं नाशयति। तथा अयं कामः स्वयमेक एव सकलसुजनहृदयसदन एव निवसन्तं, सदैव सदयहृदयेन भवभयापनुत्तये विविधानपि व्यापारान् कारयन्तं, ज्ञानविषयतया-भवन्तं, भगवन्तं, धूम इव धूमकेतुमावृत्य आभिमुख्येन प्रदर्शकतया सम्यगेव प्रदर्शकं, तत एवादर्शपदवाच्यमादर्शं मलमिव। स्वान्तः स्वयमिव स्थितस्यापि भगवतः स्वस्याप्यादर्शकमन्तःकरणं, ज्ञानकरणं, भवभयतरणं, तत एव जीवस्य परमप्रेमास्पदं प्रतिबध्य, जरायुरिव गर्भजीवं अधिकारिणं विविधविषमविषयसङ्गपाशैर्निबध्य तदर्थसार्थं सर्वमपि विनाशयति। तत्रापि विशेषः- यथा हि चोरा यो विशेषतः स्वामिनः कृपायाः पात्रं तस्य नाशयन्तोऽप्यर्थं नातीव नाशयन्तीति। किं नाम। स्वामिभयात् दूरत एव स्थित्वा, तेन तन्मित्रेण वा स्वकृतं नाशनं यावन्न ज्ञायते तावन्तमेव कालं न तदनन्तरम्। स्वामिने स्वयमेव वा मित्रमुखेन वा निवेदने वयमेव समूलं विनश्याम इति भयादेव। यस्मिंश्च स्वामिनो न विशेषतो दया तस्यार्थं नाशयन्तोऽपि न सर्वथा नाशयन्ति।

---

१. ''काष्ठोत्कर्षे स्थितौ दिशि'' इत्यमरः।

Rarest Archiver

**तत्रापि विशेषः—** यत्पूर्वत्र गेहपतिना तस्य मित्रेण वा यावत्स्वकृतनाशनं न ज्ञायते तावत्पर्यन्तमेवेति। अत्र तु तज्ज्ञानानन्तरमपि नाशयन्ति। पूर्वत्रेव स्वामिभयाभावात्। स्वयमेव वा मित्रमुखेन वा निवेदनेऽपि नास्मानेव निहनिष्यति, किं त्विदानीं वारयिष्यत्येव, विशेषतस्तस्मिन् प्रेमाभावात्। पूर्वत्र तस्मिन् प्रीतिविशेषेणोत्तरत्र नाशनं मा भूदेवेति नाशयिष्यत्येव। तथा न पूर्वत्रेव दूरत एव स्थित्वा, किन्तु समीपे स्थित्वा। पूर्वत्रेवात्र विशेषतः स्वामिभयाभावात्। यस्मिंस्तु स्वामिनो न सर्वथा प्रीतिः, स तस्मै न निवेदयत्येव, तस्य मित्रं च। स्वार्थे तु तं तन्मित्रं च दृढैः विविधैः पाशैः बध्वा तस्य गेहे एव स्थित्वा स्वस्य परमप्रेमपात्रभूतैरन्यैश्च सह तस्यार्थं निर्भयं सर्वथा विनाशयन्त्येव। तथायमपि विशेषतः प्रीतिपात्रं जनं, धूमः धूमध्वजमिव दूरत एव स्थित्वा आवृणोति। बाह्यमेव तादृशं, न स्वरूपमिति हृदयं। मध्यमं जनं तु मलमादर्शमिवावृणोति। स्वरूपमपि किञ्चित्तादृशं मिश्रमिति हृदयं। अधमं तु उल्बं गर्भमिवावृणोति। स्वरूपं विशिष्टमेव दुष्टकामाद्यात्मकमिति हृदयं। तत्रापि य उत्तमो जनः तं स्वामिनः परमप्रीतिपात्रं धूमोऽनलमिव आवृणोति। अत एव स जनः कामाद्यभिभूत इव लोकैर्दृश्यमा-नोऽपि न स्वयं तेनावृतः। **तथा चोक्तम्-बिम्बोपदेशकगुरुप्राप्तिप्रकरणे—** "न वै जनो जातु कथञ्चनाव्रजेन्मुकुन्दसेव्यन्यवदङ्ग संसृतिम्" (२१६)॥ इत्यादौ। यश्च मध्यमस्तं मलमादर्शमिवावृणोति। अत एव स जनः ईषदेव कामाभिभूतोऽपि प्रायेणानावृतमेवावतिष्ठते। **तथा चोक्तम्—**"शिलोञ्छवृत्त्या परितुष्टचित्तो धर्मं महान्तं विरजं जुषाणः। मय्यर्पितात्मा गृह एव तिष्ठन्नातिप्रसक्तः समुपैति शान्तिमि" (११।१७।४३) (१९२) त्यादौ **देशप्रशंसाप्रकरणे।** योऽधमस्तं तु जरायुर्गर्भमिवावृणोति। अत एव स जनो दृढतरं कामाद्यभिभूतो विनष्टस्वार्थः वणिगिव वनेषु संसारकान्तार एव बम्भ्रमीति। **तथा चोक्तम्-वैराग्यप्रकरणे-**

Rarest Archiver

"कथं प्रियाया अनुकम्पितायाः (७।६।१७)" (६३) इत्यादौ। तदेवं अधिकारिणां अपेक्षितपुरुषार्थसाधन-विघटकतया परमशत्रुषु काम एव वरिष्ठः। तस्याधिष्ठानतया प्रसिद्धेषु इन्द्रियेषु[1] मन एव वरिष्ठं, पुंश्चलीव परपुरुषस्य। स च, स्वयं तत्र न्यस्तपदः परपुरुषः स्वस्य मित्राणीव, क्रोधादीनपि निरूढपदानेव निरीक्षते। अतः स त्याज्य एव। तत्त्यागश्च कथितः तपः शिक्षेदिति। इदानीं तदनन्तरशत्रुः क्रोधोऽपि त्याज्य एवेत्याशयेनाह॥ **अहिंसां शिक्षेत्।** न केवलं कामत्याग एव परं तपः किं नाम क्रोधत्यागोऽपि। क्रोध एव हि मुख्यतो हिंसा नाम परपीडादिकं तु प्रायेण तत्कार्यतया तथाभिधीयत इति (१०)॥ छ॥

**समत्वं शिक्षेत्** (११)। नन्वन्यत्र यमेषु नियमेषु वा तुष्टिरपरिगृहीताऽत्र गृह्यते। सत्यम्। तेषामुदाहरणमुखेनोपलक्षण (त) या ग्रहणार्थं गृहीतत्वात्। यस्यावश्यकता स ग्राह्य एवेति। ननु तुष्टिरलम्बुद्धिरिति च अनर्थान्तरं, न च भक्तिसाधनेषु अलम्बुद्धिः तत्र प्रवृत्तौ उपयुज्यते। ततस्ततोऽन्यत्रैवेति वक्तव्यम्। तत्किमित्यतस्तद्विशदीकृतं पूर्वत्र॥ "ग्राम्येहोपरमःशनैरि" (७।१२।९)ति। अनेन ग्राम्यमेवान्यपदार्थः तत्रेच्छानिवृत्तिरेवालम्बुद्धिरिति किं तद्ग्राम्यं? यत्रेच्छानिवृत्तिरेव अलम्बुद्धिस्तुष्टिपदार्थो भवेदित्यतः तद्विशदीकरोति॥ **समत्वं द्वन्द्वसंज्ञयोरिति।** द्वन्द्वशब्दार्थेषु मुख्यं सुखं दुःखं चेति द्वन्द्वमेव। अन्यस्तु एतद्द्वन्द्वोपयोगितयैव द्वन्द्वपदार्थ इति अभिधीयते। एतदेव विभावयितुं सुखदुःखयोरिति वक्तुं शक्यत्वेऽपि द्वन्द्वपदेन द्वन्द्वयोरित्येवानभिधाय यद्द्वन्द्व संज्ञयोरिति चोक्तम्। अनेन सुखं दुःखं चेत्येतद्वयमेव ग्राम्यपदस्य अभिप्रेतार्थः इत्युदितं भवति। नन्विदं दुर्घटमिवाभाति। सुखं हि सर्वथा उपादेयमेव। प्राणभृन्मात्रस्य दुःखं तु हेयमेव। तत्रोभयत्र समता तु सुखस्यापि हेयत्वे, दुःखस्यापि उपादेयत्वे, वा भवेत् तच्च न सर्वस्यापि महाजनस्य मनोज्ञमिति

---

१. "इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते" इति **गीतायां** ३।४०।

Rarest Archives

कथमिदं विज्ञेयमिति। सत्यम्। तदेव समता भवेदिति। तत्र प्रथमपक्षमेवाश्रित्य समता ज्ञातव्या, परमपुरुषार्थार्थिना। यथाहि दुःखमनुपादेयं, तथैव ग्राम्यं भूतग्रामात्मकं विषयजन्यं (वैषयिकं) भौतिकं सुखमपि अनुपादेयमेवेति दुःखसाम्यमेव सुखे ज्ञातव्यम्। यथाहि श्रवणमात्रेण तमसो मूर्च्छादिकथनेनाधिकदुःखित्वं सिध्यति। तथा वैषयिकसुखेच्छामात्रेण दुःखोक्त्या दुःखेष्वधिकत्वमेव सिध्यतीत्यतः कात्र कथन्तेति। तदेतदभिप्रेत्योक्तम्। **दुःखं कामसुखापेक्षेति** (११।१९।४२)। किमनेन वैषयिकसुखमात्रे हेयत्वज्ञानेन। तत्रेच्छानिवृत्तिरूपः उपरम एवेति ब्रूमः। तेनापि किं? तत्र रागनिवृत्तिंरूपं वैराग्यभाग्यमेवेति। ननु कस्मिंश्चित् ग्राम्यसुखेच्छानिवृत्तिश्चेत् कथञ्चित्साधकस्य (शक्या) युक्ता। ग्राम्यसुखमात्रे त्वशक्यैव। मैवम्। अभ्यासस्य अशक्याभावात् आदौ एकं सुखं जैह्व्यम्। तथैकं भोगं गन्धलेपनरूपं परित्यज्य, तथैव मासवर्षादिरूपे काले गते सति अभ्यासपाटवेन तत्रेच्छानिवृत्तौ सत्यां पुनरेकं सुखं एकं भोगं च श्रीहरिप्रीत्यर्थं त्यक्ष्यामीति सङ्कल्प्य अभ्यासे कृते क्रमेण कालतः सर्वत्रेच्छानिवृत्तिः सुशक्येति। तदेतदाह॥ **शनैरिति**॥ **यथाहुः—** ''मदर्थे च परित्यागो भोगस्य च सुखस्य च'' (११।१९।२३) इति। ननु तथापि ग्राम्येहोपरमः साधयितुं अशक्यो दृश्यते। यतो दृष्टमल्पं अल्पकालस्थितं च तत्र कथञ्चिदीहोपरमः सम्भवेत्, अदृष्टं तु महदनल्पकालस्थितं च तत्र स कथं सम्भवेत्। यथेदं दृष्टं नश्यति तथा अदृष्टमपि इत्येतदृष्टान्तेन तस्यापि अनित्यासारतानुसन्धानसम्भ-वात्। **यथाहुः—** ''कर्मणां फलरूपत्वादाविरिञ्चादमङ्गलम्। विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवदि''ति (११।१९।१८)। इदमप्याह॥ **शनैरिति**॥ **अथवा** अरिवर्गे यथा कामो महन्निन्दाविषयः सर्वथा परित्याज्यः, यथा च क्रोधो महत्सु तद्वधादधिक इति सर्वथा त्याज्यः, तथा मोहोऽप्ययं मुक्तिपरिपन्थीति परित्याज्य एव सर्वथा इत्याशयेनाह। **समत्वं द्वन्द्वसंज्ञयोरिति**॥ **अयमाशयः—** सुखदुःखयोः

Rarest Archiver

मानापमानयोः लाभालाभयोः जयापजययोः इत्येवमादिकयोः द्वन्द्वसंज्ञयोः। तद्विषयकः सर्वेषामपि मोहोऽस्त्येव। कथं। यद्यस्तुखं दुःखं वा, मानमपमानं वा, लाभालाभौ वा, जयपराजयौ वा, इत्येवमादिकं श्रीहरिणा गुणकर्म-कालादिनाम्ना दीयते। तत्सर्वमपि शिरसा वन्दनं कृत्वा उपादेयमेवेति महतां मतम्। तत्र सुखादिकमेवोपादेयं, न तु दुःखादीति मिथ्याज्ञानमेव। तदेव च मोहपदाभिधेयम्। अयमेव च द्वन्द्वमोह इति गीयते। अयमपि कामादिवदेव ज्ञानादिप्रतिबन्धकं इति तत्त्याग आवश्यक एव। त्यागे हेतुश्च यथा श्रीहरीच्छाप्राप्तत्वात् सुखादिकमुपादेयं, तथा दुःखादिकमपीति सुखादिसाम्यमेव दुःखादावपीति द्वन्द्वयोः (साम्य) सम्यग्ज्ञानमेवेति। **यथाहुः—** ''यथा दारुमयी नारी यथा यन्त्रमयो मृगः। एवं भूतानि मघवन्नीशतन्त्राणि विद्धि भो॥ पुरुषः प्रकृतिर्व्यक्तमात्मभूतेन्द्रिया-शयाः। शक्नुवन्त्यस्य सर्गादौ न विना यदनुग्रहम्। अविद्वानेवमात्मानं मन्यतेऽनीशमीश्वरम्॥ आयुः श्रीः कीर्ति-रैश्वर्यमाशिषः पुरुषस्य याः। भवन्त्येव हि ते काले यथानिच्छोर्विपर्ययाः॥ तस्मादकीर्तियशसोर्जयापजययोरपि। समः स्यात्सुखदुःखाभ्यां मृत्युजीवित-योस्तथे''ति '(६।१२।१०-१४) (११)॥ छ॥

**सर्वत्रात्मेश्वरान्वीक्षां शिक्षेत्।** (१२) न सकृत्परोक्षज्ञानमात्रेण पूर्यते। किं नाम पुनः पुनः भगवति मनोयोजनेन भाव्यम्। तत्रैकस्मिन्नेव रूपे मनोयोजने तन्द्र्यादिके प्राप्ते रूपान्तरेऽपि योजनीयम्। एवं च सत्येव तीव्रं (शीघ्रं) अपरोक्षं भवतीति भावेन समाधानं त्रिविधम्। यथावस्तुज्ञानमेकम्। तादृशं ध्यानं द्वितीयम्। तादृशं सर्वसमर्पणं तृतीयम्। तत्राद्यं तावदाह॥ **सर्वत्रेति॥** भगवतो हि रूपद्वयम्। आत्मस्थमात्मनामकमेकम्। एतदेव च पुरुष इति जीव इति प्रत्यगिति वासुदेव इति हरिरिति च गीयते। आत्मनः बहिःस्थितं कालनामकं द्वितीयम्। एतदेव ईश्वर इति च भाष्यते। तथा च अन्तर्बहिरिति

Rarest Archiver

सर्वत्र आत्मनः ईश्वरस्य च ईक्षणमनुसृत्य ईक्षणं पुनःपुनरीक्षणं तद्रूपं समाधानं शिक्षेदिति। ननु पुनःपुनः भगवति मनः योजनीयम्। तत्रैकस्मिन्नेव मनस्यवस्थिते पुनः पुनः तत्रैव मनो योजनीयम्। अनवस्थाने तु पुनः पुनः यथाभिलाषं नवे नवे एव योजनीयं, रूपभेदेनापि मनोयोजनलाभेन ध्यानप्रतिनिधिलाभादित्यभिसन्धाय रूपद्वयमेवोक्तम्। तत्कथमित्यतो बिम्बोपासनाप्रकारविज्ञाने सति एकमेव अनेकं भवति विशेषविदामिति इदानीमेव किं तया चिन्तयेति रूपान्तराण्येव पार्थिवपांसुपरिगणनापटीयसा मनसा विबुधायुषापि विचारेणापि नवनवान्येव विद्यन्ते, रूपदारिद्र्याभावात् इति कात्र कथन्ता इत्याभिप्रायेण तद्विवृणोति॥ **तेष्विति** (७।१२।१०)॥ पश्वादिरूपेषु भूतेष्वात्मा अस्तीति, तथा देवता अस्तीति, बुद्धिः यदा पश्वादिषु, तदा सुतरां नृषु कर्तव्या। तत्र सर्वत्रापि नैकप्रकारेणाविर्भावः। किन्तु रूपे तारतम्याभावेऽपि आविर्भावतारतम्यमस्त्येव। तच्चानुसन्धेयं भावुकेन इति भावेन **यथार्हत** (७।१२।१०) इत्याहेति॥ (१२) छ॥

**कैवल्यं शिक्षेदिति** (१३)। ननु केवलः सहायरहितः तस्य भावः कैवल्यं एकाकित्वमेव। अर्थान्तरस्यात्र अनवसरदुःस्थत्वात्। तच्च किमित्यत्र परिगण्यते। अत्युत्तमार्थवेदकत्वाभावात् इत्यतस्तद्व्याख्यातं पूर्वत्र। **त्याग इति**॥ ननु इदमपि तादृगेव, यतस्त्यागो दातृत्वमेवेति अनर्थान्तरमिति चेत्। मैवम्। त्यागशब्दस्य अर्थान्तरपरत्वात्। त्यागो हि मुख्यः संन्यास एव। सर्वेषां त्यागत्वेन परिपठितानां तदर्थतयैव तत्पदबोध्यत्वात्। अन्यथा क्रियावर्जनादि-रूपाणां तेषां शिलादावपि सत्वेन तद्वतां तत्सदृशत्वेन आदरणीयत्वापत्तेः। तदेतदभिसन्धायाह॥ **त्यागः संन्यास उच्यत** (११।१९।३९) **इति**। नन्वस्य त्यागशब्दार्थत्वे बहुविप्लवापातः यथाहि भागवतधर्मेषु सन्यासिनः प्रवर्तन्ते। तथा गृहस्थादयोऽपि बहवो जनकादयः। अस्य तदर्थत्वे तु तेषां प्रवृत्तिरेव न

Rarest Archive

स्यादिति। मैवम्। संन्यासस्यात्र वैवक्षिकत्वात्। तदेतदभिसन्धाय गृहीतं, यमेष्वस्तेयमिति। नन्वयमर्थः नातीव समञ्जसः। ''कर्मणा मनसा वाचा परद्रव्येषु निःस्पृहा। अस्तेयमिति तच्चोक्तं'', इत्यादिना सर्वथा परद्रव्यापहरणाभावरूपत्वावगमात्। तस्य च पातकेषु परिगणिततया तत्त्यागस्य प्रसिद्धतरतया अत्र वक्तव्यतावश्यम्भावाभावात्। तेन प्रयोजनविशेषादर्शनाच्चेति चेत्। मैवम्। अस्तेयपदस्य अर्थान्तरविवक्षया सर्वस्य सामञ्जस्यात्। भगवानेव हि स्वशक्त्या पुरुषदेहं निर्माय तत्र स्थित्वा स्वसृष्टैरेव इन्द्रियैः विषयान् भुङ्क्ते **इत्यध्यात्मप्रकरणे**[१] निपुणतरं निरूपितम्। सत्यप्येवं ममैव देहः तथा एतानि च करणानि, एतैरहमेव यक्ष्ये, भोक्ष्ये इत्याद्यनुसन्धानं भवति। तत्परित्याज्यं भावुकेन। यत एवमनुसन्धाने भगवतः कर्तृत्वं भोक्तृत्वं, शरीरेन्द्रियस्वामित्वं, च अपहृतं भवति। एतदेव च स्तेयं नाम मुख्यम्। मुख्यार्थस्यैवापहृतत्वात्। एवमनुसन्धानपरित्याग एवास्तेयमिति। ननु भगवतः एव सर्वक्रियाकर्तृत्वे, तत्फलभोक्तृत्वे, देहेन्द्रियस्वामित्वे च, अनादितो विद्यमाने सति, मध्य एव जीवस्यैवमनुसन्धाने किं बीजम्। उच्यते। अनादिरयं देहेन्द्रियादिसन्घातप्रवेशात्मकः संसारः जीवस्येति तावन्निर्विवादं। तत्र अनादित एव श्रीहरीच्छया प्राप्तशरीरस्थिततया अनादितः स्थितमेव अनुसन्धानमिति किं बीजप्रश्नेन। सत्यम्। अनाद्यपि किं निमित्तकं? नहि निर्निमित्तः संसारः। यतो भगवतो वैषम्यापातेन अनाद्येव किमपि निमित्तमनुसरणीयम्। तच्च किमिति प्रश्नाभिप्रयः इति चेत्। त्रितयाज्ञानं[२], तत्सन्निधे(धि)श्च अनादित इति वदामः। बहुकालस्थिते स्वनिकटस्थितद्रव्ये तथा दर्शनादिति। **यथाहुः—** ''यतो यतो

१. स वा इदमित्यत्र (२३६)।

२. भगवतः कर्तृत्वं, भोक्तृत्वं, शरीरेन्द्रियस्वामित्वं, चेत्येतत्त्रितयं तस्य अज्ञानं। अत्र हेतुमाह ॥ **तत्सन्निधेश्चेति** ॥ अनादितः तत्सन्निधिरेव हेतुः इति भाति।

Rarest Archive

निवर्तेत विमुच्येत ततस्ततः। एष धर्मो नृणां क्षेमः शोकमोहभयापह'' (११।२१।१८) इति (१३) ॥ छ ॥

अस्तेयादिरूपं यममनुतिष्ठन् दारादिकं त्यक्त्वा स्वयं केवल एकाकितया तीर्थाटनरूपं [1]नियममपि कुर्यादिति आपाद्यते योगानुशासनेषु। तदभिप्रायं दर्शयितुं स्वयमपि नियमेषु परिगणितं तीर्थाटनमित्येतद्व्याचष्टे ॥ **अनिकेतनं शिक्षेदिति (१४)** ॥ निकेतनं नियतस्थानम्। तन्नियमाभावं **शिक्षेदिति। अयमभिप्रायः–** एकत्रैव वासकरणे गेहादिपरिग्रहावश्यम्भावेन तत्राभिमानोत्पादेन तदपायादिना मनोव्यथा माभूदिति इति॥ छ॥ अथवा योगशास्त्रेषु तीर्थाटनं कुर्यादित्युच्यते। तस्य च अयमेवार्थो मुख्यः नान्यः इति वक्तुं नियमेष्वाह ॥ **तीर्थाटनमिति ॥ अयमाशयः–** तीर्थशब्दो मुख्यतः पावनेषु वर्तते। नान्यत्र। तत्र प्रयोगस्तु न तत्त्वविदां मनोज्ञः। तादृशास्तु भगवत्तत्त्वविदो भागवता एव, अतस्तेभ्य उपदेशाद्यर्थं तद्गवेषणाय अटनमेव तीर्थाटनं नाम। तदेव कर्तव्यं कुशलेन न तु मूढाभिमततीर्थाटनमिति। **तथा चोक्तम्—** ''यत्तीर्थबुद्धिः (१०।७२।१३) सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखर'' इति। नन्वस्तु एवमेव तीर्थाटनशब्दार्थः। तथापि तद्व्याख्यानाय प्रवृत्तस्य अनिकेतनमित्यस्य तु कोऽर्थ इत्यतो नेदं पदार्थकथनमुखेन व्याख्यानाय प्रवृत्तम्। किं नाम तेभ्य उपदेशाय गवेषणं कर्तव्यमित्युदिते तदुपदेशेन भाव्यं ज्ञानं कीदृशमित्याशङ्कायां क्षिप्रप्रवृत्तये तत्प्रयोजनकथनमुखेनैवेति भावेन तद्दर्शयति ॥ **अनिकेतनमिति ॥** नन्विदं नात्युक्तमार्थज्ञापकं दृश्यते, अतः कथं तत्प्रयोजनमिदं भवेत्। कथं च भागवतधर्मेषु ईदृशस्य परिगणनमिति चेत्। मैवं। अः अकारवाच्यो विष्णुरेव, मम निकेतनं , नान्यज्जडं, तस्याधारताशक्त्यभावात्। तदाधारताप्रतीतेः भ्रान्तित्वात्, इत्यर्थान्तरविवक्षावशेन सर्वस्य

१. ''तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवन''मिति तन्मध्ये परिगणितत्वात्।

Rarest Archive

उपपत्तेरिति। एतेन एतदपि निरस्तम्। सात्विकादिभेदेन कर्त्रादित्रैविध्यमिव स्थानत्रैविध्यमेव सर्वत्रोक्तम्। अत्र तु चातुर्विध्यमपि उच्यते। तच्च अनुपपन्नमिवाभाति। वनं सात्विकं, राजसः ग्रामः, द्यूतसदनं तामसमिति, त्रैविध्यमभिधाय, ''मन्निकेतं तु निर्गुणं'' इति चतुर्थी विधा प्रदर्शिता। नहि वनादितो गुणकार्यतायां देवालयादेर्मात्रयापि विशेषं पश्यामः। येन मुख्यं निर्गुणपदाभिधेयमिति चतुर्थीं विधां सम्भावयामः। यदि च सत्वगुणकार्य-ज्ञानादिसाधनतया त्रिषु सात्विकत्वादिकं गौणमभिहितं, तदापि देवालयतुलसीकाननादेरपि सात्विकत्वमेव भवेत्। न तु निर्गुणत्वमितीति[1]। मन्निकेतं मद्रूपम्। निकेतनमित्यनमेन अर्थान्तरस्य अत्युत्तमस्य सूचितत्वात्। निर्गुणताया मुख्याया एव श्लिष्टतमत्वात्। एतेन एतदपि सूचयति। वनादावपि तथानुसन्धानवतः तदपि निर्गुणमेव। सात्विकाद्युक्तिस्तु तदभावदशायामेवेति। वनादिकमपि न वनादित्वेनैव सात्विकादिभावमापद्यते। तथा सति नियमेन सत्वज्ञानादिसाधकत्वापत्त्या ''भयं प्रमत्तस्य वनेष्वपिस्यात् (५।१।१७)'' इत्यादिकमयुक्तं स्यात्। ततो यथा ''रस्याः स्निग्धाः'' इत्यादिना सात्विकत्वादिभेदेन उक्तानामपि न स्वादुत्वादिना तत्वम्। तथा सति बहुविप्लवापत्तेः। किं नाम सज्ज्ञानसाधनत्वाद्यवस्थाव्यवस्थयैव। सापि पुरुषदेशादिव्यवस्थयैव व्यवस्थिता यस्य यत्र यदा यदेव शरीरेन्द्रियोपचायकतया सज्ज्ञानोपयोगि तदेव तस्य तत्र तदा सात्विकमिति। उदाहरणस्य अहिंसादिवत्तादृशवस्तुज्ञापनेनैव चरितार्थत्वात्। प्रायस्तेषामेव तथात्वेन ग्रहणसम्भवादिति (तथैव) सज्ज्ञानसाधनत्वाद्यवस्थया व्यवस्थैवेति वक्तव्यम्। तथैव वनादिकमपि यस्य यदा यत्र गुणकृतमनोऽविकारकारकं तस्य तत्र तदा निर्गुणमिति। तत्वं च वनादीनां गौणानां तत एव स्वस्वकार्यकारणशक्तिमतामप्येवमनुसन्धानेन

---

१. अस्य एतदपि निरस्तमिति पूर्वेणान्वयः।

Rarest Archive

बहुकालिकेन भविष्यतीति भवितव्यं तत्रादरवता भागवतेनेति साधूक्तम्— **''मन्निकेतं तु निर्गुणमि''ति** ।। अन्यद्गुणनिवृत्तिप्रकरणे[1] वक्ष्यामः इति (१४) ।। छ ।।

प्राक्कैवल्यशिक्षणावसरे स्वस्य कर्तृत्वं, भोक्तृत्वं, देहेन्द्रियस्वामित्वं त्याज्यं, तत्त्याग एव कैवल्यं, तद्रूपेणास्तेयेन च शीघ्रमेव अपरोक्षज्ञानं भवति। ततः सर्वसांसारिकदुःखनिवृत्तिरूपो मोक्षोऽपीत्यभि-हितम्। तत्र यथा अस्तेयं अन्तरङ्गसाधनं तथा इदमपीत्याशयेनाह। **विविक्तं शिक्षेदिति (१५) ॥** ननु किमिदं विविक्तम्। यदि विवेक इत्यभिमतं, तथा सति विवेक इत्येव वाच्यं स्यात्। न च विवेकोऽपि विना वचनविषयं ज्ञातुं शक्यः। यदि च योग्यतया नित्यानित्यवस्तुविवेक इत्युच्यते, तदापि न तस्यात्र वक्तव्यता, प्रागेवोक्तत्वात्[2]। यदि वा ज्ञानसाधनेषु परिगणिततया विविक्तदेशसेवित्वं लक्ष्यते, तदापि तस्यावक्तव्यता। अत्युक्तमार्थालाभादिति चेन्मैवम्। तादृशार्थान्तरस्य विवक्षितत्वात्। वस्तुतो यो विविक्तः स्वात्मनस्तस्यैव देशस्य गृहस्य मानुष्यशरीररूपस्य, सेवित्वं सेवा। तत्र वसनमिति यावत्। एतच्च मनुष्यमात्रेऽप्यस्ति, किं ततः। तादृशोऽपि योऽहमित्यात्मभावं मनुते स मूर्खो भ्रान्त एव। सत्यं किं कर्तव्यम्। तेनेदमेव। यस्मिन् गृहे अहम्बुद्ध्या भ्रान्तस्तद्गृहं च आत्मनो विविक्तं शिक्षेत्, सम्यगेव जानीयात्। तस्य शीघ्रमेवापरोक्षादिहेतुत्वात्। यतः सुदुर्लभमपि व्यर्थीकृतवान् अतः स मूर्ख एव। अनिवर्त्यभ्रमत्वात्। अतः स दुराराध्य एवेति नैतत्संसर्गविशिष्टः सुरेन्द्रलोकोऽपि सतां माभूदिति। अभ्युपगम्य चेदमुदितम्। वस्तुतस्तु स न मनुष्यशरीरे स्थितः, किन्तु पशुरेव। **तथा चोक्तम्—** ''यस्यात्मबुद्धिः कुणपे त्रिधातुके। स एव

---

१. अविद्यमानोप्यवभाति (३५०) इत्यस्य व्याख्याने।

२. समत्वं शिक्षेदित्यत्र।

Rarest Archiver

गोखर''इति। तदेतदभिसन्धायाह। **मूर्खो देहाद्यहम्बुद्धि** (११।१९।४३) रिति। [1]गृहं शरीरं मानुष्यमिति (११। १९।४४) च। **यथाहुः**— ''तदेतदधिगच्छन्ति विष्णोर्यत्परमं पदम्। अहंममेति [2]दौरात्म्यं न येषां देहगेहजं''(१२।५।३३) इति (१५) ॥ छ ॥

तदेवं उक्तसाधनसम्पन्नस्याधिकारिणः कीदृशं फलं स्यादित्यत आह ॥ **चीरवसनं शिक्षेदिति** ॥ (१६) ननु किमिदं चीरवसनम्। सुबहुकालं भुक्तं भुक्तं केवलं नशिष्णु पथि क्षिपन्ति, तदेव। तथाचोक्तम्— ''चीराणि किं पथि न सन्ती''ति। तर्हि शिक्षेदिति कथम्। न हि पथि च्युतस्य खण्डपटस्य ग्रहणे गुरोराज्ञापेक्षिता। कथं तर्हि परगृहे भोजनार्थं स्थितस्य गुरोराज्ञा। सत्यम्। न तत्र गुरोराज्ञापेक्षितेति। तथापि गुरुं परित्यज्य तत्समानानां शिष्यत्वप्राप्तये गुरोराज्ञा तावदपेक्षितेति सिद्धमेव। अन्यत्रापि तदनुसरणे तत्प्रीतिविशेषो भवेदिति तदनुसरणमिति चेत्समः समाधिः। सत्यम्। न गुरोरनुज्ञया भोजने किञ्चिदुपकारः। तेन भोजनेन महाफलप्राप्तौ तस्योपयोगः। अत एव अनुज्ञाप्रार्थनायां ''श्रीहरेः प्रसादोऽस्तु'' इति वदन्तीति चेत्, सम एव समाधिः। चीरवसनवसनेन महाफलमिति चेत्, भोजनेनापि सत्यनुसन्धाने तत्फलं केनापि वक्तुमशक्यमिति चेत्, सम एव समाधिः। शुकादिभोजने तथा दृष्टमिति चेत् द्रौपद्यादिवसनदानेऽपि दीयतां दृष्टिः। नन्वलं वादेन। परमार्थ एव कथ्यताम्। कथ्यते। यथाहि कश्चित् संसारी चीरवसनं त्यक्त्वा नूतनं सङ्गृह्णाति। (तदप्येवमिति)। न तथायं भागवतधर्माणामनुष्ठाता। किन्तु यद्भोगाय शरीरं सङ्गृहीतं तदेव स्वीकुरुते। न त्वभिनवम्। कोऽर्थः। अमायया भगवद्भक्त्या युक्तः, तद्भक्तेष्वपि तारतम्येन तद्युक्तः, निष्कामो, महतां निन्दया

१. किं गृहं इति प्रश्नस्योत्तरम्।

२. दौर्जन्यमिति पाठः विजयध्वजीये।

Rarest Archiver

स्वात्मप्रशंसया च विरहितः, तत्तत्कालप्राप्तकामाद्युद्रेकसहिष्णुः, सर्वशब्दानां भगवन्नामतया अनुसन्धाता, तत एव तेषामन्यत्राप्रयोक्ता, त्रिष्वपि करणेषु एकविधप्रवृत्तिमान्, देहेन्द्रियव्यापारान् सर्वानपि भगवत्येव योजयन्नक्रोधः, यथा दुःखं हेयं तथैव ऐहिकामुष्मिकं वैषयिकं सुखमिति जानन्, श्रीहरीच्छया प्राप्तं दुःखमपि सुखमिव सादरं भुञ्जानः, स्वात्मनि स्थितं, आदानादिसकलव्यापाराणां कर्तारं, उभयज्ञानस्य दातारं, आत्मनामन्तः पुरुषनामकम्। बहिःस्थितं, ज्ञानकर्मोभयफलदातारं, तत एव पातारं कालनामकं सदैव भावयन्, तत्रालस्यादावन्यत्रापि प्राणभृन्मात्रेष्वेवमेव रूपद्वयं विभावयन् कर्तृत्वं भोक्तृत्वं शरीरेन्द्रियादिस्वामित्वं च तस्मिन्नेव संन्यस्य शयनासनादौ सर्वत्र श्रीहरिमेव चिन्तयानः, यावत्प्रारब्धं शरीरं तावदेवानुभवन्, कुर्वन्नपि कर्माणि, न पुनः शरीरारम्भकाणि करोति इति (१६) ॥ छ ॥

**सन्तोषं शिक्षेत्** (१७) ॥ ननु ''वार्तासञ्चयशालीनं शिलोञ्छ'' इति जीविकाचतुष्टयं विहितम्। तत्रासञ्चय इति यमेषु परिगणितः। यदि चेतरेषां त्याग एव विवक्षितः तर्ह्यस्यापि त्याग एव भवेत्। विहितानां मध्ये एकत्रपक्षपातायोगात्। तेषामपि ग्राह्यत्वे तन्मात्रग्रहणमयुक्तमित्यतः स्वाशयं प्रकटयति ॥ **सन्तोषं शिक्षेदिति ॥ अयमाशयः—** चतुर्विधा अपि ग्राह्या एव, तथापि न तत्कथनं व्यसनितया क्रियते। किन्नाम उपासनाया विघ्नो न भवेदित्येतदर्थमेव। तथा च यथा विघ्नो न भवेत् तथा वर्तितव्यमिति। अयं चार्थो विना वचनं कथं प्रतीयेत, इत्यतस्तदनुवादेनायमर्थः प्रदर्श्यते। अनुवादश्चोपलक्षणया अन्येषामपि भवत्येव। अतोऽनेनैव अभिप्रायेण तावन्मात्रग्रहणमिति। कथं सन्तोषं शिक्षेदित्येतावता अयमर्थः सिद्ध्यतीत्यतः शेषपूरणेन व्याख्याति ॥ **येन केनचिदिति ॥** नास्माकं वृत्तिप्रभेदवक्तॄणामिदमेव कार्यमित्याशयः। किन्नाम उपासकेन वार्तादिना लब्धेन वा यदृच्छया लब्धेन वा

Rarest Archiver

सन्तुष्टमनसैव भाव्यम्। तथा सत्येव उपासाया विघ्नो न भवेदिति। यदन्यद्वक्तव्यं तत्प्रागेवोक्तम्। वक्ष्यते च। अनेन पूर्वत्र सन्तोष इति विवृतं वेदितव्यम् ॥ छ ॥ (१७)

[१]**परार्थेहां शिक्षणीया (१८) ॥** ननु ''कर्मणा मनसा वाचा परद्रव्येषु निःस्पृहा। अस्तेयमिति सम्प्रोक्तमि''ति अन्यत्र अस्तेयतयोक्ता निःस्पृहा। अत्र अस्तेयशब्दस्य अर्थान्तरपरत्वेऽपि परद्रव्येषु निःस्पृहा इत्यंशस्तावदभ्युपेय एव। तस्याः पातकेषु परिगणिततया तत्त्यागस्यावश्यकत्वात्। तत्कथमुच्यते परार्थेषु परद्रव्येष्वपीहा शिक्षणीयेत्यतः सत्यम्। परद्रव्येषु निःस्पृहेत्यंशः स्वीकर्तव्य इति। तथापि नात्र सा विवक्षिता। किन्नाम। परो मोक्षसाधनादन्यः तद्विरोधी च योऽर्थः साधनसङ्घः तस्मिन् ईहा इच्छा तदीक्षणं इत्यर्थान्तरस्य स्वीकारादित्यभिप्रेत्य तद्व्याख्याति ॥ **नृणां विपर्ययेहेक्षेति ॥** ननु विदितमे-तत्। परद्रव्येषु निःस्पृहेत्यंशः अभ्युपगम्यत एव। परार्थेहा यदि परद्रव्येहेत्यर्थः स्यात्, तदा हि तद्विरुध्येत। न चैवमस्ति। परो मोक्षसाधनादन्यः तद्विरोधी च योऽर्थः तत्र जनैः क्रियमाणा या ईहा तदीक्षणमेवपरार्थेहापदविवक्षितोऽर्थ इति। न चानया परेषां नृणां परार्थेषु ईहेक्षया तत्प्रवृत्तीक्षया वा स्वस्य प्रयोजनमस्ति। स्वयं तावन्मोक्षसाधनेभ्यः अन्यानि तद्विरुद्धानि यानि तेष्विच्छां प्रवृत्तिं वा परित्यज्य मोक्षसाधनश्रवणाद्यनुष्ठानेनैव अलम्। तावतैव स्वप्रयोजनसिद्धेरिति चेत्। सत्यम्। तथापि परेषां तदिच्छां तद्वचनादिना विज्ञाय प्रवृत्तिप्रतिषेधनं, प्रवृत्तिं वा वीक्ष्य तत्परित्याजनं नानोपायैः कर्तव्यमेव। ततः श्रीहरिप्रीतिः स्वयं साधनानुष्ठानादपि वरीयस्येव भवतीति महाप्रयोजनसद्भावादिति। अभ्युपगम्य चेदमुदितम्। परद्रव्येष्वीहैव स्पृहैव परार्थेहा इत्यङ्गीकृतावपि न विरोधः। नन्वन्यत्र संन्यासं गृहीत्वा त्रिदण्डीभूत्वा योगमभ्यसेदित्युक्त्वा, त्रिदण्डित्वं

---

१. ''तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनमि''ति नियमपरिगणितां परार्थेहां व्याख्याति।

Rarest Archiver

नाम न वेणवस्त्रयः। किंनाम, मौनेन वाचां दण्डः, अनीहया चेतसो दण्डः, वायुधारणायासेन देहस्य दण्डः, इत्येव प्रमाणप्रमिता मुख्या दण्डा एत एव। ते तु अमुख्या इति न तैर्मुख्यं त्रिदण्डित्वमिति नासौ मुख्यतया यतिपदार्थ इत्युक्तम्। **यथाहुः—** ''मौनानीहानिलायामैर्दण्डोवाग्देहचेतसाम्। न ह्येते यस्य सत्यङ्ग वेणुभिर्न भवेद्यतिरि'' (११।१८।१७) ति। तेन ज्ञायते सर्वत्रानीहा कर्तव्येति। अन्यथा मनोदण्डनाभावेन अमुख्ययतित्वापत्तेः। तत्कथमनुज्ञायते परद्रव्येषु स्पृहैव परार्थेहेत्यङ्गीकृतावपि न विरोध इति। सत्यम्। परार्थेषु परद्रव्येष्वपि परार्थमेवेहा न तु स्वार्थमित्यङ्गीकारात्। अनीहावचनं तु स्वार्थमेवेति। युक्तं चैतत्। अन्यथा स्वप्रयोजनहान्यापत्तेः। न चानीहादिभिरेव मनआदेर्दण्डनं कर्तव्यमिति कुलधर्मः। परार्थं परोपकारार्थं परद्रव्येष्वपीहया महापुरुषार्थलाभस्योक्तत्वात्। न हि मनोदण्डनं व्यसनितया क्रियते। किंनाम पुरुषार्थविशेषापेक्षयैव। स चेदीहयैव किं तया अनीहाचिन्तया। एतेन मौनेन वाग्दण्ड इत्येतदपि उक्तोत्तरम्। सर्वथा शब्दाप्रयोगरूपस्य तस्य स्वप्रयोजनहान्यापादकतया वक्ष्यमाणत्त्वात्। शब्दप्रयोगेणैव महापुरुषार्थलाभे तस्यानवकाशत्वाच्च। एतेनैव च वायुधारणया देहदण्डनमपि व्याख्यातम्। विनैव वायुधारणायासं महापुरुषार्थलाभे तदनुष्ठानस्यावश्यम्भावाभावस्य उदितत्वात्। सत्यम्। विनैव मनोवाक्कायदण्डं महापुरुषार्थलाभो भवतीति। तथापि त्रिदण्डिताभावेन मुख्ययतिता न भवतीति चेत्। माभूत्। किं तया अजागलस्तनायितयेति वक्तुं शक्यत्वेऽपि अभ्युपगम्य त्रिदण्डितामुपपादयति॥ **मनोवाक्कायदण्डं चेति (१८)** ॥

**इदमुदितं भवति—** अत्रोपासनायामधिकारी द्विविधः। सिद्धः साधकश्चेति। तत्राद्यस्य श्रीहरिध्यानादिकमेव मुख्यं कर्तव्यम्। द्वितीयस्य तु प्राणिनामुपकार एव। तेनैव श्रीहरिप्रीतिविशेषसद्भावात्। ततो द्वितीयेन

Rarest Archive

स्वयोग्यं कृत्वा विपरीतेषु प्रवृत्तान् प्राणिनो वीक्ष्य तेषामुपकारः कर्तव्यः। मनः स्वभावतः परोपकारार्थं सर्वथैव न प्रवर्तत इति सर्वानुभवसिद्धम्। तादृशस्यापि मनसो दण्डनं तत्रैव नियोजनरूपम्। तथा वागपि लोहशलाकया विद्धेव न परोपकरणाय प्रवर्तत इति च। तादृश्या अपि वाचः तत्रैव विनियोगरूपम्। तथा कायोऽपि कशासहस्रताडितोऽपि विवश एव पतति। न तु परोपकृत्यै पदमेकमपि प्रक्षिपति। तादृशस्यापि कायस्य दण्डनं तदर्थमेव गमनागमनादिरूपं च शिक्षेत्। इदमेव हि मुख्यं त्रिदण्डित्वमिति यतितापि मोक्षार्थं प्रयतमानस्य तव तादृशरूपा मुख्यैव सिद्ध्यतीति ॥ अथवा तपःप्रतिपादनावसरे ''कामत्यागः परं तप'' इति अभिहितं, तदयुक्तम्। कामस्यैव त्यागे महोपप्लवापातात्। न हि विना मोक्षकामं तत्साधनेषु कामो भवति। न च तत्त्वेन तत्र प्रवृत्तिर्युक्तेत्यतः तत्र त्याज्यतयोक्तः काम ईदृश इति नोक्तानुपपत्तिरिति अभिप्रेत्याह ॥ **परार्थैहैवेति ॥** परेषु मोक्षतत्साधनातिरिक्तेषु तद्विरोधिषु, अर्थेषु ईहा काम एव, त्याज्यतया विहितः। न तु मोक्षतत्साधनेष्विति। किं तन्मोक्षसाधनमित्यतो द्विविधेषु अधिकारिषु आद्यस्य परमात्मनो ध्यानादिकमेव। द्वितीयस्य तु परोपकाराय प्रवृत्तिरेवेत्याशयेन आद्यं तावदाह ॥ **परार्थैहैवेति ॥** अत्रेहापदं तत्कार्यसम्बन्धिपरं हरेर्ध्यानादिकं कर्तव्यमित्युदिते कुतस्तस्य ध्यानं कर्तव्यं अन्येषामपि ध्येयानां सत्वादिति। सत्यम्। तथाप्ययमेव ध्येयः। मोक्षसाधनतयैव हीदं प्रकृतं, तादृशं च हरेर्ध्यानमेव भवेत्। अर्थस्तावत्त्रिविध एव लोके। उत्तमो मध्यमोऽधम इति। विधान्तराभावात्। मोक्षदत्वं चोत्तमार्थस्यैव। ततोऽन्यस्य स्वातन्त्र्याभावेन तदयोगात्। उत्तमोऽर्थस्तु हरिरेक एव। तदन्यस्तु कश्चन मध्यमः। उर्वरितश्चाधमः। इति ततस्तस्यैवान्त्य-परित्यागेन ध्यानादिकं कर्तव्यमिति। तथा हरेर्ध्यानं कर्तव्यमिति अभिहिते किं तद्ध्यानं यन्मोक्षसाधनमिति साधयाम इत्यतो ध्यानं हि भवद्भिर्विदितमेव तथाकृतमेव नापूर्वम्। यथाहि सर्वे नित्यमेव वासनामयाः करितुरगादयः

Rarest Archive

पुत्रदारादयो वा स्पाप्नपदार्था अनुबोभूयन्ते । तथैव च मनोरथाः । इयानेव पूर्वतो विशेषः । यत्पूर्वत्र श्रीहरीच्छयैव निमित्तभूतया निर्माणम् । अत्र तु मनुष्येच्छयापि । तथा च श्रीहरीच्छाधीनया स्वेच्छयैव वासनामयस्य वस्तुनो मनसावलोकनमेवेति च । द्वितीयेऽपीदमेवोत्तरम् । **परार्थेहैवेति ॥** कोऽयं परोपकारो यत्र प्रवृत्तिमेव परार्थेहां जानीमः इत्यतः प्रियकरणमेव उपकारपदार्थः । स द्विविधः । अनिष्टपरिहरणं, इष्टकरणं चेति । तत्राद्यं तावद्दर्शयति ॥ **नृणां विपर्ययेहेक्षेति ॥** मोक्षप्रतिपक्षप्रवृत्तिरेव हि परममनिष्टं इति तत्परिहरणमेव हि महानिष्टपरिहरणम् । अत्र विपरीतेषु प्रवृत्तिपरिहरणमिति वक्तव्ये ईहेति च ईक्षेति च वदता अयमर्थः सूचितः । यथा हि मुक्तिसाधनेषु इच्छायां जातायामपि नियमेन न प्रवृत्तिः । न तथा तद्विरोधिषु । किन्तु तत्र इच्छायां जातायां प्रवृत्तिर्नियतैव । तादृशस्वभावत्वात्कामस्येति । **तथा चोक्तम्—इन्द्रियजयकथनप्रकरणे** ''नैतन्मनस्तव कथास्वि''त्यादि । यथाहि मध्यमानां परानिष्टज्ञानेऽपि न तत्परिहरणाय नियमेन प्रवृत्तिर्न तथोत्तमानां । किन्नाम । परानिष्टं भवतीति ज्ञाने जात एव प्रवृत्तिर्नियतैवेति । तादृशस्वभावत्वात्साधूनामिति । अहो कीदृशी परमदयालुता साधूनां परप्रयोजनमपि स्वात्मगामीव मन्वानानाम् । यत्तत्करणे स्वीयानपि मनोवाक्कायान् त्रीनपि नियमयन्ति । यत्त्रिष्वेकस्य मनसस्तत्र नियमनेनैवाखिलपुरुषार्थावाप्तिर्नृणां (इति) । इदमिष्टमेषां भवत्विति इच्छामात्रेणाप्राप्यस्याभावा ([1]प्रथमस्य भावा) दिति अभिसन्धाय [2]द्वितीयमपि दर्शयति ॥ **मनोवाक्कायदण्डं च तरुदृष्टान्तेन शिक्षेदिति** (१८) । **यथाहुः**—

''पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ॥   गन्धनिर्यासभस्मास्थितोक्मैः[3]

---

१. पूर्वं द्वेधा विभक्तपरोपकारपदार्थमध्ये अनिष्टपरिहरणरूपस्य ।

२. इष्टकरणरूपम् ।

३. अङ्कुरैः इति **विजयध्वजीये** । ''तोक्मं कर्णमले पुंसि हरिते च हरिद्यवे'' इति **मेदिनी** । ''तोक्मस्तु तत्र हरिते'' इत्यमरोऽपि ।

Rarest Archiver

कामान्वितन्वते'' (१०।२०।३७) इति।। छ।। तनु तरुष्वेवन्दर्शनेऽपि नास्माकं तत्र धैर्यं भवति। ते तु स्वयमादानादिशक्तिरहिताः तत एव जनैः पीड्यन्ते। न तु बुद्धिपूर्वकं ददति। वयं तु बुद्धिपूर्वकं कथमीदृशं कुर्म इत्यतः यथाहि तरवः पत्रपुष्पादिभिः सर्वैरपि स्वीयैरवयवैः परोपकारं कुर्वन्ति। तथैव चेष्टादिशक्तिमन्तो बुद्धिपूर्वकमेव परोपकारं कुर्वन्तः महान्तोऽपि सन्ति। ततो न विभेतव्यं भवद्भिरतः सर्वात्मना परोपकारः कर्तव्य इति भावेनाह।। **मनोवाक्कायदण्डं च तादृशसाधुदर्शनेन शिक्षेदिति** (१८)।। **यथाहुः—** ''श्रेयः कुर्वन्ति भूतानां साधवो दुस्त्यजासुभिः। दध्यङ्शिबिप्रभृतयः को विकल्पो धरादिष्वि'' (८।१९।७) ति (१८)।। छ।।

**सत्यं शिक्षेत्** (१९)।। समाधानं त्रिविधम्। यथावस्तुज्ञानं, यथावस्तुध्यानं, यथावस्तुसमर्पणं, चेति। तत्राद्यं सर्वत्रात्मेश्वरान्वीक्षा इत्यत्रोदितम्। इदानीं द्वितीयमाह॥ **सत्यं शिक्षेदिति॥** ननु ''सत्यं भूतहितं प्रोक्तं न यथार्थाभिभाषणमि''ति प्राणिहितवचनस्यैव सत्यपदार्थतया प्रसिद्धत्वात् कुतः तत्परित्यजनमिति चेत्। अत्युत्तमार्थत्वाभावादित्यावेदितत्वात्। इदं च महानिष्टनिवर्तकतया महेष्टसाधकतया च अत्युत्तमोऽर्थः। तथा च वक्ष्यत इति (१९)।। **अभयं शिक्षेत्** (२०) ननु नियमेषु दानं [१]अन्यत्र परिगणितं, तत्कुतो न सङ्गृहीतं अत्र यमेषु नियमेषु वा। दानं नाम अर्थिनां यदिष्टं धनं तस्यैव तेभ्यस्त्याग एव। न तु गुडमर्थयते तिन्त्रिणीफलमिव, तेषामिष्टमेकं दीयमानं चान्यदिति। तथाविधं च दानं उत्तम एवार्थः। प्राण्युपकारस्यैव भगवत्प्रीतिद्वारा महापुरुषार्थसाधनतया अवश्यम्भावस्यानन्तरमेव उक्तत्वादिति चेत्सत्यम्। इष्टधनदानस्य महापुरुषार्थहेतुतया आवश्यकत्वमिति। तथापि न प्रकृते धनदानं विवक्षितम्। किन्तु अभयदानमेवेत्याशयेनाह॥ **अभयं शिक्षेदिति॥** ननु अभयं

---

१. योगयाज्ञवल्क्ये।

Rarest Archive

दानपदेन कथं लभ्यते। जीवानामभयदानमेव मुख्यं दानमिति। **यथाहुः—** "सर्वे वेदाश्च यज्ञाश्च तपोदानानि चानघ। जीवाभयप्रदानस्य न कुर्वीरन् कलामपी"ति मुख्यामुख्ययोश्च मुख्यस्यैवासति बाधके ग्राह्यत्वादिति। तदिदमभिसन्धायाह॥ **दण्डन्यासः परं दानमिति** (११।१९।३८)॥ अनेन सन्न्यासग्रहणसमये भूतेभ्योऽभयदानं योगानुशासनेषु प्रतिपादितमप्यस्तीति सूचयति इति। इष्टं धनदानं न सङ्गृहीतमिति चेत्तस्य सन्तोषविचारावसरे [1]वक्ष्यमाणत्वात्। ननु इत्थमेवाभयपदं नियमेष्वपि पठ्यते। तत्किमर्थम्। न चोक्तार्थम्। पुनरुक्तेः। नाप्यन्यार्थम्। तस्याभावात्। भावे वा सर्वतो मनसोऽसङ्गमित्यनेन वैराग्यात्मविमर्शनयोरिव प्राक्पठितेनैव ग्रहणसम्भवात्। न च पूर्वत्र सेवापदस्येव इज्यापदस्येव च द्विवारं पठितस्याप्यर्थान्तरविवक्षा किं न स्यादिति युक्तम्। वैषम्यात्। न ह्यत्रेव तत्र निर्विशेषितं पदं द्विवारं पठितमस्ति। किन्तु समदृक्सेवेति। अस्य विष्णोः सेवेति च, तथा विष्णोरिज्येति च, विशेषितमेवेति तत्र शङ्काया एवानुदयात्। यद्यपि पुनरिज्येति न विशेषितं तथापि विष्णुदृष्टान्तेन भक्तसेवेतिवत् भक्तपूजेति अर्थान्तरविवक्षया प्रयोगसम्भवादिति। ततो दुर्घटमिदमिति **चेन्नैवम्**। अर्थान्तरविवक्षयैव तत्प्रयोगात्। न च पुनःपाठवैयर्थ्यम्। वैषम्यात्। तत्र हि सर्वतो मनसोऽसङ्गेन तद्रूपेण वैराग्येण विना आत्मविमर्शायोगेन कारणपदेनोभयग्रहणमसङ्गपदोदितयमत्वमुभयोरप्यस्तीति सूचनार्थम्। न चात्र दानपदोदितनियमत्वमुभयोरस्ति। येन तत्सूचनाय दानपदेनोभयग्रहणं युज्येत। न चैवमस्ति। एकस्य यमेषु द्वितीयस्य च नियमेषु प्रवेशात्। इयांस्तु विशेषः। यत्प्रथमस्याभयत्वेनैव न तु दानकर्मतया निवेशः। द्वितीयस्य तु दानकर्मत्वेनैवेति। ततः यमविशेषत्वेन वा नियमविशेषत्वेन वा दानकर्मत्वेनैव एकेन पदेन उभयोर्ग्रहणासम्भवेन पृथगेवार्थान्तरं वक्तव्यमिति पुनःपाठो युक्त एवेति (२०)॥ छ॥

---

१. स चिन्तयन् द्व्यक्षरमिति श्लोके २७३।

Rarest Archiver

नन्वेकस्य दानकर्मभूतस्य अभयस्य योगानुशासनोदिताभयदानसमान-योगक्षेमतयान्यत्र दानपदोदितनियमविशेषतया च अत्र ग्रहणावश्यम्भावेऽपि द्वितीयस्यान्यत्र यमेषु अपरिपठिततया अत्र यमेष्वेव ग्रहणे किं निमित्तमिति चेत्। मा त्वरिष्ठाः। नन्वेतदुभयं भागवतधर्मेषु उभयत्रापि न दृश्यते अतोऽत्र परिगणनं उभयस्यापि व्यर्थमेवेत्यत उभयमपि तत्र परिगृहीतं अतो नोक्तदोष इत्याशयेनाह॥ **शमदमावपि शिक्षेदिति** (२१)॥ ननु कथं शमदमपदाभ्यां यमनियमान्तर्गतयोरुभयोः (परिग्रहः)। शान्तिः संयमश्चेति हि पदार्थौ। तत्र कस्य शान्तिः कस्य वा संयम इति न ज्ञायते। इत्यतो यथावद्व्याचष्टे॥ **शमो मन्निष्ठता बुद्धेर्दम इन्द्रियसंयम इति** (११।१९।३७)॥ तत्र शमपदार्थकथनं **निष्ठेति॥** योग्यतया मयीति लभ्यते। दमपदार्थः **संयम इति।** बुद्धेरिन्द्रियेति च पदाभ्यां कस्येति शङ्कायाः परिहारः। ननु अस्त्वेवं शमदमपदार्थौ अभयपदाभ्यामेतौ (कथं) लभ्येते इति चेदुच्यते। नात्र पदार्थकथनेन तद्व्याख्यातं किन्नाम अभयपदाभ्यां सामान्याभ्यां कथं विशेषार्थावबोध इति गवेषणायां शमदमावित्युक्तम्। तावपि तादृशावेव जातौ। इयांस्तु विशेषः। यत्पूर्वत्र ताभ्यामुभाभ्यामपि भयाभावत्वेन एकरूपेणैव उभयव्यक्तिबोधोऽत्र तु शान्तित्वेन संयमत्वेन च इति प्रकारद्वयेन। ततोऽत्र व्यक्तिद्वयं प्रकारद्वयेन ताभ्यां बोध्यमित्येव। तत्र संबन्ध्याकाङ्क्षायां सोऽप्युभयत्र विशेषतो निरूपितः। अनयोस्ताभ्यामभेदस्तु स्फुटमेव बाधितः। न हि भगवन्निष्ठबुद्धित्वं वा सन्नियमितेन्द्रियत्वं वा अभयं वक्तीति प्रतीयते। ततोऽसत्यप्यभेदे व्याख्यानभावोऽनुपपद्यमानः स्वोपपादकं किमपि गमयत्येव। तच्च कार्यकारणभावो गम्यगमकभावो वा भवेत्। तत्रापि निर्धारणायां "भयं प्रमत्तस्य वनेष्वपि स्यादि"त्यादौ अजितेन्द्रियत्वमुपलक्ष्यते। उपसंहारे अजितेन्द्रियस्येत्युक्तेः। तत्रात्मरतेरित्युक्त्या प्रमादो व्याख्यातः। तथाच गार्हस्थ्यस्य भयहेतुत्वात्तन्निवृत्तये प्रव्रजनमिच्छते प्रियव्रतायेदमुच्यते। नात्र

Rarest Archiver

गृहाश्रमो भयहेतुः। येन प्रव्रजनेन तद्विरोधिना तन्निवृत्त्या तत्कार्यं भयमपि निवर्तेत। किं तर्ह्यजितेन्द्रियत्वं भगवद्विमुखत्वं चेत्युभयमेव। अतस्तन्निवर्तकमेव मृग्यम्। तच्च जितेन्द्रियत्वं भगवन्निष्ठबुद्धित्वं चेत्युभयमेव। तच्च तद्विरोधीति कारणनिवृत्तौ कार्यस्यापि निवृत्तिरिति किं प्रव्रजनेनेति एवं विमर्शने कृते भगवन्निष्ठबुद्धित्वजितेन्द्रियत्वयोरेव अभयं प्रति हेतुतेति गम्यते। तत्रापि विचारेण तच्चाभयं देयमास्थेयमिति द्विविधमिति प्रागेवावेदितम्। तत्र द्वितीयं यमपरिगणितं शमप्राप्यम्। आद्यं देयं तु दमेनैव इत्यपि विशेषोऽवगम्यते। तत्रापि विचारणायां यत्र संसाराद्भयाभावः स्वाभाविकस्तत्र शमो यत्रायं तत्र स इति। यथा यस्माल्लोकस्य भयं नास्ति स जितेन्द्रियः यश्चेदृशः तस्माद्भयं लोकस्य नास्त्येवेत्यव्यभिचरिताभ्यां अन्वयव्यतिरेकाभ्यां परस्परं गम्यगमकभावेऽपीति ॥ २३९ ॥

**जितमजित तदा भवता यदा भवान् भागवतं धर्ममनवद्यम्।**
**निष्किञ्चना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय ॥ २४० ॥**
**। ६ । १६ । ४० (४)**

ननु भवतु नारदप्रार्थनया भागवतधर्माणामेव प्रस्तावः। भवतु च भागवतविषयतया भगवता प्रदर्शितता। भवतु वा भागवते विस्तृत्य प्रतिपाद्यतापि। तथापि भारतादाविव धर्मान्तरप्रतिपादनं विहाय अत्र भागवतधर्माणामेव विशिष्य प्रतिपादनं किन्निमित्तमिति चेत्। मोक्तं विस्मार्षीः। उक्तमेवैतत्। यत्सर्वं कृत्वापि अलम्बुद्धिमनासादयता भगवतैतत्कृतम्। एतेन तु भगवत्प्रीतिरधिका भवति। ततश्च भवति भविनां भवापवर्ग इत्यवतारप्रयोजनसिद्ध्या भवत्येव मनस्तुष्टिरित्याशयेनोक्तं बुद्ध्यारोहाय विशदयन्नाह ॥ **जितमिति ॥** हे अजित। भवान्। यदा। अनवद्यम्। भागवतं

Rarest Archiver

धर्मम्। भविनां भवापवर्गाय आह। तदैव भवता। जितं जयः प्राप्तः। अवतारप्रयोजनस्य सिद्धेरिति भावः। किं तदवतारप्रयोजनं कथं च भागवतधर्मकथनमात्रेण सिद्धमित्यत आह। **निष्किञ्चना इति।** येषां किञ्चिदप्यपेक्षणीयं प्राकृतं वस्तु नास्ति ते निष्किञ्चनाः त एवात्मारामाः भगवन्निष्ठाः भवन्ति। ये आत्मारामाः त एव मुनयः यथाशक्ति वेद्यस्य वेत्तारो भवन्ति। ये मुनयः त एव भागवतं धर्मं उपासते तमिति। **इदमुदितं भवति**— साक्षाद्भगवान्नारायणः भविनां भवापवर्गाय दिविभवभावितः व्यासः बभूवेति हि घण्टाघोषः। स च यदा अतुलः भिषगिव औषधं अतुलं भागवतं धर्ममाह। यदा च रोगी तदौषधमिव भवी तं भागवतं धर्मं उपास्ते किं तदा अवशिष्टं रोगनिवृत्ताविव भवनिवृतौ ॥ द्वयमेव ह्यपेक्षितं रोगनिवृत्ताविव। यद्रोगनिदान-विच्छिरोमणिना औषधकथनं तदेकम्। यच्च रोगिणो आदरेण भक्त्या तत्सेवनं तद्द्वितीयमिति। भवनिवृत्तावपि सर्वज्ञशिरोमणिना तदुपायभागवतधर्मकथनम्। भागवतैर्भविभिः भक्त्या तत्सेवनं चेति। तदुभयं च सिद्धमिति ॥ २४० ॥

**विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च।**
**योऽन्यत्र विषमधिया रचितः स ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः ॥**
**२४१ ॥ ६ । १६ । ४१ (५)**

कोऽयं भागवतो धर्मः यदनुष्ठानं अपवर्गाय भवेदित्यतस्तल्लक्षणमाह ॥ **विषमेति ॥** यत्र यस्मिन् धर्मे। अहमेव कर्तेति। तथेदं साधनं फलं वा ममैवेति च। इत्येवं द्विविधा विषमा मतिः अभिमानः। नृणामनुष्ठातॄणाम्। न भवति कारणतया। स एव भागवतो धर्म इति। अनेन कर्तृत्वाद्यभिमानत्यागपूर्वक-मनुष्ठीयमानो भागवतो धर्म इति लक्षणमुक्तं भवति। अत एवाक्षयफलः पापाजनकश्च भवति। अस्य अतिव्याप्तिं परिहरति ॥ **य इति ॥** अन्यत्र अन्यो

Rarest Archive

यो धर्मः। स विषमधिया अहंममेत्यभिमानेन रचितः। अत एव सक्लेश्या अनुष्ठितजपादिकमिव अशुद्धः। तत एव च क्षयिष्णुफलकः। अधर्मबहुलः बहुपापसाधनं चेति। एतदुभयं प्रमाणप्रमितमिति हिशब्देन सूचयतीति ॥ २४१ ॥

**न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः।**
**स्थिरचरसत्वकदम्बेष्वपृथग्धियो यमुपासते [१]त्वार्याः ॥ २४२ ॥**
**। ६ । १६ । ४३ । (६)**

ननु मा हि भूदतिव्याप्तिः। यद्भागवतधर्मस्य अक्षयफलत्वमुक्तं तत्तावन्न सम्भवति। कदाचित्केनचिदनुष्ठितेन भागवतधर्मेण अन्यधर्मेणेव मुक्तेरजननेन फलान्तरजननेन वा अक्षयफलत्वस्य वक्तुमशक्यत्वात्। सति चैवं भागवतधर्मोपदेशमात्रेण भगवतः कृतार्थतेत्येतदपि गतमित्यत आह ॥ **नेति** ॥ अनेन भागवतधर्मेण मोक्षः स्यादिति ययेक्षया प्रतिभया। भागवतो धर्मस्तत्साधनतया अभिहितः सा तव प्रेक्षावच्छिरोमणेः ईक्षा। कदापि न व्यभिचरति। केनचित्प्रेक्षयोदितो नार्थं व्यभिचरति। किमु प्रेक्षावच्छिखामणेरित्याशयेन तवेत्युदितम्। एतच्च प्रमाणसिद्धमिति नास्माभिर्यतितव्यमित्याशयेनोक्तम्। **हीति ॥ इदमुदितं भवति–** स्यादियमर्थव्यभिचारचोदना प्रेक्षावता भगवता मोक्षसाधनतया अभिहितस्य भागवतधर्मानुष्ठानस्य यद्यभिधायकस्य प्रेक्षा अर्थं व्यभिचरेत्। नचैतदस्ति। प्रेक्षा, अर्थव्यभिचारिणीत्यस्य व्याहतत्वात्। इयमेव हि प्रेक्षा, यत्कालत्रयेऽपि स्वगृहीतार्थस्याबाधितत्वनिर्णयनम्। तदेतत्सूचनायैव व्यासेन त्रिवारं वेदान्विचार्य मोक्षसाधनतया भागवतधर्मनिरूपणार्थकं भागवतं कृतमित्युच्यते। **यथाहुः—** ''न ह्यतोऽन्यः

---

१. तु आर्या इति छेदः। तुना तारतम्यमन्ययोगव्यवच्छेदं चाहेति **विजयध्वजतीर्थपादाः**।

Rarest Archive

शिवः पन्था विश्रुतः संसृताविह। वासुदेवे भगवति भक्तियोगो यतो भवेत्॥ (२।२।३६) भगवान् ब्रह्म कात्स्न्र्येन त्रिरन्वीक्ष्य मनीषया। तदपश्यद्धि कूटस्थे रतिरात्मन्यतो भवेत्'' इति॥ २।२।३७)॥ इतोपि नार्थव्यभिचार इत्याशयेनाह। **स्थिरेति॥** हि यस्मात्। आर्याः। स्थिरचरसत्वकदम्बेषु चराचरभूतनिवहेषु। [१]अपृथग्धिय एव सन्तः। यं धर्मम्। उपासते विशेषेण। तस्मादिति। **इदमुदितं भवति—** स्यादयं मनोरथो भवतः यद्यर्थव्यभिचारः सिध्येत् न चैवम्। यतो भागवतधर्माणां अनुष्ठातारश्चेतनाचेतनगणस्थितं श्रीहरिं मनसा मानयन्तः क्रियमाणं तत्पूजार्थमस्तु इत्यनुसन्दधाना एवानुतिष्ठन्ति। न हि भगवतः पूजा भवति विफला अल्पफला वा। ततः श्रीहरिपूजात्वेन क्रियमाणस्य विफलत्वाद्यसम्भवेन सिद्धैव भागवतधर्मकथनेन भगवतः कृतार्थतेति। अनेन हरिपूजात्वेनानुसन्धाय क्रियमाणो धर्मो भागवत इति लक्षणान्तरं च सूचितं भवति॥ २४२॥

**यत्पादपङ्कजरजः शिरसा बिभर्ति**
**श्रीरब्जजश्च गिरिशः सह लोकपालैः।**
**लीलातनूः स्वकृतसेतुपरीप्सया यः**
**काले दधत्स भगवान् स्वकृतेन तुष्येत्॥ २४३॥**
**।१०।६२।४२।(७)**

भगवता भवापवर्गाय प्रणीतत्वं भागवतधर्मस्य प्रधानलक्षणमभिधाय[२] कथं बन्धकस्वभावस्य कर्मणः अपवर्गहेतुतेत्याशङ्कायां यथाहि यदेव द्रव्यं पार्थिवं अशोधितं भुक्तं रोगदायकं तदेव संशोध्य औषधीकृतं तद्रोगमेव परिहरति तथैव

१. यथास्थितदर्शिन इति **वि. श्रीपादाः।**

२. द्वितीयं लक्षणं निगद्येत्युत्तरेणान्वेति।

Rarest Archiver

बन्धकस्वभावमपि कर्म केनचित्संस्कृतं अपवर्गदं भवेदेव । स चापवर्गः सुखमेव मे स्यात् दुःखं मनागपि मा भूदिति सर्वैरप्यपेक्ष्यते । क्रियते च बन्धकस्वभावमेव कर्म क्रियास्वभावैः देहिमात्रैः विना कर्मभिः क्षणमात्रं अवस्थातुम् अशक्नुवद्भिः । तदेतत् सङ्कटमभिवीक्ष्य जातकरुणो भगवांस्तदेव कर्म, चिकित्सितवान् । तदेव हि कर्म भागवतधर्म इत्यभिधीयते । स च सर्वापेक्षितमोक्षो द्विदलः । तत्र द्वितीयदलहेतुतानेन संस्कारेण संस्कृतस्य भवति इत्याशयेन तच्छङ्कापरिहाराय कर्तृत्वाद्यभिमानत्यागपूर्वकं क्रियमाणो भागवतो धर्म इति द्वितीयं लक्षणं [१]निगद्य । स्यादेतत् । यथा हि राजा स्वद्रव्यपाहारकं चोरं निगडादिना निबध्य प्रतिदिनं कशावेत्रादिभिः ताडयति यावद्द्रव्यत्यागम् । तथैव श्रीहरिरपि स्वस्वातन्त्र्यापहारिणं यावत्तत्त्यागं संसारकारागृहे निबध्य दुःखयेदेव । त्यागे तु पुनस्तं चोरमिव किमिति दुःखयेदिति कर्तृत्वाभिमानत्याग-पूर्वकं क्रियमाणेन कर्मणा दुःखनिवृत्तिर्भवेदिति द्वितीयदलहेतुतेति ॥ प्रथमदल-हेतुता तु कथं भवेत् । न हि राज्ञा चोरः अपहृतं द्रव्यं दत्तवानित्युपक्रियते । किन्नाम दयालुना यत्र क्व वा गम्यतामिति त्यज्यत एव केवलमित्याशङ्कायां यथा स एव राजा तस्मा एव चोराय पश्चात्तापतप्ताय विशेषतः स्वसेवां कुर्वते प्रसन्नोऽपेक्षितं सर्वमपि ददाति, तथा श्रीहरिरपि इत्याशयेन तच्छङ्कापरिहाराय अनेन संस्कारेण संस्कृतस्य प्रथमदलहेतुतापि भवेदेवेति भावेन हरिपूजात्वेन अनुसन्धाय क्रियमाणो भागवतो धर्म इति तृतीयलक्षणमभिधाय, यथानेन संस्कारेण संयुतं प्रथमदलहेतुतामश्नुते, तथा एतेनापीति भावेन चतुर्थं लक्षणमाह ॥ **यत्पादेति** ॥ श्रीः महालक्ष्मीः यत्पादपङ्कजरजः । शिरसा बिभर्ति । तेन नित्यमुक्ता आसीदित्यभिप्रायः । अब्जजो ब्रह्मापि बिभर्ति । स तेनैव जीवन्मुक्तोऽभूदिति हृदयम् । गिरिशश्च सह लोकपालैः इन्द्रादिभिः सह

१. तृतीयं लक्षणमभिधायेत्युत्तरेणान्वयः ।

Rarest Archiver

बिभर्ति। तेनैव निश्चिततारतम्योपेतमोक्ष इत्याकूतम्। ईदृशस्य च सर्वथा प्रारब्धदेहायोग इति भावेनाह॥ **यश्चेति॥** यः लीलयैव गृहीताः तनूः दधत् आस्ते। प्रारब्धाभावे किमर्थं बुद्धिपूर्वकं शरीराणि धत्त इत्यत उक्तम्॥ **स्वकृतेति॥** स्वेन कृतो यः सेतुर्मर्यादा धर्ममार्गः तस्य रिरक्षयेति। किं तस्य नाशकं प्राप्तमित्यत उक्तम्॥ **काल इति॥** काले तस्य धर्मस्य दुष्कर्मकारिभिश्चोरप्रायै राजभिर्ग्लानिकाले। तथा अधर्मस्य अभिवृद्धिकाले इति॥ स तादृशः सर्वेषां मुक्तिप्रदो भगवांश्च अनेनैव तुष्यतीत्याशयेनाह॥ **स्वकृतेन तुष्येदिति॥** अनेन हरिकर्तृकतया अनुसन्धाय क्रियमाणो भागवतो धर्म इति चतुर्थं लक्षणं सूचितं भवति। **यथाहुः**— "एतत्संसूचितं ब्रह्मन् तापत्रयचिकित्सितम्। यदीश्वरे भगवति कर्म ब्रह्मणि भावितम्॥ (१।५।३२)॥ एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः। त [1]एवात्मविनाशाय कल्पन्ते कल्पिताः परे" इति (१।५।३४)॥ २४३॥

**अथापि यत्पादनखावसृष्टं जगद्विरिञ्चोपहृतार्हणाम्भः।**
**सेशं पुनात्यन्यतमो मुकुन्दात् को नाम लोके भगवत्पदार्थः॥२४४॥**

**।१।१८।२१।(८)**

ननु धर्मं तु साक्षाद् भगवदिति (६।३।१९) "ये वै भगवता प्रोक्ता" इति (११।२।३४) "धर्मान् भागवतानि"ति '११।२।३१) - "तत्र भागवतान् धर्मानि"ति '११।३।२३) "अत भागवतं ब्रूते"ति '११।२।४४) "एष भागवतोत्तम" इति च (११।२।४५) परवस्तुविवक्षया भगवच्छब्दो भगवत्प्रसक्तौ भागवतधर्मप्रसक्तौ भागवतभक्तप्रसक्तौ च तत्र तत्र प्रयुक्तः। स च भवदभिमतविष्णुपर एवेति कुतः, अन्यपर एव किं न स्यादिति

---

१. अनेकजन्मसञ्चितदुष्कर्मस्वरूपनाशायेति विजयध्वजीये।

Rarest Archive

पाखण्डविभिन्नचेतसस्तटस्थस्य शङ्कां परिहर्तुमाह।। **अथापीति।।** स्वार्थे तमप्। मुकुन्दादन्यः कः पुरुषः भगवत्पदस्यार्थः भवेत्। न कोऽपि। कुत इति चेत्। प्रसिद्धो हि पदार्थतया सम्भाव्यते। यथा पङ्कजपदस्य पद्मम्। न च मुकुन्दादन्यस्तथा। मुकुन्दस्तु प्रसिद्धतरः। गीतादौ "भगवानुवाचे"त्यादौ तस्यैव प्रतीतेः। अन्यथा प्रसिद्धिबाधादित्याशयेन प्रसिद्ध्यर्थकनामग्रहणम्। अत एव लोक इत्युक्तम्। अस्तु रूढ्या मुकुन्दो भगवत्पदार्थः। योगवृत्त्याश्रयणे तु ऐश्वर्यादिगुणवानेवार्थ इति लभ्यते। स च मुकुन्द एवेति कुतः। न च रूढार्थत्यागे बाधकाभावः। बाधककल्पनायाः सर्वत्र सुलभत्वादित्यतोऽङ्गीकृत्यापि बाधकसमाधानमाह। **मुकुन्दादिति।।** ऐश्वर्यादिगुणवान्हि भगवत्पदार्थतया भवता अभ्युपगम्यते। ते च गुणाः यत्र मुख्यतः सन्ति। तस्मादितरं परित्यज्य स एव ग्राह्यो भवेत्। येषां च पुनर्मोक्षदाने न सामर्थ्यं ते तु कथं समग्रैश्वर्यादिमन्तो भवेयुः। अयं तु मोक्षदाता न कथं समग्रैश्वर्यवानित्यतो योगाश्रयणेऽपि अयमेव ग्राह्य इति। तदेतदभिप्रेत्योक्तम्। **मुकुन्दादिति।।** मुकुन्दात् मोक्षस्य दातुः। अन्यतमः। को नाम। लोके भगवत्पदार्थ इति। अथापि स्यात्। अनेकार्थं हि भगवत्पदम्। अत्र तु पूज्य एवार्थो विवक्ष्यते। पूज्येऽपि बहुलं तत्पदप्रयोगदर्शनात्। **तथा चाह हलायुधः—** "भगवानिति शब्दो वृद्धैः प्रयुज्यते पूज्य" इति। पूज्यस्तु मुकुन्द एवेति। कुतः। ततोऽन्यस्यापि तत्सम्भवादिति। **अत्र प्रष्टव्यं**—सोऽन्यः क इति। हरिहरविरिञ्चास्तावल्लोके पूज्या इति प्रसिद्धम्। तत्र पूज्यत्वार्थकभगवत्पदार्थविचारे त्रयोऽपि सम्भाविताः प्राप्नुवन्त्येव। हरिरेवेति निर्बन्धं कुर्वाणं प्रति तु उच्यते। हरो विरिञ्चो वा किं न स्यादिति। एवं वदन्तं प्रत्याह। **अथापीति।।** पूज्यत्वार्थकत्वेऽपि मुकुन्दाद्धरे-रन्यतमः को नाम लोके भगवत्पदार्थ इति। कुतः। यतः यत्पादनखावसृष्टं निर्गलितम्। विरिञ्चेनोपहृतं पादप्रक्षालनोदकम्।

Rarest Archiver

ईशेन हरेण सहितं जगदेव पुनाति तत इति। **इदमुदितं भवति**— स्यादियं सम्भावना यदि त्रयाणामपि साम्यं भवेत्। न चैतदस्ति। विरिञ्चस्य पूजकत्वात्। हरस्य तु यत्पादोदक-पवित्रितजनसङ्गनिविष्टत्वादिति। **यथोक्तम्।** ''यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिधृतेन शिवः शिवोऽभूदि''ति (३।२९।२२)॥ २४४॥ तत्र ऋजोर्भावः आर्जवं त्रिकरणेष्वेकप्रकारत्वम्। तत्पूर्वकमेव कृतो धर्मोऽनन्तफलद इत्यादौ तदेव दर्शयति॥

**तमेव यूयं [1]भजतात्मवृत्तिभिर्मनोवचः कायगुणैः स्वकर्मभिः।**
**अमायिनः कामदुघाङ्घ्रिपङ्कजं यथाधिकारावसितार्थसिद्धये॥ २४५॥**
**।४ २१।३२।(९)**

**तमेवेति॥** यूयम्। अपेक्षितप्रदपादपद्मम्। तं हरिमेव। मनआदिनिष्पन्नैः स्वविहितकर्मभिः। आत्मवृत्तिभिः भगवद्विषयतां प्रापितैरेव। अमायिनः कापट्यरहिताः सन्तः। यथाधिकारं अधिकारानतिक्रमेण क्लृप्ता ये पुरुषार्थाः तेषां प्राप्तये भजतेत्यन्वयः। अत्रामायिनः सन्तो यथाधिकाराव-सितार्थसिद्धये भजतेत्यनेन मायापदोदितकापट्यराहित्यपूर्वकं कृतस्यैव भजनस्य क्लृप्तपुरुषार्थहेतुतोक्त्या तत्सिद्धये तन्निवर्तकमार्जवं अवश्यं सम्पाद्यमिति सूचितं भवति॥ २४५॥

**स वेद धातुः पदवीं परस्य दुरन्तवीर्यस्य रथाङ्गपाणेः।**
**योऽमायया सन्ततयाऽनुवृत्त्या भजेत तत्पादसरोजगन्धम्॥ २४६॥**
**।१।३।३८।(१०)**

---

१. आत्मनि हरावेव वृत्तिर्वर्तनं येषां ते तथा तैः मनोवचःकायगुणैः ध्यानस्तुतिपरिचर्यारूपैः कार्यैः इति यादुपत्ये।

Rarest Archiver

न केवलं पुरुषार्थसाधकतया आवश्यकमिदं किन्नाम पुरुषार्थसाधनज्ञानादिसम्पादकतयापीत्याशयेनाह ।। **स वेदेति ॥** यः अमायया कापट्यरहितया । निरन्तरसेवया । भागवतधर्मानुष्ठानरूपया । श्रीहरिपादसरोजगन्धम् । सेवेत (प्रणीयात्) स एव । चक्रपाणेः [१]अपरिमितपराक्रमस्य । धातुः भक्तपोषणादिकर्तुः । परस्य परमात्मनः । पदवीं स्वरूपस्थितिम् । वेदेत्यन्वयः ।। २४६ ।।

**इत्थं परस्य निजधर्मरिरक्षयात्तलीलातनोस्तदनुरूपविडम्बनानि ।**
**कर्माणि कर्मकषणानि यदूत्तमस्य गायेदमुष्य पदयोरनुवृत्तिमिच्छन् ।।**
**२४७ ।। १० । १०३ । ४० । (११)**

ननु भागवतधर्मानुष्ठानापरपर्यायानुवृत्तेः ज्ञानादिसाधनताभिहिता । सा निरन्तरं वर्धनीयेति च । सा च केन भवेत् । तद्वर्धनं च केन स्यादित्यत आह ।। **इत्थमिति ॥** अमुष्य पदयोः अनुवृत्तिं इच्छन् । इत्थं उदितानि । परस्य हरेः । कर्माणि । कर्मकषणानि पापपरिहारकाणि । गायेत् कीर्तयेदित्यनेन श्रीहरिकथाकथनादिकमेवानुवृत्तिसाधनमित्युक्तं भवतीति भावेन प्रथमशङ्कापरिहारः ।। २४७ ।।

**मर्त्यस्तयानुसवमेधितयानुवृत्त्या श्रीमत्कथाश्रवणकीर्तनचिन्तयैति ।**
**तद्धाम दुष्करकृतं जनतापवर्गं ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थे ।।**
**२४८ ।। १० । १०३ । ४१ । (१२)**

द्वितीयशङ्कां परिहरति ॥ **मर्त्य इति ॥** अनुसवमेधितया वर्धितया इति पूर्वमुक्त्वा । श्रीमतो हरेः श्रीप्रदा या कथा तस्याः श्रवणेन कीर्तनेनाभिधानेन च

---

१. फलितप्रदर्शनमिदम् ।

Rarest Archiver

युक्त्या चिन्तया। अनुसवं एधिता या अनुवृत्तिस्तयानुवृत्त्या। भूपाला अपि। यदर्थे यद्धामप्राप्तये। [१]ग्रामाद्वनं ययुः। तत् तादृशधाम स्थानम्। मर्त्यः। एति याति। कृतेन कर्मणा दुष्करं दुष्प्राप्यम्। अनेन श्रवणादिवर्धनेन तद्वर्धनं भवतीत्युक्त्या द्वितीयशङ्कापि परिहृता भवति॥ २४८॥

**शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः।**
**त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुजम्॥ २४९॥**
**।१।८।३९।(१३)**

ननु प्रतिदिनं वर्धितेन श्रवणादिना वर्धितयानुवृत्त्या पूजारूपया पुरुषार्थस्तत्साधनं ज्ञानादिकं च कियता कालेन भवतीत्याह॥ **शृण्वन्तीति**॥ ये जनाः। अभीक्ष्णशः श्रवणादि कुर्वन्ति। त एव अभीक्ष्णशः त्वां पूजयन्तः सन्तः तावकं पदाम्बुजम्। अचिरेणैव पश्यन्ति। मुक्तिमप्यचिरेणैव यान्तीति सूचयितुं भवप्रवाहोपरममिति पदाम्बुजविशेषणमिति॥ २४९॥

**सर्वाणि मद्धिष्ण्यतया भवद्भिश्चराणि भूतानि सुता ध्रुवाणि।**
**सम्भावितव्यानि पदे पदे वो विविक्तदृष्टिस्तदुतार्हणं[२] मे॥ २५०॥**
**।५।५।२६।(१४)**

(निष्कापट्यापादकमार्जवं)॥ **सर्वाणीति**॥ हे सुताः। भवद्भिः चराणि

---

१. ग्रामं विहाय वनं।

२. विविक्तदृष्टिः जीवानां धिष्ण्यतया परमेश्वरस्य भेददर्शनम्। यद्वा भेददर्शनमेव नार्हणं अपि तु भेदप्रतिपादनमपि उतार्थ इति **विजयध्वजीये**। ''उपपादयेत्परात्मानं जीवेभ्यो यः पदे पदे। भेदेनैव न चैतस्मात्प्रियो विष्णोस्तु कश्चन। यो हरेश्चैव जीवानां भेदवक्ता हरेः प्रियः।'' इति **तात्पर्योदाहृतपाद्मवचनम्**।

Rarest Archiver

ध्रुवाणि चेत्येवं सर्वाण्यपि भूतानि। मद्धिष्ण्यतया मम प्रतिमात्वेन। पदे पदे। सम्भावितव्यानि माननीयानि। किं तत्सम्भावनेनेत्यत उक्तम्॥ **विविक्तेति**॥ वः युष्माकं सम्बन्धिनी या विविक्ततया प्रतिमात्वेन दृष्टिः सम्भावनम्। तदु तदेव। अर्हणं पूजा। मत्पूजया तु अपेक्षितसिद्धिरिति। **यथाहुः**— ''अन्तर्देहेषु भूतानामात्मास्ते हरिरव्ययः। सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसावि''ति (६।४।१३)॥ २५०॥

**मनोवचोदृक्करणैर्हि तस्य साक्षात्कृतं मे परिबर्हणं तत्।**
**विना पुमान्येन महाविमोहकृतान्तपाशान्न विमोक्तुमीशः ॥ २५१॥**
**।५।५।२७। (१५)**

एवं साधकस्य साधनप्रकारमुक्त्वा सिद्धस्य पूजायां विशेषं वदन्, आवश्यकतां व्यतिरेकेण दर्शयति॥ **मनइति**॥ क्वचिन्मनसा क्वापि वचसा कुत्रचिद्दृष्ट्यैव कस्मिंश्चित्कायिकव्यापारेणापीत्येवमनेकधा। तस्य यत्परिबर्हणं सम्भावनम्। तत्साक्षान्मे ममैव भवति। पुमांश्च येन सर्वसत्वसम्भावनेन विना। महामोहकराद्यमपाशात्संसारात्। स्वात्मानं मोचयितुम्। ईशः समर्थो न भवति तत् तादृशं सर्वैरवश्यमनुष्ठेयमिति॥ २५१॥

**खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्वानि दिशो द्रुमादीन्।**
**सरित्समुद्रांश्च हरेः [१]शरीरं यत्किञ्च भूतं प्रणमेदनन्यम्[२] ॥ २५२॥**
**।११।२।४१। (१६)**

---

१. ''सर्वं हरेर्वशत्वेन शरीरं तस्य भण्यते''।

२. ''अनन्याधिपतित्वाच्च तदनन्यमुदीर्यते। न चाप्यभेदो जगता विष्णोः पूर्णगुणस्य तु।'' इति हरिवंशे।

Rarest Archives

चराण्यचराणीति सर्वाणि भूतानि सम्भावितव्यानीति उदिते शङ्कोदेति। चरा द्विविधाः। द्विपदाश्चतुष्पदाश्चेति। तत्राद्येषु ब्राह्मणाः सर्वेऽपि सम्भाव्यन्त एव। द्वितीयेषु च गावः सर्वा अपि। अचरेष्वपि तुलस्यादयः पूज्यन्त एव। ये नोभयत्रापि पूज्याः ते न पूज्यन्त एव। ततः किमितीदं विशिष्य विधानमित्यत आह।। **खमिति**।। नात्र नम्यतया सिद्धानामेव नमनं विधीयते, येन सिद्धार्थता शङ्क्येत। किन्तु द्विपदेषु ब्राह्मणमारभ्य चण्डालेष्वपि श्वमांसभक्षको यो नीचः तत्पर्यन्तम्। चतुष्पदेषु गामारभ्य अस्थिभक्षको य आरण्यको मृगविशेषश्चतुष्पदेषु चाण्डालः तत्पर्यन्तम्। अचरेष्वपि तुलसीमारभ्य यत्किञ्चिन्नीचतमं वस्तु तत्पर्यन्तमेवेदं वन्दनं कार्यमित्युच्यते। ननु लज्जया कर्तुमशक्यमिति चेत्। एवं वदन् प्रष्टव्यो जायते। किं वन्दनसामान्यं किंवा तद्विशेषः। आद्ये प्रणमेदिति तद्विधानवैयर्थ्यात्। द्वितीये स क इति प्रष्टव्यम्। वाचिकं कायिकं च वन्दनमिति चेत्। व्रीडा किं मानसवन्दनं न प्रतिबध्नाति। उच्यते। व्रीडा तावन्मनःपरिणामरूपा मनःस्था सा च मानसिकादि-वन्दनविषयकतया मानसिकी वाचनिकी दैहिकी चेति त्रिविधा भवति। तत्र मानसिकी व्रीडा मानसवन्दनं प्रतिबध्नात्येव। तथापि तां स्वबुद्ध्या विनिगृह्य मानसवन्दनं क्रियते इति। एवं तर्हि यथा प्रतिबन्धिकामपि मानसीं लज्जां स्वबुद्ध्या विनिगृह्य मानसवन्दनं क्रियते। तथा वाचनिकीं दैहिकीं च लज्जां स्वबुद्ध्या विनिगृह्य वाचनिकं दैहिकं च वन्दनं क्रियतां अविशेषात्। सत्यम्। जुगुप्सितं तद्द्वयमिति चेत्। समं प्रथमेऽपि विधिबलादङ्गीकर्तव्यमिति चेत् अन्यत्रापि दीयतां दृष्टिः। एवं मनसा वचसा कर्मणा चेति त्रिविधमपि वन्दनं यावत्सर्वत्र हरिरेव स्थितः सर्वं कारयतीति निश्चित्य तत्र सर्वत्र तत्प्रतीकदर्शनमात्रेण तत्स्मरणं झडित्येव न जायते तावत्पर्यन्तमेव कार्यं। तदनन्तरं तु यथा यथा मानसाद्यन्यतरं वा त्रिविधमपि वा यथामनः कार्यम्। न च

Rarest Archiver

सर्वत्रावस्थाननिश्चयपूर्वकं तत्स्मरणसम्पादनेनापि किङ्कृत्यमिति मन्तव्यम्। तस्य महाफलहेतुतयाऽवश्यं सम्पादनीयत्वात्। ईदृशं च वन्दनं न सिद्धमिति न सिद्धार्थता विधानस्येत्याशयेनाह॥ **खमिति॥ यथाहुः—** "विसृज्य स्वयमात्मस्थां दृश्यव्रीडां च दैहिकीम्। प्रणमेद्दण्डवद्भूमावाश्वचण्डालगोखरम्॥ (११।२९।१६)॥ यावत्सर्वेषु भूतेषु मद्भावो नोपजायते। तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः॥ (११।२९।१७)॥ अयं हि सर्वकल्पानां सध्रीचीनो मतो मम। मद्भावः सर्वभूतेषु वाङ्मनःकायवृत्तिभिरि"ति॥ (११।२९।१९)॥ प्रणमेत् साष्टाङ्गं नमेत्। अत एवैतत्सूचयितुं दण्डवदिति भूमाविति चोक्तम्। मानसमात्रविवक्षायां तु असामञ्जस्यात्। विषयविशेषविवक्षायां च सिद्धार्थत्वात्। एवं नृषु आश्वचाण्डालं, पशुषु च आगोखरं, भूमौ दण्डवत्प्रणामः कियत्पर्यन्तं कर्तव्यं इत्यत आह। **यावदिति।** मद्भावः तत्तद्व्यापारकारयितृतयाऽवस्थाननिश्चयपूर्वकं प्रतीकदर्शनक्षण एव मम स्मृतिः। प्रणमेदित्येतन्न मानसवन्दनमात्रपरम्। किन्नाम त्रिविधस्यापि वन्दनस्य विधायकमित्येतत्सूचनाय वाङ्मनःकायवृत्तिभिरिति विवृतम्। तत्सम्पादनेनापि किम्प्रयोजनमित्यतस्तस्य साधनोत्तमतया मत्प्रीतिसाधनत्वादित्याशयेनाह॥ **अयमिति॥** २४२॥

**शृण्वन्सुभद्राणि रथाङ्गपाणेर्जन्मानि कर्माणि च यानि लोके।**
**गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसङ्गः ॥ २५३ ॥**
**। ११ । २ । ३९ । (१७)**

न केवलं भगवतः प्रणाम एव विलज्जो भवेदिति किन्नाम भगवत्सेवामात्र इत्याह॥ **शृण्वन्निति॥** लोके मित्रस्योदासीनस्य वैरिणो वा स्वतो नीचस्य वा गृहे। गीतानि व्याख्यास्यमानानि। सुभद्राणि। रथाङ्गपाणेः। जन्मानि,

Rarest Archiver

(रूपाणि,) कर्माणि तच्चरितानि। तदर्थकानि जन्मकर्मप्रतिपादकानि। नामानि। यानि चान्यानि। रथाङ्गपाणेः कर्माणि सेवारूपाणि, गृहसंमार्जन-नृत्तादिरूपाणि। तानि सर्वाण्यपि। विलज्जः सन्नेव। विचरेत् विशेषेणैवाचरेत्। तेन विशेषतः असङ्गो भवेत्। एवं विलज्जो भूत्वा भगवत्सेवाकृतौ किं फलान्तरं च स्यादित्यत्राह॥ **असङ्ग इति॥** विलज्जः सन्नेव शृण्वन्, गायन्, असङ्गः अकारवाच्ये हरावेव चिन्तनाख्यसम्बन्धवान् भवेत् इति। तदनेन सर्वत्र भगवच्चिन्तनं कार्यम्। अभ्यासेन पाटवे सति तत्प्रतीकदर्शनक्षण एव तत्तद्गतरूपविशेषस्मरणं सुखविशेषश्च भवति। एवं सर्वत्र हरिमेव भावयतः मायापरपर्यायप्रकृतिबन्धः स्वयमेव निवर्तत इति सूचितम्। **यथाहुः—** ''एतावानेव लोकेऽस्मिन् पुंसां स्वार्थः परः स्मृतः। एकान्तभक्तिर्गोविन्दे यत्सर्वत्र तदीक्षणं'' (७।७।५७) इति (''सर्वत्र भगवच्चिन्तनं'' ।।२।।) ।। २५३ ।।

**जह्यासुरं भावमिमं स्वमात्मनः समं मनो धत्स्व न सन्ति विद्विषः।**
**ऋतेऽजितादात्मन उत्पथस्थितात् तद्धि ह्यनन्तस्य महत्समर्हणम् ॥**
**२५४ ॥ ७ । ८ । १० । (१८)**

अक्रोधापरनामकं अहिंसाख्यं भागवतधर्ममाह ।। **जहीति ॥** हिरण्यकशिपुं प्रति प्रह्लादवचनमेतत्। इमं आसुरं भावं स्वभावम्। जहि त्यज। त्यक्त्वा च आत्मनः मनः समं सर्वभूतेषु। धत्स्व स्थापय कुरु। ननु मित्रे वोदासीने वा कथञ्चित्समं मनो निवेष्टुं शक्यं, विद्विष्टे तु कथं शक्यत इत्यत उक्तम्॥ **ऋत इति॥** अजितात्। अत एव सन्मार्गं परित्यज्य असन्मार्गे प्रवृत्तात्। आत्मनः मनसः। ऋते। विद्विषः वस्तुतो न सन्त्येव। वस्तुतो द्वेषिण उदासीना मित्रं चेति न सन्त्येव। मनोदोषेणैव तथा भासन्ते। तच्च

Rarest Archiver

सन्मार्गविरुद्धम्। अतस्तत्परित्यज्य सर्वत्र साम्येन मनो निवेश्यमिति। एवङ्कृते यदि महत्प्रयोजनं विद्येत विद्यते चेत् तत्किमित्यत आह॥ **तदिति॥** सर्वभूतेषु साम्येन मनोनिवेशनं अनन्तस्य हरेः। महत् अत्युत्तमम्। समर्हणं पूजनमिति। विद्धीति। पूजया प्रसन्ने च भगवति किमलभ्यमिति भावः॥ २५४॥

**तं दुर्जयं शत्रुमसह्यवेगमरुन्तुदं तन्न विजित्य केचित्।**
**कुर्वन्त्यसद्विग्रहमत्र मर्त्यैर्मित्रैरुदासीनरिपुं[1] विमूढाः ॥ २५५॥**
**।११।२३।४९। (१९)**

उत्पथस्थितादित्युक्तं तत्र कोऽयमसतां मार्ग इत्यतः चित्तविक्षेप एवेत्याशयेन तं विशदयति॥ [2]**तमिति॥** तं मनोरूपम्। अत्र जनेषु। केचित्पुरुषाः। अरुन्तुदं अतिदुःखदम्। असह्यः सोढुमशक्यो वेगो यस्य तम्। तस्मात् ते पुरुषाः विशेषेण मूढाः अज्ञानिन इति। अत एव विमूढत्वं द्योतयितुं वस्तुतो यो रिपुस्तेन सह कलहः कर्तुं योग्यः। स चोदासीनतया कैश्चिन्मित्रतयापि कृत इत्याशयेनोदासीनरिपुमिति शत्रुं विशेषितवान्। मित्रैरिति च मर्त्यानिति। शत्रुषु मैत्र्याः मित्रेषु वैरस्यौदासीन्यस्य च उभयत्र करणं असन्मार्गो विमूढैरेव सेव्य इत्युक्तं विशदीकृतमिति ज्ञेयम्। यथाहुः— ''उत्पथश्चित्तविक्षेप'' (११।१९।४३) इति॥ २५५॥

---

१. विष्णुभक्तौ उदासीनानां रिपुं इति **विजयध्वजीये।**

२. रुद्रेणाभिमन्यमानं वैकारिकमपि मनो द्विविधम्। सात्विकं तामसमिति। प्रथमं विष्ण्वादिदेवताप्रसादेन जय्यम्। द्वितीयं विष्णुप्रसादं विना दुर्जयम्। विष्णुवध्यकालनेमिना अभिमतत्वात्। अतः मित्रैर्मर्त्यैः सह विग्रहः असतां भवतीत्याशयेनाह। **तमिति।** इति **विजयध्वजीये।**

Rarest Archiver

**दस्यून्पुरं षण्णविजित्य लुम्पतो मन्यन्त एके स्वजिता दिशो दश।**
**जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ॥**
**२५६ ॥ ७। ८। ११। (२०)**

अस्त्वयमसन्मार्गो विमूढैः सेव्यः, सन्मार्गस्तु साधुभिर्ज्ञानिभिः सेव्यः कोऽसावित्यतस्तत्र विशेषसूचनाय पूर्वोदितासन्मार्गानुवादपूर्वकं तं दर्शयति ॥ **दस्यूनिति ॥** एके विमूढाः। पुरं स्वाधिष्ठितमेव शरीरम्। लुम्पतः नाशयतः, तत्रापि षट्सङ्ख्यान्। तेऽपि न संमुखतया स्थित्वा युद्धकर्तारः इत्याशयेनोक्तम् ॥ **दस्यूनिति ॥** चोरान् न विजित्य अविजित्वा। दशापि दिशः स्वैर्जिता मन्यन्ते, इत्यनेन यथा केनचिद्राजाभासेन स्वाधिष्ठितमेव स्थानं निरन्तरमेव नाशयतः पञ्चषानपि चोरान् निग्रहीतुं अशक्तेन श्वः अन्यरिपोः राज्यं गृह्यते अस्माभिः परश्वश्च परस्येत्येवमादिरूपेण कथनं, तथा प्रयतनं च प्रेक्षावतां अपहसनीयं, एवं असन्मार्गोऽपीति विशेषः सूचितो भवति ॥ इदानीं सतां मार्गं दर्शयति ॥ **जितेति ॥** जितो विजितः आत्मा मनो येन स तस्य। अत एव देहिनां सर्वेषाम्। समस्य, साधोः निर्मत्सरस्य। ज्ञस्य ज्ञानिनः। स्वस्य मोहेन अज्ञानेनैव प्रतीयमानाः। परे वैरिणः उदासीनाश्च। कुतः स्युः न कुतोऽपीति ॥ **इदमुदितं भवति ॥** ये स्वस्य पुरुषार्थनाशका मनआदयो वैरिणः तैरेव सह निरन्तरं ज्ञानासिधारणादिपूर्वकवैरभावेन कलहः, केषुचिदौदासीन्यं च, ये तु स्वस्य भक्तिज्ञानादिपुरुषार्थस्य विघटकाः, ये तु तत्साधकाः तेषु सर्वेषु भूतेषु सख्यमेवेति त्रिकं सदानुष्ठेयमिति हि सतां मार्ग इति ॥ **यथाहुः—** ''परः स्वात्मेत्यसद्ग्राहः पुंसां यन्मायया कृतः। विमोहितधियां दृष्टस्तस्मै भगवते नमः'' (७।५।११) इति ॥ २५६ ॥

Rarest Archiver

**मनस्विनो निर्जितदिग्गजेन्द्रा ममेति सर्वे भुवि बद्धवैराः ।**
**मृधे शयीरन्न तु तद्व्रजन्ति यन्न्यस्तदण्डो गतवैरोऽभियाति ॥२५७॥**
**। ५ । १३ । १९ । (२१)**

एवमक्रोधापरपर्यायोऽहिंसाख्यो भागवतो धर्मः भगवत्प्रीतिहेतुतया पुरुषार्थहेतुत्वात् अवश्यं सम्पाद्य इत्यभिहितम्। इदानीमेतदनुष्ठानाभावे अनर्थप्राप्तेश्चायमावश्यक इति भावेनाह ॥ **मनस्विन इति ॥** निर्जितमनस्त्वेन गतवैरः अत एव न्यस्तदण्डः पराऽनुद्वेजकः । क्रोधराहित्यरूपाहिंसाख्यभागवत-धर्मानुष्ठातेति यावत्। पुरुषो यद्वस्तु प्राप्नोति तद्वस्तु ते नैव व्रजन्ति। ते के ये अजितमनस्कतया स्वमनोनुसारेण प्रवृत्तिमन्तः भुवि भूमौ। विद्यमानेषु सर्वेष्वपि। बद्धवैरा भूत्वा। कदाचिन्निर्जिता दिग्गजसदृशा राज्ञामिन्द्रा यैस्ते तादृशा भूत्वा। कश्चिच्च ममेदं राज्यमिति युद्धार्थं गताः सर्वेऽपि युद्धभूमावेव शयीरन्। मृताश्च नरकाद्यनर्थमेव प्राप्नुवन्तीति भावः ॥ २५७ ॥(अहिंसा ३)

**तत्वे मनो दर्शने दृगपि स्तुतौ च**
**वाक्कर्मणि ह्यपि करौ श्रवणं कथायाम् ।**
**संसेवया त्वयि विनेति षडङ्गया किं**
**भक्तिं जनः परमहंसगतौ लभेत ॥ २५८ ॥ ७ । ९ । ५० (२२)**

ब्रह्मचर्याख्यं भागवतधर्ममाह ॥ **तत्व इति ॥** तत्र ब्रह्मणि हरौ तरणमेव ब्रह्मचर्यं नाम। चरणं च तत्सेवया चिन्तनादिरूपया सम्पाद्यं तद्विषयत्वम्। तत्र कारणानि चैतानि षट् मनआदीनि। सा च षडङ्गसेवा भक्तिसाधनभूतेति गीयते ॥ तत्वे परतत्वविषयकं मनः। परतत्वप्रतीकस्य दर्शने दर्शनविषयिणी दृक् चक्षुरपि। परतत्वस्य स्तुतौ स्तुतिविषयिणी वाक् च। परतत्वस्य कर्मणि मन्दिरमार्जनादौ कर्मणि तद्विषयौ करश्च करश्च करौ। कायः करश्च।

Rarest Archiver

करशब्दस्य देहे प्रयोगस्तत्ववित्सम्प्रदायागततया रूढ्या वा असाधारण्येन व्यपदेशा भवन्तीति योगेन अवयवनिवहात्मके काये करयोर्होमदानजपादिषु बहुसूत्कृष्टदेहसाधनकर्मसु हेतुतया प्राधान्येन प्रधानावयववाचकेन करपदेन अवयविनः कायस्य बहुतरप्रयोगसिद्धया निरूढलक्षणया वा बोध्यः। अत एव मनउक्तिपाणिभिरिति पाणिपदस्य देहे प्रयोगः। अत्र चोभावपि विवक्षिताविति सूचयितुं कराविति द्विवचनं प्रायुङ्क्त। करयोर्द्वित्वविवक्षया तत्प्रयोग इति तु न मनोज्ञं तद्वचने प्रयोजनाभावात्। वास्तवस्थितिज्ञापनायेति चेत्। तर्हि चक्षुषोः श्रवणयोश्च ज्ञाप्यताम्। सर्वानुभवसिद्धार्थः किमिति ज्ञापनीय इति चेत्। समः समाधिः। अतो ज्ञापनप्रयोजनाभावेन स्वेच्छयैकवचने द्विवचने वा प्रयोक्तव्ये यत्सजातीये सह पठिते एकवचनं प्रयुज्य अत्रैव द्विवचनं तद्विषयं तेन जानीमः अत्र उभावपि विवक्षिताविति। एवंप्रकारेण षड्भिर्मनआदिभिरङ्गैरुपेततया अत एव सं सम्यक् पूर्णया त्वयि त्वद्विषयिण्या चिन्तनादिरूपया सेवया विना। जनो मुमुक्षुः हरौ भक्तिं पूर्णां लभेत किम्। किमाक्षेपे। न लभेदेव। अत इदं भक्तावन्तरङ्गसाधनमिति भावः। परमहंसानां मनःशुद्धिमतां जनानां गतौ आश्रये॥ २५८॥

**वाणी गुणानुकथने श्रवणौ कथायां**
**हस्तौ च कर्मसु मनस्तव[१] पादयोर्नौ।**
**स्मृत्यां शिरस्तव[१] सुरप्रवर प्रणामे दृष्टिः**
**सतां दर्शनेऽस्तु [१]भवत्तनूनाम्॥ २५९॥ १०।११।३९ (२३)**

अयं च भागवतो धर्मः न केवलं भक्त्यन्तरङ्गतया आवश्यकः, किन्नाम

१. अयमेवार्थः सन्ततं अस्मदभिमतः नान्य इति तव तव भवत्पदैः धनदात्मजौ ध्वनयतः इति **सत्यधर्मतीर्थश्रीचरणाः।**

Rarest Archiver

भागवतैरपि प्रार्थितत्वादित्याशयेनाह ॥ **वाणीति** ॥ नौ आवयोः । मनः तव पादयोः स्मृतौ अस्तु । हे सुरप्रवरेति कृष्णं प्रति यमलार्जुनसम्बोधनम् । तव प्रणामे शिरोऽस्तु । भवत्तनूनां मुख्यतः प्रतिमानां सतां अमुख्यतः प्रतिमानां च दर्शने दृष्टिरस्तु ॥ २५९ ॥

**सा वागनन्तस्य गुणान्गृणीते करौ च तत्कर्मकरौ मनश्च ।**
**स्मरेद्वसन्तं स्थिरजङ्गमेषु शृणोति तत्पुण्यकथाः स कर्णः ॥ २६० ॥**
**। १० । ९८ । १९ । (२४)**

भगवद्विषयकत्वविशिष्टानां वागादीनां भागवतैः स्तुतत्वादप्ययं सम्पाद्य इति भावेनाह ॥ **सेति** ॥ या गृणीते सैव वाग्धन्या । वाक्त्वेन भवनं सार्थकमिति भावः । एवमुत्तरत्रापिद्रष्टव्यम् । स्थिरेषु चरेषु चेति सर्वत्र वसन्तं हरिम् । अनेनापि सर्वत्र भगवच्चिन्तनमावश्यकमिति लभ्यत इति ज्ञेयम् ॥ २६० ॥

**शिरस्तु तस्योभयलिङ्गमानमेत्तदेव यत्पश्यति तद्धि चक्षुः ।**
**अङ्गानि विष्णोरथ तज्जनानां पादोदकं यानि भजन्ति नित्यम्॥२६१॥**
**। १० । ९८ । २० । (२५)**

**स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने ।**
**करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ॥ २६२ ॥**
**। ९ । ६ । ६ । (२६)**

**मुकुन्दलिङ्गालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेऽङ्गसङ्गम् ।**
**घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्यां रसनां तदर्पिते ॥ २६३ ॥**
**। ९ । ६ । ७ । (२७)**

Rarest Archiver

**पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवन्दने ।**
**कामं तु दास्ये न तु कामकाम्यया यदुत्तमश्लोकजनाश्रयां[१] रतिम् ॥**
**२६४ ॥ ९ । ६ । ८ । (२८)**

तस्य हरेः उभयलिङ्गं चराचरप्रतीकम् । तदुभयलिङ्गम् । तद्धि तदेव चक्षुः । विष्णोस्तज्जनानां च ॥ २६१ ॥

सर्वकरणानां भगवद्विषयतासम्पादनाचरणमप्यस्ति । ततोऽप्ययमवश्यं सम्पाद्य इति भावेनोक्तं विशदीकरोति ॥ **स वा इति** ॥ सोऽम्बरीषः । मनः कृष्णपदारविन्दयोश्चकार । तद्विषयं कृतवानिति । एवमुत्तरत्रापि ज्ञेयं ॥ २६२ ॥

श्रीमत्तुलस्यां स्थिते । तदर्पिते अन्नादौ ॥ २६३ ॥

मनस इव तद्विकाराणां वृत्तीनामपि भगवद्विषयत्वं सम्पाद्यमित्याशयेनाह ॥ **काममिति** ॥ कामं तु दास्य एव चकार । न तु कामकाम्यया विषयवासनया विषयेषु ॥ २६४ ॥

**एवं सदा कर्मकलापमात्मनः परेऽधियज्ञे भगवत्यधोक्षजे ।**
**सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह॥२६५॥**
**। ९ । ६ । ९ । (२९)**

किम्बहुना षोडशकलात्मकदेहसम्भवाः ये व्यापारास्ते सर्वेऽपि मनःशुद्ध्यनुसारेण भगवद्विषयकतया कर्तव्या इत्याशयेनाह । **एवमिति** ॥ सर्वात्मना भावं भक्तिम् । अयमाचारोऽपि न साधारणजनकृतः किन्तु

१. उत्तमश्लोकस्य हरेः जनान् आश्रयतीति तां इति **विजयध्वजीये** ।

Rarest Archive

परमभागवततया प्रसिद्धतरेणेति न अनादरणीय इति भावेन ह इत्युक्तम्। किञ्च सोऽप्यम्बरीषो न स्वबुद्ध्यैवं कृतवान् किन्तु भागवतप्रधानैरुपदिष्ट एव ततोऽत्युपादेय इति सूचयितुं तन्निष्ठैर्भगवन्निष्ठावद्भिर्विप्रैरभिहित इति। एतच्च पुराणे प्रसिद्धमिति हेत्यनेनाह। अनेन मनोवृत्तीनां व्यापारमात्रस्य भगवद्विषयत्वसम्पादनस्याधिक्यस्य कथनेन पूर्वोक्तं विशदीकृतमिति ज्ञेयम्॥ २६५॥

**बिले बतोरुक्रमविक्रमान्ये न म शृण्वतः कर्णपुटे नरस्य।**
**जिह्वाऽसती दार्दुरिकेव सूत न चेत्प्रगायत्युरुगायगाथाम् ॥ २६६॥**
**।२।३।२०।(३०)**

**भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम्।**
**शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्काञ्चनकङ्कणौ वा ॥ २६७॥**
**।२।३।२१।(३१)**

तदेवं भागवतोत्तमैरपेक्षितत्वात् स्तुतत्वात् आचरितत्वाच्च सर्वकरणानां भगवद्विषयत्वरूपं ब्रह्मचर्यं अवश्यं सम्पाद्यमित्यभिहितम्। इदानीं तद्वैपरीत्येनावस्थानस्य तैरेव निन्दितत्वाच्च तदावश्यकमिति भावेनाह॥ **बिले बतेति**॥ स्वे देहे। सूतेति शौनककृतं सम्बोधनम्। नरस्य ये कर्णपुटे। उरुक्रमस्य विक्रमान्। न शृण्वतः न शृणुतः ते बिले तत्सदृशे। कर्णतया भवनमेव व्यर्थमिति भावः। एवमुत्तरत्रापि ज्ञेयम्। अत एव पश्यतां कुण्डलमण्डितेऽपि दुःखकरे इति भावेनोक्तम्॥ **बतेति॥** इदं सर्वत्र ज्ञेयम्। उरुगायगाथां न प्रगायति चेत्, सा जिह्वा अतिचमत्कृतिविशिष्टपुष्टजनतुष्टि-करवचनपटीयस्त्वेन लोकमान्यतामण्डिताऽपि मण्डूकजिह्वातुल्यैव। अत एव

Rarest Archiver

असती सन्मान्या न भवति ॥ २६६ ॥ **भार इति।** परं केवलं भारः शिलावच्छरीरस्य। वा अपि। शावौ करौ शवसम्बन्धिनौ तत्सदृशौ ॥ २६७ ॥

**बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये।**
**पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ॥ २६८ ॥**
**। २ । ३ । २२ । (३२)**

**बर्हायित इति।** लिङ्गानि उभयविधानि। ये न निरीक्षतः ते नलिनदलादिसदृशतया जठरपिठरीपूरणपरैः उपवर्णिते दृष्टशतसहस्रनटादिनर्तने अपि बर्हायिते पिच्छसदृशे। यौ हरेः क्षेत्राणि नानुव्रजतः तौ शतराजस्थान-विहरणपटुतरावपि राजशतवर्णितौ नृणां पादौ पादतया जातावपि। द्रुमजन्मभाजौ द्रुमतया जननमेव प्राप्ताविव। स्वयमेव गमनाभावेऽपि गच्छतोऽनुगमनेनापि भाव्यम्। तदपि नास्तीत्याशयेनोक्तम्। **नानुव्रजत इति** ॥ २६८ ॥

**जीवंश्छवो भागवताङ्घ्रिरेणुं न जातु मर्त्योऽभिलषेत यस्तु।**
**श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसंश्छवो यस्तु न वेद गन्धम् ॥**
**२६९ ॥ २ । ३ । २३ । (३३)**

**जीवंश्छव इति ॥** यः मर्त्यः। श्रीविष्णुपद्याः श्रीमद्भागीरथ्याः संबन्धि। भागवताङ्घ्रिरेणुं तन्मिश्रमुदकम्। जातु कदाचिदपि। नाभिलषेत। स तु शव एव। तुशब्दोदितं विशेषं दर्शयति। **जीवन्निति ॥** एतावानेव विशेषो यज्जीवनभावाभावाविति। तस्याङ्गानि शवाङ्गसदृशानि इति भावः। अनेन ''अङ्गानि विष्णोरथ तज्जनानां पादोदकं यानि भजन्ति नित्यमि''त्यत्रोक्तं विष्णोः पादोदकं सालग्रामशिलादितीर्थमेकं श्रीमद्भागीरथीतीर्थमपरमिति

Rarest Archive

सूचितम्। अत एव श्रीविष्णुपद्या इत्याह। उदकमित्यनुक्त्वा रेणुमित्युक्तिः तन्मिश्रतयैतदधिकमिति ज्ञापयितुम्। अत एव प्राक् ''[1]या वै लसच्छ्रीतुलसी-विमिश्रकृष्णाङ्घ्रिरेण्वभ्यधिकाम्बुनेत्री''त्युक्तम्॥ नित्यं यानि पादोदकं भजन्ति तान्यङ्गानीत्युक्तं तन्मा हि भूत्। जन्मनि एकदापि भजन्ति चेत् तान्यङ्गानि वयं स्तुमः, तदपि नास्तीत्याशयेनोक्तम्। **जात्विति॥** श्रीविष्णुपदार्पिताया-स्तुलस्याः यः गन्धं न वेद स तु शव एव। तुशब्दोक्तं शवाद्विशेषं दर्शयति॥ **श्वसन्निति।** तस्य नासिका अनेकसुमपरिमलं जिघ्रन्त्यपि नानाविधतया स्तुताऽपि शवनासिकासमेति भावः। यथा भगवति भक्तिविशेषसिद्धये सर्वात्मना श्रीहरिसेवा कर्तव्या तथा तदनन्तरं ज्ञानप्रदे गुरावपि इति भावेनवातस्या अकर्तारं धिक्करोति॥ **जीवन्निति॥** भागवतानाम् अङ्घ्रिरेणुमपि द्रव्यव्ययासाध्यं जात्वपि यो नाभिलषेत स जीवंश्छव इति॥ २६९॥ (ब्रह्मचर्य ४)

**निष्किञ्चना मय्यनुरक्तचेतसः शान्ता महान्तोऽखिलजीववत्सलाः।**
**कामैरनालब्धधियो [2]जुषो ये ते नैरपेक्ष्यं हि विदुः सुखं मम॥२७०॥**
**।११।१४।१७।(३४)**

इदानीमेतस्य भागवतधर्मस्यानुष्ठातॄणामेव भक्तिसाधनेषु श्रवणादावधि-कारस्ततः सुखं तत्र रतिश्च भवति नेतरेषामित्ययमवश्यं सम्पाद्य इति भावेन येन केनापि सन्तुष्टत्वाख्यं भागवतधर्मं दर्शयति॥ **निष्किञ्चना इत्यादिना॥** तत्र यावद्देहं काचनजीविकाऽपेक्षितैव। प्राणरक्षणस्य परमधर्मत्वात्। सा जीविकावृत्तिश्च द्विविधा। अयाचना सयाचना चेति। तत्राद्या द्विविधा।

---

१. प्रकरण २। श्लोक ७।

२. अजुष इति प्रतीकमुपादाय विषयानसेवमानाश्चेति व्याख्यातं **विजयध्वजीये**। एवमेव **श्रीनिवासतीर्थाः**॥

Rarest Archiver

यदृच्छावृत्तिः शिलोञ्छवृत्तिश्चेति। द्वितीया तु त्रिविधा। असञ्चयो वार्ता शालीनेति। एवं पञ्चवृत्त्या प्रपञ्चं पञ्चदिनानि प्रपञ्चयन् विरिञ्चप्रपञ्चे येनकेनापि सन्तुष्ट इत्युच्यते। तत्र योगिनः अवस्थाभेदेन त्रिविधाः। पक्वाः, पक्वकल्पाः, पक्वप्रतिनिधयश्चेति। तत्राद्यानां आद्या वृत्तिः। द्वितीयानां तु द्वितीया। तृतीयानामपि दशाविशेषेणोत्तरा त्रिविधा वृत्तिः। तत्र पूर्वपूर्ववृत्तिः उत्तरोत्तराधिका इत्यादौ आद्यया वृत्त्या वर्तमानान् दर्शयति **निष्किञ्चना इति॥** द्विविधाः प्राणिनः सकिञ्चनाः निष्किञ्चनाश्चेति। तत्र ये किञ्चन तुच्छं कपर्दिकामात्रमप्यादिं कृत्वा जीवनोपयिकादधिकमुपादेयं वस्तु तेन सहिताः ते सकिञ्चनाः, तत एव तेषु न विशेषतो भगवत्प्रीतिः। **यथाहुः—** "यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनाम्। अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हती"ति॥ (७।१५।९) किञ्चनापि ततोऽधिकमुपादेयं निष्क्रान्तं येभ्यस्ते निष्किञ्चना योगिन इति चोच्यन्ते। तत्र हेतुः॥ **मय्यनुरक्तचेतस इति॥** मय्येवानुरक्तं चेतो येषां ते महान्तो योगिषु। तेषां लक्षणं दर्शयति॥ **अखिलजीववत्सला इति॥** प्रवृत्तिप्रकारमाह। **कामैरनालब्धधिय इति॥** अनुद्विग्नधियोऽपि जुषः कामजुषः। अनेन स्वयमयाचनेन यदृच्छया लब्धेनैव जीवनं तेषामिति सूचितं भवति। अत एव एवंविधप्रवृत्तिमत्त्वादेव लोकेषु शान्ता येन केनापि सन्तुष्टा इत्युच्यन्ते। किमनेन भागवतधर्मेणानुष्ठितेन फलमत आह॥ **य इति॥** ये कामैरनालब्धधियो यथाधिकारं विषयैरपरिभावितबुद्धयः। येन केनाप्ययाचितेन याचितेन वा वक्ष्यमाणरीत्या जीवनोपायेन सन्तुष्टमनसस्त एव। मम सुखं मत्कथाश्रवणादिजन्यं सुखम्। विदुरिति। तेषामेव तत्राधिकारः रतिः तेन सुखं च भवतीति भावः। कुत ईदृशानामेव तत्राधिकारादिरित्यत उक्तम्॥ **ममेति॥** मम सुखम्। नैरपेक्ष्यं येन केनापि सन्तोषो निरपेक्षा तयैव प्राप्यमिति। ज्ञानिनो वदन्ति हि यतोऽत इति। तथैव ज्ञानिवचनेन

Rarest Archiver

प्रमितत्वादिति। तेऽपि तथा किंवदन्तीत्यतोऽप्युक्तम्॥ **ममेति**॥ हि यतस्ते। ज्ञानिनो मम सुखं नैरपेक्ष्यमिति विदुः अनुभवन्ति तत इति॥ अथवा। येन केनापि सन्तुष्टिलक्षणभागवतो धर्मः अनुष्ठेयः इत्युदिते येन केनापि जीवनधारणे क्रियमाणे सन्तुष्टिः कथं स्यात्। इच्छानुसारेण सम्यग्विषयसेवने हि सम्यक् सुखलक्षणा सन्तुष्टिः स्यादित्यत आह॥ **य इति**॥ ये कामैरनालब्धधियस्त एव नैरपेक्ष्यं येन केनापि जीवनधारणमात्रौपयिकवृत्तिरूपया निरपेक्षया जन्यं सुखम्। विदुः जानन्ति। यतस्ततः कामहतधियां कथं सन्तोषः स्यादिति॥ २७०॥

**अकिञ्चनानां हि धनं शिलोञ्छनं स तेन निर्वर्तितसाधुसत्क्रियः।**
**कथं विगर्ह्यं तु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः॥**
**२७१॥ ६। ७। ३७। (३५)**

एवं पक्वयोगिनां यदृच्छावृत्तिं प्रदर्श्य पक्वकल्पानां वृत्तिं दर्शयति॥ **अकिञ्चनानामिति**॥ हे अधीश्वराः इति देवान्प्रति विश्वरूपऋषेः सम्बोधनम्। हि यत अकिञ्चनानां योगिनाम्। शिलोञ्छनमेव धनं जीवनोपाय इति हि प्रमितम्। यतश्चाहमेतावत्पर्यन्तं तेनैव विहितेन शिलोञ्छनेन[१]। निर्वर्तिताः साधूनां याः सत्यो दोषाजनिकाः क्रियाः अग्निहोत्रादयो येन स तस्मात्स तादृशोऽहम्। विगर्ह्यं ब्राह्मणश्रेष्ठस्यैव निन्दितम्। मम योगिनः तु विशेषेण विनिन्दितं पौरोधसम्। कथं करोमीति। ननु बहुभिः प्रार्थनीयमेतत्। सत्यम्। प्रार्थयितार ईदृशा इत्याह। **दुर्मतिरिति**॥ येन दुर्मतिरेव हृष्यति न प्रेक्षावानिति। व्रीह्यादिसस्यवत्सु क्षेत्रेषु खले राशीकृते धान्ये क्षेत्रस्वामिना नीते

---

१. ''उंछः कणश आदानं कणिशाद्यर्जनं शिलं'' इति **यादवः**।

Rarest Archiver

सति तत्परित्यक्तधान्यानयनं तेन जीवनं शिलोञ्छनामेति ॥ २७१ ॥

**मागारदारात्मजदेहबन्धुषु सङ्गो यदि स्याद्भगवत्प्रियेषु नः ।**
**यः प्राणवृत्त्या परितुष्ट आत्मवान् सिद्ध्यत्यदूरान्न तथेन्द्रियप्रियः ॥**
**२७२ ॥ ५ । १८ । १० (३६)**

अधुना दशाभेदेन भिन्नानां त्रिविधानां पक्वतुल्यानां योगिनां प्रवृत्तिप्रकारं दर्शयति ॥ **मागारेति ॥** अगारादिषु, सङ्गः कुटुम्बिता, नोऽस्माकं, साधकानां मा भूदेव । अयमुत्तमः कल्पः । यदि च दैवादनायत्या अज्ञानेन वा स्यात् । तदा तेन कुटुम्बेन भगवद्भक्तेन भाव्यम् । तदैव, हि कुटुम्बिनोऽपि पुरुषार्थसाधनयोग इति भावेनाह ॥ **भगवत्प्रियेषु स्यादिति ॥** कुत एवं प्रार्थ्यत इत्यत आह ॥ **य इति ॥** योऽधिकारी । प्राणवृत्त्या प्राणधारणमात्रोपयिकया वृत्त्या । परितुष्टः सन्तुष्टः । स एवात्मवान् मनोजयेन विशुद्धान्तःकरणः सन् । श्रवणादावधिकृतः । अदूरात् शीघ्रमेव । सिद्ध्यति अपरोक्षादिमान् भवति यथा । न तथा इन्द्रियप्रीणनासक्तः, प्राणधारणौपयिकद्रव्यादधिकद्रव्यासक्तः । सिद्ध्यति । किन्तु पुनर्जन्मैवात्र प्राप्नोति यतोऽत इति॥ **इदमुदितं भवति—** कुटुम्बराहित्येनावस्थानं पारिव्राज्यादिकमेव मुख्यम् । तथा यदृच्छया लब्धेन द्रव्येण प्राणधारणमात्रं च । भगवत्प्रियैर्भार्यादिभिः कुटुम्बैर्गृहित्वम् । तथा शिलोञ्छवृत्त्या प्राणधारणमात्रं च तस्मादवमम् । इदं च वर्तनद्वयमयाचनया । याचनया प्राणधारणमात्रं तु ततोऽवमं । ततोऽप्येकैकस्मिन् दिने जीवनौपयिक-स्वीकरणमुत्तमम् । सा वृत्तिः असञ्चयपदोदिता । पक्षमासादिकालपर्यन्तं जीवनौपयिकस्वीकरणं मध्यमम् । तथा वृत्तिस्तु वार्तेति गीयते यायावरमिति च । संवत्सरपर्यन्तं जीवनौपयिकस्वीकरणमधमम् । इयं च वृत्तिः शालीनमिति शब्द्यत इति । इदं च मनोविक्षेपविशेषाविशेषविवक्षयोक्तमुत्तमत्वादिकम् । यस्य कुटुम्बे

Rarest Archiver

सत्यसति वा, याचनेऽयाचने वा, सङ्ग्रहेऽसङ्ग्रहे वा, मनोविक्षेपविशेषाभावः तेन सानुष्ठेयेति तत्वमिति ।। २७२ ।।

**स चिन्तयन् द्व्यक्षरमेकदाम्भस्युपाशृणोद्द्विर्गदितं वचो विभुः ।**
**स्पर्शेषु यत्षोडशमेकविंशं निष्किञ्चनानां नृप यद्धनं विदुः ।। २७३ ।।**
**। २ । ९ । ६ । (३७)**

नन्वेवंविधया वृत्त्या प्राणधारणमात्रेण वर्तनेऽपि विपदागमने कथम् । वासुदेवभक्तानां विपदो न संत्येव । दैवाद्यदि भवेयुस्तदाप्यन्येषां सम्पद्भ्योऽपि वरीयस्य एव । भक्तिज्ञानादिविशेषसाधनत्वात् । **यथाहुः**— ''विपदः सन्तु नः शश्वत्तत्र तत्र जगत्पते । भवतो दर्शनं यत्स्यादपुनर्भवदर्शनं'' (१।८।२८) इति ।। सत्यमेवम् । तदापि जीवनोपायः क इति मदाशय इति । अन्येषामपि कः । सङ्गृहीतधनमिति चेत् समम् । किं तदित्यत इदमेवेत्याह ।। **स इति** ।। विभुर्ब्रह्मा । अम्भसि । कथं सृष्ट्युपयोगिज्ञानं मे स्यादिति चिन्तयन्नासीत् । स चैवं चिन्तयानः । एकदा । द्विवारमुच्चारितं, द्वे अक्षरे यस्मिन् तादृशं वचः । शुश्राव । वचसि तदक्षरद्वयं किमिति शङ्कमानं नृपं प्रति शुकः स्वयमाह । हे नृप, कादयो मावसानाः पञ्चविंशतिवर्णाः स्पर्शसंज्ञाः तेषु च यत्षोडशं तदेकम् । यच्चैकविंशं तद्द्वितीयमिति । विज्ञातमेतत् । षोडशं तकारः एकविंशं तु पकारः इति । तयोरर्थस्तु क इत्यत उक्तम् । **निष्किञ्चनानामिति** । निष्किञ्चनानां योगिनाम् । यद्धनं तदेव । तयोरक्षरयोरर्थं विदुः वदन्ति ज्ञानिनः । निष्किञ्चनास्तु तपोधना इति प्रसिद्धमिति भावः । एवं पारोक्ष्येण कथनेन भगवद्वचनमात्रस्य मन्त्रतुल्यतां सूचयति । अनेन यथान्येषां सङ्गृहीतं धनं विपत्सु जीवनोपायो भवति तथैतेषां सङ्गृहीतं तप एवान्नादिसम्पादनद्वारा जीवनोपायो भवतीति किमेतया चिन्तया इत्युक्तं भवति ।। २७३ ।। (येन केनापि सन्तोषः ५) ।।

Rarest Archiver

**विषयतृषो नरपशवो य उपासते विभूतीनं परं त्वाम्।**
**तेषामाशिष ईश तदनु विनश्यन्ति यथा राजकुलम् ॥ २७४ ॥**
**। ६ । १६ । ३८ । (३८)**

कामनां कुर्वतो निन्दति॥ **विषयेति**॥ हे ईश। विषयतृषो विषयाकाङ्क्षिणः। अत एव नरेषु पशवः। विभूतीर्विविधमनोगतप्रदान्। तथा विदित्वा अन्यान् देवानुपासते। ततोऽपि परं उत्तमम्। तादृशपुरुषार्थप्रदमपि त्वां नोपासते। तेषां पुरुषाणामाशिषः आशासितविषया तत्प्राप्तमेकं वस्तु अनुसृत्यैव नश्यन्ति। **इदमुदितं भवति**। ते मनसि बहून् विषयाननुसन्धाय त्वत्तोऽन्यं तत्प्रदमिति मत्वा त्वामगणय्य उपासते। तस्माच्चतेष्वेकं पुत्ररूपं फलं भवति। अथ सम्पद् आगन्तव्या। तदन्तरे जातः पुत्रो म्रियते इत्येवंक्रमेणानुसंहितानां विषयाणामेकदा मेलनमेव दुर्घटमिति कचिदेकस्यैकदा मेलनेऽपि तस्य मेलनस्य अनु अनन्तरं मिलिताः सर्वा अप्याशिष एकदैव विनश्यन्ति। यदि च कस्यचि-द्यावज्जीवं मेलनं भवति दैवात् तदापि त एव तदनु तच्छरीरत्यागानन्तरमेव विशेषेण नश्यन्ति। नरकदुःखमेव प्राप्नुवन्तीति यावत्। अत्र सर्वत्रापि दृष्टान्तमाह ॥ **यथा [१]राजकुलमिति** ॥ यथा राजकुलं अमिलितराज्यं कदाचिन्मिलितराज्यमपि तत्काल एव गतराज्यम्। कचिद्यावज्जीवं स्थितमप्यन्ते निश्चितनरकं तथेति। **यथाहुः**— ''एवं लोकं परं विद्यान्नश्वरं कर्मनिर्मितम्। अतुल्यातिशयध्वंसाद्यथा मण्डलवर्तिनां'' ((११।३।२१) इति ॥ २७४ ॥

**वरान्विभो त्वद्वरदेश्वराद्बुधः कथं वृणीते गुणविक्रियात्मनाम्।**
**ये नारकाणामपि सन्ति देहिनां तानीश कैवल्यपतेर्वृणीत कः॥२७५॥**
**। ४ । २० । २४ । (३९)**

---

१. अराजकुलम्। पालकेन राज्ञा शून्यो जनसमुदायः। धर्मविरुद्धानां राज्ञां कुलं वा। इति **विजयध्वजतीर्थीये**।

Rarest Archiver

ननु भगवन्तं परित्यज्य अन्यदेवोपासक उत्तरकालभाविदुःखमननुसन्धाय सुखलवं तात्कालिकमवेक्षमाणः अदीर्घदर्शितया कण्टकावृततृणभक्षकपशुरिवेति भवदुक्तं सम्भावितमेव। तमेव भगवन्तमुपास्य वरान् वृणीमः। न हि वयं त इवादीर्घदर्शिन इत्यत आह॥ **वरानिति॥** हे विभो भगवन्। वरप्रदानां मध्ये श्रेष्ठात्। त्वत्तः। बुधः पण्डितः। वरान् अल्पैर्वरणीयान् विषयान्। कथं वृणीते। न कथमपि। वरदेश्वरश्चेदुदारतया अधिकमेव दद्यादिति न [१]तत्प्रतिबन्धकं प्रत्युत साधकम्। वरणे विषयवरणे च कानुपपत्तिरित्यतस्तद्विशदयति॥ **य इति॥** हे ईश। कैवल्यदातुः तव सकाशात्। गुणेषु विषयेषु विक्रिया विकारस्तेन युक्तः आत्मा मनो येषां तेषां विषयलुब्धानाम्। नारकाणां तत्सदृशानां तिर्यग्योनिगतानामपि। देहिनां प्राणिनाम्। सन्ति भवन्ति ये विषयास्तान् को वृणीत। न कोऽपीति। अनेन कुबेरसमीपे पलालप्रार्थनमिव कैवल्यदातुर्विषयवरणं अत्यचतुरतापादकमिति सूचितं भवतीति भवत्येव वरणे वरदेश्वरादिति प्रतिबन्धकमेवेति भावः॥ **इदमुदितं भवति—** सत्यं यूयमन्यदेवोपासकजन इव नादीर्घदर्शिन इति। तथापि प्राप्तपरित्यागितया तदपेक्षया अधिकं अदीर्घदर्शिन एवेति॥ २७५॥

**मां प्राप्य मानिन्यपवर्गसम्पदं वाञ्छन्ति ये सम्पद एव सत्पतिम्।**
**ते मन्दभाग्या निरयेऽपि ये स्युर्मात्रात्मकत्वान्निरये सुसङ्गमः॥२७६॥**
**।१०।७५।५७। (४०)**

कियदेतत्। यत्केनचिद्विरक्तेन भक्तेनोदितम् अतो भगवदुपासका वयमन्योपासकेभ्योऽधिकमदीर्घदर्शिन इति वचनमतिसाहसमित्यतो भगवद्वाक्यमेवोदाहरति॥ **मामिति॥** [२]अपवर्गाख्यसम्पत्प्रदं मां उपास्य, विषयभोगरूपा

---

१. वरदेश्वरत्वमिति भाति।      २. अपवर्ग एव सम्पत् यस्मात्।

Rarest Archiver

एव सम्पदः ये वाञ्छन्ति । ते मन्दभाग्याः दैवहीनाः । प्राप्तमोक्षाख्यफलत्यागित्वेन अन्यदेवोपासकादाधिक्येन देशान्तरस्थं राजानमप्राप्यालब्धफलात्पुरुषादपि प्राप्य अलब्धफलपुरुष इव मन्दभाग्य इति । [१]मात्रात्मकत्वात्तज्जन्यत्वात् । ये विषयभोगाः । निरये पश्वादिदेहेऽपि । स्युः भवेयुः । तद्रूपाः सम्पद एवेत्यन्वयः । निरये विषयाभावेन तदधीनो भोगः कथं स्यादित्यत उक्तम् ।। **निरय इति ।।** निरये तत्सदृशपश्वादिदेहेऽपि । सुसङ्गमः मात्राणां तृणजलादीनामनायासेन प्राप्तिरस्त्येवेति । अतो भगवतैव निषेधितत्वात् तत्करणे तदपेक्षया आधिक्येन अदीर्घदर्शितेति साधूक्तमिति ॥ **यथाहुः**— ''न खादन्ति न मेहन्ति किं ग्रामपशवोऽपरे'' (२।३।१८) इति ॥ २७६ ॥

**नूनं विमुष्टमतयस्तव मायया ते**

**ये त्वां भवाप्ययविमोक्षणमन्यहेतोः ।**

**अर्चन्ति कल्पकतरुं कुणपोपभोग्य-**

**मिच्छन्ति यत्स्पर्शजं निरयेऽपि नृणाम् ॥ २७७ ॥**

**। ४ । १० । ९ । (४१)**

ननु भगवन्तं प्रति ये वरान् प्रार्थयन्ते ते पुनरन्यदेवमपेक्षितार्थप्रदाने सामर्थ्यविधुरं विदित्वैव तत्परित्यज्य, अपेक्षितार्थप्रदं मोक्षप्रदं ज्ञात्वैवोपासते । प्रार्थयन्ते तु कल्पतरुमर्चयित्वा कणपिष्टादिकमिव, विषयानल्पान्नश्वरांश्च । किन्निमित्तमत्र विद्यते इत्यतो भगवन्मायैव कल्पतरुपूजककणभक्षकस्य कणप्रार्थनायामिवेति भावेनाह ।। **नूनमिति ।** ये त्वां भवाप्ययविमोक्षणं ज्ञात्वा । अन्यहेतोः विषयभोगप्राप्तये । अर्चन्ति पूजयन्ति । ते कल्पतरुं

---

१. तेषां भोगानां शब्दादिविषयाविनाभूतत्वात् इति **विजयध्वजीये ।**

Rarest Archive

अर्चन्ति। कुणपोपभोग्यं इच्छन्ति। पिष्टेच्छया कल्पतरुपूजनसदृशमेतत्कृत-मर्चनमिति यावत्। यत्स्पर्शजत्वान्नृणां, नरके सुलभम् ते पुरुषा जानन्तोऽपि एवं कुतः कुर्वतीत्यत उक्तम्॥ **त इति**॥ [1]ते। तव मायया विमुष्टा हृता मतिर्येषां ते तथा। नूनं निश्चितमेतत्। मायैव तेषां बुद्धिमेवंविधां करोतीति। अन्यथा विदुषामेवंविधप्रवृत्त्ययोगादिति॥ २७७॥

**न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम्।**
**न योगसिद्धीरपुनर्भवं वा वाञ्छन्ति त्वत्पादरजःप्रपन्नाः ॥ २७८॥**
**।१०।१४।३७।(४२)**

एवं विषयाणामल्पसुखदत्वाद्बहुदुःखदत्वाच्चावश्यं तत्र कामना वर्जनीयेत्यभिहितम्॥ तत्रेयमाशङ्का। सत्यं विषयभोगा अल्पसुखदाः महादुःखदाश्चेति। तथापि तत्र कामना त्यक्तुमशक्या। ननूक्तमेतत्। यच्छनैः सम्पादनीयमेतदिति। सत्यमभ्यासबलेन सर्वविषयानपि क्रमात्त्यक्ष्यामः, यदि सर्वानपि विषयान् परित्यज्य भगवद्भजनासक्ता लोके स्युः॥ इत्यतः क्व भवदीया विषयाः क्व स्वर्गादयस्तथापि तादृशानपि परित्यज्य बहवो भगवत्सेवारताः किमसारवैषयिकसुखकामनापरिचिन्तया, तत्परित्यागश्च तादृशवाक्यादेवा-वसीयत इत्याशयेन तदभिधायकं वाक्यं पठति॥ **न नाकेति**॥ रसायाः रसातलस्य। योगप्राप्याणिमादिसिद्धीः। किं बहुना। [2]अपुनर्भवं मोक्षमपि॥ २७८॥

---

१. तच्छब्दस्य रूपम्।

२. ''अपुनर्भवमात्रात्तु हरिसामीप्यमुत्तमम्। तत्रापि स्पर्शयोग्यत्वं यथा वेदविदो विदुः'' इति **पाद्मे**। जननादिविकलात् मोक्षात् हरिसामीप्यं तद्रूपो मोक्षः उत्तमः। तत्रापि सामीप्येऽपि। स्पर्शयोग्यत्वं उत्तममित्यन्वेति। यथा सम्यक् उत्तममिति वेदविदःविदुः।

Rarest Archive

**नात्यन्तिकं विगणयंत्यपि ते प्रसादं**
**किंचान्यदर्पितभयं भ्रुव उन्नयैस्ते ।**
**येंऽग त्वदङ्घ्रिशरणा भवतः कथायाः**
**कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ॥२७९॥ ३ । १६ । ४८(४३)**

ननु सत्यलोकादिकमसारानित्यमिति तन्न वाञ्छन्तीति युक्तं, अपुनर्भवं तु किमिति न वाञ्छन्तीत्यतः अनभिज्ञो हि भवान् भागवतानां भवतः (जायमानस्य) सुखस्य काष्ठायाः। यद्भगवत्कथाश्रवणादिसुखस्य मौक्तं सुखमपि कलां नार्हतीति । तथा चोक्तं वैराग्यप्रकरणे[१] । ततः ईदृशसुखे निमग्ना अपुनर्भवमपि न वाञ्छन्तीति भावेनाह ॥ **नात्यन्तिकमिति ।** हे अङ्ग, त्वदङ्घ्रिरेव शरणं येषां ते । कीर्तन्यं कीर्तनीयं, तीर्थं पवित्रं, यशो यस्य तस्य । भवतः । कथायाः रसज्ञाः सारग्राहिणः । अत एव कुशलाः ये ते पुरुषाः । ते तव आत्यन्तिकं मुख्यम् । प्रसादं तत्साध्यं मोक्षमपि [२]न विगणयन्ति पुरुषार्थतया । यदा हि मोक्षस्य ईदृशी दशा । तदा ते । भ्रुवः, उन्नयैः विजृम्भणविशेषैः । अर्पितं पतनादिभयं यस्मिन् तत् । अन्यच्च स्वर्गादिकं तु । न विगणयन्ति इति किं वक्तव्यमिति ॥ २७९ ॥

---

१. ''या निर्वृतिस्तनुभृता''मित्यत्र (१०१) ।

२. आत्यन्तिकं प्रसादमपि न विगणयन्तीत्युक्त्या मुक्तिमपि न गणयन्तीति प्राप्ते यं न गणयन्ति तं आत्यन्तिकप्रसादलभ्यं आनन्दं प्रमाणेनैव तावदाह ॥ **भक्तीति** ॥ ''भक्तिज्ञान-परीपाकात्किञ्चित्पूर्वश्च मुच्यते । दर्शनेन हरेस्तत्र नानन्दः पूर्णतां व्रजेत्'' इति **ब्रह्मतर्के** ॥ ''मुमुक्षोः केवलो भक्तो मुक्तावपि सुखी भवेत्'' इति च । केवलः निरपेक्षः । सुखी अधिकसुखवान् । तथाच उत्तमाधिकारिणः ये कथायाः रसज्ञाः ब्रह्मसाक्षात्कार-प्राप्तस्वरूपानन्दानुभववन्तः ते अधमाधिकारिषु जायमानं आत्यन्तिकप्रसादसाध्यमोक्षानन्द-मपि न गणयन्ति । स्वेषां इदानीमेव तन्मोक्षसुखापेक्षया अधिकसुखस्य लाभादिति मूलाभिप्राय इति भावः ।

Rarest Archive

**कामं भवेम वृजिनैर्निरयेषु नष्टाश्चेतोऽलिवद्यदि नु ते पदयो रमेत।**
**वाचश्च न स्तुलसि[१] वेद्यदि तेङ्घ्रिशोभाः पूर्येत ते गुणगणैर्यदि कर्णरन्ध्रः[१]**
**॥ २८० ॥ ३ । १६ । ४१ । (४४)**

भगवत्सेवानिरताः मुक्तिमपि नेच्छन्तीत्युक्तं तन्नाश्चर्यम्। यतो नारकं दुःखमपीच्छन्तः सन्तः सेवासमुत्सुकाः सन्तोऽपि सन्ति। का कथा कामकामनां त्यजतामित्याशयेनाह॥ **काममिति॥** अलिवत् पद्मे भ्रमरवत् [२]अङ्घ्रिनिमित्त (सम्बन्धि) शोभावत्यः। पूर्येत यदि। तर्हि। पापैः। नरकेषु। नष्टाः क्लिष्टाः। कामम्। [३]भवेमेति॥ २८०॥

**न कामयेऽन्यं तव पादसेवनादकिञ्चनप्रार्थ्यतमाद्वरं विभो।**
**आराध्य कस्त्वामपवर्गदं हरे वृणीत आर्यो वरमात्मबन्धनम्॥२८१॥**
**। १० । ५४ । ५७ । (४५)**

एवं निष्कामो भूत्वा भगवत्सेवारूपं कर्म कुर्यादित्युक्तमुपसंहरन् सन्ततं श्रीहरिं प्रति इदमेकमेव प्रार्थ्यं नान्यत् तस्यात्मबन्धकत्वादिति विशेषं ज्ञापयति॥ **न कामय इति॥** मोक्षमपि हित्वा सेवनं किमिति प्रार्थ्यत इत्यत इदमेकमेवाकिञ्चनैर्भागवतैः प्रार्थ्यतममितोऽन्यन्नास्त्येव। तस्यैव भागवतजनपुरुषार्थत्वा-

---

१. ह्रस्वत्वमार्षम्। रध्रशब्दे पुंस्त्वं च।

२. अङ्घ्री शोभयन्तीत्यङ्घ्रिशोभाः। स्तुतिद्वारेणेति शेषः।

३. अत्र पापफलदुःखभोगः कथं प्रार्थ्यते। दुःखस्य अनिष्टत्वेन द्वेष्यत्वात्। तत्र च मनआदीनां भगवद्विषयकत्वरूपभक्तिवर्धनं च किमर्थं प्रार्थ्यते इत्यतः अत्राभिप्रायं प्रमाणेन दर्शयति॥ **यावदिति॥** यावत्परमभक्तैस्तु भुज्यते दुःखमुल्बणम्। तावन्मुक्तौ सुखोद्रेकस्तत्र चेद्भक्तिवर्धनम्। **इति ब्रह्मतर्के॥** तथा च हरिभक्त्यविलोपेन दुःखभोगे आनन्दोद्रेकफलसद्भावात् एवं प्रार्थनं युक्तमिति भावः।

Rarest Archiver

दिति भावेनोक्तम्। **अकिञ्चनप्रार्थ्यतमादिति**॥ आत्मनः स्वस्यबन्धकम्। वृणीत प्रार्थयेत्॥ २८१॥

**सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थितो यत्पुनरर्थिनो मदः।**
**स्वयं विधत्ते भजतामनिच्छतामिच्छाविधानं निजपादपल्लवम्॥**
**२८२॥ ५। १९। २७। (४६)**

ननु भवन्तु भगवन्तं परित्यज्यान्यदेवं विषयकामनया भजमानाः पशवः। भवन्तु च तमपि विमुक्तिदं विषयकामनया कणाशया कल्पतरुमिव भजन्तोऽपि भाग्यहीनाः। मायाविमोहितधियश्च। तथापि नास्माकं काचन हानिः। तत्र वास्तवीं स्थितिं तावत्पृच्छामः। किं विषयकामनया स्वात्मानं भजतां भगवान् स्वर्गादिस्थादीन् विषयान् ददाति न वा। आद्ये विषयकामनया तमुपास्य विषयान् भुक्त्वा अन्ते मुक्त्यर्थमपि निष्कामनयोपास्य तां सम्पादयामः। भाग्यहीनत्वादिना निन्दितत्वं तु तावत्सह्यं फलदृष्ट्या। तदपि निष्कामनया भजनसमये स्वयमेव गच्छति। द्वितीये अन्यदेवोपासकाः कथं पशवः अयं विषयान्न ददातीत्येनं परित्यज्य अन्योपासनस्य क्रियमाणत्वात्। प्रत्युत त एव भगवदुपासकेभ्यो वरिष्ठाः। विषयभोगस्य एकस्यापि साधितत्वात्। निष्कामनया भगवतं भजन्तस्तूभयतो भ्रष्टाः। यतः स्वात्मानमप्युपास्य प्रार्थयतामत्यल्पानपि विषयान् यो न ददाति स कथं पुनरनिच्छतां महापुरुषार्थभूतां मुक्तिं दद्यात्। **तदिदमाभाणकं**— ''गृहं प्रति गमनेऽपि तक्रमददानः आज्ञापितः क्षीरं कथं दद्यादि''ति। तदेवं वास्तवीं स्थितिं पृच्छन्तं प्रत्याह॥ **सत्यमिति**॥ नृभिः विषयवासनयोपासितः प्रार्थितश्च सन्। तेषां अर्थितं दिशतीति सत्यं निश्चितम्। तैरर्थितोऽपि अर्थितं नैव दिशति इति यत् तत्। पुनस्तदपि। सत्यं निश्चितम्। नहि तत्तद्दानसामर्थ्याभावात्। नापि तत्र

Rarest Archiver

विद्वेषात्। किन्तु तेषु कृपयैव। अर्थिनः अर्थितदाने मदो मा भूदिति। विषयाननिच्छतां भजतां तु। स्वयं अप्रार्थित एव। निजपादपल्लवम्। तेषां इच्छाविधानं अपेक्षितपुरुषार्थविधायकम्। विधत्ते करोतीति योजना। **इदमुदितं भवति—** यत्तावत्पृष्टं ददाति न वेति तत्र ददातीति ब्रूमः। तत्र यदुक्तं तदतिसाहसम्। निष्कामनयैव भजने मोक्षस्येवान्यपुरुषार्थानामपि लभ्यमानत्वात्। एकेनैवोभयसिद्धौ भागवतजनविनिन्दां सहित्वापि विषयकामनया भजनस्य अनावश्यकत्वात्। तदिदमाभाणकमप्यनुकूलितं **भवति—** "एका क्रिया द्व्यर्थकरी"ति। **यथाहुः—** "धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः। एकमेव हरेस्तत्र कारणं पादसेवनमि" (४।९।४४) ति॥ न च मुक्तिप्रतिबन्धकं बहुदुःखदं भगवान् कथं स्वभक्ताय ददातीति शंक्यम्। भक्तेषु दयया तेषां मनःशुद्धिमालक्ष्य यदा वैषयिकभोगदानं तन्मुक्तिप्रतिबन्धकं बहुदुःखदं च न भवेत् तदैव ददाति। यदा तु न मनःशुद्धिस्तेषां नैव ददाति। मद्भक्तानां ऐश्वर्यमदेन मदवज्ञाने मद्भक्तानां अवज्ञाने च बहुदुःखं मुक्तिप्रतिबन्धश्च भवेदिति तैर्विषयकामनयोपासितः प्रार्थितश्च भूत्वा तद्दाने तु नैव घटते। ते तु कालविशेषमजानन्तः प्रार्थयन्ते। तदा तु अदाने मनःखेदो भवति। दाने तु महद्दुःखम्। तद्दृष्ट्वा दत्तमैश्वर्यं पुनरपहार्यं च भवति। ततो निष्कामनयैव मां भजन्तः अहं तैरप्रार्थित एव तेषां वैषयिकमन्यञ्च पुरुषार्थं सर्वमपि काले ददामीति स्वसङ्कल्पानुसारेण स्वयमेव दीयमानेऽर्थे मात्रा बालकशरीरगतं रोगादिना विकारविशेषं परीक्ष्य तदौचित्येन भोज्ये पदार्थे दीयमाने अयमेव पदार्थो ममापेक्षितः स एव देय इत्यादिबालकचापल्यमिव भवतीत्येव चापल्यमात्रमिति। तदेवं विषयभोगस्याल्पत्वात् बहुदुःखप्रदतया तत्र कामनया भगवद्भजनस्य भागवतजननिन्दिततया तां परित्यज्य निष्कामत्वापरपर्यायशौचाख्यभागवतधर्मस्य नित्यपुरुषार्थसाधनतया विनिश्चितत्वेन तदर्थं मुमुक्षुभिः अवश्यं तत्सम्पाद्यमिति सिद्धम्॥ २८२॥

Rarest Archiver

**विश्वस्य यः स्थितिलयोद्भवहेतुराद्यो**
**योगेश्वरैरपि दुरत्ययतयोगमार्गः ।**
**क्षेमं विधास्यति स नो भगवांस्त्र्यधीश-**
**स्त्रातास्मदीयविमृशेन कियानिहार्थः॥२८३॥ ३ । १७। ३७(४७)**

यश्चान्येन कृतमुपकारं स्मरति स कृतज्ञ इत्युच्यते लोके। भवति चोपकर्तुर्विशेषतः प्रीतिपात्रम्। यश्च न, स कृतघ्न इति गीयते। न भवति तथा। दृष्टमेवं लोके। एवं भगवानपि निर्निमित्तं सर्वेषामपि परमोपकारकः, तत्स्मरणं च सदा अवहितैः कार्यं विशेषप्रीतिहेतुत्वादित्याशयेन सख्यापरपर्याय-परमोपकर्तृत्वानुसन्धानरूपं भागवतं धर्मं वदन् भगवतः परमोपकारित्वमेव कथमित्यतस्तद्दर्शयति॥ **विश्वस्येति**॥ आद्यः आदौ सृष्टेः स्थितः। योगप्रभावलब्धचिरायुष्ट्वादिबलवद्भिरपि दुरत्ययो योगमार्गो यस्य स तादृशः। यः विश्वस्यापि प्रपञ्चस्य स्थित्यादिकर्ता। य एवोद्भवं लयं चास्माभिरप्रार्थित एवास्मत्प्रयोजनप्राप्तये आद्योऽतश्च भूत्वा करोति यथा। स एव भगवान् नः अस्माकम्। क्षेमं स्थितिमपि। विधास्याति। योगेश्वरैरित्यनेनेदं सूचयति। ते हि योगबलेन चिरायुषो वयमिति मन्यमाना मृतिं नेच्छन्ति। तथापि तेषां लयं करोत्येव। एवमनिच्छया लभ्ये अर्थे प्रयतनमनुपपन्नमिति। ननु स एव क्षेमं विधास्यतीति कुतः अन्य एव किं न कुर्यादित्यत उक्तम्॥ **त्र्यधीश इति**॥ यतः स एव त्रयाणामुत्पत्त्यादीनां अधीशोऽतः स एव नस्त्रातेति। एवं निर्निमित्तं सति रक्षकेऽस्मदीयेन विमर्शेन रक्षणविषये प्रयतनेऽर्थः कियान् व्यर्थं प्रयतनमिति॥ २७३॥

**न यस्य सख्यं पुरुषो वेत्ति सख्युः सखा वसन्संवसतः पुरेऽस्मिन्।**
**गुणो यथा गुणिनोऽव्यक्तदृष्टिस्तस्मै महेशाय नमस्करोमि॥ २८४॥**
**। ६। ४। २४। (४८)**

Rarest Archive

एवं जीवस्य ज्ञानादिसाधनं देहेन्द्रियादि दत्वा, तत्तत्कालप्राप्तविघ्न-विशेषान् परिहृत्य, तदा तदपेक्षितं स्वसङ्कल्पितं दत्वा, रक्षणं कुर्वतो हरेः परमोपकारित्वं प्रतिपाद्य, इदानीं तत्सन्ततमनुसन्धेयमिति भावेन तदनुसन्धाने आदरजननाय एवं सत्यपि यो न स्मरति, स दैवहीनः अकृतज्ञः भगवन्मायया विमोहित इति वक्ति॥ **न यस्येति॥** अयं पुरुषः। सख्युः स्वसखिभूतस्य। अस्मिन्नेव पुरे देहे। संवसतः अतिप्रसिद्धतया वसतः। यस्य हरेः। सख्यं न वेत्ति। स्वयमपि सखाऽस्मिन्नेव पुरे वसंश्च भूत्वेति पुनर्वचनेन सखित्वं द्रढयति। एवमप्यवेदने किं निमित्तमत्राह॥ **अव्यक्तदृष्टिरिति॥** अविशुद्ध-बुद्धिरिति। अत्र दृष्टान्तमाह॥ **गुण इति॥** गुणः अप्रधानो भृत्यो मन्दमतिः। गुणिनः स्वामिनः। सख्यं न वेत्ति तत्कृतमुपकारं न जानाति न स्मरति, तथेति। एवंभवनं च तन्माययैवेति भावेन तस्मै महेशाय नमस्करोमि इत्युक्तम्॥ २८४॥

**यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता।**
**विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात्॥**
**२८५॥ १।८।२६। (४९)**

एवं भगवतो महोपकारित्वरूपसख्यस्मरणं कर्तव्यमित्यभिहितम्। तत्र आदरजननाय एवमाचारोऽप्यस्तीत्याह॥ **यथेति॥** हे हृषीकेश इन्द्रियगणपते। देवकी ते माता। खलेन इन्द्रियारामेण कंसेन। कारागृहे अतिचिरं रुद्धा। तत एव शुचार्पिता यथा त्वया मोचिता। तथैव हे विभो। सपुत्रा अहमपि। नाथेन त्वयैव। विपद्गणात् मुहुः विमोचिता। इयांस्ततो विशेषः, यत् सा एकैव, विपदप्येकदैव, विमोचनमपि एकदैव। अहं तु सात्मजा, विपदोऽपि बह्व्यः, ततो मोचनमपि बहुवारमिति॥ २८५॥

Rarest Archive

**विषान्महाग्नेः पुरुषाददंशनादसत्सभाया वनवासकृच्छ्रतः ।**
**मृधे मृधेऽनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः ॥**
**२८६ ॥ १ । ८ । २७ । (५०)**

एतच्च परमोपकारित्वं पुनःपुनः अनुसन्धेयमिति भावेन पूर्वोक्तं अहं, मम पुत्राः, तत्पत्नी मम स्नुषा, तस्याः स्नुषा, तस्याः पुत्रश्च, इत्येवं सर्वे वयं मुहुः विपद्गणात् मोचिता इति देवकीतो विशेषं विशदीकुर्वन्ती एव तत्स्मरति ॥ **विषादिति ॥** भीमाय दत्तात् कालकूटात् । महाग्नेः जतुगृहदाहनिमित्तात् । पुरुषादानां हिडिम्बबकादीनां दंशनात् भक्षणात् । असत्याः द्रौपदीकेश-ग्रहणादिनिन्दितकर्मयुक्तायाः सभायाः सकाशात् वनवासक्लेशात् प्रतियुद्धं अनेकेषां महारथानां नागाद्यस्त्रतः । द्रौणेः वंशक्षयं कर्तुं उद्यतस्य अस्त्रतश्च । हे हरे, त्वयैव अभिरक्षिताः आस्मेति ॥ २८६ ॥

**तस्यैव मे सौहृदसख्यमैत्री दास्यं पुनर्जन्मनि जन्मनि स्यात् ।**
**महानुभावेन गुणालयेन विषज्जतस्तत्पुरुषप्रसङ्गः ॥ २८७ ॥**
**। १० । ८१ । ३५ । (५१)**

भागवतप्रवरैरस्य प्रार्थितत्वादपीदं अवश्यं संपाद्यमिति भावेनाह ॥ **तस्यैवेति ॥** यो मयोपनीतं पृथुकं एकमुष्टिपरिमितं प्रीत्याऽगृह्णात्, तस्यैव कृष्णस्य । सौहृदं बन्धुत्वं, सख्यं परमोपकारित्वं मैत्री सहाध्ययनाद्यागन्तुकः स्नेहः, दास्यं पुण्ड्रधारणादिकं, तत्सर्वमपि । प्रतिजन्मनि । तत्रापि पुनःपुनः स्यादिति । महामहिम्ना अनन्तगुणेन श्रीहरिणा विशेषेण स्नेहलक्षणभक्तिसंपा-दनेच्छोः मम सहायभूतः तत्पुरुषाणां बहुकालिकः सेवालक्षणसङ्गश्च स्यादिति ॥ २८७ ॥

Rarest Archive

**भक्ताय चित्रा भगवान् हि सम्पदो राज्यं विभूतीर्न समर्थयत्यजः।**
**अदीर्घबोधाय विचक्षणः स्वयं पश्यन्निपातं धनिनां मदोद्भवम्     ॥**
**।१०।९९।३६। (५२)**

ननु हरिस्तावत्परमैश्वर्यादिमान् तद्भक्तश्च त्वं तत एव तत्प्रीति-विषयश्च। सत्यप्येवं सम्पदादिकं तुभ्यमददानस्य सख्यादिकं किमिति प्रार्थ्यत इत्यत आह॥ **भक्तायेति॥ इदमुदितं भवति—** यद्यपि हरिः समग्रैश्वर्यवान् भगवत्त्वादेव, दाता च भजतां आत्मन एव दानात्। अहं च भक्तः, एवमप्यदाने निमित्तं मयि केवलं दयैव– स्वदत्तधनानां धनमदेन तुच्छीकृतस्वभक्तानां अनर्थं दृष्ट्वा मम सोऽनर्थः बहुदिनं संसारानुभवलक्षणः माभूदिति॥ २८८॥ परमोपकारित्वलक्षणं (सख्यं ७)॥

**स्यान्नस्तवाङ्घ्रिरशुभाशयधूमकेतुः**
**क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः।**
**यः सात्विकैः समविभूतिभिरात्मविद्भि-**
**र्व्यूह्यार्चितः सवनशः समविक्रमैर्यः॥२८९॥११।६।१०(५३)**

पूजापरपर्यायं इज्यालक्षणं भागवतं धर्मं सपरिकरं वक्तुं उत्तरं प्रकरणम्॥ ननु पूजैव तावद्दुर्घटा, किं तत्परिकरवचनेन। **तथाहि—** भगवान् हि केवलज्ञानानन्दादिरूपः। तस्य च पूजायां क्रियमाणायां ध्यानं तावत्कर्तव्यं पादमारभ्य मौलिपर्यन्तम्। न हि तत्र पादादिविभागः कर्तुं शक्यः, तत्रापि अङ्गुलीः कल्पनीयाः, तच्च कथम्। हस्तेषु आयुधानि ध्येयानि तानि च कानि। अवयवेषु भूषणानि ध्येयानि तान्यपि कानि। एवं चक्षुरादावपीति। ननु भूः पादौ, द्यौः शिरः, इत्यादिना अवयवभूषणायुधानां सर्वेषां उक्त्या सुघटैव पूजेति

Rarest Archives

चेत्। सत्यम्। सा स्थूला सावधिका च, प्रतिमापूजाया इव तस्याः सूक्ष्मपूजाप्राप्त्यवधिकत्वात्। सूक्ष्मपूजाया एव साक्षात् मुक्तिसाधनेषु सारत्वात्। **यथाहुः—** ''तान्त्रिकाः परिचर्यायां कैवल्यस्य श्रियः पतेः। अङ्गोपाङ्गायुधाकल्पान् कल्पयन्ति तथैव यैः ॥ १ ॥ तन्नो वर्णय भद्रं ते क्रियायोगं बुभुत्सताम्। येन क्रियानैपुणेन मर्त्यो यायादमर्त्यतां'' इति ॥ २ ॥ तान्त्रिकाः तन्त्रं पञ्चरात्रं तन्निष्ठावन्तः। तदुदितपूजाप्रकारविद इति यावत्। क्रियायोगं कर्मसु कौशलम्। एवं प्राप्त आह ॥ **स्यान्न इति ॥** यश्च मुनिभिः। भक्तियुक्तमनसा। उह्यमानः धृतः। यश्च सात्विकैः साधुगुणैः। आत्मविद्भिः बिम्बज्ञानवद्भिः विज्ञानिभिः। तुल्यपराक्रमैः अविशिष्टैः वासुदेवादिभिर्मूर्तिविशेषैः। व्यूह्य अवयवादिभावं कल्पयित्वा। सवनशः त्रिषवणम्। अर्चितः पूजितः। तवाङ्घ्रिः। नः अस्माकम्। क्षेमाय स्यादिति योजना। **इदमुदितं भवति—** यद्यपि भगवान् केवलः, तथापि स्वरूपभूतैः वासुदेवादिभिः चतुर्मूर्तिरूपविशेषैः अवयवादिभावेन स्थितः तद्विदो विज्ञानिनः, तैरेवायुधैः युतान् तैरेव भूषणैः भूषितान् ध्यायन्तोऽर्चयन्ति अर्चनसाधनैः स्वविहितैरिति। विज्ञानिचरणजुषां सुलभैव सा साक्षाद्भवमोचनीति युक्तं तद्वचनमिति। **यथाहुः—** ''नमस्कृत्य गुरून् वक्ष्य विभूतीर्वैष्णवीरपि। या वेदागमतन्त्राभ्यामाचार्यैः पद्मजादिभिः ॥ (१२।१०।४) ॥ अङ्गोपाङ्गायुधाकल्पैर्भगवांस्तच्चतुष्टयम्। बिभर्ति स्म चतुर्मूर्तिर्भगवान् हरिरीश्वरः'' इति ॥ (१२।१०।२३) ॥ एवं पृष्टवते याः ब्रह्मादिभिः पूर्वाचार्यैः वेदपञ्चरात्राभ्यां प्रदर्शिताः ताः वैष्णवीः तदन्या अपि विभूतीः वक्ष्ये इति प्रतिज्ञाय, पूर्वं अन्या विभूतीः स्थूलपूजाप्रस्तावे प्रदर्श्य वैष्णवीरपि प्रस्ताव्य उत्तरं वक्ति ॥ **अङ्गेति ॥** हरिः ''वासुदेवः सङ्कर्षणः प्रद्युम्नः पुरुषः स्वयम्। अनिरुद्ध इति ब्रह्मन् मूर्तिर्व्यूहोऽभिधीयते'' इति यच्चतुष्टयमभिहितं तदेव चतुष्टयं अङ्गोपाङ्गायुधाकल्पैः अङ्गादित्वेन बिभर्ति, यः अङ्गी, यानि अङ्गादीनि तदुभयमपि न पृथक् किन्तु

Rarest Archiver

एकमेव समविभूतित्वात् समवीर्यत्वाच्च इति भावेन [1]भगवदिति चतुष्टयं, भगवानिति हरिं च विशेषितवान् लोकविरुद्धाङ्गाङ्गिभावादिः कथं घटते इत्यतः ईश्वर इत्याह। अघटितघटनापटीयसी खलु ईश्वरशक्तिः इति किं तस्य दुर्घटमिति भावः ॥ २८९ ॥

**प्रक्रमवत्स्वसत्कृतं पुरुषेषु धीषु तु बहिरन्तरसच्चरणे।**
**तव पुरुष वदन्त्यखिलशक्तिधृतः स्वकृतम् ॥ २९० ॥**
**। १० । ९४ । २१ । (५४)**

एवं साक्षात् मुक्तिसाधनभूतां पूजां उक्त्वा तस्य अमितकार्यतारूपः साधनविशेषः पूजादौ स्वक्रियमाणे समस्ते कर्मण्यपि अनुसन्धेयः। सन्ततं तेन संस्कृतं भागवतधर्मपदाभिधेयं भवति। तथा च उक्तं पुरस्तात्। तत्कर्म-बन्धकस्वभावमपि मुक्तिमेव ददाति इति भावेन प्रदर्शयति ॥ **प्रक्रमवदिति** ॥ त्रिचरणोऽयं श्लोकः। अनेन गायत्रीतुल्यता ज्ञापिता भवति। हे पुरुष। सच्चरणे असच्चरणे चेति सर्वेषु पुरुषेषु। सच्चरणसाधनभूतासु असच्चरणसाधनभूतासु चेति सर्वासु धीषु। इन्द्रियेषु च। पुरुषरूपेण अन्तः। कालरूपेण बहिश्चेति। प्रक्रमवत् स्थानगुणानुसारेण व्यक्तगुणत्वरूपक्रमेण व्यक्तो भूत्वा। तद्द्वारा यन्निष्पन्नं कर्म तत्। तव त्वत्सम्बन्धि। कोऽर्थः। स्वकृतं स्वेन त्वयैव कृतमिति। तत्र केन प्रकारेण स्थित्वा क्रियते इत्यतः स्वरूपैः अवतारैरेव इत्याशयेन उक्तम् ॥ **अखिलशक्तिधृत इति** ॥ तथा तेन स्वकृतेन सता असता वा कर्मणा। स्वेनैव सत्कृतं पूजितं त्वां वदन्ति विज्ञानिनः। ननु एवं असद्भिः क्रियमाणं श्रुत्याद्यविहितं पापं कर्मापि भागवतो धर्म इति प्राप्तं। तस्यापि भगवत्पूजारूपत्वात् तत्कर्तृकत्वाच्च। मैवं। श्रीहरिरेव सर्वकर्म स्वपूजात्वेन

१. भगवत्तच्चतुष्टयमित्यपि पाठः तदनुरोधेनेदं व्याख्यातम्।

Rarest Archive

करोति इति वास्तवीं तस्य स्थितिं ज्ञापयितुं उच्यमनतया वस्तुतः तस्य तथात्वेऽपि तेन रूपेण अनुसन्धीयमानत्वाभावात्। तादृशस्यैव भागवत-धर्मत्वात्। तथा चोक्तं पुरस्तात्। अत एव तेषां तथा अनुसन्धानाभावादेव न तत् पुरुषार्थसाधकम्। प्रत्युत, अहमेव कर्ता मत्पूजार्थमेव एतदिति विपरीतानुसन्धानात् विपरीतार्थसाधकं च भवति। श्रुत्याद्यविहितस्य सद्भिरेव कृतस्य भागवतधर्मत्वं स्यादिति चेत्। मैवं। तत्र तल्लक्षणाभावात्। प्रायेण सद्भिः तादृशं न क्रियते एव। परमेश्वरेण विष्टिगृहीतस्य हस्तेन इव बलात्कृत्य कदाचित्करणे तु अहो मया असाधु इदं आचरितं इत्युत्तरकालीनपश्चात्तापबलेन तेन रूपेण तदा अनुसन्धानाभावनिश्चयात्। पश्चात् तथा अनुसन्धाने कथमिति चेत्। न क्रियते एव पश्चात् तादृशकर्मणि तथा अनुसन्धानं सद्भिरिति ब्रूमः। कदाचित् तथा अनुसन्धानं कृतं चेत् कथम्। किं तावता, तस्यापि भागवतधर्मत्वं स्यादिति चेत्। न। तल्लक्षणाभावात्। तथा अनुसन्धानपूर्वकं क्रियमाणत्वस्य तल्लक्षणत्वात्। तत्करणसमये एव तथा अनुसन्धानं चेत् कथम्। इति नैव भवति। नहि तदा अविहितमिदं अनर्थसाधनमिति शास्त्रीयं स्थूलमतिभिरपि सुगमं अनुसन्धानं अलभमानस्य विष्टिगृहीतस्य इव परमेश्वरेण चोद्यमानस्य, तोयाभ्यवहारासमर्थस्य मुमूर्षोः शष्कुलीभक्षणमिव सम्भावयितुमपि तच्छक्यम्। नन्वेवं श्रुत्यादिविहितस्यापि तथा अननुसन्धाय क्रियमाणस्य भागवतधर्मत्वं न प्राप्तमिति चेत्। को नेति ब्रूते। तदर्थमेव एवमनुसन्धाय कर्तव्यमिति उच्यमानत्वात्। तमेवं विशेषं सूचयति तुना इति ॥ अनेन पूजादिकं सर्वमपि कर्म भगवत्कर्तृकं तत्पूजात्मकमिति अनुसन्धेयमिति सूचितं भवतीति ॥ २९० ॥

**योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां**
**सञ्जीवयत्यखिलशक्तिधरः स्वधाम्ना ।**

Rarest Archiver

**अन्यांश्च हस्तचरणश्रवणत्वगादीन्**

**प्राणान्नमो भगवते पुरुषाय तुभ्यम् ॥ २९१ ॥ ४।१०।६। (५५)**

''पुरुष'' इति सम्बोध्य ''तवाखिलशक्तिधृत'' इति विशेषितं ''धीषु'' इति धीमात्रग्रहणं कृतं ''अन्तः'' इति पूर्वश्लोके उक्तं विशदीकर्तुमाह ॥ **योऽतः प्रविश्येति ॥** एकोऽपि अखिलशक्तिधरः सन्। तादृशशक्तिशब्दवाच्येन स्वेन धाम्ना रूपविशेषेण। एकैकेन एकैकमिति। प्रसुप्तां स्वकार्ये अक्षमाम्। इमां वाचम्। हस्तचरणश्रवणत्वागादीन्। अन्यान् प्राणान् इन्द्रियाणि। अवयवादींश्च। अन्तः पुरुषरूपेण प्रविश्य। सञ्जीवयति तत्तत्कार्यक्षमाणि करोति। तस्मै तादृशरूपाय। भगवच्छब्दशब्दिताय। पुरुषरूपाय। तुभ्यम्। नमोऽस्तु त्वत्प्रावण्यमेव सदा भवतु इति। अनेन पुरुषरूपेण अन्तःप्रवेशोक्त्या तत्पदेन सम्बोधनम्। शक्तिरूपेणैव प्रवेशस्योक्त्याऽखिलशक्तिधृत इति विशेषणम्। सर्वेन्द्रियोक्त्या धीपदम्। प्रविश्येति पूरणेन अन्तरिति च विशदीकृतं बोध्यम् ॥ २९१ ॥

**देहेन्द्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरन्ति कर्मसु।**
**नैवान्यदा लोहमिव प्रतप्तं स्थानेषु तद्द्रष्ट्रपदेशमेमि ॥ २९२ ॥**
**। ६ । १६ । २४ । (५६)**

ननु स्वस्वव्यापारेषु विरिञ्चेनैव वाचा वचनमित्यादिरूपेण नियमितेषु प्रवर्तन्त एव, किमेतस्यान्तः प्रवेशेन। शक्तिभिः प्रवेश इति च न ज्ञायते। पुरुषस्य सामर्थ्याभावेन शक्तिद्वारा करणे अभिधीयमाने शक्तिमत-प्रवेशापत्तिरित्यत उक्तं विशदयति ॥ **देहेति ॥** अमी। स्थानेषु स्वस्वयोग्येषु। कर्मसु व्यापारेषु। विरिञ्चेन विरचनसमय एव नियमिता अपि देहादयः। यस्यांशैः स्वरूपैः विद्धाः। अन्तःशरीरिभावेन अधिष्ठिता एव स्थानेषु कर्मसु

Rarest Archive

प्रचरन्ति तत्करणक्षमा भवन्ति। अन्यदा तु नैव भवन्ति। कुत इत्यतः दृष्टान्तेन द्रढयति ॥ **इवेति** ॥ यथा विरिञ्चेन। स्थानेषु स्वस्वयोग्येषु सूचीकटाहादिषु विकारेषु। विकारिभावेन सृष्टिकाले विनियतमपि लोहं प्रतप्तं प्रकर्षेण पुनः पुनः तत्तद्योग्यताप्राप्तिपर्यन्तं तप्तमेव। स्थानेषु प्रचरति तदात्मना विकृतं भवति। इव यथेति। तत् तादृशं द्रष्टृपदेश द्रष्टृशब्दवाच्यं। शरणमेमीति योजना। **इदमुक्तं भवति–** प्रवेष्टव्यमेव भगवता भाविकार्यभावनया। न च विरिञ्चेन तत्तत्कार्योद्देशेन सृष्टिमात्रेण तत्तत्कार्यं भवितुं शक्यं। निदर्शने तथाऽदर्शनात्। अन्यथा तत्र विनापि दाहं कार्योत्पादप्रसङ्गात्। प्रवेशोऽपि भगवतो रूपदारिद्र्याभावेन एकैकेन स्वरूपेणैव एकैकं अवयवादि इति क्रमेणैव तान्येव रूपाणि तत्तच्छक्तिप्रबोधकतया शक्तिशब्दशब्दितानि इति न शाक्तमतप्रवेशोऽपि इति ॥ २९२ ॥

**नमो नमस्तेस्त्वृषभाय सात्त्वतां विदूरकाष्ठाय मुहुः कुयोगिनाम्।**
**निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः ॥**
**२९३ ॥ २ । ४ । १४ । (५७)**

नित्यनिरतिशयानन्दपूर्णोऽपि भक्तानुकम्पया पूजां गृहीतुं अत्रागत्य स्थितः अस्य भक्त्या सूक्ष्मया पूजयैव पूजकानां ज्ञानद्वारा मुक्तिः इतरथा न भवत्येव ततः आदरेण अनवरतं सूक्ष्मपूजा पूर्वोक्ता कर्तव्या मुमुक्षुभिरित्याशयेन तस्याः अङ्गभूतं अवनतिनामानं नमनापरपर्यायं भागवतधर्ममाह ॥ **नमो नमः इति** ॥ प्रणामेषु कर्तव्येषु यथाशक्ति बहव एवं कर्तव्याः पूजाङ्गतया इति ज्ञापनाय त्रिर्वचनम्। मनोवृत्तेः तत्प्रावण्यं, वचसा नारायणाय नम इत्युदीरणं, साष्टाङ्गतया कायस्य अवनतिरिति त्रिविधमपि कर्तव्यमिति वा। सात्वतां पञ्चरात्रोदितप्रकारेण भगवतः सूक्ष्मपूजां कुर्वतां कर्मकुशलानां योगिनाम्। ऋषं

Rarest Archive

ज्ञानं उपलक्षणमेतत्। ज्ञानादिरपेक्षितार्थो दातृतया अस्यास्तीति ऋषभः तस्मै। कुयोगिनां इन्द्रियजयरहितानाम्। कर्मसु अकुशलानां वा योगिनाम्। बहुभिरपि जन्मभिः अज्ञेयस्वरूपाय। साम्यातिशयरहितेन स्वमहिम्ना। स्वप्रकाशे पूर्णे स्वस्मिन्नेव विहरमाणाय परस्मै। नमो नमो नम इति त्रिरुक्तिः। अत्र प्रणामे श्लोकाः षोडशपर्यन्ता अत्रैव सन्ति। अधिकेच्छायां भागवतोक्ताः अस्माभिः नमःप्रकरणे निबद्धाः द्रष्टव्या ॥ २९३ ॥

**यत्कीर्तनं यच्छ्रवणं यदीक्षणं यद्वन्दनं यत्स्मरणं यदर्हणम्।**
**लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः ॥**
**२९४ ॥ २। ४। १५। (५८)**

कीर्तनाख्यं तथा सेवाख्यं भागवतं धर्मं अर्हणापरनामकं पूजोपयोगिभूतं हरिमन्दिरमार्जनादिरूपं भागवतं धर्मं सर्वदा कार्यं पूजाकाले हि अवश्य-कार्यताज्ञापनाय फलविशेषोक्तिपूर्वकं दर्शयति। **यत्कीर्तनमिति।** यस्य कीर्तनादि लोकस्य कल्मषं सद्य एव विधुनोति तस्मै परमपावनकीर्तये नमो नम इति आदराद्द्विर्वचनम् ॥ २९४ ॥

**नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते।**
**यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥**
**२९५ ॥ ७। ९। ११। (५९)**

ननु जनेन क्रियमाणां पूजां भगवान् स्वीकरोति न वा। आद्ये यत्प्रयोजनाय स्वीकरोति तस्य न्यूनत्वादपूर्णता। द्वितीये व्यर्थोऽयं पूजासमारम्भ इत्यत आह ॥ **नैवेति ॥** जनो द्विविधः। विद्वानविद्वांश्चेति। तत्र अविद्वद्विषये तावदुत्तरं वक्ति। अविदुषो मानं नैव वृणीते नैव स्वीकुरुते। अनेनैव विदुषो

Rarest Archive

विषयेऽपि उत्तरं सूचितं भवति। विदुषस्तु वृणीते न वृणीते चेति। ननु विरुद्धमुभयं कथं युज्यत इत्यतः अभिसन्धिमुद्घाटयति। **आत्मनोऽर्थे न वृणीत इति**॥ स्वस्य अप्राप्तार्थप्राप्तये न स्वीकरोति। कुत इत्यत उक्तम्॥ **निजलाभेन पूर्ण इति**॥ अत एव प्रभुः स्वतन्त्रः। एवं न वृणीत इत्युपपाद्य, वृणीते च इत्येतदुपपादयति॥ **यद्यदिति**॥ तत्सर्वमपि। आत्मने आत्मार्थं स्वपुरुषार्थप्राप्तय एव भवति। पूजायामादरजननाय बिम्बप्रतिबिम्बभावस्मरणाय च दृष्टान्तमुखेन दर्शयति॥ **यथेति**॥ यथा मुखस्य कृता श्रीः अलङ्कारः सर्वोऽपि प्रतिमुखस्य विद्यमानो भवति तथेति। यद्यदान्दोलिकं स्वस्यापेक्षितं तेन समस्तेनापि पूजासाधनद्रव्येण आदरेण अनवरतं बिम्बपूजैव कर्तव्या इति सूचनाय परप्रयोजनाय स्वीकरोतीत्यभिसंध्युद्घाटनेन उभयं न विरुद्धमिति सूचितं भवति। ननु स्वप्रयोजनार्थे न स्वीकरोतीत्येतदुभयत्र समं परप्रयोजनार्थं स्वीकरोतीति च। सति चैवं अविदुषो नैव स्वीकरोति। विदुषस्तु न स्वीकरोति स्वीकरोतीति विशेषोक्तिः कथमिति चेत् उच्यते। भोग्यं तावद्द्विविधम्। भगवदात्मकं ततोऽन्यच्चेति। अन्यदपि द्विविधम्। अप्राकृतं प्राकृतं चेति। प्राकृतमपि त्रिविधम्। उत्तमं मध्यममधममिति। तत्र यद्रूपगन्धरसोपेतं तदुत्तमम्। रूपेण नयनयोः, गन्धेन घ्राणस्य, रसेन जिह्वायाश्च, आह्लादकारितया त्रिविधभोगभोग्यत्वात्। यच्च गन्धरसोपेतं यद्वा रूपरसोपेतं यदपि रूपगन्धोपेतं तन्मध्यमम्। भोगद्वययोग्यत्वात्। यदेकैकोपेतं तदधमम्। एकैकभोगयोग्यत्वात्। तत्र आत्मार्थं अविदुषो जनादिव विदुषोऽपि स्वीकरणं नास्त्येव। तथा पूर्णत्वहानिसाम्यात्। अनेनैवाभिप्रायेण न स्वीकरोतीत्युच्यते। परप्रयोजनार्थं तु स्वीकरणं विदुषो जनादेव। स हि जनो रूपगन्धाद्यात्मकं भगवद्रूपं तदन्यत् अप्राकृतं प्राकृतं चेति सर्वमपि समर्पयति,

Rarest Archiver

स्वीकुरुते च भगवान्। तत्र स्वीकारोऽनेकविधः भगवदात्मकस्य भोग्यस्य अनुभवः मुख्यो भोगः। अन्यस्य अप्राकृतस्य स्वमुख्यभोग्यं प्रति मुख्यतः अधिष्ठानत्वेन अनुमोदनमेव। स तु मध्यमो भोगः। प्राकृतस्य तु स्वमुख्यभोग्यं प्रति अप्राकृतादपि अमुख्यतः अधिष्ठानतया अनुमोदनं स तु अधमः। एवं त्रिविधमपि भोग्यं विदुषो जनात्स्वीकुरुत इति परप्रयोजनाय स्वीकरोतीति च विशेषोक्तिर्युज्यते। अविदुषो जनात्तु त्रिविधभोग्यस्य भोगरूपं स्वीकरणं नास्त्येव। तेन असमर्पणात्। समर्पणेनैव प्रसन्नो भगवान् फलं। यच्छति यद्यपि भगवदात्मकस्य तदन्यस्य अप्राकृतस्य च अज्ञानादिना समर्पणाभावेऽपि प्राकृतं समर्पयत्येव स्वीकुरुते च भगवान्। तथापि तस्य अत्यल्पत्वेन अविवक्षिततया स्वल्पान्नस्य भोक्तरि भोजनाभावव्यवहारवत् अभोगं विवक्षित्वा न स्वीकुरुत इत्युच्यते। तथा च आत्मार्थं परार्थं वा न स्वीकुरुत इति नैव स्वीकुरुत इति विशेषोक्तिर्युज्यते इति। समर्पणाभावेऽपि भोगस्तु हरेर्भवत्येव। परन्तु भोग्यपदार्थस्वामिनः फलं नास्ति। समर्पणेनैव प्रसन्नो भगवान् फलं यच्छतीत्युक्तम्। प्रसादोऽपि राजप्रसाद इव निवेदनीयपदार्थतारतम्यानुसारी। फलं च प्रसादानुरूपमिति प्रसिद्धमेवेति। किं वक्तव्यं विद्वदविद्वत्प्रसाद-फलयोर्महदन्तरमिति इति भावेन भक्तानुग्रहोन्मुखत्वं परमदयालोर्हरेः स्वभाव इत्याह॥ **करुण इति**॥ २९५॥

**अर्हसि मुहुरर्हत्तमार्हणमस्माकं अनुपथानां नमो नमः इत्येतावत्स-दुपशिक्षितं कोऽर्हति पुमान्प्रकृतिगुणव्यतिरेकमतिरनीश ईश्वरस्य प्रकृतिपुरुषयोः परस्यार्वाक्तनमतिर्नामिरूपाकृतिभिर्निरूपणम्॥ ५। ३। ५॥ परिजनानुरागविरचितस्तवलवसंशब्दसलिलकिसलय-तुलसीदूर्वाङ्कुरैरपि सम्भृतया सपर्यया किल परम परितुष्यसि॥ ७॥**

Rarest Archiver

**अथानयापि न भवत इज्ययोरुसम्भारभरया समुचितमर्थमिहोपलभामहे ॥ ८ ॥ आत्मन एवानुसवनमञ्जसा व्यतिरेकेणानुबोभूयमानाशेषपुरुषार्थस्वरूपस्य किन्तु नाथाशिष आशासानानामेतदभिसंराधनमात्रं भवितुमर्हति ॥ ९ ॥ अथ कथञ्चित्स्खलनक्षुत्पतनजृम्भणदुरवस्थानादिषु विवशानां नः श्रीमच्चरणारविन्दस्मरणाय ज्वरमरणदशायामपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवन्तु ॥ २९६ ॥ १३ ॥ (६०) ॥ इति प्रार्थनम् ॥**

उक्तमर्थं बुद्ध्यारोहाय विशदयन् पूजाङ्गं स्तोत्रं प्रार्थनां च प्रदर्शयति ॥ **अर्हसीति ।** पूजा द्विविधा । स्थूला सूक्ष्मा च । तत्र सूक्ष्मप्राप्त्यर्थत्वेन तदवधित्वात् स्थूलायाः । यथाह— ''अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् ॥ यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितमि''ति ॥ (३।३०।२५) ॥ ततोऽनन्तरमपि करणं जनसङ्ग्रहाय । तत्र मनोऽनवधाननिमित्तं वा । ततः अभ्यर्हिततया आदौ सूक्ष्मपूजां दर्शयति ॥ **नमो नम इति** ॥ नमोनम इत्येतावदेव अनुपथानां त्वदुक्तं भागवतमार्गं अनुसरतां अस्माकं अर्हणं मुहुः प्रतिदिनं प्रतिसवनं अर्हसि स्वीकरोषि । तत्सूक्ष्मं समर्हणं कैरुपदिष्टं भवतामत्राह । **सद्भिरिति ।** सद्भिर्भागवतधर्मप्रवर्तकैर्भागवतप्रधानैः । उपशिक्षितमिति । इदं चार्हणं मनोवृत्तिप्रावण्यविशेषरूपं रूपविशेषविषयं पूजास्वधिकमिति भावेनोक्तम् । हे अर्हत्तम पूज्यतमेति । एवं सूक्ष्मामुक्त्वा तत्साधनभूतां तत्राशक्तानां अनुष्ठानाय स्थूलपूजां दर्शयति । तत्रादौ अविद्वद्भिः कृतपूजास्वीकारो नाम अयमेवेत्याशयेनाह । हे परम, सपर्यया इज्यया अविद्वत्कृतया स्थूलया परितुष्यसि किलेति । तत्स्वीकरणं नाम तत्र कृपाविशेष

Rarest Archive

एवेति सूचयितुं परम उत्तम कृपाकारिषु इति सम्बोधनम्। सा का स्थूला पूजा इत्यतः तत्साधनं स्थूलं प्रसिद्धमेव तैः क्रियमाणैव स्थूलेति भावेनैव तानि साधनानि प्रदर्शयति। उरवो ये सम्भाराः स्वर्णरजतनवरत्नमयाः तथा नानाविधधान्यपिष्टनिर्मिताः भोग्याः पदार्थविशेषाः, फलविशेषाः रसविशेषाः, दीपविशेषाः वाद्यविशेषाः वस्त्रविशेषाः गन्धादिविशेषाश्च तैः पूरितया इज्यया इति॥ **अथ अन्या वक्ष्यते**॥ हे परम उत्तमैर्भागवतैः पूजित। भवतः तव। इह द्विविधायामपि पूजायां। आत्मनः स्वस्य। अर्थं नोपलभामहे। कुत इत्यतः पूर्णतया प्राप्तव्याभावादिति भावेनाह॥ **आत्मन एवेति॥** आत्मनः अव्यतिरेकेण स्वरूपाभेदेन। अनुसवनं अञ्जसैव अनुबोभूयमानाः ये अशेषा पुरुषार्थाः आनन्दादयः तत्स्वरूपस्य इति। ननु पौनःपुन्ये भृशार्थे यङ्लुक्। अत्र च अनुसवनमञ्जसा इत्याभ्यां अर्थद्वयस्यापि प्राप्त्या किमर्थं तत्प्रयोग इति चेत् उच्यते। नात्र पाण्डित्यप्रदर्शनाय प्रयोगः किन्तु अर्थविशेषज्ञापनार्थमेव इत्याशयेन तस्य अर्थद्वयपदाभ्यां प्रदर्शितमिति। अथवा "स एष परोवरीयानुद्गीथ" इत्यत्र परोवरीयानित्यस्य निरुपचरितसर्वोत्तमत्वे तात्पर्यमिव अत्र त्रितयस्यापि निरुपचरितपूर्णत्वे तात्पर्यमिति नान्यतरवैयर्थ्यमिति। तर्हि द्विविधापि पूजा वन्ध्या भवेदित्यतः आत्मप्रयोजनाभावेऽपि भक्तप्रयोजनोद्देशेन स्वीकरोत्येव अतः न वैयर्थ्यमिति भावेनाह॥ **अथेति।** अथ यद्यपि। आत्मनोऽर्थं नोपलभामहे। किन्तु तथापीति। हे नाथ, आशिषः आशासानानां पुरुषार्थापेक्षिणां पुंसाम्। एतत्तवार्हणं केवलं प्रसादसाधनं भवति। तेषु प्रसादं कर्तुमेव स्वीकरोषि इति यावत्। प्रसादनेऽपि विशेषोऽस्तीत्याशयेनोक्तम्। उरुसम्भारभरयाप्यनया स्थूलया अविद्वत्कृतया इज्यया हे परम, तथा न परितुष्यसि। कथम् सलिलकिसलयतुलसीदूर्वाङ्कुरैः अनायासलभ्यैः अमौल्यैरपि साधनैः सम्भृतया विद्वत्कृतया सपर्यया परम परितुष्यसि किल यथा तथेति। बहुमौल्यैः आयासलभ्यैः महाजनमनोरञ्जनैः साधनैः सम्भृतया सपर्यया सन्तुष्ट्या

Rarest Archiver

अधिकयैव भाव्यम्। तत्कथं विपरीतमुच्यते इत्यतः तत्र हेतुं दर्शयति। अनयोः उरुभिः उरुमौल्यैः उर्वायाससाध्यैः उरुजनमनोरञ्जनैः सम्भारैः साधनैः सम्भृतयापि इज्यया भवतः समुचितं सर्वोत्तमं भोग्यमर्थं इह सलिलादिभिः तद्विपरीतैः साधनैः सम्भृतायां पूजायां यथा उपलक्षामहे तथा नोपलभामहे इति ॥ एवं भगवतः पूजां कृत्वा तदङ्गभूतं स्तवं तत्प्रार्थनां च अवश्यकर्तव्यतया आह ॥ **स्तवलवसंशब्देति** ॥ अनन्तोऽपि वेदादिशब्दराशिः भगवतः स्तव एव स नास्माभिरनुष्ठातुं शक्य इति किमेतद्विधीयते इत्यतः। सत्यम्। तथापि तत्र यावच्छक्यं तावदेव अस्माभिर्विधीयते इत्याशयेनोक्तं— **स्तवलवेति** ॥ तन्महिमाप्रतिपादकः शब्दः स्तवः। पुरुषोद्देश्यसूचकशब्दयुक्तः तद्विशेषः प्रार्थनमिति। अत एव अर्थिनां सं सन्तोषकरः शब्दो यस्मिन् तत् संशब्दमित्युक्तम्। एतद्द्वयं च न स्वकपोलकल्पितं किन्तु भागवतजनैः भक्तिपूर्वकं रचितमित्याशयेनोक्तम्। **परिजनेति** ॥ अत्र अर्हसि इत्यारभ्य अर्हति इत्यन्तेन स्तोत्रं प्रदर्शितम् ॥ अधुना प्रार्थनं दर्शयति ॥ **अथेति** ॥ विषयभेदसूचकः अथशब्दः। कथञ्चित् केनापि निमित्तेन प्राप्तासु दशासु स्खलनादिनिमित्तक्लेशोपेतासु तथा मरणाव्यवहितदशायामपि पतनादिनिमित्तक्लेशावस्थातो ज्वरनिमित्तक्लेशावस्थायां विस्मृतिरधिका, ततोऽपि मरणाव्यवहितदशायां, तत्रापि श्रीमतश्चरणारविन्दस्मरणं स्यात्। तदर्थं च तव यानि विशिष्टगुणप्रवृत्तिनिमित्तकानि नारायणादिनामधेयानि तानि मम वचनगोचराणि भवन्तु। किं तेन तव प्रयोजनमित्यत उक्तम्। सकलानि यानि स्खलनादिनिमित्तानि कश्मलानि दुःखानि तेषां नाशकानि। सकलानि कश्मलानि यस्मात्संसारात् तस्य निरसनानीति वा प्रार्थनम्। अनयोरधिकेच्छायां भागवतोक्तं अस्माभिः सङ्गृहीतं स्तोत्रप्रकरणं प्रार्थनाप्रकरणं च अवलोक्य स्वपुरुषार्थः साधनीयः सद्भिरिति ॥ २९६ ॥

Rarest Archiver

**न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः ।**
**श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिञ्चनेषु सत्सु ॥ २९७॥**
**। ४ । ३१ । २२ । (६१)**

स्थूलपूजाकारिणां अविदुषां सकाशात् पूजां विदुषां सकाशादिव न स्वीकरोति। किन्तु कियदेव। कथञ्चित् तदनुसारेण अनुग्रहद्वारा फलमपि ददातीत्यभिहितम्। इदानीं तावदपि फलं वक्ष्यमाणेतिकर्तव्यतापूर्वमनुष्ठाने भवेत्। नेतरथा। प्रत्युत विपरीतमेव फलं भवेदित्याशयेन तां इतिकर्तव्यतां दर्शयति॥ **न भजतीति**॥ ये अकिञ्चनेषु सत्सु भागवतेषु श्रुतधनकुलकर्मणां सकाशादुत्पन्नैर्मदैः पापं अवज्ञादिकं अनिष्टं विदधति कुर्वन्ति । तेषां पुमनीषिणां विपरीतबुद्धीनां सकाशात्। इज्यां पूजाम्। स हरिर्न भजति नैव स्वीकरोति। तदा कुतः प्रसादः। कुतस्तरां ज्ञानभक्त्यादिकम्। कुतस्तमां च मुक्तिरिति। कुतो न स्वीकरोतीत्यत उक्तम्। ये अधनाः बाह्यधनरहिताः तथा आत्मैव धनं येषां ते तादृशानामकिञ्चनानां सतां प्रिय इति। स्वप्रियानिष्टकारी स्वस्याप्यप्रिय इति हेतोरिति भावः। धनादिमतां बहुसम्भारभृतां पूजां कथं त्यक्ष्यतीत्यत उक्तम्। **रसज्ञ इति**॥ सारमात्रग्राहिणः किं प्रयोजनं सम्भारेण। सारस्य च तत्राभावादिति भावः। तत्किं सारभूतं पूजासाधनमित्यतः इदमेवेत्याशयेन **आत्मधनेत्युक्तम्**॥ **इदमुक्तं भवति**— श्रीहरिणा सृष्ट्यादौ सर्वाणि शरीराणि सृष्ट्वापि तुष्टिमलभमानेन मानुषं शरीरं सृष्ट्वा तत्रापि तारतम्येन स्वयं स्थित्वा पूजाप्राप्तये इदमेव पूजास्थानं वरीय इति सन्तुष्टेन ब्राह्मणरूपाधिष्ठानेष्वेव पूजा परिगृहीता। तथैव च कृतयुगे प्रवर्तिता। ततस्त्रेतादिषु नृणां परस्परमत्सरादिना परस्परावज्ञानेन श्रीहरेः पूजां लुप्यमानामवेक्ष्य श्रीहरिनियमितं चरं ब्राह्मणाधिष्ठानं परित्याजयित्वा अचरं प्रतिमारूपमधिष्ठानं कविभिः कारितम्। तच्चाधिष्ठानं ये मत्सरग्रहग्रस्ताः ते आदरेण गृहीत्वा तत्र हरिं श्रद्धया

Rarest Archive

पूजयामासुः। ये तत्र ग्रहोच्चाटनमन्त्रविदः ते ब्राह्मणरूपेषु भगवता प्रदर्शितेष्वेव अधिष्ठानेषु तं पूजयन्तः पूज्यन्त एव लोकैः। तत्रापि भागवतधर्माणामनुष्ठातारः श्रेष्ठाः। सति चैवं इदानीं कलियुगे तु सत्कुलजननरूपपिशाचगृहीताः धनमदान्धाः, सदाचारित्वाभिमानमदिरामत्ताः, विद्यारूपातिभाषणापादक-रोगपरिभावितस्मृतयः, विस्मृतस्वगतयः, तादृशानपि ब्राह्मणान् साक्षाद्भगवत्प्रियानपि अवजानन्तः, सम्भृतसम्भारान् प्रदर्शयन्तः, उदरम्भरजनमनांसि रञ्जयन्तः, प्रतिमादेः पुरतो घण्टां वादयन्तः, स्वात्मनः सर्वतोऽतिमहत्त्वं वेदयन्तः, भागवतशास्त्रं वाचयन्तः, मनसा मनोरथान्मानयन्तः, धनदुर्मदान्धान् श्रावयन्तः, मानमर्थयतः, अतितरां पूजायां प्रवर्तन्ते। ईदृशकुयोगिकृतां पूजां हरिर्न स्वीकरोति। ततो महदवज्ञाभावरूपेतिकर्तव्यतापूर्वकं पूजा कर्तव्या। तां तु पूजां भगवान् स्वीकरोतीति। **यथाहुः—** ''पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः॥ शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ॥ तेष्वीशो भगवान् राजन् तारतम्येन वर्तते॥ तस्मात्पात्रं हि पुरुषो यावानात्मा यथेयते। दृष्ट्वा तेषां मिथो नृणामवज्ञामात्मनो नृप॥ त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता॥ ततोऽर्चायां हरिं केचिच्छ्रद्धया च सपर्यया॥ उपासते उपासा हि नार्थदा पुरुषद्विषाम्॥ पुरुषेष्वपि राजेन्द्र सुपात्रं ब्राह्मणं विदुः॥ तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुम्'' (७।१५।३८-४२) इति ''मय्यर्पितात्मनः पुंसो मयि सन्त्यक्तकर्मणः॥ (३।३०।३३)॥ न पश्यामि परं भूतमकर्तुः समदर्शनात्॥ (९।३०।३४)॥ अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा॥ तमवज्ञाय मां मर्त्यः कुरुतेऽर्चाविडम्बनम्॥ (३।३०।२१)॥ यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम्॥ हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः॥ (३।३०।२२)॥ अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे। नैव तृप्येऽर्चितोऽर्चायां भूतग्रामावमानिनः॥ (३।३०।२४)॥ दुष्प्रज्ञा अविदित्वैवमवजानन्त्यसूयवः॥

Rarest Archives

(१०।९१।४४) ॥ तस्माद्ब्रह्मऋषीनेतान् ब्रह्मज्ञान्श्रद्धयाऽर्चय । एवंविदार्चितोऽस्म्यद्धा नान्यथा सुविभूतिभि''रिति ॥ (१०।९१।४६) ॥ २९७ ॥ **(इज्यापराभिधाना पूजा)** ॥ ८ ॥ **(प्रणामापरपर्यायावनतिः)** ॥ ९ ॥ (कीर्तनं) ॥ १० ॥ **(मन्दिरमार्जनादिरूपा वा, पादप्रक्षालनरूपा वा सेवा)** ॥ ११ ॥

**स वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि ।**
**नामान्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः॥**
**२९८ ॥ १ । ५ । ११ । (६२)**

श्रद्धापूर्वकमनुष्ठितस्यैव श्रवणादेर्विशिष्टफलहेतुत्वात् अतो अवश्यं सा तत्र सम्पाद्या मुमुक्षुभिरिति भावेन जन्मान्तरार्जिताशेषपाप-परिहारकमिदं भागवतं शास्त्रमिति तावद्दर्शयति । **स वाग्विसर्ग इति** ॥ प्रतिश्लोकम् । अबद्धवत्यपि शाब्दिकजुगुप्सितपदादिमत्यपि । यस्मिन्निबन्धे अनन्तस्य यशःप्रतिपादकानि नामानि सन्ति । अत एव यच्च साधवः शृण्वन्ति, गायन्ति, स एव वाग्विसर्गः शास्त्रमिति गीयते । स एव च श्रद्धया श्रवणादि कुर्वन्त्या जनताया अशेषपापपरिहारको भवति । ततः तस्मिन्नेव शास्त्रे श्रद्धा कार्येति भावः ॥ २९८ ॥

**यत्रोत्तमश्लोकगुणानुवादः सङ्गीयतेऽभीक्ष्णममङ्गलघ्नः ।**
**तमेव नित्यं [१]शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः ॥ २९९ ॥**
**। १२ । ३ । १५ । (६३)**

---

१. 'शृणुतादिति विजयध्वजीयपाठः ।

Rarest Archiver

भागवतशास्त्रस्य भगवद्भक्तिसम्पादकतयापि तत्रावश्यकी श्रद्धेति भावेन भक्तिहेतुतां प्रदर्शयति ॥ **यत्रेति** ॥ यस्मिन्वाग्विसर्गे । अभीक्ष्णं पुनः पुनः । सङ्गीयते । तमेव वाग्विसर्गम् । नित्यं अभीक्ष्णं शृणुयात् । तत्फलमिदमित्याशयेनोक्तम् ॥ **कृष्ण इति** ॥ कृष्णे अमलां कामादिदोषरहितां चाञ्चल्यदोषरहितां च दृढां भक्तिं काङ्क्षमाण इति ॥ २९९ ॥

**यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः ।**
**निषेव्यमाणोऽनुदिनं मुमुक्षोर्मतिं सतीं यच्छति वासुदेवे ॥ ३०० ॥**
**। ५ । १२ । १३ । (६४)**

बिम्बज्ञानसाधनत्वाच्च अत्रश्रद्धा आवश्यकी इति दर्शयति ॥ **यत्रेति** ॥ यत्र येषां समीपे । विषयवार्ताप्रतिबन्धक उत्तमश्लोकगुणानुवादः । प्रस्तूयते प्रसज्जते । प्रकर्षेण स्तूयत इति वा । स च अनुदिनं निषेव्यमाणः । मुमुक्षोः । वासुदेवापरपर्याये बिम्बरूपे हरौ । [1]सतीं स्वयोग्यां मतिं ज्ञानम् । [2]यच्छति ददाति । तेषामिति पूर्वेणान्वयः ॥ ३०० ॥

**मृषा गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः ।**
**तदेव सत्यं तदुहैव मङ्गलं तदेव पुण्यं भगवद्गुणोदयम् ॥ ३०१ ॥**
**। १२ । १२ । ४८ । (६५)**

न केवलं श्रद्धा ज्ञानादिमात्रसाधिका । किं नाम । तद्द्वारा मोक्षस्यापि । ततो भागवतशास्त्रे सा अवश्यंकर्तव्येतिभावेन श्रद्धापूर्वकं श्रुतस्य

---

१. भक्तिशाणोल्लीढा सतीमतिरुच्यते इति पदरत्नावली ।

२. यच्छतिरत्र भक्तिनिशितज्ञानं दत्वा संसारोपरमं करोतीत्युभयार्थ इति पदरत्नावल्याम् ।

Rarest Archive

भागवतशास्त्रस्य मुक्त्यादिहेतुतां प्रदर्शयति। **मृषा गिर इति।** [१]यत्र यस्मिन्वाक्यजाते उत्तमश्लोकस्य यशोऽनुगीयते तद्वाक्यजातमेव। सत्यं सत् नृणां साधुभावलक्षणं मोक्षादिपुरुषार्थं यापयतीति सत्यशब्दवाच्यम्। केन प्रकारेण मोक्षदं तदेवोत्कृष्टं मङ्गलं तत्सूचकम्। हेति प्रसिद्धं तथात्वमिति दर्शयति। तदेव पुण्यप्रदं तदेव भगवद्गुणानां उदयो ज्ञानं यस्मात्तादृशम्॥ ३०१॥

**तदेव पुण्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवम्।**
**तदेव शोकार्णवशोषणं नृणां यत्रोत्तमश्लोकयशोऽनुगीयते॥ ३०२॥**
**।१२।१२।४९।(६६)**

पुण्यं तदेव। नवं नवं अर्थविशेषप्रदर्शकं भूत्वा, रुचिरं मनोरमं भवति। तदेव शश्वत् सर्वदा मनसो महोत्सवप्रदम्। एवं ज्ञानादिजननद्वारा तदेव शोकार्णवस्य संसारसमुद्रस्य शोषकमिति॥ ३०२॥ (श्रद्धा)॥ १२॥

**यस्यां न मे पावनमङ्ग कर्म स्थित्युद्भवत्राणनिरोधमस्य।**
**लीलावतारेहितकर्म वा स्याद्वन्ध्यां गिरं तां बिभृयान्न धीरः॥३०३॥**
**।११।११।२०।(६७)**

एवं भागवतशास्त्रे श्रद्धामभिधाय दुःशास्त्रनिन्दामाह॥ **यस्यामिति॥** अस्य जगतः। स्थित्यादिकर्तृत्वरूपं वा। लीलावतारैरीहितं कृतं यमलार्जुनभञ्जनादिकं कर्म वा। उपलक्षणमेतत्। मे मम माहात्म्यसूचकम्। अत एव पावनं कर्ममात्रम्। यस्यां वाचि न स्यात् या वाक् सर्वथा भागवतमाहात्म्यप्रतिपादिका न भवति। तां गिरम्। धीरो ज्ञानी। सर्वथा न

१. उत्तरश्लोकस्थं यत्रोत्तमेति पदद्वयं अत्रैव व्याख्यातम्।

Rarest Archiver

बिभृयात् नोपादद्यात्। कुत इत्यतः परमपुरुषार्थासाधकत्वात्तस्य इति भावेनोक्तम्॥ **वन्ध्यामिति॥** अनेन अभागवतशास्त्रस्य पुरुषार्थासाधकतया तत्र हेयत्वबुद्धिरूपत्याग एव कर्तव्य इति सूचितं भवति ॥ ३०३ ॥

**गां दुग्धदोहामसतीं च भार्यां देहं पराधीनमसत्प्रजां च।**
**वित्तं त्वतीर्थीकृतमङ्ग वाचं हीनां मया रक्षति दुःखदुःखी ॥ ३०४ ॥**
**।११।११।१९।(६८)**

न केवलं पुरुषार्थासाधकतया तत्परित्यागः। किं नाम बहुक्लेशप्रदतयापीत्यभिप्रेत्याह ॥ **गामिति ॥** परगृहे दुग्ध एव दोहः क्षीरं यस्याः सा स्वगृहानयनानन्तरं सर्वथा क्षीररहितां गाम्। असतीं स्वैरिणीं परुषभाषिणीं भार्यां च। तथा परेषामेव अधीनं सत् नसिप्रोतवृषभ इव तेषामेव सततं कार्यकरं न पुनः स्वाभिमानिनः हितकरं ईदृशं देहम्। असतीं दुष्टां स्वच्छायाऽननुवर्तिनीं प्रजां पुत्रादिरूपां च। तीर्थयात्रादिष्वविनियुक्ततया अपवित्रीकृतं वित्तं च। मया हीनां मदुत्कर्षाप्रतिपादिकां वाचं च। हे अङ्ग। दुःखदुःखी बहुक्लेशवानेव भूत्वा रक्षति। उत्तरत्र फलभ्रान्त्या तद्रक्षणनिमित्तं दुःखं रक्षणसमये अनुभवति। फलं तु नास्त्येवेति प्रागेवोक्तमिति भावः। **यथाहुः**—"शब्दब्रह्मणि निष्णातो न निष्णीयात्परे यदि॥ श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षत" इति॥ (११।११।१८) ॥ ३०४ ॥

**न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं यदि कर्हिचिद्वदेत्।**
**तद्ध्वांक्षतीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि साधवोऽमलाः ॥**
**३०५॥ १२।१२।५०।(३९)**

निर्मलमानसैर्भागवतैः परित्यक्तत्वादपि इदं अभागवतशास्त्रं

Rarest Archive

परित्याज्यमित्याशयेनाह ।। **न यद्वच इति ।।** चित्रपदमपि यद्वचः । जगत्पवित्रं हरेर्यशः । यदि कर्हिचिदपि आदावन्ते मध्ये वा न वदेत् । तर्हि ध्वांक्षैः अशुद्धमानसैः । अत एव असाधुभिरेव सेव्यं तीर्थम् । न तु हंसैः शुद्धमानसै साधुभिः सेवितम् । अच्युतयशःप्रतिपादकत्वाभावेऽपि हंससेवितत्वं किं न स्यादित्यत आह ।। **यत्रेति ।।** यत्र यस्मिंस्तीर्थे । अच्युतः प्रतिपाद्यते । तत्र तस्मिन्नेव तीर्थे । हंसाः प्रवर्तन्त इति हि व्याप्तिः । यत्तीर्थं भगवत्प्रतिपादकं तदेव हंससेवितं इति व्याप्त्या व्यापकनिवृत्तौ व्याप्यनिवृत्तेरपि आवश्यकत्वान्नैवमिति भावः । अत्र भागवतशास्त्रे यत्र यत्र हंसपरमहंसादितुर्याश्रमवाचकाः शब्दाः प्रयुज्यन्ते तत्र सर्वत्र प्रायेण शुद्धमनस्त्वरूपं धर्ममाश्रित्यैवेति ज्ञेयम् । ज्ञापकविशेषे सति तु तुर्याश्रमबोधकत्वं च । अन्यथा जनकादीनां गृहस्थानां, अवधूतादीनां ब्रह्मचारिणां, वानप्रस्थानामधिकारिणां च, भागवते शास्त्रे अनधिकारप्रसङ्गेन बहुविप्लवापातात् । तदेतदभिप्रेत्य प्रकृतत्वात् यत्राच्युतः तत्र हंसाः इत्येव वक्तव्ये तत्पदतात्पर्यार्थं कथयामास साधवोऽमला इत्यनेनेति ।। ३०५ ।।

**न तद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं न गृणीत कर्हिचित् ।**
**तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा न्यपतन्निमंक्षया ।।३०६।।**
**।१।५।१०। (७०)**

नन्वेवं फलाभावेन बहुक्लेशकरत्वेन च प्रेक्षावद्भिः परित्यक्तं अभागवतशास्त्रं किमिति पठन्ति पाठयन्ति च बहवः इत्यतः पुरुषार्थोऽनेन भवेत्परत्रेति भ्रान्त्या केचित् । परे तु परपुरुषार्थविचारविरहिता वैषयिकमेव बहुमन्वाना अनेनैव स्यादिति मन्यमानाः पण्डितंमन्याः पठन्ति पाठयन्ति चेत्यभिप्रेत्याह ।। **न तद्वच इति ।।** यद्धरेर्यशो जगत्पवित्रं कदापि न वदेत् । तत

Rarest Archiver

एव शास्त्रमेव न भवति। यच्च मानसाः मनःशुद्धिमन्तः। अत एव हंसपदवाच्याः साधवः। मिमंक्षया श्रवणादिरूपावगाहनेच्छया। न न्यपतन् न प्रविशन्ति। तद्वचः विषयः प्रयोजनं च वददपि। न वचो न शास्त्रम्। कुतः न वच इति हेतोः विषयस्य हरेः परमस्य परमपुरुषार्थस्य च अवचनात्। वस्तुतः विषयादिमत एव शास्त्रत्वात् अस्य तदभावात्। यद्येवं वास्तवी स्थितिः। तथापि ये केचित्तदपि तीर्थं शास्त्रमित्युशन्ति जानन्ति। त एव परमपुरुषार्थप्राप्तये तदुशन्ति इच्छन्ति श्रोतव्यादितया। यच्च अपरे तत् चित्रपदं विचित्रविषयजन्यं सुखमुशन्ति इच्छन्ति। त एव तत्प्राप्तये साधनभूतम्। चित्रपदं यङ्लुङन्ततया वा कदाप्यश्रुतार्थाभिधायकतया वा शब्दार्थालङ्कारालङ्कृततया वा चित्राणि महाजनमनोरञ्जनानि पदानि यस्मिंस्तादृशं शास्त्रम्। उशन्ति इच्छन्ति श्रोतव्यादितया। तदेवं द्विविधैः मनःशुद्धिरहितैः तत इव ध्वांक्षादिपदबोधितैः असद्भिः सेव्यतया वायसं तीर्थं उशन्ति ज्ञानिन इति॥ ३०६॥
**(अभागवतशास्त्रनिन्दा १३)**

**जरायुजं स्वेदजमण्डजोद्भवं चराचरं देवर्षिपितृभूतभेदम्।**
**द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेय एकः ॥ ३०७॥**
**।५।१८।३२। (७१)**

इदानीं मौनरूपं भागवतधर्ममाह॥ तच्च मौनं नाम सर्वथा शब्दाप्रयोग इति नार्थः। भगवति शब्दप्रयोगेण महापुरुषार्थसत्त्वेन तत्परित्यागे पुरुषार्थहान्यापत्तेः। तथाच वक्ष्यते। किन्तु सर्वशब्दानां भगवन्नामतया तेषां भगवतः अन्यत्र अप्रयोग एवेति भावेन सर्वशब्दानां भगवद्वाचकत्वमाह॥ **जरायुजमिति॥** देवर्षिपितृभूतभेदं देवादिप्रभेदवाचकशब्दजातम्। तत्र देवप्रभेदवाचका इन्द्रादयः। ऋषिप्रभेदवाचका विश्वामित्रादयः। पितृप्रभेदा

Rarest Archiver

अर्यमादयः। चरप्रभेदा जरायुजादयः। अचरप्रभेदा उद्भिज्जादयः। जरायुजादिप्रभेदाः मनुष्यपश्वादयः। तत्प्रभेदा ब्राह्मणा-दयोऽश्वादयश्च। तत्प्रभेदाः यत्यादयः। उद्भिज्जप्रभेदास्तरुगुल्मादयः। तत्प्रभेदा अश्वत्थादय इत्यादिसर्वशब्दानामेक एव भगवानभिधेयः। अन्यत्र शब्दा न सन्त्येवेति॥ ३०७॥

**शब्दस्य हि ब्रह्मण एष पन्था यन्नामभिर्ध्यायति धीरपार्थैः।**
**परिभ्रमंस्तत्र न विन्दतेऽर्थान् मायामये वासनया शयानः ॥ ३०८॥**
**।२।२।२। (७२)**

अस्त्वेवं सर्वनामा भगवान् किं तत इत्यतः ततोऽन्यत्र तन्नाम्नामप्रयोगरूपं मौनमापाद्यं मुमुक्षुभिः सर्वथा इति भावेन तन्नाम्नां ततोऽन्यत्र प्रयोक्तॄन् धिक्करोति॥ **शब्दस्य हीति**॥ हि यस्मात्। अज्ञानप्रचुरे देहे। विद्यमानश्चिन्तनस्वभावः पुरुषः। अन्यत्रापगतप्रवृत्तिनिमित्तैः। यस्य मुख्यतया वाचकैरिन्द्रादिनामभिः इन्द्रादीन् ध्यायति इन्द्राय स्वाहेत्यादिपूर्वकं तदाराधनं करोति। एवं तत्र इन्द्रादिदेवताविषये पुरुषार्थवासनया परिभ्रमन्नपि। तेभ्यः पुरुषार्थान्न प्राप्नोति। कुत इत्यतः तत्र इन्द्रादिषु अपार्थैरिति हेतुगर्भविशेषणम्। स्वयमेव परमैश्वर्यमलभमानः कथमन्यस्मै दद्यादिति। ततो भगवन्नामान्यपहृत्य अन्यत्र प्रयोगेऽपि स्वप्रयोजनालाभेन तथा कुर्वाणाः अचतुराः इत्यन्यत्र शब्दाः न प्रयोक्तव्याः प्रेक्षावद्भिरिति भावः। तत्राप्रयोगे कुत्र प्रयोगः कर्तव्यः। यद्वाचकास्ते शब्दाः तत्रैवेत्याशयेनाह॥ **एष इति**॥ एष भगवानेव। शब्दस्य ब्रह्मणः अशेषशब्दराशेरपि। पन्थाः प्रयोगाय योग्यः। तस्यैव तद्वाचकत्वादिति हिशब्देनाहेति। ततः तस्याराधनेनैव पुरुषार्थसिद्ध्या किमन्यत्र प्रयोगप्रयासेनेति। अत एव पुरुषार्थप्रदानोपयोगि परमैश्वर्यादि-

Rarest Archiver

कमस्तीति ज्ञापयितुं तत्रेन्द्रादौ अपार्थैर्यन्नामभिरिति भगवति लब्धप्रवृत्ति-निमित्तत्वं शब्दानामसूचीति ॥ ३०८ ॥

**यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु ।**
**एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकैर्जनैः॥३०९॥**

**। १२ । ४ । ३१ । (७३)**

एवं सर्वशब्दानां भगवन्नामत्वात् तत्रैव तान्प्रयुज्य तमाराध्य पुरुषार्थः संपादनीय इत्युक्तम् । तत्र पूर्वाचारोऽप्यस्तीतिभावेन एकस्यैव विचित्रविरुद्धानेक-शब्दवाच्यत्वं कथमित्यतो बुद्ध्यारोहाय तथाविधदृष्टान्तप्रदर्शनपूर्वकं दर्शयति ॥ **यथा हिरण्यं बहुधेति** ॥ यथा सुवर्णमेकमेव । नृभिः कर्तृभिः । क्रियाभिस्ताल्वादिव्यापारैः करणैः । निष्पादिता ये बहुधा व्यवहाराः कटकं कुण्डलं रुचकमित्येवमादयो व्यवहाराः तद्रूपेषु मार्गेषु विषयीभवन्ति तैः शब्दैः प्रतिपाद्यत इति यावत् । तथा सर्वशब्दानां भगवन्नामत्ववेदिभिः जनैः । हे पितर्मातरित्यादिभिर्भोक्तृविषयैः । अन्नं पानीयमित्यादिभिर्भोग्यविषयैः । पर्णं कमण्डलुरित्यादिभिः करणविषयैः लौकिकैः । हे इन्द्र चन्द्रेत्यादिभिर्देवता-विषयैः । लाजाज्यादिभिर्होम्यविषयैः । स्रुक्स्रुव इत्यादिभिः करणविषयैः वैदिकैश्च । किम्बहुना सर्वैरपि द्विविधैर्विविधैर्विरुद्धैरपि वचोभिर्भगवानेक एव प्रतिपाद्यते । अतः पूर्वाचारसद्भावाद्भवद्भिरपि तथाचरणीयमिति भावः ॥ ३०९ ॥

**यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरणमयस्य ।**
**तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्मि तद्वत् ॥ ३१० ॥**

**। ११ । २८ । २० । (७४)**

Rarest Archive

ननु जगतः सृष्टेः प्राक् संहारान्तरं च तादृशानां व्यवहारविशेषाणामभावेन मध्य एव तादृशा व्यवहारा भवन्तीत्येतत्कथमिति चेदेवं वदता हिरण्यस्य नानापदेशैः मध्य एव व्यवहार्यमाणता अङ्गीक्रियते न वा। नेति वदन् श्लाघनीयप्रज्ञो देवानाम्प्रियः। आद्ये उत्तरमाह॥ **यथा हिरण्यं स्वकृतमिति**॥ सर्वस्य हिरण्मयस्य पुरस्तात्पश्चाच्च नानाव्यपदेशैरव्यवहार्यमाणमपि हिरण्यं यथा मध्ये एव नानाव्यपदेशैर्व्यवहार्यमाणं भवति। तद्वदेव अहमप्यस्मीति कात्र कथन्ता। भगवद्वचनमेतत्। ननु युज्यते तत्तत्र हिरण्यं न हिरण्यतया तच्छब्दैर्व्यवहार्यमाणमङ्गीक्रियते किन्नाम कुण्डलादिभावेन। प्रागनन्तरं च सृष्टेः कुण्डलादिभावमनापन्नतया तथा अव्यवहार्यमाणमपि मध्य एव कुण्डलादिभावमापन्नं तदैव तथा व्यवहार्यमाणं भवितुं युक्तमेवेत्यतोप्याह॥ **यथेति**॥ यथा हिरण्यम्। सर्वस्य हिरण्मयस्य। प्रागनन्तरं च सुष्ठु हिरण्मयकुण्डलादिभावेन अकृतं अपरिणतं इति हेतोः नानापदेशैरव्यवहार्यमाणमपि मध्य एव सुष्ठु कुण्डलादिभावेन कृतं परिणतमिति तेन रूपेण नानापदेशैर्व्यवहार्यमाणं भवति। तद्वत् तथैव अहमपि। मां विना भ्रूभङ्गमपि कर्तुमशक्तं इदं जगत् प्रवृत्त्यादौ मामेवापेक्षत इति मत्प्रधानकतया मन्मयमित्युच्यते। **यथाहुः**—"मन्मया मामुपाश्रिता" इत्यादि। ततः सर्वस्य मन्मयस्य जगतः पुरस्तात्पश्चाच्च सुष्ठु सुरनरतिर्यगादिनामकरूपैरकृतमात्मानं तैः रूपविशेषैरनभिव्यक्तीकृत्य स्थित इति हेतोः सुरनरतिर्यगादिभिर्नानापदेशैरव्यवहार्यमाणोऽपि मध्ये सुकृतः सुरनरतिर्यगादिकं सृष्ट्वा तत्तत्समानाकारतया तत्प्रवृत्तये प्रविश्य आत्मानं रूपविशेषैर्बहुधा व्यक्तीकृत्य स्थितः तत एव हेतोरेतैरेव रूपविशेषैर्नानापदेशैर्व्यवहार्यमाणोऽस्मीति भगवद्वचनमिति समः समाधिरिति। ननु हिरण्यदृष्टान्तः कथमिति चेत् एवं वदन् प्रष्टव्यो जायते। किमुपादानोपादेयभावमापन्नो दृष्टान्त एव नोपादेय इति तवाभिप्रायः। किंवा अयमेवेति। यद्वा कथं दार्ष्टान्तिकं योजनीयमिति। नाद्यः। ऊर्णनाभ्यादेर्बहुलं ग्रहणदर्शनात्। **यथाहुः**—

''यथात्ममायायोगेन नानाशक्त्युपबृंहितः ।। विलुम्पन्विसृजन्गृह्णन्बिभ्रदात्मानमात्मना ।। क्रीडस्यमोघसङ्कल्प ऊर्णनाभिर्यथोर्णुते ।'' (२।९।२७-२८) इति ।। द्वितीये विना विद्वेषं सुवर्णे हेत्वन्तरस्य उपपादयितुमशक्यत्वात्। नापि तृतीयः। योजनाप्रकरस्य प्रदर्शितत्वादिति। ननु मध्ये सुरनरतिर्यगादिरित्येव व्यवहारो न तु भगवानिति ततस्तैः, शब्दैरेव व्यवहार्यमाणो भगवानिति निश्चयः कथमिति चेत्। एवंवदन्नानाव्यपदेशैर्व्यवहार्यमाणं सुवर्णमेवेत्यङ्गीकरोति न वा। नेतिवदन्ननुभवविरुद्धवादीत्युपेक्ष्यः प्रेक्षावतामिति। आद्ये समाधिमाह ।। **यथेति** ।। यथा मध्ये नानाव्यपदेशैरेव व्यवहार्यमाणमपि वस्तु तदेव हिरण्यमेव। तद्वत् तथैव नानाव्यपदेशैरेव व्यवहार्यमाणं यद्वस्त्वहमेव तदस्मीति। ननु सुष्ठु रथशङ्खादिसमानाकृतितया अकृतमितिहेतोः सर्वस्य हिरण्मयस्य रथादेः पुरस्तात्पश्चाच्च हिरण्यमिति सर्वस्यापि लोकस्य व्यवहाराय स्फुटं शक्यं भवति। मध्ये तु सुकृतमिति न स्फुटतया हिरण्यमिति सर्वस्यापि व्यवहर्तुं शक्यमिति हेतोरेव नानाशब्दैः ''रथो हिरण्मयः शङ्खो हिरण्मयः'' इत्येवमादिभिरेव व्यवह्रियते अतः तस्य अन्यथाप्युपपन्नतया न तदन्यथानुपपत्त्या हिरण्येतरं भवति। किन्तु तदेव हिरण्यमेवेति युक्तमेवेति चेत्। अत्रापि इदमेवोत्तरम् ।। **यथेति** ।। यथा हिरण्यं स्वकृतमिति सर्वस्य हिरण्मयस्य पुरस्तात् पश्चाच्च सर्वस्यापि लोकस्य हिरण्मयमिति स्फुटं व्यवहर्तु शक्यं न भवति। किन्तु स्फुटतरविवेकिनामेव। न च तावतैव नानाशब्दैः व्यवहारमात्रेण तद्वस्तु न हिरण्यं भवति। किन्तु तदेव हिरण्यमेव भवति। यथा तद्वत् तथा अहमस्य जगतः पुरस्तात्पश्चाच्च स्वकृत इति न सर्वस्यापि लौकिकस्य स्फुटं भगवानिति व्यवहर्तुं शक्यः। मध्येतु सुकृत इति न सर्वस्यापि विविच्य स्फुटं व्यवहर्तुं शक्यः। किन्तु सुरनरतिर्यगादिदेहेषु स्थित्वा तत्तत्प्रवर्तकतया तैस्तैः शब्दैर्वाच्यो भगवानेव। ते तु प्रतिमामात्रमिति स्फुटतरविवेकिनामेव। ततस्तथा

Rarest Archive

व्यवहर्तुमशक्तानां नानाव्यवहारमात्रेण तद्व्यवहारविषयीभूतं वस्त्वहं भगवान्नेति वक्तुं युक्तम्। किं त्वहमेवेति समं समाधानमिति । तदेवं पूर्वाचारसद्भावेन भगवत्येव शब्दप्रयोगः कर्तव्यो नान्यत्रेति सिद्धमिति। अनेन भगवन्नाम्नां सर्वशब्दानां अन्यत्राप्रयोगरूपं मौनमवश्यं सम्पाद्यमिति सूचितं भवति। अनेनैव च वेदानां भगवन्नामत्ववेदनरूपं स्वाध्यायापरपर्यायं वेदाध्ययनमपि भागवतधर्मेषु परिगणितमवश्यं सम्पाद्यमिति सूचितमिति ज्ञातव्यं ॥ ३१० ॥ (मौनं १४) ॥

**अतः कविर्नामसु यावदर्थः स्यादप्रमत्तोऽव्यवसायबुद्धिः ।**
**सिद्धेऽन्यथार्थे न यतेत तत्तत्परिश्रमं तत्र समीक्षमाणः ॥ ३११ ॥**
**। २ । २ । ३ । (७५)**

ननु एवंविधे मौने अनुष्ठीयमाने शरीरपोषणं कथं स्यादित्यत आह॥ **अतः कविरिति**॥ यतः उक्तरीत्या अशेषोऽपि शब्दः भगवन्नाम। तस्य च देवादौ भगवतोऽन्यत्र अप्रयोगश्च। प्रयोगेऽपि फलादर्शनेन अकर्तव्यतया निश्चितः। यतश्च महापुरुषार्थहेतुतया भगवत्येव प्रयोगः कर्तव्यतया निश्चितः। अतः अस्मात्कारणात्। तत्र भगवतोऽन्यत्र तत्तच्छब्दविशेषप्रयोक्तॄणां क्लेशविशेषं समीक्षमाणोऽनुसन्दधानः अव्यवसायबुद्धिः अनिश्चितबुद्धिः कविः मुमुक्षुः अप्रमत्तः प्रमादरहितः सन् नामसु भगवन्नाम्नामन्यत्र प्रयोगे यावदर्थः यावान् शरीरधारणपोषणोपयोगितयैव परिमितः अर्थः यस्य तादृशः स्यात्। **इदमुक्तं भवति—** यद्वस्तु यस्य भवति तत्तस्मै देयं कुशलेनेति हि लोकत एव सिद्धम्। सर्वशब्दाश्च भगवत एवेति ''नामानी''ति प्रतिपादितम्। ततो लोकरीतिमनुरुन्धानैस्तत्रैव तेषां प्रयोगः कर्तुमुचितः। यदा चैवं तदा किं पुनस्तेन सति महापुरुषार्थलाभे। तथा चोक्तमेव। सत्यप्येवं परित्यज्य परमार्थं अपरमार्थे प्रयुञ्जानस्य तेन फलाभावस्य प्रागुदिततया केवलं गङ्गाशब्दं अन्त्यजवीथ्याः जले

Rarest Archive

प्रयुञ्जानस्येव प्रत्यवाय एव फलतया दृश्यते। एवं महाफलविघातकतया प्रत्यवायापादकतया च अकर्तव्ये सति अन्यत्र प्रयोगे। यस्तु भगवानेव राजादिपदाभिधेयः स च अन्नं मे देहि वस्त्रं मे देहि इत्यनुक्तावपि सर्जनसंहाराविव पालनमप्यप्रार्थित एव करोतीति निश्चितबुद्धिः सः अन्यत्र तथा न प्रयुङ्क्त एव। यस्त्वेवमव्यवसितबुद्धिर्मुमुक्षुः तेन चापल्येन प्रयोगे कर्तव्ये च इदमितिकर्तव्यता यत्प्रमादाभाव इति। प्रमादश्च भगवतः सर्वशब्दवाच्यत्व-विस्मरणम्। ततो भगवतः सर्वशब्दाभिधेयत्वानुसन्धानपूर्वकं विशेषतः अश्वं गजं रथं छत्रचामरादींश्च तत्तत्फलकान्भृत्यान् तत्पोषणाय राज्यं तद्रक्षणाय शूरांश्च इत्यादिप्रयोगे तदलाभे निष्ठुरभाषणावज्ञानादिना, क्वचिल्लाभे तु तद्रक्षणादिना च सुबहुतरश्रम एवेति बोधकानुसन्धानपूर्वकं च यावान् शरीरपोषणमात्रोपयोगी अर्थो विषयोऽस्ति तावत्येव अल्प एव शब्दः प्रयोक्तव्य इति। इदं च अकर्तव्यकरणं अतिसङ्कटे प्राप्ते। तदभावे तु सर्वथा अन्यत्रशब्दप्रयोगो न कार्य एवेत्याह॥ **अन्यथेति**॥ अन्यथा विना शब्दप्रयोगम्। अर्थे स्वशरीरपोषणरूपे प्रयोजने सिद्धे। न यतेत ततः तत्साधने शब्दप्रयोगं न कुर्यादिति॥ ३११॥

**सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किम्।**
**सत्यञ्जलौ किं पुरुपर्णपात्रैर्दिग्वस्त्रलाभे सति किं दुकूलैः॥ ३१२॥**
**।२।२।४।(७६)**

पक्वयोगिन एव दशाभेदेन द्विविधाः। विदेहिनः किञ्चिद्देहाभिमानवन्त इति। तत्र आद्यानां तावदन्यथासिद्धिप्रकारं दर्शयति॥ **सत्यामिति**॥ अतः अन्यत्रप्रयोगो न कर्तव्य एवेति भावः॥ ३१२॥

Rarest Archiver

**चीराणि किं पथि न सन्ति दिशन्ति भिक्षां**
**नो वाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ।**
**रुद्धा गुहाः किमवधूतसुहृन्न कृष्णः**
**कस्माद्भजन्ति कवयो धनदुर्मदान्धान्**                    **॥ ३१३ ॥**

**। २ । २ । ५ । (७७)**

**॥ इति भागवतधर्मोपदेशप्रकरणम् ॥ २० ॥**

द्वितीयानामपि अन्यथासिद्धिप्रकारं प्रकटयति॥ **चीराणीति** ॥ तादृशैरपि भगवद्भक्तैरादरेण दत्तमन्नादि ग्राह्यमेवेति सूचनाय धनदुर्मदेनान्धानित्युक्तम् । **यथाहुः—** ''साधूनां समचित्तानां मुकुन्दचरणैषिणाम् ॥ उपेक्ष्यैः किं धनस्तम्भैरसद्भिरसदाश्रयैः ॥ (१०।११।१९) । दरिद्रस्यैव युज्यन्ते साधवः समदर्शिनः ॥ सद्भिः क्षिणोति तत्तर्षं तत आराद्धि सिद्ध्यति ॥'' (१०।११।१८) इति । अथवा अन्यत्र भगवन्नाम्नां प्रयोगो नैव कर्तव्य इत्युक्ते कैरेवमाचरितमित्यतो बहुभिर्योगिभिरेवमन्यत्रशब्दप्रयोगो न कृतो भवद्भिरपि यथाशक्ति वाङ्नियमनरूपं मौनं कार्यम् । इन्द्रियतर्पणार्थं यथाकामं न व्यवहर्तव्यम् । कालतोऽभ्यासे सति क्रमेण ईदृशी दशापि लभ्यते इत्याशयेन तदाचारं दर्शयति ॥ **सत्यामित्यादिना** ॥ ३१३ ॥

**॥ इति श्रीमदवधूतशिरोमणिश्रीमज्जयतीर्थ (विष्णुतीर्थ)**
**निर्मितश्रीमद्भागवतसारोद्धारटीकायां भागवतधर्मोपदेशप्रकरणम् ॥ २० ॥**

Rarest Archiver

## बिम्बोपदेशप्रकरणम् ॥ २१ ॥

**मन्येऽकुतश्चिद्भयमच्युतस्य पादाम्बुजोपासनमत्र नित्यम् ।**
**उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मना यत्र निवर्तते भीः ॥ ३१४ ॥**
**। ११ । २ । ३३ । (१)**

श्रीगोपालकृष्णाय नमः ॥ कानि च बिम्बोपासनलब्धये साधनानि मयानुष्ठेयानि इति द्वादशीं शङ्कां पराकृत्य अधुना तच्च रूपं कीदृशं, क चास्ति, तदुपासनमपि कीदृशमिति, **नवमादिशङ्कात्रयं** परिहरिष्यन् बिम्बरूपोपदेशं कृत्वा, बिम्बोपासनं वक्तुं, तथा तत्र आदरजननाय तस्यापेक्षिताखिलफल-हेतुतामादौ दर्शयति ॥ **मन्य इति** ॥ असति अमङ्गले देहादौ आत्मेति आत्मन इति च भावात् अहंममेत्यभिमानात् तन्मूलकात् संसारात्। उद्विग्नबुद्धेः दुःखितस्य पुंसः अधिकारिणः। नित्यमच्युतस्य हरेः। पादाम्बुजोपासनमेव। कुतश्चिदपि भयं यस्मान्न भवति। सर्वात्मना संसारदुःखनिवर्तकमिति मन्ये जानामीति। न केवलमिदं ममानुभवेनैव सिद्धमिति मन्तव्यम्। किं त्वत्र भागवतशास्त्रेऽपि तथैव नियतमित्याशयेनाह। **यत्रेति** ॥ यस्मिन्नुपासने अनुष्ठीयमाने सति। भीः संसारदुःखम्। विश्वात्मना सर्वात्मना किञ्चिदप्यविहाय। निवर्तत इति अत्र शास्त्रे नित्यं नियतमिति। सर्वात्मना भयनिवृत्तिरुपासनेन भवतीत्येतदनुभवारूढं कर्तुं संसारादिति वक्तव्ये असदात्मभावादिति तन्मूलवाचकपदेन तद्ग्रहणम्। तस्य चोपासनेन विरोधस्तु स्फुटतर इति मूलस्यैव विच्छेदे सर्वात्मना निवृत्तिः सुलभैवेति। तथा च **बिम्बोपासनाप्रकरणे** स्पष्टीभविष्यति। सर्वात्मना दुःखनिवृत्तिहेतुतया इदमुपासनमत्युपादेयं मुमुक्षुभिरिति भावः ॥ ३१४ ॥

Rarest Archive

**विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजाप्यैः ।**
**नात्यन्तशुद्धिं लभतेऽन्तरात्मा यथा हृदिस्थे भगवत्यनन्ते ॥ ३१५ ॥**
**। १२ । ३ । ४८ । (२)**

ननूपासनमात्रेण कथं सर्वात्मना दुःखनिवृत्तिः इत्यतः सर्वस्यापि दुःखस्य मूलं मन एवाशुद्धम् । अशुद्धिश्च मनस उद्वेग एव । तयैवाशुद्ध्या दुःखं भवतीति मनोऽपि दुःखप्रदं भवतीति । यदा तु तन्मनो भगवति निवेशितं, तदा कुतोऽशुद्धिर्मनसः, यदा चाशुद्धं मनो नास्ति, कुतस्तदा दुःखम् । अत एवैतत् सूचयितुं दुःखितस्येति वक्तव्ये उद्विग्नमनस इति तत्कारणवाचकपदेनैव तत्तद्ग्रहणं प्राक्कृतमिति । ननु यदि मनःशुद्धिद्वारा भगवदुपासनं दुःखनिवर्तकं, तर्हि विद्यादिनापि मनःशुद्धिसम्भवेन पदाम्बुजोपासनेन अकुतश्चिद्भयं मन्य इति कथमित्यतः सत्यम् । विद्यादिनापि मनःशुद्धिः भवतीति । तथापि तया कियत एव दुःखस्य निवृत्तिर्भवेत् । सर्वात्मना निवृत्तिस्तु अत्यन्तशुद्ध्यैव । साधनानुरूपत्वात् साध्यस्य, सा चात्यन्तिकी मनःशुद्धिरूपासनेनैवेति पादाम्बुजोपासनमेव अकुतश्चिद्भयं मन्य इति साधूक्तमिति भावेनाह ॥ **विद्येति** ॥ विद्या वेदाध्ययनम् । प्राणनिरोधो वायुजयः । मैत्री परोपकारः । अभिषेकः स्नानम् । अन्तरात्मा मनः । अनन्ते भगवति हृदि स्थिते सति । यथा यादृशी शुद्धिर्भवति । तादृशीं अत्यन्तशुद्धिं विद्यादिभिर्न लभत इति ॥ ३१५ ॥

**तावद्भयं द्रविणदेहसुहृन्निमित्तं शोकः स्पृहा परिभवो विपुलश्च लोभः ।**
**तावन्ममेत्यसदवग्रह आर्तिमूलं यावन्न तेऽङ्घ्रिमभयं प्रवृणीत लोकः॥**
**३१६ ॥ ३ । १० । ६ । (३)**

किञ्च न वयं यस्मिन् दिने उपासनमारभ्यते तस्मिन्नेव दिने सर्वात्मना

Rarest Archiver

दुःखनिवृत्तिर्भवतीति वदामः। किन्तु नित्यं उपासनं कुर्वतोऽभ्यासपाटवेन तत्रैव मनःप्रणिधानेन आत्यन्तिकशुद्धिलाभे सति तदा तु भवत्येव आत्यन्तिकी क्लेशनिवृत्तिः ततः पूर्वं तं उपासनेन अनुष्ठीयमानेन अद्यैकं दुःखं गतं श्वोऽपरमित्येवं क्रमेण दुःखन्यूनतैव। यथा अनुपासकानां दिने दिने दुःखवृद्धिर्न तु तथा उपासकानां इत्येतदेव अनुभवसिद्धमिति कात्र कथन्ता इत्याशयेनाह ॥ **तावदिति** ॥ लोकोऽयं सर्वथापि न विद्यते भयं यस्मात्तादृशं तव पादं यावन्न प्रवृणीत भक्तिपूर्वकं नोपासीत। तावदेवेदं ममेत्येवंरूपो अमङ्गलो अभिमानः सर्वस्यापि दुःखस्य कारणभूतः। यावदेवाभिमानः तावदेव द्रविणादिनाशादि-निमित्तं भयं, तन्निमित्तः शोकादिश्च भवति। यावदुपासनमेव विपुलं भयं, विपुलः शोकादिः, अस्मिन् प्रारब्धे तु क्रमान्न्यूनतेति। परिपाके तु सर्वथा दुःखनिवृत्तिरित्यत एव एतत्सूचयितुं विपुल इत्युक्तम् ॥ ३१६ ॥

**भक्तिः परे स्वेऽनुभवो विरक्तिरन्यत्र चैष त्रिक एककालः।**
**प्रपद्यमानस्य यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुधपायोऽनुघासम् ॥**
**३१७ ॥ ११ । २ । ४२ । (४)**

उपासनया दुःखनिवृत्तिर्भवन्त्यपि न साक्षात् किं नाम भक्तिविरक्तिज्ञानद्वारैव। तदपि नैकदैव यावद्भावि तावद्भवति। किं तु क्रमादेवेति। तदनुसारेण दुःखनिवृत्तिरपि क्रमादेव भवतीति भावेन भक्त्यादिकं च त्रयं भवत् न कालभेदेन भवति किन्त्वेकदैव उपासनाबलेन अभिव्यज्यत इत्येतद्बुद्ध्यारोहाय दृष्टान्तपूर्वकं उपासनेन भवत्फलं चाह। **भक्तिरिति** ॥ प्रपद्यमानस्य भगवदुपासनां कुर्वतः अधिकारिणः। स्वे स्वबिम्बरूपे। परे परमात्मनि। भक्तिः। अनुभवो ज्ञानं च। तथा अन्यत्र देहादौ विरक्तिः। इत्येष त्रिकः त्रित्वसङ्ख्यां प्राप्तः। एककालः एकः कालः अधिकरणं यस्योत्पत्तेः स

Rarest Archiver

एकदैवोत्पद्यते । कथम् । अश्नतः भुञ्जानस्य । अनुघासं प्रतिकवलं क्षुधोऽपायः । पुष्टिः उदरपूर्तिलक्षणा । तुष्टिः अलं बुद्धिश्च इत्येतत्त्रयं यथा भवति तथेति ॥ ३१७ ॥

**इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः ।**
**भवन्ति वै भागवतस्य राजन् ततः परां शान्तिमुपैति साक्षात् ॥३१८॥**
**। ११ । २ । ४३ । (५)**

इति इत्थम्भूतया प्रत्युपासनं भक्त्यादित्रयमुत्पादयन्त्या अनुवृत्त्या उपासनया । अच्युताङ्घ्रिं भजतोऽपि यस्य भागवतस्य पुंसः । भक्तिर्विरक्ति-र्भगवत्प्रबोधश्च इत्येते यावन्तः क्लृप्ताः तावन्तो यदा भवन्ति । स वै स एव । ततः तदनन्तरमेव । परां शान्तिं आत्यन्तिकीं दुःखनिवृत्तिम् । साक्षाद्द्वारान्तरं स्वनिष्ठमनपेक्ष्यैव । उपैति प्राप्नोति । **इदमुदितं भवति–** यथा बुभुक्षोरश्नतश्च एकस्मिन् कवले गृहीते क्षुधपायः पुष्टिस्तुष्टिश्चेति त्रिकं एकदैव भवति । न च तावतात्यन्तक्षुन्निवृत्त्यादिर्भवतीति सः कवलान्तरं गृह्णाति तत्राप्येवमेवेति क्लृप्तकवलं गृह्णात्येव । तदनन्तरं तु आत्यन्तिकं क्षुन्निवृत्त्यादिर्भवत्येव । तथा उपासनमपि प्रतिव्यक्ति विरक्त्यनुभवभक्तित्रिकमभिव्यक्तं कुर्वत् क्रमेण दुःखनिवृत्तिं कुर्वत् स्वकाष्ठां प्राप्तं सत् क्लृप्तं भक्त्यादित्रिकमुत्पाद्य आत्यन्तिकीं दुःखनिवृत्तिं स्वसमानाधिकरणद्वारान्तरमनपेक्ष्यैव करोतीति ॥ ३१८ ॥

**विचक्षणा यच्चरणोपसादनात्सङ्गं व्युदस्योभयतोऽन्तरात्मनः ।**
**विदन्ति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः ॥ ३१९ ॥**
**। २ । ४ । १६ । (६)**

एवं भगवदुपासनेन भक्त्यादिद्वारा आत्यन्तिकक्लेशनिवृत्तिं प्राप्ताः सन्ति

Rarest Archiver

चेत् वयं तदुपासनं कुर्म इत्यतः सन्ति तादृशा अपि कुशला इत्यनुशयेनाह ॥ **विचक्षणा इति** ॥ विचक्षणाः अध्यात्मविचारचतुराः । कर्तव्याकर्तव्यविदो वा । यस्य चरणोपसादनात् अन्तरात्मनो मनसः उभयतः ऐहिकामुष्मिकविषयेषु । सङ्गं स्नेहं व्युदस्य परिहृत्य । वैराग्यं प्राप्य इति यावत् । ब्रह्मणो हरेः गतिं ज्ञानं तद्विशेषभूतां च भक्तिं विन्दन्ति । तद्द्वारा गताः अशेषतो अपगताः क्लमाः क्लेशा येभ्यस्ते तादृशा भवन्ति । अथवा सङ्गं व्युदस्येति भक्त्यादित्रयस्यापि उपलक्षणं प्राप्य ब्रह्म विन्दन्ति चेति योज्यं । तस्मै तादृशाय नमो नम इति । उपासनया उपासकानां पूर्वेषां फलप्राप्तिदर्शनात् अधुनातनैः अवश्यमुपासना कार्या इति भावः ॥ ३१९ ॥

**स्थित्युद्भवप्रलयहेतुरहेतुरस्य यः स्वप्नजागरसुषुप्तिषु सन् बहिश्च ।**
**देहेन्द्रियासुहृदयानि चरन्ति येन सञ्जीवितानि तदवैहि परं नरेन्द्र ॥**
**३२० ॥ ११ । ३ । ३६ । (७)**

एवमादरजननाय बिम्बोपासनां प्रशस्य बिम्बरूपमुपदिशति ॥ **स्थितीति** ॥ ब्रह्मविदामग्रेसरेण जनकेन स्वयं बिम्बरूपं विजानतापि लोकोपकाराय योगेश्वरान् प्रति पृष्टं । **यथाहुः**— ''नारायणाभिधानस्य ब्रह्मणः परमात्मनः । निष्ठामर्हथ नो वक्तुं यूयं हि ब्रह्मवित्तमाः ॥'' (११।३।३५) इति । एवं पृष्टवते राज्ञे बिम्बरूपमुच्यते । हे नरेन्द्र । यः अस्य जगतः स्थित्यादिहेतुः । स्वयं, न विद्यते हेतुर्यस्य इति अहेतुः । यश्च स्वप्नादिषु सन्नपि तत्कृतलेपाभावात् बहिरेव । **अथवा** अवस्थात्रयावस्थितत्ववदवस्थान्तर-स्थितत्वमप्यस्तीत्याह ॥ **बहिरिति** ॥ बहिर्मुक्तौ प्रलये सन्निति । हृदयं मनः येन च देहादीनि सञ्जीवितानि उद्बोधितान्येव । चरन्ति स्वस्वव्यापारक्षमाणि भवन्ति । तदेव ब्रह्म नारायणादिपदतात्पर्यविषयभूतं परं वस्तु विद्धीति योजना ।

Rarest Archiver

**इदमुदितं भवति–** क्वचिन्नारायणनाम्नो भगवद्रूपस्य उपास्यता ''नारायणं महाज्ञेयमि''त्यादौ। कुत्रचिद्ब्रह्मपदाभिधेयस्य ''ब्रह्मविदाप्नोति परमि''त्यादौ। अन्यत्र तु परमात्माभिधानस्य ''तस्याः शिखाया मध्ये तु परमात्मा व्यवस्थित'' इत्यादौ। एवमनेकाभिधानं एकमेव रूपमनन्तरूपस्यापि भगवतो बिम्बसंज्ञं वर्तते इति सिद्धं। तच्च कीदृशमित्यभिप्रायेण पृष्टे यो जगज्जन्मादिकारणतया सर्वशास्त्रप्रतिपाद्यः भगवानन्तरूपेष्वपि एतैरेव रूपविशेषैः मुक्तिं ददामीति सत्यसङ्कल्पानुसारेण सर्वेषु जीवेषु स्थितः अनाद्यनन्तकालेष्वपि जाग्रदादित्रिविधकालीनभोगविशेषं कुर्वाणोऽपि स्वातन्त्र्येण नित्यालिप्तो विजयतेतरामित्युत्तरं वै दत्तमिति। अनेन शङ्कात्रये कीदृशं तद्रूपमिति [१]शङ्का परिहृतेति ज्ञेयं ॥ ३२० ॥

**ज्ञानं विशुद्धं परमार्थमेकमनन्तरं न बहिर्ब्रह्म सत्यम्।**
**प्रत्यक् प्रशान्तं भगवच्छब्दवाच्यं यद्वासुदेवं कवयो वदन्ति ॥३२१॥**
**।५।१२।११।(८)**

क्व चास्तीति **दशमीं** शङ्कां परिहर्तुमाह ॥ **ज्ञानमिति** ॥ अवधूतेन मम शिबिकाभर्तृत्वं मार्गगन्तृत्वादिकं च नास्ति। किन्तु मदन्तर्गतस्य हरेरेव इत्याशयेन ''त्वयोदितं व्यक्तमविप्रलब्धं भर्तुः स मे स्याद्यदि वीर भारः। गन्तुर्यदि स्यादधिगम्यमध्वा'' (५।१०।१०) इत्यादिना ''अहो कष्टं भ्रातर्व्यक्तमुरुश्रान्तो दीर्घमध्वानमेक एवोहितवान् सुचिर'' (५।१०।६) मित्याद्युपहासपूर्वकं राज्ञोक्तस्य उत्तरे दत्ते सति राज्ञा विशेषज्ञे गुरौ लब्धे सति विशेषो विज्ञेय एवेति मन्वानेन विशेषविवित्सया ''भर्तुः स मे स्याद्यदि वीर भारः'' इत्यादिना त्वयोदिते मम शिबिकाभर्तृत्वं गन्तृत्वादिकं च

---

१. नवमी शङ्का।

Rarest Archiver

नास्तीत्यादिरूपे अर्थे मे मनो भ्रमति यतो हरिर्जीवे स्थितश्चेत्तस्य हृद्येव वर्तते। ''अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठती''ति श्रुतेः। बहिरेव चेत् महान् सन्तोषः। उभयथापि हरेः शिबिकाभर्तृत्वाद्ययोग इत्यभिप्रायेण ''न ह्यञ्जसा तत्वविमर्शनाय भवानमुष्मिन् भ्रमते मनो मे'' इत्यनेन प्रश्ने कृते सति उत्तरमुक्तमवधूतेनेदं। यत्परमार्थं सर्वोत्तमं एकं विशुद्धज्ञानरूपं सत्यं नित्यं प्रशान्तं ब्रह्म ब्रह्मपदवाच्यं। तथा भगवच्छब्दवाच्यं वासुदेवपदाभिधेयं च वस्तु कवयः वदन्ति तद्वस्तु, बहिर्जीवस्य रूपादिति न मन्तव्यं। नापि अन्तः जीवहृदयान्तरेव स्थित्वा विषयभोगं कुर्वेदित्युक्तम्– **अनन्तरमिति**॥ कथमवस्थानं बिम्बस्येति तेन विशेषतो विवित्सितमर्थं रहस्यतया अवक्तव्यमपि शिष्ये करुणया दर्शयति॥ **प्रत्यगिति**॥ जीवबिम्बमिति। **इदमुदितं भवति**– प्रत्यक्शब्दो जीवपरः प्रसिद्धः। तत्कुतः प्रत्यगिति सर्वदा अनाद्यनन्तकालेष्वपि कदाचिदपि कुतश्चित् कारणादपि यन्न बहिर्निःसरति तदुच्यते। अन्तरेव स्थितं वस्तु प्रत्यक्पदाभिधेयमिति यावत्। तादृशं च तद्बिम्बरूपमेव तस्य च वियोगे जीवस्वरूपस्य अनवस्थानापत्तेः। तच्च जीवस्य शिरसि शिरः, मुखे मुखमित्यादिक्रमेण समानाकृतितया सर्वत्र विद्यमानं सत् जीवावयवेन्द्रियाद्यन्तः-स्थितैः स्वरूपभूतैः स्वावयवादिभिर्भोगान् अनुभवति। ततस्तत्सन्निधानात् प्रत्यगिति प्रसिद्धो जीवः। यथा आत्मनः जीवस्य सन्निधानात् देहोऽपि आत्मेति व्यवह्रियते। जीवान्तरेव (च) व्याप्य विद्यमानतया प्रत्यक्पदबोध्ये जीवबिम्बरूपे परमात्मन्येव शिबिकाभर्तृत्वादिकं सुयोगमिति स्वप्रयुक्तवाक्याभिप्रायोद्घाटनेन राज्ञो बिम्बावस्थानं कथमिति विवित्सितार्थस्य लाभ इति। अत्रानन्तरं न बहिश्च किन्तु प्रत्यक् जीवस्वरूपस्य अन्तरेव व्याप्य विद्यमानमित्येवालं तावतैव विवित्सितार्थलाभसम्भवात्। तथापीदृशस्य सर्वदा जाग्रदाद्यवस्थावस्थितभोगभोक्तुः मुक्तिदानसामर्थ्यं कथमिति शङ्कापरिहाराय

Rarest Archiver

"ज्ञानं विशुद्धं" इत्याद्यभिहितमिति। परब्रह्मणः मुक्तिदातुरेव जीवे कृपयैव अत्रावस्थानं न जीवतौल्येनेति तत्परिहारः। अनेन क चास्तीति **दशमी** शङ्का परिहृता भवति। तत्प्रकारस्य स्फुटं प्रदर्शितत्वादिति॥ ३२१॥

**रहूगणैतत्तपसा न याति न विद्यया निर्वसनाद्गृहाद्वा।**
**न छन्दसा नोत जलाग्निसूर्यैर्विना महत्पादरजोभिषेकात्[1] ॥ ३२२॥**
**।५।१२।१२।(९)**

एवं बिम्बरूपस्य स्थितिप्रकारमभिधाय एतत् मया अभिहितबिम्बस्यैवं अवस्थानवेदनं तपआदिना केनापि साधनेन न लभ्यं किन्तु बिम्बज्ञानिनां महतां सेवया लब्धेन तत्प्रसादेनैव। सुदुर्लभत्वात् एतन्न कापि प्रकाश्यम्। तव तु जन्मान्तरार्जितपुण्यवशेन मम समागमः तेन अहं त्वयि करुणयैव उक्तवान् इत्यभिप्रेत्याह॥ **रहूगणेति**॥ एतत् एवं मया कथितप्रकारेण बिम्बावस्थानवेदनं न याति न लभ्यते। छन्दसा वेदाध्ययनेन। जलाग्निसूर्यैः भागीरथ्यादिनिषेवणेन अग्निहोत्रादिना सूर्यसेवया च। गृहात् निर्वसनात् वनवासात् सन्यासाद्वा॥ ३२२॥

**त्वं प्रत्यगात्मनि सदा भगवत्यनन्ते**
**आनन्दमात्र उपपन्नसमस्तशक्तौ।**
**भक्तिं विधाय परमां शनकैरविद्या-**
**ग्रन्थिं विभेत्स्यसि ममाहमिति प्ररूढाम्   ॥ ३२३॥**
**।४।११।६० (१०)**

---

१. महत्पादरजोभिषेकमित्यपि पाठः।

बिम्बज्ञानमेव संसारात् मोचकं तेन विना मुक्तिः सर्वथा न भवति ततः तदवश्यं गुरुसेवादिना सम्पाद्यं तच्च भक्तिद्वारा मोचकं इत्याशयेनाह ॥ **त्वमिति** ॥ एवमनाद्यनन्तकालेषु जीवान्तरेव तदनुरूपाण्येव कर्माणि कुर्वतः तद्भोग्यभोगानेव भुञ्जतः कथं संसारमोचकत्वमिति शङ्कानिरासाय उक्तम् । प्रत्यक् जीवान्तरेव अवस्थितरूपेण तदनुरूपतयैव आत्मनि आदानभोगादि कर्तर्यपि । आनन्दमात्रे सारसुखानुभवस्वरूपे । उपपन्नाः युक्ताः समस्ताः शक्तयः यस्मिन् तस्मिन्निति । शनकैरनायासेन विभेत्स्यसि भेदयसि ॥ ३२३ ॥

**॥ इति श्रीमदवधूतशिरोमणिश्रीजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां बिम्बोपदेशप्रकरणम् ॥ २१ ॥**

Rarest Archiver

## बिम्बोपासनापरपर्यायात्मसमर्पणप्रकरणम् ।। २२ ।।

**यस्मात्प्रियाप्रियवियोगसु[१]योगजन्म-**
**शोकाग्निना सकलयोनिषु दह्यमानः ।**
**दुःखौषधं तदपि दुःखमतद्धियाहं**
**भूमन् भ्रमामि वद मे तव दास्ययोगम् ।।३२४।। ७ । ९ । १७(१)**

श्रीरङ्गनाथाय नमः ।। एवं बिम्बं उपदिश्य तदुपासनाप्रकारं दर्शयति । अत्र तदीयोऽहमित्यनुसन्धानरूपं दास्यं द्विविधम् । बहिरन्तश्चेति । तत्र बिम्बातिरिक्तभगवद्रूपविशेषविषयकमाद्यम् । द्वितीयं तु बिम्बविषयकम् । तत्त्वनुसन्धानविशेषात्मकतया वा साक्षान्मुक्तिसाधनतया वा बाह्याद्वैशेष्य-ज्ञापनाय कुरुपाण्डवन्यायेन ततः पृथक्कृत्य परिगणितमित्यदोषः । एतदपि द्विविधम् । आत्मनो जीवस्य समर्पणम् । आत्मनः आत्मीयस्य समर्पणं चेति । स्वशब्दपर्यायात्मशब्दस्योभयबोधकत्वात् । द्वितीयमपि त्रिविधम् । इष्टद्रव्य-समर्पणम् । क्रियासमर्पणम् । गुणसमर्पणं चेति । एवं चतुर्विधमप्यात्मसमर्पणं बिम्बोपासनमिति गीयते । एवं द्विविधे दास्ये आद्यस्य द्वितीये बिम्बोपासनरूपे स्नानस्य भोजने इवोपकारकतयाङ्गत्वमभिप्रेत्यादावाद्यं दर्शयति ।। **यस्मादिति** ।। यस्मात्कारणादहं सुरनरतिर्यगादिषु सकलयोनिषु । प्रियवियोगाप्रियसुयोगाभ्यां उत्पन्नेन शोकाग्निना । दह्यमानः सन् । तद्दुःखनिवृत्तये । अतत् दुःखौषधादन्यदेव दुःखौषधमिति बुद्ध्या । भ्रमामि । यद्यत्कर्म करोमीति यावत् । तदपि तत्सर्वमपि । दुःखं दुःखप्रदमेव जातमिति ।

---

१. स्वयोगेत्यपि पाठः ।

Rarest Archiver

पुनः पुनरेव भ्रमामि। एवं भ्रममाणस्य मुख्यतो दुःखनिवृत्तिसाधनतया तव सकलदासैः निर्णीतं योगं मुख्यतो भक्त्युपायभूतं तव यद्दास्यं अन्तर्दास्यं तस्य योगं अङ्गभूतं बाह्यदास्यं वद। दुःखनिवृत्तिसाधनं अन्तर्दास्यमेव तदेव वद। तत्राधिकारसिद्ध्ये बाह्यमपि देहीति। अनेन बहिर्दासत्वरूपं दास्यं दर्शितं भवति ॥ ३२४ ॥ **(दास्यं २२)** ॥

**धर्मार्थकाम इति यो विहितस्त्रिवर्ग**

**ईक्षात्रयी नयदमौ विविधा [१]च वार्ता।**

**मन्ये तदेतदखिलं निगमस्य सत्यं**

**स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः॥ ३२५ ॥ ७।६।३२। (२)**

एवमन्तर्दास्यापरपर्यायबिम्बोपासनाङ्गभूतं बहिर्दास्यं प्रदर्श्य अधुना बिम्बोपासनां दर्शयति ॥ **धर्मार्थकाम इतीति** ॥ सत्यशब्दः आवर्तनीयः। यतो निखिलस्यापि निगमस्य शब्दराशेः। स्वस्य जीवस्य सुहृदोऽनिमित्तोपकारकस्य। परमपुरुषसय। तस्मै। स्वस्यात्मा स्वरूपम्। तथात्मीयं च तयोरर्पणम्। सत्यं मुख्यतस्तात्पर्यप्रतिपाद्यम्। अतो यद्यद्धर्मादि-प्रतिपादकं शब्दजातं तदेतदखिलमपि। सत्यं सत् निर्दुष्टं स्वात्मार्पणलक्षणं प्रमेयं यापयतीति सत्यम्। तादृशं चेत्सत्यं सार्थकं मन्ये नो चेन्न तेन शब्दजातेन प्रयोजनम् ॥ **इदमुदितं भवति—** वेदादिशब्दनिवहस्तावद्भगवत्प्रीतिजननद्वारा जीवप्रयोजनाय प्रवृत्तः तादृशमेव जीवाय ज्ञापयन् कृतकृत्यो भवेत्। येनैव भगवत्प्रीतिर्भवेत्। भगवत्प्रीतिः भगवते स्वात्मार्पणेन यादृशी भवति। न तादृश्यन्यतः अतस्तदेव जीवप्रयोजनं साधयतो वेदादिशब्दनिवहस्य

१. ''ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वणश्चतुर्थः'' इत्यारभ्य ''सर्वदेवयजनं विद्ये'' त्यनेन यदुक्तं तस्य सर्वस्य अनुकर्षणार्थश्चकार इति पदरत्नावल्याम्।

Rarest Archiver

मुख्यतस्तात्पर्यतः प्रतिपाद्यम्। तच्च यदि सोऽपि यं प्रति न प्रतिपादयेत्तदा तं प्रति कथं सार्थकं स्यात् इति। अत्र मुख्यतो भगवत्प्रीतिसाधनं जीवस्वरूपार्पणमेवेति प्रतिपाद्यते। तदेव हि बिम्बोपासनं नाम। कदाचिदर्पणं समर्पणमित्युच्यते। प्रतिदिनं घटिकादिकालनियमपूर्वकं अविच्छिन्नमात्मसमर्पणमेव बिम्बोपासनम्। अत एव सर्वेषु भागवतधर्मेषु फलतो वरिष्ठतासूचनाय सर्वस्यापि भागवतधर्मस्य फलरूपतया अन्ते निवेशनमिति ज्ञेयम्॥ ३२५॥

**विप्राद्द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखाच्छ्वपचं वरिष्ठम्।**
**मन्ये तदर्पितमनोवचनात्मगेहप्राणः पुनाति सकलं न तु भूरिमानः॥**
**३२६॥ ७। ९। १०। (३)**

भगवत्प्रीतिजनकेष्वात्मसमर्पणसमं किञ्चिदपि नास्तीत्येतद्बुद्ध्यारोहाय दृष्टान्तेन बोधयति॥ **विप्रादिति**॥ द्विषड्गुणाश्च— "ज्ञानं च सत्यं च दमः शमश्च अमात्सर्यं ह्रीस्तितिक्षाऽनसूया। दानं च यज्ञश्च तपः श्रुतं च महाव्रता द्वादश ब्राह्मणस्ये"त्युदिताः तैर्युक्ताद्विप्रात्। श्वपचं चाण्डालेषु नीचतमम्। वरिष्ठं अत्युत्तमं मन्ये। नन्विदमसम्बद्धम्। द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखाच्चेति। शमपदोक्तभगवन्निष्ठत्वस्यापि सत्त्वादित्यतस्तस्य तत्र सत्वेऽपि विमुखत्वं युज्यत एव। अत्र पादारविन्दरतत्वस्य ईदृग्रूपत्वात्। तस्य च तस्मिन्नसत्वात्। अतो न विरुद्धं विशेषणद्वयमित्यभिप्रायेण तन्निर्वचनपूर्वकं श्वपचं स्तौति, निन्दति च विप्रम्। **तदिति**॥ तस्मिन्भगवति समर्पिताः मनोवाग्देहप्राणा येन तादृशः श्वपचः। सकलं दृष्टिगोचरं पदार्थसार्थम्। पुनाति यदा। तदा स्वीयं मनआदिकं पुनातीति किमु वक्तव्यम्। ईदृशं च हरिरतत्वं तादृशेऽपि विप्रे नास्त्येवेति पादारविन्दविमुखता प्राप्तैवेति भावेनाह॥ **भूरिमान इति**॥ भूरिमानोऽहं ममेत्याभिमानवानिति। अनेनात्मसमर्पणं तत्र नास्ति इति

Rarest Archiver

सूचितम्। तयोरतिविरोधात्। ईदृशो विप्रस्तु सकलं न पुनाति इति प्राग्वद्योजनीयम्। **इदमुदितं भवति—** समुचितकुलजत्वादिसकलसाधन-सम्पन्नोऽप्येतद्विरहमात्रेण सकलमपि साधनजातं व्यर्थीकरोति, सकलसाधन-विरहितोऽप्येतन्मात्रेण सकलं दुर्जन्मादिकमपि सार्थकं करोतीति च निन्दास्तुतिभ्यां नीचत्वमहत्त्वे कथ्येते। भगवतोऽन्यत्र महत्त्वं नाम भगवतः प्रीतिविशेषपात्रत्वमेव। तदभाव एव नीचत्वम्। सकलसाधनसहितेऽपि प्रीत्यभावकथनेन तद्रहितेऽपि प्रीतिविशेषकथनेन च आत्मार्पणमेव विशेषतो भगवत्प्रीतिसाधनमिति ज्ञायत इति। अतः इदमेव वेदादितात्पर्यविषयभूत-मित्येतद्बोधकतयैव वेदादिकं सार्थकमिति। अनेन पूर्वश्लोकोऽपि विवृतो भवति॥ ३२६॥

**किञ्चित्करोत्युर्वपि यत्स्वदत्तं सुहृत्कृतं फल्ग्वपि भूरिकारि।**
**मयोपनीतं पृथुकैकमुष्टिं प्रत्यग्रहीत्प्रीतियुतो महात्मा ॥ ३२७॥**
**। १०। ८१। ३४। (४)**

एवं चतुर्विधेष्वात्मसमर्पणेष्वाद्यं प्रदर्श्य द्वितीयेऽप्याद्यं प्रदर्शयति॥ **किञ्चिदिति**॥ उर्वपि भूर्यपि। स्वदत्तं सु सम्यक् आत्मोद्देशेनादत्तमनर्पितं वस्तु। किञ्चिदेव करोति। फल्ग्वपि वस्तु। सुहृद्भिरात्मसमर्पणकारितया स्वप्रियैः कृतमर्पितं भूर्येव करोतीति भूरिकारीति हेतोः। महात्मा भक्तेषु दयावानिति ज्ञायते। कुत एवं त्वया ज्ञानमित्यतोऽनेनेत्याह। **मयेति**॥ मया गृहात् आगमनसमये दारिद्र्यदोषेण कियदेव पृथुकं तदर्थमानीतम्। तस्मिन्नप्येकमुष्टिपरिमितमेव। प्रीतियुतः सन्। प्रत्यग्रहीत् यतस्तेनेति। अतो मुमुक्षुणा द्रव्यं भगवते सन्ततं समर्पणीयमिति भावः॥ ३२७। **इति द्रव्यसमर्पणम्**॥

Rarest Archiver

**कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतः स्वभावम् ।**
**करोति यद्यत्सकलं परस्मै नारायणायेति समर्प(निवेद)येत्तत् ॥३२८॥**

। ११ । २ । ३६ । (५)

द्वितीयमपि निर्दिशति ॥ **कायेनेति** ॥ स्वभावं निजां स्थितिमनुसृत्य प्रवर्तमानः । अथवा स्वाख्यो भावः स्वभावो भगवान् तमनुसृत्य प्रवर्तमानः । बिम्बरूपेण हरिणा विष्टिगृहीत इव प्रवर्त्यमान इति यावत् । तादृशोऽयं पुरुषः कायादिना मनःपर्यन्तेन यत्करोति । तत्सन्निवेदयेत् समर्पयेत् । किं तन्निवेदनापरपर्यायं समर्पणमित्यत इदमेव समर्पणं नाम । यत्क्रियमाणे कर्मणि भगवदुद्देश्यकत्वानुसन्धानमित्यनुशयेनाह ॥ **परस्मै नारायणायेतीति** ॥ एतदेव समर्पणमिति । न केवलमिदानींतनक्रियैव भगवति समर्पणीया । किं नाम क्रियमाणेव भूतपूर्वा, करिष्यमाणा च, यस्मिञ्जन्मनि समर्पणशक्तिं ददाति भगवांस्तस्मिन्नेव जन्मनि त्रिविधापि क्रिया समर्पिता चेत् पूर्वजन्मसु स्मरणविरहितापि क्रिया सर्वापि सार्थका भवति । तथा अस्मिन्नपि वार्द्धकादौ रोगाद्युपद्रवदशायां तत्तत्कालेषु क्रियमाणायां क्रियायां समर्पणशक्तिर्माभूदिति तानेष्यान् रोगादिकांस्तत्कालीनक्रियाश्च तथा मरणानन्तरक्रियमाण-शवदाहादिक्रियां समर्पयेदिति सूचयितुं यद्यत्कृतं करिष्यमाणं च तत्सकलमित्याहेति । यद्यप्येतेन भागवतधर्मत्वं न भविष्यति विना तत्कालसमर्पणम् । तथापि तदा तादृशाधिकारनिश्चयाभावेन अभागवतधर्मतो वैलक्षण्यायेदमित्यदोषः । निश्चिताधिकारिणामपि तत्समर्पणं भगवत्प्रीति-विशेषार्थं लोकशिक्षणार्थं वेति ॥ ३२८ ॥

**नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ।**
**कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ॥३२९॥**

। १ । ५ । १२ । (६)

Rarest Archiver

ननु किमनेन क्रियायाः समर्पणेन श्रुत्याद्यविहितपरित्यागपूर्वकं विहितानुष्ठानेनैव फलस्य जायमानत्वादित्यतो यदा मुख्यतो मुक्तिसाधनतया श्रुत्यादिविहितं सर्वपापपरिहारकतया प्रमितमपि ज्ञानं ब्रह्मविद्याविरहितो ब्राह्मण इव न शोभां बिभर्ति। किं तदा यन्मुख्यतो न मुक्तिसाधनं स्वयमेव पापबहुलं च तत्तादृशं कर्म भगवदर्पणेनापि विहीनं चेत् न शोभते इति किं वक्तव्यम्। अतो भगवदर्पणमवश्यं कर्तव्यमिति भावेनाह। **नैष्कर्म्यमपीति**॥ चोऽवधारणे। पुनःशब्दो वाक्यालङ्कारे। कर्मासाध्यतया वा दुष्कर्मरहिततया वा निष्कर्मणो मुक्तेः साधनम्। तथा श्रुत्यादिविहितं अलं निरञ्जनं सकलपापपरिहारक-स्वभावमपि ज्ञानम्। अच्युते हरौ भावेन समर्पणाख्यमनोवृत्त्या विरहितं चेन्नैव शोभते नोपादेयं भवति। यदा तदा यदकारणं मोक्षसाधनतया अविहितम्। शश्वदभद्रं वैशसादिना अमङ्गलतरं अत एव स्वभावतः पापमपि तत्तादृशं कर्म ईश्वरे नार्पितं चेत् कुतः कारणादुपादेयं भवेदिति। **इदमुदितं भवति—** प्रेक्षावान्हि तदेवोपादत्ते। यत्स्वपुरुषार्थसाधनं भवेत्। पुरुषार्थो हि द्वेधा। अनिष्टनिवृत्तिरिष्टप्राप्तिश्चेति। साधनमपि पुरुषार्थस्येतिकर्तव्यतासहितमेव साधकं भवति। तदत्रेतिकर्तव्यतारूपेण भगवदर्पणेन विरहितं ज्ञानं सकलपापरूपानिष्टनिवृत्तिरूपमुक्तिप्राप्तिं च अकुर्वत्कथमुपादद्यात्। तथा सति प्रेक्षावत्त्वहानिप्रसङ्गात्। ततस्तद्यथा अनुपादेयं तथा कर्मापीश्वरार्पणविरहितं चेदितिकर्तव्यताराहित्येन पुरुषार्थमसाधयत्कथं प्रेक्षावद्भिरुपादेयं भवेदित्युपादेय-तास्थैर्याय कर्मणामितिकर्तव्यतारूपतया समर्पणं कार्यमेवेति॥ ३२९॥

**तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः।**
**क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः॥३३०॥**

**।२।४।१७। (७)**

Rarest Archiver

स्यादेतद्यदि भगवदर्पणमपीतिकर्तव्याताकोटिनिविष्टं भवेत् तदेव कुत इत्यतो व्यतिरेकेण तस्येतिकर्तव्यतात्वं द्रढयति ॥ **तपस्विन इति** ॥ यशस्विनः यशःप्रयोजककर्मविशेषाणां कर्तारः । मन्त्रविदो वेदाध्ययनादिकं कुर्वाणाः । किं बहुना यद्यत्पुरुषार्थसाधनतया श्रुत्यादिना विहितं कर्म तस्य सर्वस्यापि कर्तारोऽपीत्याशयेनाह । **सुमङ्गला इति** ॥ यद्यच्छ्रुत्यादिना कर्माङ्गं विहितं प्रायश्चित्तदीक्षाप्रयाजादिकं तस्य सर्वस्य साहित्येन साङ्गं कर्म कुर्वन्तोऽपि । नैव क्षेमं विन्दन्ति किं पुनरङ्गविकलकर्मकर्तार इति भावेनोक्तं— **स्विति** ॥ सु सम्यक् मङ्गला इति । यस्मिन्भगवति अर्पणं विना । क्षेमं न विन्दन्ति । अतोऽनेन कर्मणा क्षेमप्राप्तये प्रतिकर्म पुनःपुनस्तस्मिन्नेव समर्पणं कर्तव्यमिति भावेनोक्तं तस्मै नमो नम इति ॥ ३३० ॥

**यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः ।**
**प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या ॥ ३३१ ॥**

**। ४ । ३१ । १४ । (८)**

**॥ इति बिम्बोपासनापरपर्यायात्मसमर्पणप्रकरणम् ॥ २२ ॥**

ननु भगवदर्पणस्यापि इतिकर्तव्यताकोटिनिविष्टत्वे भगवतोऽन्यस्य देवादेः पूजादिविलोपप्रसङ्गः । तस्य भगवदर्पणे तत्पूजात्वाद्यभावात् । तदुद्देश्यकपूजा[illegible]त्र तत्पूजादित्वात् । तथा च सति अङ्गविकलतया भगवत्पूजादेरपि विशिष्टफलाधायकत्वं न स्यात् । साङ्गस्यैव तथात्वात् । अङ्गदेवतादिपूजासाहित्येनैव च भगवत्पूजादेः साङ्गत्वात् । तथा च न भगवदर्पणस्येतिकर्तव्यताकोटौ निवेशो युक्तः इत्यत आह । **यथेति** ॥ तरोर्वृक्षस्य । मूल एव निषेचनेन कृतेन । मूलमिव तस्य वृक्षस्य स्कन्धाः स्थूलशाखाः, भुजास्ततो निकृष्टाः शाखाः, उपशाखाः शाखाभ्योऽपि निकृष्टाः

Rarest Archive

ता अपि तृप्यन्त्येव। तेन तत्रापि पल्लवपुष्पफलोदयदर्शनेन तन्निश्चयात्। तथा च प्राणस्य देहान्तःसञ्चारिणो वायोः उपहारादुपसंहाररूपयोगादेव इन्द्रियाणामप्युपहारो विषयेभ्य आकर्षणरूपोपसंहारो भवति। तथाच्युतस्य हरेरिज्या पूजादिलक्षणा सेवैव[१] सर्वस्याङ्गदेवादेरर्हणं पूजा। न पृथगस्ति तेषां पूजा नामेति ॥ **इदमुदितं भवति—** कर्तव्यमेव समर्पणम्। न च तत्पूजाभावः। भगवत्पूजाया एव तत्पूजात्वात्। भगवदुद्देश्यकपूजाधिष्ठानतैव हि इतरेषां पूजा नाम। **तथा चोक्तं पुरस्तात्—** ''सर्वाणि मद्धिष्ण्यतया भवद्भिः सम्भावितव्यानी''ति। अङ्गिपूजारूपयैवाङ्गपूजया अङ्गानामपि तृप्तेस्ततः फलोन्मुखत्वस्य च निदर्शने निदर्शितत्वेन साङ्गा भगवत्पूजेति। ततो विशिष्टफलस्यापि उदयसम्भवात्। न चाङ्गत्वं देवानां तरुनिदर्शनेनोपादानतामात्रेणावयवत्वमिति मन्तव्यम्। प्रधाने यत्क्रियते तदप्रधानस्यापि भवति इत्यभिप्रायेणैव तस्य गृहीतत्वात्। किं तु(च) तदेकाधीनप्रवृत्तिमत्त्वमेव तदङ्गत्वमित्यभिप्रेत्यावयवावयविभावरहितनिदर्शनान्तरोपादानमिति युक्त एव भगवदर्पणस्येतिकर्तव्यताकोटौ निवेश इति। एतेन गुर्वादिपूजावन्दनादिकमपि व्याख्यातं वेदितव्यम् ॥ ३३१ ॥

**॥ इति श्रीमदवधूतशिरोमणिश्रीमज्जयतीर्थ (विष्णुतीर्थ)**
**निर्मितश्रीमद्भागवतसारोद्धारटीकायां**
**बिम्बोपासनापरपर्यायमात्मसमर्पणप्रकरणम् ॥ २२ ॥**

---

१. अत्र एवकारेण प्राधान्यपूजा निषिध्यते। न त्ववान्तरपूजा। तस्याः विहितत्वेन अच्युतस्य पूजात्वादित्यभिप्रायः ॥ ''परिवारतया ग्राह्या अपि हेयाः प्रधानतः ॥'' इत्युक्तेः। इति पदरत्नावल्याम् ॥

Rarest Archives

## भक्तिस्तुतिप्रकरणम् ॥ २३ ॥

**वाग्गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च।**
**विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति ॥ ३३२ ॥**
**। ११ । १४ । २४ । (१)**

॥ श्रीलक्ष्मीवेङ्कटेशाय नमः ॥ एवमतीतग्रन्थेन त्रिंशद्विधान् भागवतधर्मान् प्रदर्श्य अधुना ईदृशभागवतधर्मान् अनुतिष्ठतस्तत्र शिरोमणिसदृशं बिम्बोपासनापरपर्यायं आत्मसमर्पणं आदरनैरन्तर्याभ्यां कुर्वतो भागवतप्रधानस्य भक्तिरतुला भवति। तत्कार्याणि चैतानि। तानि च दृष्ट्वा तेषां भागवतप्रधानानां लोकविलक्षणां चर्यां दृष्ट्वा मुमुक्षुभिः अन्यथामतिः सर्वथा न कर्तव्या। तया च भक्त्या गुणनिवृत्तिरूपं मायातरणं भवतीत्यादिकं वक्तुमुत्तरो ग्रन्थसन्दर्भः ॥ **यथाहुः—** "इति भागवतान् धर्मान् शिक्षन्भक्त्या तदुत्थया ॥ नारायणपरो मायामञ्जस्तरति दुस्तरां" ॥ (११।३।३४) इति ॥ द्विविधा माया। एका भगवत्स्वरूपभूता तदिच्छारूपा। अपरा भगवतो भिन्ना भगवदधीना गुणत्रयरूपा अविद्याप्रकृतिवासनादिपदाभिधेया। तत्राद्या जगदुत्पत्त्यादौ निमित्तभूता। द्वितीयोपादानभूता। तत्र आद्यैव द्वितीयां निमित्तीकृत्य मुख्यतो जीवानां बन्धिका। तत्राद्यायास्तरणं अनुग्रहोन्मुखीकरणमेव भक्त्या। द्वितीयायास्तु परित्याग एवेति। तत्रादावेवं त्रिंशद्विधभागवतधर्मानुष्ठानेन भक्तिसम्पादने को विशेषो भक्तेरित्यतोऽनिष्टपरिहारेष्टप्राप्त्योरप्यन्त-रङ्गसाधनभूता सैव। ततोऽवश्यं सम्पाद्या इति भावेन तां स्तोतुं इदं प्रकरणम्। तत्रादौ भक्तेः सकलपापपरिहारकत्वरूपं माहात्म्यं दर्शयति ॥ **वाग्गद्गदेति** ॥ यस्य वाग्गद्गदा भवति। यस्य चित्तं द्रवते। यश्च कचिद्रुदति। कुत्रचिच्च

Rarest Archiver

हसति। कदाचिद्विलज्ज उद्गायति। क्वापि विलज्जः सन्नृत्यति च। स एवैतैर्भक्तिकार्यैर्मद्भक्तियुक्त इति ज्ञेयम्। स तादृश एव भुवनमपि सम्भाषणादिना पुनाति पवित्रीकरोति। किमु स्वयं इति। **यथाहुः**— "साधूनां दर्शनं स्पर्शः कीर्तनं स्मरणं तथा॥ तीर्थानामिव पुण्यानां सर्वमेव हि पावनं" (१०।८७।५९) इति॥ ३३२॥

**तस्मिन् भवन्तावखिलात्मयोनौ नारायणे कारणमर्त्यमूर्तौ।**
**भावं व्यधत्तां नितरां महात्मन् किं वाऽवशिष्टं युवयोः सुकृत्यम्॥**
**३३३॥ १०।४४।३४। (२)**

सकलप्राप्तव्यप्रापकतया कृतकृत्यताप्रदत्वरूपं महिमान्तरमाह॥ **तस्मिन्निति**॥ महात्मन् महात्मनि। तस्मिन्यतो भावं भक्तिं व्यधत्तां कृतवन्तौ। अतो युवयोः। सुकृत्यं शोभनं कर्तव्यं कर्म। किं वाऽवशिष्टमस्ति न किमपि। सर्वस्यापि भक्त्यर्थत्वात्तस्याश्च सम्पादिततया सर्वापेक्षितस्य सिद्धत्वादिति भावः॥ ३३३॥

**मन्ये धनाभिजनरूपतपः श्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः।**
**नाराधनाय हि भवन्ति परस्य पुंसो भक्त्या तुतोष भगवान्ननु यूथपाय॥**
**३३४॥ ७।९।९५। (३)**

सर्वतोऽतिशयेन भगवत्प्रीतिहेतुत्वरूपं महिमान्तरमाह॥ **मन्य इति**॥ धनादयो बुद्धिपर्यन्ता उपायास्ते। परमपुरुषस्य हरेः आराधनाय प्रीतये। तां जनयितुं समर्था न भवन्ति। इति मन्ये निश्चिनोमि। कुतः। हिर्हेतौ। यस्माद्भगवान्यूथपाय गजेन्द्राय। भक्त्यैव तुतोष सन्तुष्टो बभूव। ननु पुराणादिना निश्चितमेतदिति। तस्मादिति योजना। **इदमुदितं भवति**—

Rarest Archive

भगवान् चक्रेण नक्रवदनं विदार्य गजेन्द्रं मोचयामास इति तावत् पुराणादौ प्रसिद्धम्। न च तन्मोचनं विना तस्मिन्परमा प्रीतिः घटते। न च तत्प्रीतौ साधनानि धनादीनि प्रसिद्धानि सम्भावितानि भवन्ति। ततो भक्तिरेव तत्र तोषहेतुतया निश्चितेति न धनादिकं भगवदाराधनाय भवतीति ॥ ३३४ ॥

**न जन्म नूनं महतो न सौभगं न चाङ्ग बुद्धिर्नाकृतिस्तोषहेतुः ।**
**तिर्यग्विसृष्टानपि नो वनौकसश्चकार सख्ये बत लक्ष्मणाग्रजः ॥३३५॥**

**। ५ । १९ । ५ । (४)**

एतदेवमेव न चात्र सन्देहः कर्तव्य इति भावेन आर्ष्टिषेणं प्रत्युक्तं हनुमतो वचनमेव दर्शयति ॥ **न जन्मेति** ॥ हे अङ्ग, महतो गुणग्राहिणां वरिष्ठस्य रामस्य। जन्म वरिष्ठं न तोषहेतुः। सौभगं च न। बुद्धिर्वा न। आकृतिरपि न। नूनं निश्चितमेतत्। कुतः। यतो लक्ष्मणाग्रजो रामः। तिर्यक्सम्बन्धियोनौ जातान् अत एव वनौकसोऽपि नोऽस्मान्। सख्ये चकार। बतेत्यास्वादने। अनुभवसिद्धमेतत्। रामस्येति वक्तव्ये महत इति वचनेन महतां सर्वेषामयं स्वभाव इति सूचयति। अत एव लक्ष्मणाग्रज इत्युक्तमिति मन्तव्यम् ॥ ३३५ ॥

**सुरोऽसुरो वाथ नरोऽथ वानरः सर्वात्मना यः सुकृतज्ञमुत्तमम् ।**
**भजेत रामं मनुजाकृतिं हरिं य उत्तराननयत्कोसलान्दिवम् ॥ ३३६ ॥**

**। ५ । १९ । ५ । (५)**

ततः किमित्यतोऽस्यैव महतो भजनं मुमुक्षुभिः सर्वथा कार्यमित्याशयेनोक्तं विशदयति ॥ **सुर इति** ॥ यतोऽस्य तोषणे जन्मादिकं न प्रयोजकं अतः सुरोऽसुरो वा नरो वानरो वा किं बहुना यः पुरुषार्थी स अत्यन्तं

Rarest Archiver

कृतोपकारस्य स्मर्तारं अत एवोत्तमं मनुजवदाकृतिस्तथा प्रदर्शनं यस्य तम्। हरिमेव तं रामम्। सर्वप्रकारेण भजत। को वा तेन पुरुषार्थो यदाशया भजेमेत्यतस्तं दर्शयति ॥ **य इति** ॥ यः उत्तरान्कोसलान् अयोध्यायाः परितो विद्यमानदेशस्थान्। दिवमेव वैकुण्ठादिरूपं प्रापयामास तमिति ॥ ३३६ ॥

**मन्येऽसुरान् भागवतांस्त्र्यधीशे संरम्भमार्गाभिनिविष्टचित्तान्।**
**ये संयुगेऽचक्षत तार्क्ष्यपुत्रस्यांसे सुनाभायुधमापतन्तम् ॥ ३३७ ॥**
**। ३ । २ । २४ । (६)**

**॥ इति भक्तिस्तुतिप्रकरणम् ॥ २३ ॥**

नन्वसुरो वेति कथम्। तेषां सर्वदा भगवता सह युद्धादिकं कुर्वतां तस्मिन् भक्तेरभावादित्यतोऽसुरा अपि भक्ताः सन्तीत्याह। **मन्ये इति** ॥ तानसुरानपि अहं भागवतान्मन्ये। अधीशे भगवति। संरम्भः क्रोधः तल्लक्षणेन मार्गेणाभिनिविष्टं भक्तिपूर्वकं निविष्टं चित्तं येषां तान्। आदावन्यनिमित्तक्रोधेन युध्यन्तोऽपि पश्चाद्भक्तिमन्तो भवन्तीति। ते के ये तार्क्ष्यपुत्रो गरुडस्तस्यांसे सुनाभं चक्रं आयुधं यस्य स तादृशम्। सम्युगे युद्धे। आपतन्तं आभिमुख्येनायान्तं आचक्षतेति। अनेन युद्धादिकमन्यनिमित्तं भक्तिरेव स्वाभाविकीति साधूक्तमसुरो वेतीति सूचितं भवति। तदेवमुक्तरीत्या भक्तेः सर्वतोऽपि वरीयस्त्वेनावश्यकतया सर्वथा भागवतधर्मानुष्ठानेन सा सम्पाद्येति सिद्धम्। **यथाहुः—** ''नालं द्विजत्वं देवत्वमृषित्वं वाऽसुरात्मजाः ॥ प्रीणनाय मुकुन्दस्य न वृत्तं न बहुज्ञता ॥ (७।७।५३) ॥ न दानं न तपो नेज्या न शौचं न व्रतानि च। प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बनम् ॥ (७।७।५४) ॥ ततो हरौ भगवति भक्तिं कुरुत दानवाः ॥ (७।७।५५) ॥ देवोऽसुरो मनुष्यो वा यक्षो

Rarest Archive

गन्धर्व एव वा (च) ।। भजन्मुकुन्दचरणं स्वस्तिमान्स्याद्यथा वयम् ।। (७।७।५२) ।। दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः ।। खगा मृगाः पापजीवाः सन्ति ह्यच्युततां गताः (७।७।५६) ।। एतावानेव लोकेऽस्मिन्पुंसां स्वार्थः परः स्मृतः ।। एकान्तभक्तिर्गोविन्दे यत्सर्वत्र तदीक्षणम्'' ।। (७।७।५७) इति ।। ३३७ ।।

**।। इति श्रीमदवधूतशिरोमणिश्रीजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटिप्पण्यां भक्तिस्तुतिप्रकरणम् ।। २३ ।।**

Rarest Archiver

## भक्तिकार्यप्रकरणम् ॥ २४ ॥

**एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः ।**
**हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति [1]लोकबाह्यः ॥ ३३८ ॥**
**। ११ । २ । ४० । (१)**

श्रीरस्तु ॥ एवं भक्तेर्माहात्म्यं प्रदर्श्य भक्तानां प्रवृत्तिरित्थम्भूतेति ज्ञापयितुं पूर्वोक्तानि भक्तिज्ञापकानि विशदीकरोति अनेन प्रकरणेन । तत्रादौ तेषां प्रवृत्तेर्लोकविलक्षणतां दर्शयति ॥ **एवंव्रत इति** ॥ पूर्वोक्तश्रवणादिकमेव व्रतमनुष्ठेयं यस्य । श्रवणादिरूपभागवतधर्ममनुतिष्ठन्निति यावत् । तादृशः पुमान् । जातानुरागो भगवत्युत्पन्नभक्तिर्भवति । स च यदा पुरुषान्तरैः अतुल्यातिशयगुणकर्मप्रतिपादकभगवन्नामानि कीर्त्यमानानि शृणोति । तदा तेषां नाम्नां कीर्तनेन निमित्तेन । द्रुतं द्रवीभूतं चित्तं यस्य स तादृशो भवति । अथो तदनन्तरम् । तेन चित्तद्रवीभावेनेति यावत् । हसति । हासश्च न लोकसंमतः किन्तु तैर्निन्दनीय एवेत्याशयेनोक्तम् ॥ **उच्चैरिति** ॥ लोकेऽपि तादृशो हासो विद्यत एवेति कथं निन्द्य इत्यतो दृष्टान्तेन प्रदर्शयति । **उन्मादवदिति** ॥ उन्मादरोगीव । न केवलं तस्य हास एवेदृशः । किं नाम । सर्वमपीत्याशयेनाह ॥ **उन्मादवदुच्चै रोदिति रौति गायति नृत्यति चेति** ॥ एवंविधप्रवृत्तिमत्त्वादेव

---

१. लोकबाह्य इत्यनेन भक्तबाहुविध्यं दर्शयति ॥ तदुक्तं— "केचिदुन्मादवद्भक्ता बाह्यलिङ्गप्रदर्शकाः । केचिदान्तरभक्ताः स्युः केचिच्चैवोभयात्मकाः ॥ मुखप्रसादाद्दार्ढ्याच्च भक्तिर्ज्ञेया न चान्यतः" । हसनादिलक्षणं उन्मादादौ अतिव्याप्तमित्यत उक्तम् ॥ मुखप्रसादादिति ॥ इति पदरत्नावल्याम् ।

Rarest Archive

लौकिकानामपहास्यो भवतीति भावेनोक्तम् ॥ **लोकबाह्य इति** ।। लोकबाह्यो लोकविलक्षण इति। अनेन द्रवते यस्य चित्तमित्यादिकं विवृतं भवति ।। ३३८ ।।

**क्वचिद्रुदन्त्यच्युतचिन्तया क्वचिद्धसन्ति नन्दन्ति वदन्त्यलौकिकाः ।**
**नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृताः ॥**
**३३९ ॥ ११ । ३ । ३२ । (२)**

अन्यान्यपि कार्याणि लोकविलक्षणान्येवेति दर्शयति ॥ **क्वचिदिति** ।। अच्युतस्य दर्शनं कथं स्यादिति चिन्तया क्वचिद्रुदन्ति। क्वचिच्चाच्युतस्य चरितविशेषस्मृत्या हसन्ति, नन्दन्ति च। अन्यदा तच्चरितानि लोकैर्बाह्यैरपृष्टा अपि तेषां तत्र आदराभावेऽपि स्वयमेव वदन्ति। क्वचिच्च अजं हरिं अनुशीलयन्ति। कृष्णादिचरितानि अभिनयेन प्रदर्शयन्ति। अन्यस्मिन्काले परं हरिं मनसा एत्य प्राप्य निर्वृताः सन्तः अन्यैः पुनः पुनः पृष्टा अपि तूष्णीमेव भवन्ति। ततो लोकविरुद्धप्रवृत्तिमत्त्वादलौकिका इति ।। ३३९ ।।

**निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि ।**
**यदातिहर्षोत्पुलकाश्रुगद्गदः प्रोत्कण्ठ [१]उद्गायति रौति नृत्यति ॥**
**३४० ॥ ७ । ७ । ३६ । (३)**

अत्र त्रिविधा अवस्था हि भक्तेः। अपक्वा, पक्वकल्पा, पक्वा चेति। यत्र यदैतान्युक्तानि भक्तिकार्याणि हासादीनि बालस्येवानुद्रिक्तानि भवन्ति, सा

१. अत्रेदं तात्पर्यम्। "केचिद्भक्ताः प्रनृत्यन्ति गायन्ति च यथेप्सितम्। केचित्तूष्णीं भजन्त्येव केचिच्चोभयकारिण" इति ब्रह्मतर्के।

Rarest Archive

अपक्वभक्त्यवस्थेत्युच्यते। यदा चोन्मत्तस्येवैतान्युद्रिक्तानि भवन्ति, सा पक्वकल्पभक्त्यवस्थेति गीयते। यदा तु ग्रहग्रस्तस्येवात्युद्रिक्तानि भवन्ति, सा पक्वभक्त्यवस्थेति भण्यते। तत्रापक्वावस्थापन्नभक्तिकार्याणि न स्फुटं ज्ञातुं शक्यानि विना विशेषपरिचयमित्यनुक्त्वा, पक्वकल्पावस्थापन्नभक्तिकार्याण्येव प्रदर्शितानि श्लोकद्वयेन। अधुनैवं सन्ततमादरेण भागवधर्मानुष्ठानेन निरन्तरमेधमाना भक्तिर्यदा पक्वा भवति तदा अपरोक्षं भवति इति भावेन तत्कार्याणि तज्ज्ञापकानि च ईदृशानि इति श्लोकत्रयेण दर्शयति॥ **निशम्येत्यादिना**॥ अन्यैर्गीतानि कर्माणि अतुल्यानि। तादृशान् गुणान् लीलातनुभिः कृतानि वीर्याणि एकयैव अङ्गुल्या पर्वतधारणादीनि निशम्य। तच्छ्रवणेनैवातिहर्षो भवति। तत एवोत्पुलकाश्रुगद्गदः। पुलकः रोमाञ्च-स्तथा अश्रूणि नेत्रोदकानि गद्गदः सकम्पस्खलितभाषणं च तद्वान् भवति। तथा प्रोत्कण्ठः प्रकर्षेणोच्चध्वनिर्भूत्वा उच्चतयैव गायति, रौति, नृत्यति च॥ ३४०॥

**यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रन्दते ध्यायति वन्दते जनम्।**
**मुहुः श्वसन्वक्ति हरे जगत्पते नारायणेत्यात्मगतिर्गतत्रपः॥ ३४१॥**
**।७।७।३७।(४)**

कार्यान्तराण्याह॥ **यदेति**॥ ग्रहग्रस्तः पिशाचादिभिर्गृहीत इवाक्रन्दते वृथाशब्दं करोति। क्वचिद्धसति। ध्यायति चिन्तापरो भवति। मुहुः पुनः पुनः दृष्टं जनं वन्दते। आत्मगतिः परमात्मव्यापारानुसारिव्यापारवानह-मित्यनुसन्धानवान्। श्वसन् हरे जगत्पते नारायणेति विलज्जो भूत्वैव मुहुर्वक्ति॥ ३४१॥

Rarest Archiver

**तदा पुमान्मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः ।**
**निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् ॥३४२॥**
**। ७ । ७ । ३८ । (५)**

तद्भावे तद्यथास्वरूपे भावेन भक्त्या, अथवा भवतीति भावो विशेषस्तस्य हरेर्भावे सति भावो विशेषो मयीत्येवंप्रकारेणानुकृतेऽनुसंहिते मानसाकृती यस्य सः ॥ **इदमुपलक्षणं**— गच्छति तस्मिन्मयि गतिः, वदति तस्मिन्मयि वचनं, इच्छति तस्मिन्मयीच्छेत्येवमादिप्रकारेणानुसंहितवि(त्रि) विधव्यापारः अनेनात्मगतिरित्येतद्विवृतं भवति। संसारबीजस्य कर्मणोऽनुशयः शेषः। निर्दग्धो बीजानुशयो यस्य स ईदृशः पुमान्। तदैव महीयसा अत्युत्कृष्टेन। भक्तिप्रयोगेण भक्त्युत्कर्षेण अधोक्षजं बाह्येन्द्रियागोचरं श्रीहरिं बिम्बम्। समेति दिव्यदृष्ट्या पश्यति। तदैव मुक्तसमस्तबन्धनो भवति। जीवन्नपि मुक्तो भवति ॥ ३४२ ॥

**तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः ।**
**न विक्रियेताथ मुखे विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥ ३४३ ॥**
**। २ । ३ । २४ । (६)**

**॥ इति भक्तिकार्यप्रकरणम् ॥ २४ ॥**

यस्मिन् भक्तिर्विद्यते तज्जन्मैव सफलं स एव वन्द्यो नान्यो भक्तिविरहितः इत्यभिप्रेत्याह ॥ **तदश्मसारमिति** ॥ यद्धृदयं यन्मनः गृह्यमाणैः श्रूयमाणैः। हरेर्गुणकर्मादिप्रतिपादकैर्नामभिः न विक्रियेत द्रवीभावलक्षणं विकारं न प्राप्नुयात्। अथ विकारः द्रवीभावलक्षणभक्त्युद्रेकनिमित्तो हर्षो यस्य मुखे नास्ति। तथा नेत्रे जलं नास्ति। गात्ररुहेषु रोमसु विकारो

Rarest Archive

रोमाञ्चरूपो नाऽस्ति। **उपलक्षणमेतत्—** किमपि भक्तिज्ञापकं नास्ति तदिदं हृदयं अश्मसारं दृढतरपाषाणसदृशम्। बत खेदे। यस्य भक्तिरस्ति स एव वन्द्यो भवति। यस्य च भक्तिर्नास्ति तज्जन्म धिगिति भावः ॥ ३४३ ॥

**॥ इति श्रीमदवधूतशिरोमणिश्रीजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां भक्तिकार्यप्रकरणम् ॥ २४ ॥**

Rarest Archive

## अन्यथामत्यकरणप्रकरणम् ॥ २५ ॥

**न वेदवादाननुवर्तते मतिः स्व एव लोके रमतो महामुनेः ।**
**यथा गतिर्देवमनुष्ययोः पृथक्स्व एव धर्मे न परं क्षिपेत्स्थितः ॥**
**३४४ ॥ ४।४।१९॥ (१)**

श्रीमत्सत्यज्ञानतीर्थगुरुभ्यो नमः ॥ एवंविधां लोकविलक्षणां भगवद्भक्तानां प्रवृत्तिं दृष्ट्वा ये अन्यथामतिं कुर्वन्ति, ते श्रीहरिद्रोहेण अनर्थभाजो भवन्ति । ततो मुमुक्षुभिः तत्र अन्यथामतिः अवश्यं वर्जनीयेति प्रतिपादयत्यनेन प्रकरणेन । तत्रादौ वैलक्षण्यं सहेतुकमाह । **न वेदेति** ॥ महामुनेः मतिः तत्पूर्विका प्रवृत्तिः वेदवादान् न अनुवर्तते । तदनुसारिणी न भवति । कुतः । स्व एव लोके रमतः स्वे बिम्बभूते सर्वव्यापारकर्तृतया सर्वत्र स्मर्यमाणे विहरमाणस्येति । तत्तत्कालक्रियासमर्पणाय बिम्बमेव मनसा अनुस्मरत इति यावत् । यदि वेदवादानुसारिणी न भवति तर्हि सा प्रवृत्तिः निन्द्यैवेत्यत उक्तम् ॥ **वेदवादानिति** ॥ श्वशुरादयो नम्याः इत्येवञ्जातीयकाः आपाततः प्रतीतार्थमात्रविषयाः वेदवादाः तानेव नानुवर्तते । वेदांस्तु उपक्रमादिभिः निर्णीतार्थविषयान् अनुवर्तत एवेति न निन्द्येति । इतरेषां तादृशानु-सन्धानरहितानां प्रवृत्तिस्तु वेदवादान् अनुवर्तते । ततस्तस्य प्रवृत्तिः लोकता विलक्षणा विरुद्धा । तदेव दृष्टान्तमुखेन द्रढयति । **यथेति** ॥ देवमनुष्ययोः देवस्य मनुष्यस्य च गतिः प्रवृत्तिः परस्परं विरुद्धा तथैवेति । अस्त्वेवं लोकप्रवृत्तिविलक्षणा ज्ञानिनां प्रवृत्तिः किमस्माभिः कर्तव्यमित्यतः तादृशीं भक्तानां प्रवृत्तिं दृष्ट्वा तत्र अन्यथामतिः श्रेयोऽर्थिभिः भवद्भिः न कर्तव्यैवेत्याह ॥ **परमिति** ॥ परं विलक्षणप्रवृत्तिमन्तमपि । परं उत्तमज्ञानिनं न क्षिपेत् ।

Rarest Archive

इदमकर्तव्यमेवेति बुद्धिं न कुर्यात्। किञ्च स्वयमपि न तथा प्रवर्तेतेत्याशयेनाह ॥ **स्व एव धर्मे स्थित इति** ॥ **इदमुदितं भवति–** ज्ञानिनां इतरेषां च प्रवृत्त्योर्वैलक्षण्ये हेतुरिदमेव। यज्ज्ञानिनां प्रवर्तकशास्त्रतात्पर्य-विचारणं उपक्रमादिभिः। इतरेषां तु तदभाव इति। ततस्तेभ्यः इतरैः उपक्रमादिना प्रवर्तकशास्त्रपरीक्षाक्षमैः इदानीं अस्माकं तादृशशक्तिर्नास्तीति मत्वा स्वयोग्यैव प्रवृत्तिः कर्तव्या न तेषां प्रवृत्तिः कार्या, नापि तत्प्रवृत्तौ अधर्मत्वबुद्धिः। यथा देवानां प्रवृत्तिः मनुष्यैः न कर्तव्या नापि तेषां अधर्मतया ज्ञेया तथैव। एवमन्यथाबुद्ध्यकृताविव श्रेयोऽर्थिनां श्रेयःप्राप्तिः। अन्यथा न तत्प्राप्तिः अनर्थप्राप्तिश्च भवेदिति ॥ ३४४ ॥

**प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे।**
**प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव न देहमानिने ॥ ३४५ ॥**

**। ४। ३। २२। (२)**

ननु उपक्रमादिना प्रवर्तकशास्त्रविचारणाक्षमाणां अज्ञानां प्रवृत्तिः तत् क्षमाणां ज्ञानिनां प्रवृत्तिः विलक्षणेति तत्राज्ञानां अन्यथामतिकरणे अनर्थप्राप्त्या तद्वर्जनमावश्यकं श्रेयोऽर्थिनामित्युक्तं तद्युक्तमेव। तत्र श्वशुरादयो नम्या इत्यापातप्रतीतार्थविषयकतया त्रेदवादत्वं यदभिहितं तदप्यस्तु। तस्योपक्रमादिना निर्णीतार्थस्तु क इत्यतः प्राज्ञसंमतोऽर्थः अयमेवेत्याशयेनाह ॥ **प्रत्युद्गमेति** ॥ हे सुमध्यमे इति सतीं प्रति शङ्करवाक्यम्। प्राज्ञैः मिथः परस्परं स्वगृहान् प्रति परेषां आगमने सति। प्रत्त्युद्गमः आभिमुख्येन गमनं, प्रश्रयणं प्रह्वीभावः, अभिवादनं प्रणामः, एतदादिकं गुहाशयाय हृदयान्तर्वर्तिजीवान्तर्यामिणे, परस्मै पुरुषायैव, तदस्त्विति चेतसा अनुसन्धानेन क्रियते। न तु देहे यस्य अभिमानोऽस्ति जीवस्य तस्मै तदस्त्विति चेतसेति ॥ **इदमुदितं भवति—** श्वशुरादयो नम्या

Rarest Archive

इति वेदस्य उपक्रमादितात्पर्यलिङ्गैः निर्णीतोऽर्थः तच्छब्दवाच्यः तद्बिम्बरूपो हरिरेव नम्यः नमनोद्देश इति हि प्राज्ञसंमतम्। अत एव बिम्बानुसन्धानवता शिवेन दक्षबुद्धिपरीक्षणाय प्रत्युद्गमनादौ अकृते प्राज्ञमतं अजानता देहाभिमानिन एव वन्दनादिकमिति जानता दक्षप्रजापतिना तस्मै कुपितम् श्वशुरस्य मे जामात्रा अनेन वन्दनं न कृतमिति। तेन च अनर्थः प्राप्तः। ततः श्रेयोऽर्थिभिः ज्ञानिनां प्रवृत्तौ अन्यथामतिः न कर्तव्येति ॥ ३४५ ॥

**श्रिया विभूत्याभिजनेन विद्यया त्यागेन रूपेण बलेन कर्मणा।**
**जातस्मयेनान्धधियः सहेश्वरान्सतोऽवमन्यन्त हरिप्रियान्खलाः ॥**
**३४६ ॥ ११।५।९। (३)**

**॥ इति अन्यथामत्यकरणप्रकरणम् ॥ २५ ॥**

ज्ञानिनां प्रवृत्तौ अन्यथामतिकरणे श्रीहरिकोपेन अनर्थप्राप्तिरेव अतो न कर्तव्येत्युपसंहरति ॥ **श्रियेति** ॥ शरीरकान्त्या। विभूत्या ऐश्वर्येण। तदादिभिः जातेन अहङ्कारेण। अन्धधियः तिरोहितशास्त्रीयानुसन्धानाः। अत एव खलाः हरिप्रियान् सतः। अवमन्यन्ते। हरिभक्तानां अवज्ञानं हरेरेव अवज्ञानं, यतः ते खलकृतं अवज्ञानमपि स्वबिम्बाय हरये समर्पयन्ति परमभागवतत्वादित्याशयेनाह ॥ **सहेश्वरानिति** ॥ अतः हरिकोपेन अनर्थप्राप्तेः भक्तानां लोकविलक्षणायामपि प्रवृत्तौ अन्यथामतिः श्रेयोऽर्थिभिः न कर्तव्येति भावः ॥ ३४६ ॥

**॥ इति श्रीमदवधूतशिरोमणिश्रीजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां अन्यथामत्यकरणप्रकरणम् ॥ २५ ॥**

Rarest Archiver

## गुरुविचारप्रकरणम् ॥ २६ ॥

नैवोपयान्त्यपचितिं कवयस्तवेश
ब्रह्मादयोऽपि [१]कृतमृद्धमुदः स्मरन्तः ।
योऽन्तर्बहिस्तनुभृतामशुभं विधुन्व-
न्नाचार्यचैत्यवपुषा स्वगतिं व्यनंक्षि॥ ३४७ ॥ ११।२९।६। (१)

॥ इति गुरुविचारप्रकरणम् ॥ २६ ॥

श्रीवादिराजगुरुभ्यो नमः ॥ एवमनवरतमादरेण बिम्बोपासना-वर्धितपक्वभक्तियोगेन बिम्बापरोक्षं भवतीति प्रतिपादितम् । तच्च भ(ग) वत् गुरुप्रसादमन्तरेण न भवतीति वक्तुमिदं प्रकरणम् । ननु सामान्यतो ब्रह्मोपदेशकर्ता गुरुरेकोऽभिहितः तस्मिन्भक्तिस्ततः प्रसादश्च सम्पादित एव । तथा विशेषतोऽप्युपदेशको गुरुरपि बिम्बोपदेष्टाप्यभिहितः । तस्मिन् भक्तिं कृत्वा ततो बिम्बोपदेशं समासाद्य उपासनाबलेन भक्तिं च विशिष्टां प्राप्य स्थितवतोऽस्त्येव तस्य गुरोः प्रसाद इति किमत्र सम्पाद्यतयोच्यते । न चाभ्यां गुरुरन्योऽस्ति पुंसः । येन तदर्थमयमारम्भः स्यादिति चेदुच्यते । अस्त्येवाभ्या-मन्यो गुरुः । इमौ त्वसाधारणौ अन्यस्तु साधारणः विना च तत्प्रसादं न बिम्बापरोक्षं स गुरुरत्र विचार्यत इति युक्तोऽयमारम्भ इति । **ननु विदितमेतत्** । पूर्वोक्तौ गुरू तु असाधारणौ । साधारणौ च द्वावन्यौ विद्येते । यतो विरिञ्चोपदेशेनैव सर्वेषां मुक्तिरिति घण्टाघोषः । स च सर्वान्प्रत्यविशिष्टतया साधारणः स एकः द्वितीयस्तु भगवानेव जगतः गुरुरिति गीतः । **तथा चोक्तं**

---

१. नतमूर्ध सदेति विजयध्वजीयपाठः ।

Rarest Archiver

**अध्यात्मप्रकरणादौ**। तथापि इदं दुर्घटमेव। तथाहि औपनिषत्की कथा। देवान्तर्यामिणा हरिणा दैत्यविजये कृते वयमेव जितवन्तः इति तेषां मदे तत्परिहाराय ब्रह्मादिभिः सह यक्षरूपो भूत्वा आगतः। तद्वेदनाय अग्निं वायुं च प्रेषितवान् इन्द्रः। तावुभौ तत्र अशक्तौ दृष्ट्वा स्वयं इन्द्र एव तत्र आजगाम। तद्विदित्वा यक्षः उमैव अस्मै ब्रह्मोपदेशयोग्येति तामेव संस्थाप्य ब्रह्मशिवाभ्यां सहैव अन्तर्दधे इति। यदा च इन्द्रस्य शिवात् ब्रह्मणः हरेर्वा साक्षात् उपदेशानर्हता तदा किं वक्तव्यं सर्वेषां तत्र अनर्हता इति। न च अयं उपदेशः साधारणप्रमेयविषयः। येन इन्द्रादेरपि कदाचित् विरिञ्चमुखात् उपदेश इव नारदादेरिव युज्यते। किन्तु साक्षान्मोचकातिगोप्यबिम्बविषयः। न च ईदृशः उपदेशो जन्तुमात्रस्य विरिञ्चात् हरेर्वा युज्यते। ततः इदं दुर्घटमेव भाति। किञ्च उभावपि एकदा एव उपदिशतः किंवा क्रमेण। क्रमेऽपि विरिञ्चादिः भगवदादिर्वा। कथमेतत् इत्यत आह। **नैवेति**॥ हे ईश, भवान् आचार्यचैत्यवपुषा चित्तस्थः चित्ताभिमानी आचार्यः ब्रह्मा च आचार्यचैत्यः तदन्तयामिणा चैत्येन सर्वजीवचित्तस्थेन वासुदेवाख्येन वपुषा रूपेण। तनुभृतां देहधारिमात्रस्य अधिकारिणः। अन्तः बहिः। अशुपभं मानसादिभेदेन त्रिविधमपि पापं ज्ञानप्रतिबन्धकं विधुन्वन् सन्। नाशयित्वेति यावत्। स्वस्य बिम्बस्य, गतिं ज्ञानम्। व्यनंक्षि व्यक्तीकरोषि। तस्य तव। ब्रह्मादयोऽपि कवयः। अपचितिं प्रत्युपकारभूतां पूजां कर्तुं सामर्थ्यम्। नैव उपयान्ति यद्यपि। तथापि इदं एकं एव भक्तैः भगवतः कर्तव्यं इति भावेनोक्तम्॥ **कृतमिति**॥ भगवता कृतं उपकारम्। ऋद्धा अभिवृद्धा मुत् सन्तोषो एषां ते तादृशाः सन्तः। स्मरन्तो भवतेति। अनिमित्तबन्धुत्वस्मरणादिकमेव भक्तकार्यं इति॥ **इदमुदितं भवति**॥ अस्त्येव अधिकारिमात्रस्यापि हरिविरिञ्चाभ्यां उपदेशो बिम्बस्यैव। न चैतत् उक्तरीत्या दुर्घटम्। साक्षात् बहिष्ठरूपेण तदनङ्गीकारात्। तस्यैव

Rarest Archiver

दुर्घटतया अभिप्रेतत्वात्। अन्तर्गतरूपेण परोक्षेण उपदेशस्य स्वीकारात्। ब्रह्मोपदेशेनैव सर्वेषां मुक्तिः इत्यस्य असामञ्जस्यप्रसङ्गात्। चतुर्मुखान्तर्यामी यो वासुदेवः महत्तत्त्वगतः स एव महत्तत्वात्मकचित्ताभिमानिचतुर्मुखान्तर्गतः सर्वजीवचित्तनियामकतया चित्तनामा स एव अनुग्रहविशेषपूर्वकं चित्तं नियम्य बिम्बं प्रदर्शयतीति स एव सर्वेषां साधारणो गुरुः। विरिञ्चस्तु तदधिष्ठानतया इति द्वावपि साधारणौ गुरू। पूर्वोक्तौ तु असाधारणौ इति न किञ्चित् दुर्घटं इति। **अथवा** ''हरौ गुरौ मयि भक्त्यानुवृत्त्या'' ''भक्त्यैकयेशं गुरुदेवतात्मा''॥ ''तत्र भागवतान् धर्मान् शिक्षेत् गुर्वात्मदैवतः'' इत्यादौ गुरुदेवतयोः ऐक्यं उच्यते। तत्कथं इत्यतः एवं इत्याशयेन आह॥ **नैवेति**॥ सर्वचित्तनियामकतया गुरुभूतस्य वासुदेवस्य हरेश्च परदैवस्य च ऐक्यविवक्षया तादृशोक्तिः इति भावः। अनेनैव अध्यात्मप्रकरणादौ उक्तं हरेः गुरुत्वं विवृतं भवति॥ ३४७॥

**॥ इति श्रीमदवधूतशिरोमणिश्रीमज्जयतीर्थ(विष्णुतीर्थ)निर्मितसारोद्धारटीकायां गुरुविचारप्रकरणम्॥ २६॥**

Rarest Archiver

## अपरोक्षप्रकरणम् ॥ २७ ॥

**यस्य स्वरूपं कवयो विपश्चितो गुणेषु योनिष्विव जातवेदसम् ।**
**मथ्नन्ति मथ्ना मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरितात्मने ॥३४८॥**
**। ५ । १८ । ३६ । (१)**

श्रीः ॥ एवंविधगुरुप्रसादात् बिम्बापारोक्षं भवतीति भावेन आह ॥ **यस्येति** ॥ अध्यात्मपरिनिष्ठिताः ज्ञानिनः । योनिषु गुणकार्येषु शरीरेषु । यस्य हरेः स्वरूपं मनसा मथ्ना विचारसाधनेन । मथ्नन्ति विचारयन्ति । कथम् । कवयः अग्न्याधानादिकुशलाः । योनिषु अग्न्युत्पादनशक्तिमत्सु काष्ठेषु । मथ्ना मथनसाधनेन । जातवेदसं वह्निमिव । किमर्थं कवयोऽपि विपश्चितश्चेत्युभयेऽपि मथ्नन्ति इत्यतः आह । गूढं तत एव अनर्चितं प्राक् । इदानीं यज्ञादिक्रियायां ये अग्निपूजार्थं विहिताः घृतलाजादयः अर्थाः तैः तथा सर्वाभिः क्रियाभिः सर्वैः पदार्थैः समर्पणेन पूजितं दिदृक्षवः इति । ननु अग्नेः प्राकृतस्थूलविग्रहतया दिदृक्षूणां दर्शनं भवेत् । भगवतस्तु अप्राकृताव्यक्तमूर्तिकस्य कथं दर्शनं अत्राह ॥ **मनसेति** ॥ मनसा दिदृक्षूणां मनसा एव दर्शनं इति । ननु दिदृक्षुत्वे प्रागारभ्य विद्यमानेऽपि इदानीं एव किमर्थं प्रयतन्ते । यदा च प्रयतन्ते ततः प्रागेव प्रयतितुं शक्यत्वात् इत्यतः सत्यम् । स्वस्य स्वातन्त्र्ये सति । तदेव नास्ति । दिदृक्षा दर्शनसाधनप्रयत्नः । दर्शनादिविशेषणविशेषितस्य मनसः तत्प्रेरणयैव प्रवर्त्यत्वात् इत्याशयेन ईरितः आत्मा मनो येन तस्मै हरये नमः अस्तु इत्युक्तम् । तेन च मथनेन बिम्बं पश्यन्तीति भावः ॥ ३४८ ॥

Rarest Archive

**द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तु निरीक्षितात्मने ।**
**तथैव तत्रातिशयात्मबुद्धिभिर्निरस्तमायाकृतये नमो नमः ॥ ३४९ ॥**
**। ५ । १८ । ३७ । (२)**

**॥ इति अपरोक्षप्रकरणम् ॥ २७ ॥**

बहूनां बिम्बापरोक्षदर्शनेन तत्र संशयेन विलम्बकरणं तत्साधनेषु न कर्तव्यं इति भावेन आह ॥ **द्रव्येति ॥** ब्रह्मादिभिः यथा वस्तु विद्यते तथैव निरीक्षितः दृष्टः आत्मा स्वरूपं यस्य तस्मै नमो नमः । अग्निदृष्टान्तग्रहणमात्रेण न प्राकृतविग्रहत्वं मन्तव्यम् । गूढत्वमथनाभिव्यक्तत्वमात्रेण तस्य गृहीतत्वात् । किन्तु अप्राकृतदिव्यविग्रहः निरस्तसमस्तदोषः मनोमात्रेण दर्शनीयः इति भावेन आह । नित्यमेव निरस्ता प्राकृती आकृतिः यस्मात् तस्मा इति । प्राप्तबिम्बा-परोक्षाः अपि न दूरं सन्ति । किन्तु भवतां देहेषु एव सन्ति । ततो न भेतव्यं भवति न वेति चिन्तया दुरन्तया इति भावेन उक्तम् ॥ **द्रव्येति ॥** अयनं स्थानं । किम् अस्मद्देहे अवस्थानेन प्रयोजनं तेषां इत्यतो भवद्भिः क्रियमाण-व्यापारमात्रस्य तत्कर्तृकतया तज्जन्यपुरुषार्थ एव प्रयोजनं इति अभिप्रेत्य आह ॥ **कर्तृभिरिति ॥** तदपि कुतः इत्यतः द्रव्यादिस्वामित्वात् इति भावेन उक्तम् ॥ **द्रव्यक्रियाहेत्व-यनेशाश्च ते कर्तारश्चेति** ॥ तत्र द्रव्येशः शङ्करः । क्रियेशः गरुडः । हेत्वीशः ब्रह्मा । अयनेशः वायुः । इति विवेकः । किम् एतेऽपि हरिवदेव अप्राकृतविग्रहाः इत्यतः भगवद्व्यतिरिक्तस्य सर्वस्यापि प्राकृतः एव विग्रहः इति अभिप्रेत्य आह ॥ **मायागुणैरिति ॥** तैः लभ्यमानं फलमपि न भवत्साम्येन किन्तु ततोऽपि अनेकगुणाधिकतयैव । साधनानुसारित्वात् साध्यस्य । साधनानां च तेषु सर्वतो अधिकत्वात् इत्यभिप्रेत्य उक्तम् ॥ **तत्रेति ॥** तत्र भगवद्विषये अतिशयितात्मबुद्ध्यादिभिः इति । अथवा बीजावापादिचातुर्याधिक्येन

Rarest Archive

फलाधिक्यं कर्षकादौ दृष्टचरं इति किमाश्चर्यं अत्र इत्याशयेन आह ॥ **तत्रेति** ॥ तत्र साधनकरणे अतिशयितात्मबुद्धिभिः इति एवं बहूनां ज्ञानिनां बिम्बापरोक्षदर्शनेन निःशङ्कं तत्साधने प्रवर्तितव्यं तदिच्छुभिः इति भावः ॥ ३४९ ॥

**॥ इति श्रीमदवधूतशिरोमणिश्रीमज्जयतीर्थ (विष्णुतीर्थ) निर्मितश्रीमद्भागवतसारोद्धारटीकायां अपरोक्षप्रकरणम् ॥ २७ ॥**

Rarest Archiver

## गुणनिवृत्तिप्रकरणम् ॥ २८ ॥

**अविद्यमानोऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथो यथा।**
**तत्कर्म सङ्कल्पविकल्पकं मनो बुधो निदध्यादभयं ततः स्यात् ॥**
**३५० ॥ ११ । २ । ३८ । (१)**

॥ इति गुणनिवृत्तिप्रकरणम् ॥ २८ ॥

श्रीः ॥ एवं उत्पन्नापरोक्षेण सुचिरं समेधितभक्तिविशेषस्य अधिकारिणः गुणनिवृत्तिरूपः मोक्षः भवति। स च केन प्रकारेण इति विचारयितुं इदं प्रकरणम्। ननु जीवः यद्यपि निर्दोषज्ञानानन्दरूपः तादृशस्य अपि यत् अज्ञानमिथ्याज्ञानादिकं तत् बाह्यमेव। सत्वाद्यात्मिकां प्रकृतिं कर्मादिकं च निमित्तीकृत्य स्वरूपं आच्छाद्य मनसैव सर्वं प्रदर्शयति भगवतः इच्छैव मायाविद्याप्रकृत्यादिपदवाच्या। ततः सर्वं संसारसाधनं मनसि एव आयतते। **तथाहि—** भगवत्तत्वाज्ञानेन सर्वासु क्रियासु भगवतः कर्तृत्वं अननुसन्धाय 'अहं कर्तेति' कर्तृत्वाभिमानः तथा स्वामित्वं च अननुसन्दधानः, 'मम इदं' इति शरीरेन्द्रियविषयेषु स्वामित्वाभिमानः। इमौ च गुणानां सन्निपाते सति भवतः। गुणाश्च चित्त एव अभिव्यज्यन्ते। आभ्यां एव प्रवृत्तधर्मार्थकामविषय-प्रवृत्तिलक्षणः व्यवहारः कायिकवाचिकमानसिकरूपः भवति। यदा तु त्रिषु एको वर्धते तदा इतरौ प्रतिबध्य स्वकार्यमेव करोति। तत्र यदा सत्वगुणः अभिवृद्धो भवति, तदा स्वेतरगुणद्वयं प्रतिबध्य निवृत्तधर्मादौ इच्छां जनयित्वा, चित्तप्रसन्नतां विषयेषु असङ्गं च दत्वा, ज्ञानेन सुखेन युक्तं करोति। यदा तु रजोगुणः वर्धते, तदा स्वेतरौ गुणौ निरुध्य, ऐश्वर्ये यशसि च इच्छां जनयित्वा, मनसि सङ्कल्पविकल्पात्मकं विकारं जनयित्वा, किञ्चित् चिन्तादिना

Rarest Archiver

अस्वास्थ्ययुक्तं करोति। यदा च तमोगुणः विजयते, तदा इतरौ विनिगृह्य, मनसः ग्लानिं आपाद्य, कर्तव्यमौढ्यं सम्पादयित्वा, चिन्तादिना युक्तं करोति। तदेवं कर्तृत्वाद्यभिमानपूर्वकं रागद्वेषाभ्यां यत् यत् करोति, तत् तत् कर्म बन्धकमेव भवतीति पुनःपुनः नानायोनिषु बम्भ्रमीति, यावत् हरिचरणसमाश्रयणम्। ततः बन्धकं सर्वमपि मनोद्वारैव इति स्थितम्। तच्च मनः विषयानेव सदा अभिध्यायति तेन च विषयाः अपि सदा मनसि एव वर्तन्ते संस्कारद्वारा, तस्मिंश्च उद्बोधकेन उद्बुद्धे सति तद्ध्यानेन इच्छादौ सति अनर्थपरम्परायाः अनिवृत्तिरेव इति तयोः वियोजनं आवश्यकं संसारसागरं तर्तुं इच्छतः मुमुक्षोः। तदेव दुर्घटमिव आभाति। परस्परानुरागानुरक्तयोः कामिनीकामुकयोरिव। **यथाहुः**— ''गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो॥ कथमन्योन्यसंत्यागो मुमुक्षोः सन्तितीर्षतः'' इति (११।१३।१७)॥ एवं प्राप्ते ब्रवीति॥ **अविद्यमान इति**॥ द्वयं द्वितीयः[१] भिन्नः देहादिः। वस्तुतः अविद्यमान एव। तादृशः अपि यश्च देहादिः अवभाति, सोऽपि धिया ईश्वरेच्छयैव प्राप्तः। तत्स्वामिकतया तदीयत्वात् जीवस्य अविद्यमानोऽपि स्वीयतया अवभाति। भगवदिच्छया सृष्टस्य भगवत्स्वामिकस्य देहादेः स्वीयतया भानं जीवस्य कुत इत्यतः भ्रान्तिरेव इयं इति भावेन उक्तम्॥ **ध्यातुः अन्यथेति**॥ अविद्यमानं अपि संसारं प्रापयत् महादुःखदं किं विद्यते इत्यतः इदमेव इत्याशयेन उक्तम्॥ **धिया मनसैवेति**॥ अस्वीये स्वीयत्वबुद्ध्या (अनेन) दुःखादिकं क्व दृष्टं इत्यत उक्तम्॥ **स्वप्नेति**॥ यथा हि स्वाप्नतुरगादिः अस्वीयः अपि जाग्रत्कालीनतुरगादिः इव अभिमतः सन्

---

१. ''आत्मनो देहगेहादि द्वयशब्देन भण्यते। अविद्यमानं जीवस्य प्रतिभाति तदीयवत्॥ जाग्रद्वत्तु यथा स्वप्नः प्रतिभाति मनोरथः। विद्यमानवदेवैतद्देहादीशवशे स्थितम्। विभाति स्ववशत्वेन सैषा संसृतिरुच्यते। तस्मात्तद्विषयं त्यक्त्वा मनो विष्णौ निवेशये''दिति हरिवंशेषु॥ इति तात्पर्यम्।

Rarest Archiver

दुःखादिप्रदो दृष्टः तथेति । इदं तु न आश्चर्यं (यत्) यदि ईश्वरनिर्मिते स्वाप्ने अर्थे जाग्रत्कालीनताभ्रान्त्या स्वीयत्वाभिमानेन दुःखादिः अस्येति । यतः बुद्धिपूर्वं स्वेनैव कल्पिते स्वीयतया अनुसन्धीयमाने मनोरथे पदार्थसार्थे केवलं अभिमानेन दुःखं दृष्टम् इत्याशयेन दृष्टान्तान्तरं आह ॥ **मनोरथो यथेति** ॥ एतत् सर्वं केन जीवः अनुभवति इत्यतः उक्तम्— **येन मनसा इति** ॥ कथं इदं मनः संसारस्य कारणं इत्यतः सङ्कल्पविकल्पकं इति मनोविशेषितवान् । इदं कर्म करिष्ये इत्यादिसङ्कल्पविकल्पादिद्वारा संसारव्यवहारनिर्वाहकं इति । एतच्च मनसः संसारनिदानत्वं प्रमाणप्रसिद्धं इति हिशब्देन आह । येन मनसा संसारः तदेव मनः । तथा तस्य मनसः कर्म विषयं च । बुधः श्रीहरेरेव कर्तृत्वादिकं इति जानन् । तत्रैव निदध्यात् । किं तत्र मनआदिनिवेशनेनेत्यत आह ॥ **तत इति** ॥ ततः तस्मादेव तत्र निवेशितात् एव ततः संसारकारणादेव मनसः सकाशात् । अभयं संसारभयात् निवृत्तिरपि स्यात् इति योजना ॥ **इदमुदितं भवति—** सत्यमेव सर्वोऽपि संसारसम्भारः मनसि एव आयतते इति तथा तन्मनः विषयेष्वेव विषयाश्च मनसि एव वर्तन्ते इति । तथापि गुणबन्धनिवृत्तिरूपः मोक्षः युज्यते एव मुमुक्षोः । परस्परानुषक्तस्यापि मनः तद्विषयश्च इत्युभयस्यापि भगवति समर्पणेन वियोजनस्य अतिसुघटत्वात् इति ॥ **यथाहुः—** ''गुणेषु वा विशेच्चित्तमभीक्ष्णं गुणसेवया ॥ गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत्'' '(११।१३।२६।) ॥ इति, प्रतिपादितं एतत् निपुणतरं अस्मत्कृतायां अध्यात्मामृतरसरङ्गिन्यां इति नात्र तत् विशदीक्रियते ॥ **इदमत्र ज्ञेयं—** एवं अनुसन्धानेन शीघ्रमेव गुणनिवृत्तिः भवतीति । यथा अनुसन्धाता निर्गुणः इति गीयते तथा तदीयसाधनजातमपि निर्गुणं इति भण्यते इति । अत एव अत्र **श्रीमति भागवते—** ''सात्विकः कारकोऽसङ्गी रागान्धो राजसःस्मृतः ॥ तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः'' (११।२५।२६) इति कर्ता चतुर्विधः

Rarest Archiver

अभिहितः। तथा "वनं तु सात्त्विको वासो ग्रामो राजस उच्यते। तामसं द्यूतसदनं मन्निकेतं तु निर्गुणं" (११।२५।२५) ॥ इति साधनं चतुर्विधतया उक्तम्। इदं तु अवस्थाभेदेन अधिकारिणां भेदं अङ्गीकृत्यैव। वस्तुतस्तु त्रिविधः एव अधिकारी साधनमपि त्रिविधमेवेति। एतदपि तथाविधस्य अधिकारिषु वैशिष्ट्यज्ञापनाय तदपि तत्र अन्येषां आदरजननायेति ॥ ३५० ॥

**॥ इति श्रीमदवधूतशिरोमणिश्रीजयतीर्थ(विष्णुतीर्थ)निर्मित श्रीमद्भागवतसारोद्धारटीकायां गुणनिवृत्तिप्रकरणम् ॥ २८ ॥**

Rarest Archives

## नामप्रशंसाप्रकरणम् ॥ २९ ॥

**तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यदात्मनः ।**
**दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक् चिकित्सेत रुजां निदानवित् ॥**
**३५१ ॥ ६ । १ । ८ । (१)**

श्रीरामाय नमः ॥ एवं त्रिंशद्विधभागवतधर्मानुष्ठानेन सञ्जातपरमभक्तेः भागवतस्य गुरुप्रसादेन बिम्बापरोक्षे सति पुनरभिवृद्धया भक्त्या गुणनिवृत्तिलक्षणो मोक्षो भवतीति प्रतिपादितं। अधुना ये तत्र उपासनादौ अशक्ताः तेषामयमेक एव भागवतो धर्मः परायणं। क्रमेण तत्र शक्तिं प्रदाय पुरुषार्थमपि प्रदद्यादिति वक्तुं इदं प्रकरणम्। तत्र आदौ आदरजननाय नामकीर्तनरूपभागवतधर्मानुष्ठानस्य नारकदुःखनिवर्तकत्वरूपं महिमानमाह ॥ **तस्मादिति** ॥ यस्मात् इहैव प्रायश्चित्ताकृतौ निश्चयेन अनर्थप्राप्तिः तस्मात् इह एव पापप्रायश्चित्तनिमित्तं प्रयतेत। तत्रापि मृत्योः सकाशात् यदा आत्मनः अविपत् रोगादिविपदामभावः तदा पुरा तस्मिन् पूर्वकाले एव। तत्रापि कालविलम्बो न कर्तव्य इत्याह ॥ **आश्वेवेति**[1] ॥ आयुषोऽल्पत्वादेवेति भावः। **यथाहुः**— "प्रायेणाल्पायुषो मर्त्याः कलावस्मिन् युगे जनाः। मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः" (१।१।९।) इति ॥ कथङ्कारं प्रायश्चित्तं कुर्यादित्यत उक्तम्॥ **यथा भिषगिति** ॥ रुजां रोगाणां निदानं मूलकारणं वेत्तीति तादृशो भिषक् चिकित्सको रुजां गौरवं लाघवं च दृष्ट्वा यथा तदनुसारेण

---

१. अतीव चिरकालेन प्रायश्चित्ताचरणे तु द्विगुणत्वापत्तेः। तथाच स्मृतिः— "अतीव चिरकाले तु द्विगुणं व्रतमर्हति" इति।

Rarest Archiver

चिकित्सेत् तथा दोषस्य गुरुलाघवं दृष्ट्वा इति। पापेऽल्पे सति प्रायश्चित्तमल्पं, महति सति महदिति भावः ॥ ३५१ ॥

**न चेदिहैवापचितिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः[1] ।**
**ध्रुवं स वै प्रेत्य [2]निरयानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ॥**
**३५२ ॥ ६ । १ । ७ । (२)**

इहैव प्रायश्चित्ताकृतौ नियमेनानर्थप्राप्त्या तदवश्यमिहैव कर्तव्यमित्युक्तम्। स कोऽनर्थो यद्भयात्तन्निवृत्तये इहैव प्रायश्चित्तं आश्वेवानुष्ठेयमित्यतोऽयमेवेत्याशयेनाह ॥ **न चेदिति** ॥ मनउक्तिपाणिभिः मनोवाक्कायैः। कृतस्य अंहसः, अपचितिं प्रतीकारं, यथा यथायोग्यं पापतारतम्यानुसरेण इहैव न कुर्यात् चेत् तर्हि, स प्रायश्चित्तस्य अकर्ता पुरुषः, प्रेत्य मृत्वा, मे मया, भवतः तुभ्यं, तीक्ष्णवेदना ये नरकाः कीर्तिताः केवलं कुटुम्बपोषणरतस्य, अभ्यागतान् वक्रदृष्ट्या निरीक्ष्य केवलं वित्तपोषणरतस्य, सूचीमुखः परवित्तापहारकस्य यातनाविशेषः ॥ १ ॥ वै०। सम्पादितं द्रव्यमसंविभज्य भुञ्जतः [3]क्रिमिभोजनो नाम ॥ १ ॥ म०। आत्मप्रशंसां महन्निन्दां च कुर्वतः क्षारकर्दमाख्यः अजितेन्द्रियस्य अगम्यागमनं कर्तुः तप्तलोहमयस्त्र्यालिङ्गनरूपः ॥ १ ॥ इ०। वेदोदितं मार्गं परित्यज्य पाखण्डमार्गमाश्रितस्य असिपत्रवनाख्यः ॥ १ ॥ ब्रं०। केवलमुदरम्भरणाय दम्भेन पशुवधपूर्वकं यज्ञस्य कर्तेति अभिमन्ता तस्य वैशसो नाम ॥ १ ॥ म०। निर्निमित्तं प्राणिनामुद्वेजकस्य दन्दशूकाख्यः ॥ १ ॥ पू०।

---

१. ''पाणिर्हस्त इति ख्यातः क्वचिद्देहोऽपि भण्यते (कदाचिद्देह उच्यते)'' इत्यभिधानम्।

२. नरकानिति **विजयध्वजीयपाठः**।

३. ''क्रिमिर्ना कृमिवत्कीटे लाक्षायां कृमिले खरे'' इति मेदिनी। ''द्रुमामये भवेत्पुंसि कीटे च कृमिवत्क्रिमिः'' **इति रभसोऽपि**।

Rarest Archiver

सद्धर्ममार्गविनाशकस्य वैतरणी ।। १ ।। बिं० । कस्तत्त्व (?) मित्येवमादिरूपेण कथिताः तान् नरकान् ध्रुवं निश्चयेन प्राप्नोति । इहैव प्रायश्चित्ताकृतौ ईदृशोऽनर्थो भवतीति भावः ।। **यथाहुः**— ''यस्त्विह वा अतिथीनभ्यागतान्वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिवापचक्षुषा निरीक्षेत्तस्य चापि निरये पापदृष्टेरक्षिणी वक्रतुण्डा गृध्रकङ्ककाकबकादयः प्रसह्योरुबलादुत्पाटयन्ति (५।२४।३७।) ।। यस्त्विह वा अर्थाभिमतिरहङ्कृतिस्तिर्यक्प्रेक्षणः सर्वतः शङ्की व्ययनाशचिन्तया परिशुष्यमाणहृदयवदनो निर्वृतिमनुपगतो ग्रह इवार्थमभिरक्षति स च प्रेत्य तत्सम्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे नरके निपतति, यत्र वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोऽङ्गेषु सूत्रैः परिवयन्ति (५।२४।३८।) ।। १ ।। यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वा हरन् यस्य वानापदि पुरुषं तममुत्र राजन् यमपुरुषा अयस्मयैरग्निवर्णैः सन्दंशैस्त्वचि निष्कालयन्ति (५।२४।२१)।। यस्त्विह वा असंविभज्यान्नमश्नाति यत्किञ्चनोपनतमनिर्वृतयज्ञोपायमसंस्कृतं परत्र क्रिमिभोजने नरकाधमे निपतति । तत्र शतसहस्रयोजने क्रिमिकुण्डे क्रिमिभूतः स्वयं क्रिमिभिरेव भक्ष्यमाणः क्रिमिभोजनो यावदप्रत्ताकृतनिर्वेशमात्मानं पातयति । यस्त्विह वा आत्मसम्भावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहुमन्येत स मृतक एव मृत्वा क्षारकर्दमे निरयेऽवाक्शिरा निपातितो दुरन्ता यातना ह्यश्नुते (५।२।३२।)।। यस्त्विह वा अगम्यां स्त्रियं पुरुषं वा योषिदपि गच्छति तावमुत्र कशया ताडयन्तस्तप्तया सूर्म्या लोहमय्या पुरुषमालिङ्गयन्ति, स्त्रियं च पुरुषरूपया सूर्म्या (५।२४।२२।) ।। यस्त्विह वै निजवेदपथादनापद्यपगतः कुपथं पाखण्डं चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरन्ति । तत्र ह आसादितस्ततो धावमान उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्वाङ्गो हा हतोऽस्मीति परमया वेदनया मूर्च्छितः पदे पदे निपतति स्वधर्महा पाषण्डानुगतः

Rarest Archiver

फलं भुङ्क्ते (५।२४।१७।) ॥ ये त्विह वै दाम्भिका दम्भयज्ञेषु पशून् विशसन्ति तानमुष्मिन् लोके वैशसे नरके पातितान्निरयपतयः पातयित्वा विशसन्ति (५।२४।२७।) ॥ ये त्विह वै भूतान्युद्वेजयन्ति नरा अत्युल्बणस्वभावा यथा दन्दशूकास्तेऽपि प्रेत्य नरके दन्दशूकाख्ये निपतन्ति। यत्र नृप दन्दशूकाः पञ्चमुखाः सप्तमुखा उपसृत्य (प्य) ग्रसन्ति यथा बिलेशयाः (५।२४।३५।) ॥ ये त्विह राजन्या राजपुरुषा वा पाखण्डाः धर्मसेतून् भिदन्ति ते सम्परेत्य वैतरिण्यां निपतन्ति भिन्नमर्यादास्तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानास्ते स्वासुभिरुह्यमाना-श्चौघेन कर्मपाकमनुस्मरन्तो विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावा-हिन्यामुपतप्यन्ति'' (५।२४।२४।) इति ॥ ३५२ ॥

**एतावतालमघनिर्हरणाय पुंसां सङ्कीर्तनं भगवतो गुणकर्मनाम्नाम्।**
**विक्रुश्य पुत्रमघवान्यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्तिम्**
**॥ ३५३ ॥ ६ । ३ । २४ । (३)**

एवंविधस्यापि नरकदुःखस्य श्रीहरिनामकीर्तनमेव परिहारकमिति तदेव महत्प्रायश्चित्तं त्रिविधानामपि पापनामिति सन्ततमादरेणानुष्ठेयं किमशक्तानां भवतां भागवतधर्मानुष्ठानचिन्तयेति भावेन तेन फलमपि पूर्वतनानां दृष्टमि-त्याह॥ **एतावतालमिति** ॥ गुणकर्मनाम्नां सम्यक् कीर्तनमिति यत् एतावता भागवतधर्मेणानुष्ठितेन पुंसामघनिवृत्तये अलं इदमेकमेव नारकदुःखप्रापकपाप-परिहारसमर्थम्। कुत एवं निश्चीयत इत्यत उक्तम्। **विक्रुश्येति** ॥ पातकिप्रवरतया प्रसिद्धोऽप्यजामिलो नाम विप्रो दास्यां जातं पुत्रं नारायणसंज्ञितं मरणकाले सकृदेकदैव विक्रुश्य मुक्तिं गतवान् इति यत् यस्मात्तस्मात् ॥ **इदमुदितं भवति—** अजामिलो नाम विप्रो नष्टसदाचारो दासीसङ्गनिरतः

Rarest Archive

चौर्यादिनोदरम्भरः तस्यां दश पुत्रानुत्पाद्य अन्ते वयसि उत्पन्ने दशमे नारायणनामके पुत्रे कलभाषणादिना मनोरमे प्रीत्या भोजनादौ तमेव लालयन् तस्मिन्नेव स्नेहयुतो मरणसमये सुदूरं क्रीडायामासक्तं बालमुच्चस्वरेणाह्वयामास। तावतैव विष्णुदूतैरागतैः, यमदूता विप्राभासं पाशैर्निबध्य नेतुमागता निवारिताः। ततः स पापकर्मणः पश्चात्तापेन निवृत्तो भगवति मनो निधाय मृतो विष्णुदूतैरेव नीतः। यदेवं पुत्रस्नेहेन तस्मिन् सङ्केतितभगवन्नामग्रहणमात्रेण सद्यो यमपाशान्मुक्तिः तदा किं वाच्यं गुणकर्मादिप्रवृत्तिनिमित्तैरेतानिभगवतो नामानीति भक्तिपूर्वकं नामोच्चारणकर्तुर्नारिकभयनिवृत्तिर्भवेदिति। एवं नामकीर्तनादिना पापनिवृत्तौ सत्यां अजामिलस्येव भगवति भक्त्याद्युत्पादनद्वारा मुक्तिरपि भवतीति ॥ **यथाहुः**— ''स्तेनः सुरापो मित्रध्रुक् ब्रह्महा गुरुतल्पगः ॥ स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे (६।२।९।) ॥ सर्वेषामप्यघवतामिदमेव सुनिष्कृतं ॥ नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः (६।२।१०।) ॥ अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि ॥ यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः (६।२।७।) ॥ अथैनं मापनयत कृताशेषाघनिष्कृतं ॥ यदसौ भगवन्नाम म्रियमाणः समग्रहीत् (६।२।१३।) साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ॥ वैकुण्ठनामग्रहणमशेषाघहरं विदुः (६।२।१४।) ॥ पतितः स्खलितो भग्नः सन्दष्टस्तप्त आहतः ॥ हरिरित्यवशेनाह पुमान्नार्हति यातनां (६।२।१५।) ॥ म्रियमाणो हरेर्नाम गृणन् पुत्रोपचारितम् ॥ अजामिलोऽप्यगान्मुक्तिं किमुत श्रद्धया गृणन् (६।२।५२) ॥ कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः। द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात्'' (११।३।५२) इति ॥ ३५३ ॥

**प्रायेण वेद तदिदं न महाजनोऽयं**

**देव्या विमोहितमतिर्बत माययालम् ।**

Rarest Archiver

**त्रय्यां जडीकृतमतिर्मधुपुष्पितायां**
**वैतानिके महति कर्मणि युज्यमानः॥ ३५४ ॥ ६ । ३ । २५(४)**

नन्वेवं नामकीर्तनरूपभागवतधर्मानुष्ठानस्य ईदृशमाहात्म्यमस्ति चेत् किमिति लोको नारकं दुःखमनुभवतीत्यतः सत्यं। तथापि नेदं सर्वेषां लभ्यं, किन्तु ये जन्मान्तरेषु महत्पादरजोभिरभिषिक्तास्तत एव सम्पादितभागवत-धर्मानुष्ठानपरिनिष्ठितबुद्धयस्तेषामेवेदं भगवन्नामकीर्तनं लभ्यते। अन्ये तु पुनर्भागवतजनसङ्गविधुराः भगवन्मायया मोहितबुद्धयः अन्यत्रैव श्रद्धाजाड्येन नेदं निरीक्षन्ते। ततः सुदुर्लभमिदमवश्यं सम्पादनीयमिति भावेनाह॥ **प्रायेणेति**॥ तदिदं भागवतधर्मानुष्ठानमाहात्म्यम्। महाजनो बन्धमोक्षविचारा-नभिज्ञः। मायया बन्धकशक्त्या। आपाततः स्वर्गादिक्षुद्रफलायां त्रय्यां वेदविद्यायां। जडीकृतमतिः श्रद्धाजाड्येन तत्रैवासक्तमतिः। तत एव हिंसादिरूपे यज्ञादौ महति महायासद्रव्यव्ययसाध्ये कर्मणि युज्यमान इति॥ ३५४॥

**एवं विमृश्य सुधियो भगवत्यनन्ते**
**सर्वात्मना विदधते खलु भावयोगम्।**
**ते मे न दण्डमर्हन्त्यथ यद्यमीषां**
**स्यात्पातकं तदपि हन्त्युरुगायवादः ॥३५५॥ ६ । ३ । २६(५)**

महाजनो न वेदेति विशेषनिषेधेन तस्मादितरो वेदेति सूचितम्। ते क इत्यतः सत्सङ्गेन भागवतधर्मपरिनिष्ठितधिय एवेत्याशयेनाह॥ **एवमिति**॥ एवं पूर्वोक्तं भागवतधर्मानुष्ठानमाहात्म्यं विमृश्य। सर्वात्मना त्रिकरणैः। भावो भक्तिस्तद्रूपं योगम्। उरुगायो हरिः तस्य वादः कथावचनादिरूपः। तादृशाः मया दण्ड्या न भवन्ति। ततो भवद्भिर्न ते आनेतव्या इति भावः॥ ३५५॥

Rarest Archive

**भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिङ्गानि महाद्भुतानि ।**
**रक्षन्ति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च ॥ ३५६ ॥**
**। ६ । ३ । १८ । (६)**

किञ्च तेषां निकटे साधारणैरदृश्यरूपाः भगवत्पार्षदास्तिष्ठन्ति । मम भक्ताः मर्त्यजन्मसमाश्रिताः तत्र विपदो बह्व्यः प्रतिक्षणं भवन्ति । तत्र काश्चन बाह्यजननिमित्ताः, अन्याश्चान्तराः । आन्तरज्वरादिरोगनिमित्ता यमप्रेषितदूत-निमित्ताः (नियमिताः) ता उभयविधा अपि विना मया नियमितं कालं मा भूवन्निति भगवता आज्ञप्ता इतोऽपि न सहसा गन्तव्यं तन्निकटे इत्याशयेनाह ॥ **भूतानीति** ॥ विष्णोर्भूतानि पार्षदाः तद्भक्तिमतो विष्णुभक्तिमतः मत्तः मम सकाशात् । मत्तः परेभ्यश्चेति सर्वतोऽपि ॥ ३५६ ॥

**तानानयध्वमसतो विमुखान्मुकुन्दपादारविन्दमकरन्दरसादजस्रम् ।**
**निष्किञ्चनैः परमहंसकुलै रसज्ञैर्जुष्टाद्गृहे निरयवर्त्मनि बद्धतृष्णान् ॥**
**३५७ ॥ ६ । ३ । २८ । (७)**

नन्वेवं सति सर्वेऽपि नामकीर्तनं कुर्युरेव । ततो नास्माभिस्ते दण्ड्या इति विरिञ्चिनियमितः अस्माकं व्यापार एव लुप्येतेत्यतः सत्यं, सर्वेषामपि नामकीर्तनलाभे, स एव न भवति सर्वेषां, ततो ये नामकीर्तनादिविरहिता भगवति विमुखाः, विषयेष्वेव निरतास्ते भवद्भिर्दण्ड्या इति न भवतां व्यापारस्य विलोप इत्याशयेनाह । **तानिति** ॥ सारज्ञैः परमहंसकुलैः विशुद्धान्तःकरणैः भागवतनिवहैः, अजस्रं नित्यं, जुष्टात् सेवितात्, पादरविन्दयोर्यो मकरन्दो गुणविशेषः तद्रूपो यो रसः सारः तस्मात् । अजस्रं नित्यं विमुखान् । निरयवर्त्मभूते कुटुम्बे एव अजस्रं बद्धतृष्णान् असतः तान् जीवान् आनयध्वमिति ॥ २५७ ॥

Rarest Archive

**जिह्वा न वक्ति भगवद्गुणनामधेयं**
**चेतश्च न स्मरति तच्चरणारविन्दम् ।**
**कृष्णाय नो नमति यच्छिर एकदापि**
**तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥ ३५८ ॥ ६।३।२९। (७)**

नन्वनेन **इदमुदितं भवति**—न सर्वेऽपि भगवन्नामकीर्तनादिना भगवति निरताः येन भवतो व्यापारलोपः। किन्तु केचित्तद्विमुखाः कीर्तनादिभगवत्सेवारहिताः सन्ति त एव भवता दण्ड्या भवन्ति। नेदमस्मद्धृदयङ्गमम्। ये सन्तस्त एव भगवत्सेवातो विमुखाः कदाचिद्भवन्ति यथाऽजामिलः। ये च असन्तः तेऽपि कदाचिन्नामसङ्कीर्तनादिना भगवत्सेवायां निरतास्ततः सतः परित्यज्य असत आनयध्वमिति भवदीयोक्तिर्नास्माभिः सुज्ञेया भवति इत्यतः पूर्वोक्तं विशदयति॥ **जिह्वेति**॥ एकदापि न वक्तीत्यादि योज्यं। इदं च विष्णुसेवामात्रस्य उपलक्षणमिति भावेनोक्तम्॥ **अकृतेति**॥ **इदमुदितं भवति**— नामसङ्कीर्तनादिकं सर्वमपि तावत् भक्तकृतमेव सफलं, नाभक्तकृतमिति निष्कृष्टम्॥ **यथाहुः**– "प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखैः। न वै पुनन्ति राजेन्द्र सुराकुम्भमिवापगाः" इति॥ (६।१।१८) सा च भक्तिः सतो जीवस्यैव भवति नासतः। कदाचिद्वैमुख्यं तु पिता पुत्रस्यापराधमिव स्वयमेव क्षमते भगवान् यथाऽजामिलस्य। अत एव एकदापि न वक्तीत्याद्युक्तं इह जन्मनि जन्मान्तरे वा न वक्तीति। एकदापि भगवत्सेवा न कृतेत्यादिकं तु असतो जीवस्यैव। तेन कदाचित् कृतावपि तस्याः सेवायाः मतिरुक्तैव। ततो भक्तान् नानयध्वं अभक्तानेवानयध्वमिति मयोक्तं। अत एव "रक्षति तद् भक्तिमतः परेभ्यो मत्तश्च" (६।३।१८) त्युक्तमिति। ननु मुक्तियोग्यजीवमात्रस्य यमदूतादिदण्ड्यत्वाभावे तस्य निरयप्रतिपादकवाक्यविरोधः स्यादिति चेत्।

Rarest Archiver

मैवम्। तत्र निरयपदेन तिर्यग्योनेः, भगवज्ज्ञान-शून्यताया वा विवक्षितत्वात्। अत एव "मात्रात्मकत्वान्निरये सुसङ्गमः" "यत्स्पर्शजं नरकेऽपि नृणां" "ये नारकाणामपि सन्ति देहिनां" इत्यादौ बहुशस्तिर्यग्योनावेव निरयादिप्रयोगः। अत एव अज्ञाने "अतितितीर्षतां तमोऽधमि"ति "अन्धं तम" इत्यादि-प्रयोगोऽपि। न च तावता तत्र अन्धं तमो गृहीतुं शक्यम्। ततोऽज्ञानमेव नरकदुःखादधिकदुःखदं भगवद्भक्तानाम्। अत एव सनकादिभिः "त्वत्पादाम्बुजस्मृतिश्चेन्निरयोऽप्यस्तु" इति श्रीहरिं प्रत्युक्तम्। **तथा चोक्तं पुरस्तात्—** "कामं भवेम वृजिनैर्निरयेषु नष्टाश्चेतोऽलिवद्यदि तु ते पदयो रमेते"त्यादि। लोकसिद्धं चैतत्। अमात्येन राजपुत्रेण केनचित्सेवकेन चौरेण च समाने अपराधे कृतेऽपि तत्तद्योग्यतामनुसृत्यैव शिक्षणमिति। कथं वा यमराजोऽपि भगवद्भक्तान् भक्त्यादिकं स्वरूपभूतं अविगणय्य अस्वरूपं च नैमित्तिकं पापं पुरस्कृत्य अभक्तसाम्येन तापनपाचनताडनभर्त्सनादिकं निष्करुण इव कुर्यात्। ततो नरकादिवचनं प्रायः सतां मनः पापमार्गे न गच्छत्येव कदाचिन्निमित्तान्तरवशेन गतिरपि माभूदिति विपक्षे बाधकप्रदर्शनार्थम्। यथाहि लोके पित्रा गुरुणा वा पुत्रान् शिष्यान् वा प्रत्युच्यते इदं कार्यं भवद्भिः सर्वथा न कर्तव्यं करणे तु अहं दण्डेन ताडयामीति। तच्छ्रुत्वा तत्र ये सर्वथा प्रागारभ्य स्वत एव न प्रवृत्ताः सुशीलाः पुत्राः शिष्या वा ते सर्वथा न प्रवर्तन्त एव। ये तु तत्र प्राक् प्रवृत्ताः तद्विवक्षयैवैतदुक्तम्। तेऽपि तच्छ्रुत्वापि तत्संस्कारवशात् यदि तत्र प्रवृत्ताः तान् पुत्रान् शिष्यान् वा पिता गुरुर्वा स्ववचनोल्लङ्घनेन कुपितः ताडयत्येव दण्डेन। तद्दृष्ट्वा ये सुशीलाः ते ततो भीता निवर्तन्त एव। कदाचित्सुशीलैः प्रमादान्निमित्तान्तराद्वा घटनायां तत्स्वभावविदा नायमेषां स्वभावः किं तु प्रमादादिनिबन्धन इति क्षम्यत एव गुणे दृष्टिं दत्त्वा, तथा भगवानपीति। अत एव "ते मे न दण्डमर्हन्त्यथ यद्यमीषां स्यात्पातकं तदपि

Rarest Archiver

हंत्युरुगायवादः'' (६।३।२६)इत्युक्तम्। कदाचिन्महापराधे सति शिक्षणेऽपि तद्योग्यमेव शिक्षणमिति। तथा च यथा अपरोक्षोदयानन्तरं न यमादिदण्डक्ता तथा प्रागपीति। कदापि यस्य जिह्वा न वक्ति भगवन्नाम तानसत एवानयध्वमिति साधूक्तमिति दिक्॥ ३५८॥

**तत् क्षम्यतां[१] स भगवान् पुरुषः**
**पुराणो नारायणः स्वपुरुषैर्यदसत्कृतं नः।**
**स्वानामहो न विदुषां रचिताञ्जलीनां**
**क्षान्तिर्वरीयसि नमः पुरुषाय भूम्ने॥ १५९॥ ६। ३। ३१ (८)**

यत एवं भगवद्भक्तोऽदण्ड्यः यस्मात्कारणाच्च तादृशोऽजामिले नः अस्माकं अस्मात्कर्तृकं असत्कृतमयोग्यमाचरणं यत्तत् सः भक्तानां मत्तः अन्यतः सर्वतश्च संरक्षणाय स्वपार्षदस्थापनादिना स्वभक्तेषु परमकृपावान् भगवानपराधवेत्ता पुराणपुरुषो नारायणः क्षम्यतां क्षमताम्। ननु भवता अपराधो न कृत एव किमर्थं क्षमा अर्थ्यत इत्यत उक्तम्—स्वपुरुषैः स्वभृत्यैः यदसत्कार्यं कृतं तन्नः अस्माकं स्वामिनामेवेति। **यथाहुः—** ''तद्वः प्रसादयाम्यद्य ब्रह्म दैवं परं हि मे। तर्ह्येवात्मकृतं मन्ये यत्स्वपुम्भिरसत्कृतम्॥ यन्नामानि च गृह्णाति लोको भृत्ये कृतागसि। सोऽसाधुवादस्तत्कीर्तिं हन्ति त्वचमिवामयः'' (३।१७।४) इति। ननु तैरपि तस्यावज्ञा न कृता इत्यत उक्तम्। **स भगवानिति**॥ तद्भक्तेष्वपराध एव तस्यापराध इति भावः। क्षमापनं च क्षमावन्तं प्रत्येव उचितं दृष्टम्। अयं तु तेषां मध्ये वरिष्ठ इति मदीयं क्षमापनं

---

१. दिवादित्वात्कर्त्रर्थे सार्वधातुके श्यन्। आत्मनेपदं आर्षम्। शमामष्टानामिति दीर्घाभावश्च आर्षः। भौवादिके विकरण आर्षः।

Rarest Archive

युक्ततरमेवेत्याशयेन उक्तं नविदुषां अविदुषाम्। तत एव अपराधकर्तॄणां स्वानां किङ्कराणां विषये क्षान्तिः सकृदपराधसहनं वरीयसि क्षमावतां मध्ये उत्तमे भगवति विद्यत एवेति। अयमेक एव अस्मदुपाय इति भावेनाह ॥ **पुरुषाय भूम्ने नम इति** ॥ अनेन क्षमापनेनापि मुक्तियोग्यस्य भक्तस्य यमदण्डो नास्तीति सूचितम् ॥ ३५९ ॥

**इत्थं स्वभर्तृगदितं भगवन्महित्वं**
**संश्राव्य विस्मितधियो यमकिङ्करास्ते।**
**तेनाच्युताश्रयजनं प्रति शङ्कमाना**
**द्रष्टुं च बिभ्यति ततःप्रभृति स्म राजन्॥ ३६० ॥६।३।३२। (९)**

भगवद्भक्तानां निरीक्षणे सर्वथा यमभटा न शक्ता किं तैः पाशादिना बन्धनादि स्यादित्यतो भगवन्नाममहिमा ईदृशा इति तत्रैव आदरः कार्यो भवद्भिर्मुमुक्षुभिरित्याशयेनाह ॥ **इत्थमिति** ॥ ''नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः। अजामिलोऽपि येनैव मृत्युपाशादमुच्यत'' (६।३।२३) इति स्वानभिमुखीकृत्य ''एतावतालमघनिर्हणाये''त्यादिना स्वस्वामिना यमेन गदितं भगवतो नाम्नश्च माहात्म्यं निशम्य विस्मितधियो बभूवुः। तेन विज्ञात भगवन्महिमत्वेन ततःप्रभृति तद्दिनमारभ्य। यदा वृत्तिरूपं ज्ञानादिकं जन्मातरकृतमपि ते गणयन्ति किमु तदा स्वरूपभूतं ज्ञानभक्त्यादिकं मानयेयुरिति वक्तव्यमित्यभिप्रेत्य उक्त अच्युत एवाश्रयः यस्य तादृशं जनमिति तं प्रति शङ्कमानाः कदाचिदज्ञानेन तेषां पाशबन्धनाद्युद्योगेन अवज्ञानघटने भगवतः कोपेन महाननर्थः अस्माकं भवेदिति भीतिमन्तो द्रष्टुमपि सहसा बिभ्यति यदा तदा व्यापारान्तरं कर्तुं बिभ्यतीति किमु वाच्यमिति ॥ ३६० ॥

Rarest Archiver

**अहो बत श्वपचोऽतो गरीयान् यज्जिह्वाग्रे वर्तते नाम[1] तुभ्यम्।**
**तेपुस्तपस्ते जुहुवुः सुराद्यान्ब्रह्मानूचुर्नाम गृणन्ति ये ते　॥ ३६१ ॥**
**। ३ । ३४ । ७ । (१०)**

॥ इति **नामप्रशंसाप्रकरणम्** ॥ २९ ॥

नामकीर्तने शीघ्रप्रवृत्तिजननाय तद्विरहितं जनं धिक्करोति ॥ **अहो इति** ॥ यस्य पुरुषस्य जिह्वाया अग्रे ते तव नाम वर्तते स तादृशः श्वपचोऽपि अतः तपआदिमतोऽपि नामरहिताद्ब्राह्मणात् गरीयान् अतिशयेन श्रेष्ठः। अहो आश्चर्यम्। ब्राह्मणमीदृशं दृष्ट्वा खेदश्च भवतीत्याह ॥ **बतेति** ॥ श्वपचे तपआदेरभावात् अतः कथं तस्य वरिष्ठत्वं इत्यतः तपआदिना यत्पुण्यं लभ्यते तस्य सर्वस्यापि नामोच्चारणेनैव लब्धत्वादित्याशयेन नाम गृणतो जनान् स्तौति ॥ **तेपुरिति** ॥ ये नाम गृणन्ति त एव तुभ्यं त्वत्प्रीतये तपः कृतवन्तः सुराद्यानुद्दिश्य जुहुवुः यज्ञं कृतवन्तः। वेदमनूचुः गुरूच्चारणमनुसृत्य अधीतवन्त इति। ततो नामकीर्तनाद्यभावे जन्म असार्थकं भवतीति तदवश्यं कर्तव्यमिति भावः ॥ ३६१ ॥

**॥ इति श्रीमदवधूतशिरोमणिश्रीजयतीर्थ (विष्णुतीर्थ) निर्मितसारोद्धारटीकायां नामप्रशंसाप्रकरणम् ॥ २९ ॥**

१. तुभ्यमिति चतुर्थ्या नारायणाय नम इत्यादिनाम चतुर्थ्यन्तेन प्रयोक्तव्यमिति ध्वनयतीति पदरत्नावल्याम्।

Rarest Archiver

## गुरुदक्षिणाप्रकरणम् ।। ३० ।।

**ज्ञानं तदेतदखिलं दुरवापमाह**
**नारायणो नरसखः किल नारदाय ।**
**एकान्तिनां भगवतस्तदकिञ्चनानां**
**पादारविन्दरजसाऽऽप्लुतदेहिनां स्यात्।। ३६२ ।। ७।६।३३। (१)**

श्रीकमलापतये नमः ।। तदेवं एकोनत्रिंशत्प्रकरणैरुदितं बिम्बापरोक्षज्ञानसाधनं भागवतधर्मानुष्ठानरूपं मुक्तिसाधनं निष्किञ्चनानां परमभागवतानां विना सेवां बहुभिरपि जन्मभिः साधनैश्च दुर्लभं सन्ततमादरेण च सम्पादनीयं पुरुषार्थार्थिभिः इति भावेन नेदं साधारणजनोपदेशपरम्परायातं किन्तु साक्षान्नारायणेन बदरिकाश्रमनिवासिना भागवतप्रधानाय नारदाय प्रोक्तम् ।। **यथाहुः—** ''पुराणसंहितामेतामृषिर्नारायणोऽव्ययः ।। नारदाय पुरा प्राहे''ति। तेन च परमभागवतेभ्यः प्रह्लादादिभ्यः प्रोक्तम्। **यथाहुः—** ''श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतम्। धर्मं भागवतं शुद्धं नारदाद्देवदर्शनात् ।।'' इति। अतोऽतिविश्वसनीयमित्याह। **ज्ञानमिति** ।। भगवतो बिम्बरूपस्य ज्ञानं ज्ञानसाधनं पूर्वोक्तप्रकरणैर्यद्यदुदितं तदेतदखिलमपि नारायणो न मूलरूपी किन्तु यमराजतनयतया अवतीर्णचतुर्मूर्त्यन्तर्गतः अवतार इति ज्ञापयितुं **नरसख इत्याह** ।। **अथवा—** इदमेव शेषेण सनकादिभ्यः प्रोक्तं तैश्च साङ्ख्यायनाय इत्यादिकं सूचयितुं **नरसख इत्याह**। किलेत्यनेन तत्प्रसिद्धमिति सूचयति। तत एवंविधमुक्तज्ञानसाधनं च अकिञ्चनानां एकान्तिनां एको भगवानेव अन्ते गतिः पुत्रादयस्तु अनियताः, प्रतिजन्म स एव

Rarest Archive

यत्र यत्र जन्मनि गच्छति जीवः तत्र तत्रागत्य निर्निमित्तं रक्षतीत्यनुसन्धानवतां भगवद्भक्तानां ये पादारविन्दे तयोः रजसा आप्लुतश्चासौ देहश्च स एषामस्तीति तेषामेव। अथवा आप्लुता अभिषिक्ता ये देहिनः तेषामेव स्यादिति ॥ ३६२ ॥

**यैरीदृशी भगवतो गतिरात्मवाद**
**एकान्ततो निगमिभिः प्रतिपादिता नः ।**
**तुष्यन्त्वदभ्रकरुणाः स्वकृतेन नित्यं**
**को नाम तत्प्रतिकरोति विनोदपात्रम् ॥३६३॥ ४ । २२ । ४९ (२)**

एवं वक्तव्यमर्थमुपसंहृत्य एतावता प्रबन्धेन उपदेशं कृत्वा स्वरूपोद्धारकर्त्रे गुरवे दक्षिणा देया भवति ॥ तद्दानप्रकरमाह ॥ **यैरीदृशीति** ॥ वेदार्थोपसंहारचतुरैः यैः आत्मवादे आत्मोपदेशार्थमेव प्रवृत्ते उपनिषदादिसर्ववेदान्तसारभूते शास्त्रे। एकान्ततो गोप्यतया मुख्यतया च। प्रतिपादिता या भगवतो गतिः ईदृशी इयं यैर्नोऽस्माकं अस्मान्प्रति वा प्रतिपादिता। किं प्रयोजनमुद्दिश्य ? नैवं, केवलं करुणयैव इत्याशयेनोक्तम्— **अदभ्रकरुणा इति ॥ यथाहुः**— ''य एतन्मम भक्तेषु सम्प्रदद्यात्सुपुष्कलम् ॥ तस्याहं ब्रह्मदायस्य ददाम्यात्मानमात्मनः ॥'' (११।२९।२६) ''ज्ञानमज्ञाततत्त्वाय यो दद्यात्परमार्थवित्। कृपालोर्दीननाथस्य देवास्तस्यानुगृह्णते ॥'' (४।१२।५०) इति। नित्यं ते स्वकृतेनैव तुष्यन्तु तेषामात्मार्पणमेव गुरुदक्षिणात्वेन योग्यं नातोऽन्यदस्तीति भावः। **यथाहुः**— ''इयदेव हि सच्छिष्यैः कर्तव्यं गुरुनिष्कृतम् ॥ यद्वै विशुद्धभावेन सर्वथात्मार्पणं गुरौ'' (१०।१८।५८) इति ॥ सत्येवं को नामं तत्तत्कृतं प्रतिकरोति। तस्य प्रत्युपकारं कर्तुं क्षमो भवति। न

Rarest Archive

कोऽपि लोकेऽस्तीति भावः। एवमपि यः पुरुषः तत्प्रतिकरोति प्रत्युपकारः कृतो मया इति मन्यते स सतां सभायां विनोदपात्रं भवति। केवलमपहसनीयप्रक्रिय इति भावः॥ **यथाहुः—** ''निष्पादितं च कात्स्न्येन भगवद्भिर्घृणालुभिः। साधु दत्तं हि सर्वं मे आत्मना सह किं ददे (४।२२।४६)॥ प्राणा दाराः सुता ब्रह्मन्गृहाश्च सपरिग्रहाः। रायो बलं मही कोश इति सर्वं निवेदितं (४।२२।४७)॥ सेनापत्यं च राज्यं च दण्डनेतृत्वमेव च। सर्वं लोकाधिपत्यं च वेदशास्त्रविदर्हति'' (४।२२।४८) इति॥ घृणालुभिर्दयाशीलैः भगवद्भिः कात्स्न्येनापि निष्पादितम्। कोऽर्थः। मे मह्यं यद्देयं तत्सर्वमपि साधु दत्तं हीति। एवमुपकारिभ्यो गुरुभ्यो दक्षिणा देया खलु तथापि किं ददे। न किमपि नूतनमस्ति देयमिति भावः। कुतः। यतो वेदशास्त्रवित् ज्ञानी सेनापत्यादिकं अर्हति तत आत्मना देहेन सह प्राणादिकं सर्वं निवेदितं तस्यैव भवति तत इति॥ ३६३॥

**मत्तोऽप्यनन्तात्परतः परस्मात्स्वर्गापवर्गाधिपतेर्न किञ्चित्।**
**येषां किमु स्यादितरेण तेषामकिञ्चनानामपि भक्तिभाजाम्॥ ३६४॥**
**।५।५।२५।(३)**

विशुद्धेन मनसा कालत्रयेऽप्यात्मसमर्पणं विना अन्या गुरुदक्षिणा देया नास्तीत्युदितम्। नैतद्गुरूणां प्रशंसार्थमुक्तं, किं नाम, तेषां भगवद्भक्तिमात्रमिच्छतां भगवतोऽपि किमप्यनिच्छतां अन्येन पुरुषेण किं प्रार्थनीयमस्तीति सर्वथा अन्यापेक्षारहितत्वस्य तेषां स्वभावत एव सिद्धत्वादित्याशयेनाह। **मत्त इति**॥ भगवद्वचनमेतत्। येषामनन्तगुणात् सर्वोत्तमात् स्वर्गापवर्गस्वामिनो मत्तोऽपि किञ्चिदपि प्रार्थनीयं नास्ति। तेषां

Rarest Archive

भिष्किश्चनानां मयि भक्तिभाजां भक्तिमेवेच्छतां इतरेण पुरुषेण देयं किं विद्येतेति ॥ ३६४ ॥

॥ इति गुरुदक्षिणाप्रकरणम् ॥ ३० ॥

॥ इति श्रीमदवधूतशिरोमणिश्रीजयतीर्थ(विष्णुतीर्थ)निर्मितसारोद्धारटीकायां गुरुदक्षिणाप्रकरणम् ॥ ३० ॥

॥ श्रीमध्वेशार्पणमस्तु ॥

**य इदमनुशृणोति श्रावयेद्वा मुरारे-**
**श्चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः ।**
**जगदघभिदलं तद्भक्तकर्णावतंसं**
**भगवति कृतचित्तो याति तत्क्षेमधाम ॥ ३६५ ॥**

**। १० । १०३ । ४२ । (१)**

श्रीरमारमणाय नमः ॥ एवं भागवतागतिप्रकारकथनप्रकरणमारभ्य गुरुदक्षिणाप्रकरणपर्यन्तं त्रिंशत्प्रकरणात्मकं श्रीमद्भागवतसाराख्यं निबन्धं निर्माय आदौ प्रणतमेव अन्ते प्रणमन् नात्रास्मदीया कृतिः क्वाप्यस्ति किं नाम श्रीमद्भागवतस्थपद्यानामेव आनुपूर्वीविशेषविशिष्टतया केवलं सङ्ग्रह एव ततो नात्रानादरः कार्यः स्वकार्यार्थिभिरिति भावेन आदौ मङ्गलाचरणपद्यमिव अन्तेऽपि फलाभिधानपूर्वकं तदीयमेव पद्यं पठति ॥ **य इदमिति** ॥ यः पुरुषो जगतोऽघं अलम्भिनत्तीति तत् तादृशं तस्य मुरारेः ये भक्तास्तेषां कर्णयोः भूषणं व्यासपुत्रैः शुकाचार्यैः वर्णितं अमृतकीर्तेः मुरारेः चरितं शृणोति श्रावयेद्वान्यं स भगवति निवेशितचित्तः सन् तस्य मुरारेः क्षेमदं धाम लोकं याति । पुत्रैरिति पूर्वोक्तं गुरुत्वं स्मारयति ॥ ३६५ ॥

Rarest Archiver

**तमहमजमनन्तमात्मतन्त्रं जगदुदयस्थितिसंयमात्मशक्तिम् ।**
**द्युपतिभिरजशक्रशङ्करद्यैर्दुरवसितस्तवमच्युतं नतोऽस्मि ॥ ३६६ ॥**
**। १२ । १२ । ६७ । (२)**

एवमस्य ग्रन्थस्य श्रवणादिफलमभिधाय यस्य नमनेन ग्रन्थोऽयं अवसितस्तमेवान्ते नमति ॥ **तमिति** ॥ जगदुदयस्थितिसंहृतिसाधनस्वरूपभूत-शक्तिम् । अनेन शक्तित्रयस्य स्वरूपत्वकथनेन गृहीतशक्तित्रितयाय इति पदं विवृतं वेदितव्यम् । द्युपतिभिरुच्चलोकाधिपतिभिः अपि अजादिभिः । दुरवसितस्तवं अलब्धपारमहिमं इत्यनेन ईदृशानामपि दुरवगमतया देहिनामज्ञेयत्वं कैमुत्येनेति सूचनेन देहिनामन्तर्ध्रुवाय अनुपलभ्यवर्त्मने इत्येतद्विवृतं भवति । भवत्वयं जगदुत्पत्त्यादिकर्ता अस्य उत्पत्त्यादिकर्ता तु कः इत्यत उक्तम्— **अजं अनन्तमिति** ॥ उत्पत्तिनाशरहितम् । तदभावेऽपि पालकः क इत्यत उक्तम्— **आत्मतन्त्रमिति** ॥ रक्षकान्तररहितमिति । अनेन परस्मै पुरुषाय इत्युक्तं परमपुरुषत्वं स्पष्टीकृतं भवति । सर्वमिदं पराधीनत्वे न घटत इत्यतोऽप्यात्मतन्त्रमिति ॥ स्वतन्त्रम् । अनेन भूयसे इत्युक्तम् भूयस्त्वं (स्वातन्त्र्यं) प्रकटीकृतं भवति । उपसंहारस्योपक्रमव्याख्यानरूपतायाः स्थितत्वादिति ॥ ३६६ ॥

**उपचितनवशक्तिभिः स्व आत्मन्युपरचितस्थिरजङ्गमपालनाय ।**
**भगवत उपलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय ॥३६७॥**
**। १२ । १२ । ६८ । (३)**

**॥ इति श्रीमदवधूतशिरोमणिश्रीजयतीर्थार्यनिर्मितश्रीमद्भागवतसारोद्धारः समाप्तः ॥**

Rarest Archiver

भक्त्युद्रेकेण पुनर्नमति। **उपचितेति**॥ उपचिताभिर्मूलप्रकृतिमहद-हङ्कारमनःपञ्चमहाभूतरूपाभिर्नवशक्तिभिः। स्वात्मनि स्वाधारतया उपरचितयोः स्थिरजङ्गमयोः पालकायेत्यनेन भगवतः जगदुत्पत्त्यादिहेतुत्वे विकारित्वं स्यादित्यतो विकारितया हेतुत्वं प्रकृत्यादेर्भङ्गवतस्तु निमित्ततया आधारतया चेति समाधानकथनेन सदुद्भवस्थानेति विवृतं भवति॥ स्वरूपशक्ति-त्रिकादधिकस्य भिन्नशक्तिनवकस्याभिधानादिति। भवतु भगवतोऽन्य-देवोपादानं विकारिरूपं जगतः, भगवतः स्वरूपं कीदृशमित्यत उक्तम्— **उपलब्धिमात्रधाम्न इति**॥ पूर्णज्ञानाद्यशेषगुणैकस्वरूपायेति॥ अनेन द्वितीय-पद्यगतं अखिलसत्त्वमूर्तये इत्येतद्विवृतम्। भवतु भगवतो जगतः श्रेष्ठ्यं न तु देवेभ्यः। ते हि बहुकालमारभ्य पदारूढा इत्यतस्तेषां तत्पदस्य दाताप्ययमेव ततोऽप्यनादिरिति भावेनोक्तं— **सुरऋषभाय सनातनायेति**॥ ईदृशाय भगवते नम इति। अनेनापि भूयसे इत्येतद्विवृतं इति मन्तव्यम्। **अथवा** स्वे स्वस्मिन्नेव उपचिताभिः लीलया व्यक्तीकृताभिः नवभिः शक्तिभिः स्वरूपभूताभिः मूर्तिभिः आत्मन्युपरचिताः पूजकतया स्वप्रसादेनैव क्लृप्ताः स्थिराः पूजायामेव दृढमनसो जङ्गमाः प्राणधारिणः तेषां पालकाय ज्ञानदानादिना इत्यनेन स्वपूजनेन अनुमृग्यदानाय ज्ञानात्मकमूर्तिस्वीकरणं भगवत इति सूचनेन अखिलसत्त्वमूर्तये अनुमृग्यदाशुषे इत्येतद्विवृतं भवति॥ **यथाहुः**— "सात्वतां नवमूर्तीनामादि-मूर्तिरहं पुरा" (११।१६।३२) इति। **अथवा** स्वे आत्मनि स्वाधारतया उपरचिताः स्वेन हरिणैव कृताः। भगवानेव अस्माकं परायणमिति मन्वाना इति यावत्। तथैव स्थिराः दृढमनसः ये जङ्गमा देहधारिणस्तेषां अनुमृग्यस्वस्वरूप-विषयकज्ञानादिदानेन पालनाय इत्यनेन पारमहंस्य आश्रमे व्यवस्थितानां अनुमृग्यदाशुष इत्येतद्विवृतं भवति। परमहंसो भगवान् तद्रूपे आश्रमे अधिष्ठाने

Rarest Archiver

विषये व्यवस्थिताः स्थिरास्तेषामिति। अनेनास्मिन् शास्त्रे हंसपरमहंसादिशब्दा भगवत्परत्वेन विशुद्धमनसां पुंसां बोधका इति सूचितं भवति। विस्तृतं चैतत्प्रागेवेति दिक् ॥ ३६७ ॥

**न विद्यामदतो नापि प्रतिष्ठाकामतः क्वचित्।**
**किं तु श्रीहरिपादाब्जरतिः स्यादित्ययं श्रमः ॥ १ ॥**

॥ इति श्रीमदवधूतशिरोमणिश्रीजयतीर्थ (विष्णुतीर्थ)
निर्मितश्रीमद्भागवतसारोद्धारटीकासमाप्तिः ॥

॥ श्रीकृष्णार्पणमस्तु ॥ ॥ श्रीमद्दिदासार्पणमस्तु ॥

Rarest Archiver

# परिशिष्टम्

## श्रीमद्भागवतसारोद्धारस्थपद्यानामकारादिकोशः ।


| अ | श्लो.सं. |
|---|---|
| अकिञ्चनानां हि धनं | २७१ |
| अतो महाभाग | ६ |
| अतः कविर्नाम | ३११ |
| अत्रिर्वसिष्ठः | २६ |
| अथ कथञ्चित् | २९६ |
| अथानयापि | २९६ |
| अथापि यत्पाद | २४४ |
| अथाहमप्यात्म | ८३ |
| अथाभिधेह्यङ्ग | ८ |
| अथो विहाय | २३ |
| अथेन्द्रियाराम | ५३ |
| अदीनलीला | २०७ |
| अध्यात्मयोगेन | १८१ |
| अन्ये च देवर्षि | २८ |
| अयं तु तस्य | १७१ |
| अरक्षमाणे | २२ |
| अर्हसि मुहुः | २९६ |
| अविद्यमानो | ३५० |
| अविस्मृतिः | २११ |
| अश्नात्यनन्तः | ११६ |
| असेवयायं | १०८ |
| अस्त्येव मे सर्वं | ५ |
| अहिंसया | ५४ |
| अहो इमं पश्यत | ८८ |
| अहो नृजन्माखिल | १०९ |
| अहो बकीयं | २३१ |
| अहो बत श्वपचो | ३६१ |
| अहो बतैषां | १८५ |
| अहो मयात्मा | ९४ |
| अहो वयं धन्यतमा | ६१ |
| अहो विधातः | ५९ |
| अहं पुरातीत | १३६ |
| अहं पुरा भरतो | ९० |


Rarest Archiver

अहं हि पृष्टोऽस्य १५३

आ

आत्मस्त्र्यपत्य ८५
आसीनमुर्व्यां १३

इ

इक्ष्वाकुरैल १५८
इत्थं परस्य २४७
इत्थं शरत् १३७
इत्थं स्वभर्तृ ३६०
इत्यच्युताङ्घ्रिं ३१८

उ

उन्निद्रहृत्पङ्कज २०५
उपचितनव ३६७

ए

एकस्तपस्व्यह ८९
एकैकशोङ्गानि २०८
एतावतालं ननु १६१
एतावतालमघ ३५३
एवं जनं निपतितं २१८
एवं निशम्य भृगुनन्दन ४२
एवं विमृश्य सुधियो ३५५
एवं विमृश्यव्यभिचारि १६५
एवं वृतः स्वप्रिय ३३८
एवं सदा कर्मकलाप ३६५
एवं सुरसुर २२४

क

कथा इमास्ते १००
कथं सुतायाः १२२
कथं प्रियाया ६३
कर्णौ पिधाय १२६
कलिमलसंसृति ११
कलेवरेऽस्मिन् ७३
कलौ न राजन् १९४
कल्पायुषां १८७
कामं भवेम २८०
कायेन वाचा ३२८
किमात्मना तेन ८२
किञ्चित्करोति ३२७
किं दुष्करैर्नः १८६
किरातहूणान्ध्र १२१
कुटुम्बपोषाय ६६
कुत्राशिषः ८०

Rarest Archive

| | | | |
|---|---|---|---|
| कृष्णाङ्घ्रिपद्म | २१५ | जन्माद्यस्य यतो | १४७ |
| केचित्स्वदेहान्तः | २०३ | जरायुजं स्वेदज | ३०७ |
| कोऽतिप्रयासो | २०२ | जह्यासुरं भावं | २५४ |
| को नाम लोके | ४६ | जितमजित | २४० |
| कस्त्वं स्वयं | १७५ | जिह्वैकतोऽच्युत | ८१ |
| कस्त्वं त्वनादृत्य | २२० | जिह्वा न वक्ति | ३५८ |
| कः पण्डितः | २३२ | जीवंश्छवो | २६९ |
| क्षुत्तृचट्त्रिधातु | १७२ | जुगुप्सितं धर्म | १७४ |
| क्षुद्रं चरं सुमनसां | ९८ | ज्ञानं तदेतदखिलं | ३६२ |
| क्वचिच्चिरायु | १६४ | ज्ञानं यदा | ४४ |
| क्वचिद्रुदन्त्यच्युत | ३३९ | ज्ञानं विशुद्धं | ३२१ |
| **ख** | | **त** | |
| खं वायुमग्निं | २५२ | त एव कृष्णाथ | ५२ |
| **ग** | | तच्छ्रद्धयतां | ३५९ |
| गां दुग्धदोहां | ३०४ | तत्राभवत् | ३३ |
| गुरुर्न स स्यात् | १७६ | तत्रोपजग्मुः | २५ |
| गृहेषु दारेषु | ८४ | तत्त्वे मनो | २५८ |
| **च** | | तत्साधु मन्ये | १९१ |
| तीराणि किं पथि | ३१३ | तथापरे त्वात्म | २३८ |
| **ज** | | तथापि सङ्गः | १४५ |
| जनस्य कृष्णाद्वि | १०४ | तथारिभिः | १२५ |


Rarest Archiver

दिश्मसारं ३४३
तदस्य कौषारव १०
तदा पुमान् ३४२
तदेव पुण्यं रुचिरं ३०२
तपस्विनो दान ३३०
तमहमजमनन्त ३६६
तमेव यूयं २४५
ते वै विदन्ति १६०
तं दुर्जयं शत्रु २५५
तं द्व्यष्टवर्षं ३४
तस्मात्पुरैव ३५१
तस्मात्परोक्षे १३४
तस्मिन्भवन्तौ ३३३
तस्यावनिज्य १२०
तस्याविशुद्ध २०१
तस्यैव मे २८७
तस्यैव हेतोः २८४
त्यक्त्वा स्वधर्मं १७८
त्यजेत कोशस्थ ६५
त्रिभुवनविभव २१३
त्वं प्रत्यगात्मनि ३२३
त्वत्तोऽस्य जन्म १६९
त्वयैव दत्तं २२७
त्वयोदितं शोभन १२३
तानानयध्व ३५७
तावद्भयं ३१६
त्वां वर्तमानं २०
त्वां ब्रह्म केचित् १४९

**द**

दस्यून् पुरं २५६
दानं स्वधर्मो १४३
देहेन्द्रियप्राण २९२
देह्यन्यदेह ५८
द्रव्यक्रियाहेतु ३४९
द्रौण्यस्त्रविप्लुष्ट ४०

**ध**

धनं हि धर्मैक १०२
धर्मं तु साक्षात् २३९
धर्मः क्वचित्तस्य १६३
धर्मः प्रोज्झितकैतवः ५०
धर्मार्थकाम ३२५

Rarest Archives

**न**

न कामयेऽन्यं  २८१
न चेदिहैवापचिन्ति  ३५२
न जन्म नूनं  ३३५
न तद्वचश्चित्र  ३०६
न तस्य तत्त्वग्रहणाय  ५७
न ते गुडाकेश  १९
न नाकपृष्ठं  २७८
न ब्रह्मणः  २२३
न भजति कुमनीषिणां  २९७
नमः परस्मै  १
नमो नमस्ते  २९३
नमो महद्भ्यो  १३२
न यत्र वैकुण्ठं  १८८
न यद्वचश्चित्र  ३०५
न यस्य वध्यो  १७०
न यस्य सख्यं  २८४
न विक्रिया  १३१
न वेदवादान्  ३४४
न वै जनो जातु  २१६
न वै नृभिः  २१
न व्यभिचरति  २४२
न हि क्रमश्चेत्  ६०
न ह्यद्भुतं  ११०
नान्तं विदामि  १५४
नात्यन्तिकं  २७९
नाश्चर्यमेतत्  १२७
नाहं तु सख्यो  २२६
नाहं न यूयं  १५५
नाहं विशङ्के  १३०
निगमकल्प  ४७
निगूजत्रुं  ३५
निर्जित्य दिक्चक्र  ६९
निवृत्ततर्षैः  ४५
निशाम्य कर्माणि  ३४०
निष्किञ्चना  २७०
नूनं तपो यस्य  १६२
नूनं विमुष्ट  २७७
नैतन्मनस्तव  १४२
नैतादृशानां  १२४
नैवात्मनः प्रभुः  २९५
नैवोद्विजे  १७३


Rarest Archiver

नैवोपयान्त्यपचितिं ३४७
नैष्कर्म्यमप्यच्युत ३२९
नैषां परावरमतिः २२५
नैषां मतिः १११

**प**

पथिच्युतं ६२
पादौ हरेः २६४
पानेन ते देव २३७
पितामहा मे ३९
पिबन्ति ये ४३
पुत्रांश्च शिष्यान् १८३
पुनश्च भूयात् ३०
पुरा मया प्रोक्त ३
पुरा रथैः ७४
प्रक्रमवत् २९०
प्रत्ताः स्मरन् ६४
प्रत्युद्गमप्रश्रयण ३४५
प्रशान्तमासीन ३८
प्रसन्नवक्त्रं २०४
प्राप्ता नृजातिं १९८
प्रायेण वेद ३५४
प्रोक्तं किलैतत् १४
प्रोवाच मह्यं १६

**ब**

बर्हायिते ते २६८
बिभेमि नाहं २२९
बिले बतोरु २६६

**भ**

भक्ताय चित्राः २८८
भक्तिः परे स्वे ३१७
भक्त्या पुमान् १०७
भयं प्रमत्तस्य ७७
भवापवर्गो १०५
भवाय नस्त्वं २२२
भारः परं पट्ट २६७
भूतानि विष्णोः ३५६
भूतैर्महद्भिः २३४
भूद्वीपवर्ष २००
भूयो नमः २
भ्रातुर्विरूपकरणं २३०

**म**

मतिर्न कृष्णे १९०


Rarest Archiver

मत्कर्मभिः १८०
मत्तोऽप्यनन्तात् ३६४
मनस्विनो २५७
मनोवचोदृक् २५१
मन्येऽसुरा ३३७
मन्येऽकुतश्चित् ३१४
मन्ये धनाभिजन ३३४
मन्ये ममानुग्रह ७५
ममैष कालो ७२
मर्त्यस्तयानुसव २४८
महद्गुणानात्मनि १३५
महत्सेवां ११३
मागारदारात्मज २७२
मां प्राप्य मानिनि २७६
मा वः पदव्यः १७७
मुकुन्दलिङ्गालय २६३
मुक्तोऽपि तावत् २१७
मुनिर्विवक्षुः ९
मृषा गिरस्ता ३०१
मेधातिथिः २७
मौनव्रत १४०

**य**

य इदमनुशृणोति ३६५
यच्छक्तयो १५२
यतो न कश्चित् ६८
यत्कीर्तनं २९४
यत्पादपङ्कज २४३
यत्पादयोरवशधीः २२८
यत्रोत्तमश्लोक २९९
यत्रोत्तमश्लोक ३००
यत्सानुबन्धे २३३
यत्सेवयाशेष ११५
यथा तरोर्मूल ३३१
यथामयोऽङ्गे १३९
यथामयो साधु १४६
यथायथात्मा २१२
यथाहिरण्यं ३०९
यथा हिरण्यं स्वकृतं ३१०
यथा हृषीकेश २८५
यदस्थिभिः ९५
यदा ग्रहग्रस्त ३४१
यदा रतिर्ब्रह्मणि ५६


Rarest Archiver

यदा परीक्षित् १८
यन्नामधेयं १९५
यद्दर्शनं निगम १४८
यद्यत्र नः स्वर्ग १८९
यद्ब्रह्म नित्यं ११७
यद्वाचि तन्त्यां ७६
यद्वाच्छया १९३
यन्मैथुनादि १४१
यन्माययोरु ११२
यस्मात्प्रियाप्रिय ३२४
यस्य स्वरूपं ३४८
यस्यात्मबुद्धिः २२१
यस्यामृतामल ११८
यस्यां न मे पावन ३०३
या निर्वृतिः १०१
या वै लसच्छ्री २४
ये ब्राह्मणान् ११९
ये वा मयीशे ११४
येषां स एव १५६
यैरीदृशी ३०३
योऽयं कालः ३९६
योऽन्तःप्रविश्य २९१
यं प्रव्रजन्तं ३१
यश्चिन्त्यते १५१
यः षट्सपत्नान् ७८
यः स्वानुभाव ३२
योषित्सुतल्पा ९२
यद्यत्र नः १८९

र

रहूगणैतत् ३२२
रायः कलत्रं ९७
रूपं यत्तत् १६८

ल

लब्ध्वा सुदुर्लभ १९९
लोको विकर्म १०३

व

वयं पुरा श्रीमद ८६
वरान्विभो २७५
वाग्गद्गदा ३३२
वाणी गुणानुकथन २५९
विचक्षणा यच्चरणो ३१९
वित्तेषु नित्याभि ६७

Rarest Archive

विद्यातपोवित्त १२९
विद्यातपःप्राण ३१५
विद्वानपीत्थं ७०
विप्राद्द्विषड्गुणयुतात् ३२६
विभूषितं मेखलया २०६
विमोहितोऽयं ७१
विश्वस्य यः स्थिति २८३
विषममतिः २४१
विषयतृषो नर २७४
विषान्महाग्ने २८६
विष्णोर्नु वीर्य ४
विसृजति हृदयं २१४
वीर्याणि तस्याखिल ४१
वेदाहमङ्ग १५७

श

शब्दस्य हि ब्रह्मणः ३०८
शास्त्रेष्वियानेव ५१
शिरस्तु तस्योभय २६१
शिलोवृत्त्या १९२
शिवाय लोकस्य १७
शुद्धिर्नृणां २०९
शृण्वन्ति गायन्ति २४९
शृण्वन् गृणमन् ४८
शृण्वन् सुभद्राणि २५३
श्यामं सदापीच्य ३६
श्रियमनुचरतीं १६७
श्रिया विभूत्या ३४६

स

सकृन्मनः कृष्ण ४९
स चिन्तयन् २७३
सतां प्रसङ्गात् १०६
सत्यं दिशति २८२
सत्यां क्षितौ ३१२
स त्वं विचक्ष्व ९९
समागताः सर्वत एव २९
समाहितं यस्य १४४
सर्वत्र मद्भाव १८२
सर्वाणि मद्धिष्ण्य २५०
सर्वे प्रयासा १२८
स वा इदं विश्व २३६
स वाग्विसर्गो २९८
स विष्णुरातो ३७

Rarest Archive

| | |
|---|---|
| स वेद धातुः | २४६ |
| स वै मनः कृष्ण | २६२ |
| सा मां स्मृतिः | ९१ |
| सा वागनन्तस्य | २६० |
| सुरोऽसुरो वा | ३३६ |
| सृष्ट्वा पुराणि | १९७ |
| सृष्टं स्वशक्त्येदं | २३५ |
| सोहं प्रियस्य | २१९ |
| सोहं नृणां क्षुल्ल | १२ |
| सौभर्युदकं | १५९ |
| सङ्कीर्त्यमानो | २१० |
| सङ्गं त्यजेत | १३८ |
| सङ्गं न कुर्यात् | ९६ |
| सन्तं समीपे | ९३ |
| साङ्ख्यायनः | १५ |
| स्थित्युद्भवप्रलय | ३२० |
| स्यान्नस्तवाङ्घ्रिः | २८९ |
| स्वपुत्रेभ्य इमां गां | ७९ |
| स्वमुखनिभृतचेताः | ७ |
| स्वस्याः स्त्रियः | १६६ |
| **ह** | |
| हरेर्मुहुस्तत्पर | ५५ |
| हरौ गुरौ मयि | १७९ |
| हिरण्यगर्भत्वं | १५० |
| हे सूत हे मागध | १३३ |

।। श्रीकृष्णार्पणमस्तु ।। छ ।।

**श्री हरिः ॐ ।।**

सकलसुगुणसिन्धुः सज्जनाभीष्टबन्धुः निखिलनिगमवेद्यः साधुहृद्योऽनवद्यः ।।
जगतिविततकीर्तिः सच्चिदानन्दमूर्तिर्हरतु मम हृदंहः सन्ततं श्रीनृसिंहः ।।

**इति श्रीमद्विष्णुतीर्थ विरचिततत्त्वप्रकाशिकाटिप्पणीसुमनोरञ्जनीमङ्गलपद्यम् ।।**

Rarest Archives

श्री गुरुभ्यो नमः ।। हरिः ॐ ।।

# रमास्तोत्रम्

ययैवेदं सच्चिन्निरुपमनिजानन्दनिरतं
परब्रह्माप्यादौ गुणसमतनूराप्य सृजति ।।
अवत्यत्ति प्रेष्ठान् पदमपि नयत्यस्तविपदः
परब्रह्माणी सा ननु विजयते मद्धृदि सदा ।। १ ।।

भवानी वाणी वा जलधितनया वा स्वहृदये-
ष्वचिन्त्यां यन्मूर्तिं सततमनुचिन्त्यापुरधिकम् ।।
सुरस्त्रीषु श्लाघ्यं दिवि भुवि च सौन्दर्यसुफलं
परब्रह्माणी सा ननु विजयते मद्धृदि सदा ।। २ ।।

अनिर्वाच्या वाच्याप्यखिलनिगमस्थैः श्रुतिगतै-
र्वचोभिस्तात्पर्यात्सहसदितिहासं पुनरपि ।।
अनुल्लङ्घ्या लङ्घ्याप्यथ निजमुदा या सुमनसां
परब्रह्माणी सा ननु विजयते सद्धृदि सदा ।। ३ ।।

ययाऽमुक्तो मुक्तो भवति विपरीतं च भवति
ययाऽप्रेयो प्रेयो भवति विपरीतं च भवति ।।
ययाऽहेयं हेयं भवति विपरीतं च भवति
परब्रह्माणी सा ननु विजयते मद्धृदि सदा ।। ४ ।।

ययाऽमाता माता भवति विपरीतं च भवति
ययाऽतातस्तातो भवति विपरीतं च भवति ।।

Rarest Archiver

यथाऽभ्राता भ्राता भवति विपरीतं च भवति
परब्रह्माणी सा ननु विजयते मद्धृदि सदा ॥ ५ ॥

यथाऽजाया जाया भवति विपरीतं च भवति
यथाऽपुत्रः पुत्रो भवति विपरीतं च भवति ॥
यथाऽनप्ता नप्ता भवति विपरीतं च भवति
परब्रह्माणी सा ननु विजयते मद्धृदि सदा ॥ ६ ॥

यथाऽराजा राजा भवति विपरीतं च भवति
यथाऽभृत्यो भृत्यो भवति विपरीतं च भवति ॥
यथाऽकार्यं कार्यं भवति विपरीतं च भवति
परब्रह्माणी सा ननु विजयते मद्धृदि सदा ॥ ७ ॥

यथाऽश्लाघ्यः श्लाघ्यो भवति विपरीतं च भवति
यथाऽवन्द्यो वन्द्यो भवति विपरीतं च भवति ॥
यथाऽवक्ता बक्ता भवति विपरीतं च भवति
परब्रह्माणी सा ननु विजयते मद्धृदि सदा ॥ ८ ॥

यथाऽविप्रो विप्रो भवति विपरीतं च भवति
यथाऽजाप्यं जाप्यं भवति विपरीतं च भवति ॥
यथाऽसाध्यं साध्यं भवति विपरीतं च भवति
परब्रह्माणी सा ननु विजयते मद्धृदि सदा ॥ ९ ॥

यथाऽपथ्यं पथ्यं भवति विपरीतं च भवति
यथाऽज्ञातं ज्ञातं भवति विपरीतं च भवति ॥
यथाऽरक्ष्यं रक्ष्यं भवति विपरीतं च भवति
परब्रह्माणी सा ननु विजयते मद्धृदि सदा ॥ १० ॥

Rarest Archives

ययाऽबन्धुर्बन्धुर्भवति विपरीतं च भवति
ययाऽहन्ता हन्ता भवति विपरीतं च भवति ॥
ययाऽधर्मो धर्मो भवति विपरीतं च भवति
परब्रह्माणी सा ननु विजयते मद्धृदि सदा ॥ ११ ॥

जनो यां प्रत्यूहे जननसमयेऽथापि विपदि
स्मरत्यद्धा नाशे ननु खलु ततोऽन्यत्रसमये ॥
स्मृता या सन्तापं हरति च मुदैवाशु परया
परब्रह्माणी सा ननु विजयते मद्धृदि सदा ॥ १२ ॥

बहूक्त्या किं स्याद्याऽघटितघटनायां पटुतरा
महामाया मोहिन्यखिलजनतायास्त्रिजगति ॥
निमेषोन्मेषाद्यं भवति च यया ब्रह्मकलयो
परब्रह्माणी सा ननु विजयते मद्धृदि सदा ॥ १३ ॥

अटतु विविधदेशं सर्वदा सप्रयासं
पठतु निखिलवेदान् साङ्गकान्नित्यमेव ॥
लुठतु सकलदेवानां पुरः पांसुमध्ये
पटलविघटनं स्यात्तां विना नैव जन्तोः ॥ १४ ॥

इति देवीस्तवं पुण्यं सर्वपापप्रणाशनम् ॥
यः पठेत् शृणुयाद्वापि स मुक्तो नात्र संशयः ॥ १५ ॥

**इति श्रीमद्विष्णुतीर्थविरचितं श्रीरमास्तोत्रं सम्पूर्णम् ॥**

Rarest Archives

श्रीमद्विष्णुतीर्थगुरुभ्यो नमः ।।

हरिः ॐ ।।

# मध्वविजयप्रमेयसङ्ग्रहमालिका

श्रीमध्वविजये सर्गाः षोडशानुक्रमादहम् ।।
तेषां प्रमेयं वक्ष्यामि सङ्ग्रहेण सतां मुदे ।। १ ।।

बळित्थेत्यादिसूक्तोक्तं वायो रूपत्रयं परम् ।
प्रथमे प्रथमं प्रोक्तं द्वितीयं तु ततः परम् ।। २ ।।

सच्छास्त्रे दूषिते दुष्टैः सुरप्रार्थनया हरेः ।।
आज्ञाया चावतीर्णस्य द्वितीये बाल्यसत्कथाः ।। ३ ।।

सूपनीतः सुविधिना स्वपित्राधीतवान् द्विजात् ।।
बहून् वेदान् क्षणेनैव तृतीये कथितं त्विदम् ।। ४ ।।

तुर्याश्रममनुप्राप्य वेदान्तनिरतोऽभवत् ।।
शिष्यानध्यापयामास सम्प्रदायमहापयन् ।। ५ ।।

व्याख्यान् भाष्यं मायिकृतं ज्ञापयंस्तस्य दुष्टताम् ।।
सूचयन्नुत्तरं भाष्यं जिगाय प्रतिवादिनः ।। ६ ।।

तत्र तत्र विचित्राणि चरित्राणि प्रदर्शयन् ।।
चरन् क्षेत्रेषु सर्वेषु हिमवन्तं ददर्श सः ।। ७ ।।

Rarest Archiver

मनसा मानयन् मुख्यं गुरुं व्यासं हृदम्बरे ॥
अपश्यच्चक्षुषाप्यत्र स्थितं मुनिगणैर्वृतम् ॥ ८ ॥

नारायणं नमस्कृत्य तत्रस्थं गुरुणा सह ॥
गतस्ताभ्यामनुज्ञातः भाष्यं कर्तुं सतां मुदे ॥ ९ ॥

स्थानान्तरे व्यासमुखाच्छ्रुत्वा शास्त्रं ततो गतः ।
एकविंशतिदुर्भाष्यखण्डनं भाष्यमातनोत् ॥ १० ॥

यथा हरेः कथालापः सुखाय कृतिनां तथा ॥
स्वस्याप्यतिविचित्राणि चरित्राणि चकार सः ॥ ११ ॥

व्याख्यानसमये प्राप्तं फणिराजं सुपूर्णधीः ॥
शिष्येभ्यो दर्शयामास स तत्फलमथाब्रवीत् ॥ १२ ॥

बहूपद्रवदं मायिमण्डलं स्वीयमण्डले ॥
खण्डयित्वाऽखण्डशक्तिर्विरेजेऽखण्डराजवत् ॥ १३ ॥

एवं मायिगणं जित्वा प्रख्यातं भूमिमण्डले ॥
जयसिंहसमाहूतं कविसिंहो ननाम तम् ॥ १४ ॥

सदा श्रीहरिपादाब्जगतमानससंभ्रमः ॥
स्नानव्याख्याभोजनादि करोत्यनुदिनं सुखी (धीः) ॥ १५ ॥

व्याख्यात्रा व्याससूत्राणां पूर्णप्रज्ञेन वादतः ॥
जितस्तच्छिष्यतां प्राप्य सोऽकरोत्तत्त्वदीपिकाम् ॥ १६ ॥

सम्पादितस्वकार्येऽस्मिन् सर्वज्ञे सर्वदेवताः ॥
ववृषुः पुष्पवारं तं स्वेच्छास्तुतिपर मुदा ॥ १७ ॥

Rarest Archiver

इत्थं सुमध्वविजये मेयसङ्ग्रहमालिका ।।
रचिता भिक्षुणा भूयाद्विष्णुवक्षस्थलाश्रिता ।। १८ ।।

सन्निधानं गुणव्यक्तिः स्वरूपस्य निबोधनम् ।।
साधनैः शोभनैः कीर्तिः शास्त्रराज्याभिषेचरम् ।। १९ ।।

विचारः साधनौघस्य ज्ञेयरूपप्रबोधनम् ।।
उपासायामतिशयो दार्ढ्यं भक्तेर्हरौ गुरौ ।। २० ।।

अपेक्षिताखिलावाप्तिर्मोक्षशास्त्रसुलोलुता ।।
विघ्ननाशः साधनानां स्वीयमाहात्म्यबोधनम् ।। २१ ।।

अपरोक्षदृशोर्विघ्ननाशस्तद्दापनं तथा ।।
मोक्षदानमिति प्रोक्तं फलं षोडशकं परम् ।। २२ ।।

**इति श्रीमद्विष्णुतीर्थकृता श्रीमत्सुमध्वविजयमेयसङ्ग्रहमालिका सम्पूर्णा ।।**

**श्रीकृष्णार्पणमस्तु ।।**

Rarest Archives

हरिः ॐ ॥

# श्रीकृष्णस्तुतिः

श्री वासुदेव मधूसूदन कैटभारे लक्ष्मीश पक्षिवरवाहन वामनेति ॥
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ १ ॥

गोविन्द गोकुलपते नवनीतचोर श्रीनन्दनन्दन मुकुन्द दयापरेति ॥
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ २ ॥

नारायणाखिलगुणार्णव सर्ववेदपारायणप्रिय गजाधिपमोचकेति ॥
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ३ ॥

श्री(मत्)प्राणतोऽधिक सुखाक्षयरूप नित्यं प्रोद्यद्दिवाकरनिभाच्युत सद्गुणेति॥
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ४ ॥

आनन्दसच्चिदखिलात्मक भक्तवर्गस्वानन्ददानचतुरागमसन्नुतेति ॥
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ५ ॥

विश्वाधिकारिमुखदैवतवन्द्य शश्वत् विश्वोद्भवस्थितिमृतिप्रभृतिप्रदेति ॥
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ६ ॥

नित्यैकरूप दशरूप सहस्रलक्ष आनन्तरूप शतरूप विमोचकेति ॥
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ७ ॥

सर्वेश सर्वगत सर्वशुभासुरूपसर्वान्तरात्मक सदोदित सत्क्रियेति ॥
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ८ ॥

**इति श्रीमद्विष्णुतीर्थविरचिता अन्त्यकालप्रार्थना सम्पूर्णा ॥**

**श्रीमध्वेशार्पणमस्तु ॥**

Rarest Archiver

Rarest Archiver

ಭಾಗವತಸಾರೋದ್ಧಾರ



ಭಾಗವತದಲ್ಲೇನಿದೆಯೆಂದು ನೋಡುವುದು ಹಲವರ ವಿಚಾರ.
ನಮಗೆ ಬೇಕಾಗಿರುವುದು... ಅಲ್ಲಿ ಹೇಗೆ ಸಿಗುವುದೆಂಬುದೇ
.... ಈ ಸಾರೋದ್ಧಾರ

ಭಾಗವತ ಧರ್ಮದ ಮರ್ಮ ಅರಿಯಲು ಇದು ಆಧಾರ.
ನಿಷ್ಕಾಮ, ದೃಢ ಹರಿ-ಗುರು ಭಕ್ತಿಯೇ ಇದರ ಸಾರ.
'ಪದ್ಮ ಪತ್ರ ಮಿವಾಂಭಸಾ' ಎಂಬಂತಿರಬೇಕು ಈ ಸಂಸಾರ.
ಇದೇ ಭಾಗವತೋತ್ತಮರ ಅಂತಸ್ಸಾರ.

ಸಾರೋದ್ಧಾರ ಸಾಗರದ ಸುಂದರ 'ಕುವರಿ'
ವಿಷ್ಣುತೀರ್ಥರ ಅನುಗ್ರಹ ಪಡೆದವರ...
..... ಭಜಿಸುವುದೇ ಪರಮ ಗುರಿ.
ಶ್ರೀ ಬಾಳಗಾರಾಚಾರ್ಯರಲ್ಲಿ ಇದರ ಸಮನ್ವಯವೇ
...... ಇಲ್ಲಿಯ ಸಿರಿ.
ಹರಿಗುರು ಭಕ್ತಿಯ ಅಭಿವ್ಯಕ್ತಿಗೆ....
.... ಈ ಕವಿತೆಯೊಂದು ದಾರಿ.

